Government Oriental Library Series

EDITED BY PANDITS UNDER THE SUPERVISION OF THE CURATOR, GOVT. ORIENTAL LIBRARY, MYSORE.

Bibliotheca Sanskrita No. 48

स्मृतिचन्द्रिका

श्रीयाज्ञिकदेवभट्टोपाध्यायरचिता

व्यवहारकाण्डस्तृतीयः, तत्र द्वितीयपरिच्छेदः

SMRITICHANDRIKA

BY

DEVANA-BHATTA

EDITED BY

L. SRINIVASACHARYA

Pandit, Govt. Oriental Library, Mysore.

III. VYAVAHARA KANDA

Part II

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF MYSORE.

MYSORE:

PRINTED AT THE GOVERNMENT BRANCH PRESS

1916

व्यवहारकाण्डे द्वितीयपरिच्छेदे
विषयानुक्रमणिका.

(1) ऋणादानाख्यं प्रथमं पदं— पुटसंख्या

धनप्रयोगविधिः 317

आधिप्रकरणम्—

निर्दोषधनिकस्याधिविषयाणि 321

सदोषधनिकस्याधिविषयाणि 323

आधेः स्वत्वध्वंसविषयाणि 329

आधिसिद्धिविषयाणि 335

आध्यादिविवादापनोदविषयाणि 336

आधिमोचनविषयाणि 341

प्रतिभूप्रकरणम्—

प्रतिभूभेदाः 346

प्रतिभुवामसाधारणविधिः 348

प्रतिभूपुत्रादीनां विधयः 351

प्रतिभ्वादिदत्तप्रतिक्रियाविधयः 356

वृद्धिप्रकरणम्—

वृद्धिभेदाः 358

वृद्धिपरिमाणनियमः 361

अकृतवृद्धिविधयः 363

अकृतवृद्ध्यपवादः 365

वृद्धिग्रहणप्रतिषेधाः 367

	पृष्ठसंख्या
वृद्ध्युपरमावधिनिरूपणम्	371
वृद्ध्युपरमापवादः	374
अधमर्णप्रकरणम् —	
ऋणप्रतिदानविधिः	376
असमर्थाधमर्णविषयाणि	378
ऋणग्रहणोपायः	382
दुस्साधाधमर्णविषयाणि	388
ऋणप्रतिदातृप्रकरणम् —	
पुत्रविषयाणि	392
पौत्रविषयाणि	397
रिक्थग्राहादिविषयाणि	400
कुटुम्बविषयाणि	,,
कुटुम्बजनविषयाणि	410
परतन्त्रस्त्रीविषयाणि	411
अतीतोत्तमर्णऋणापाकरणविषयाणि ...	413
(2) **निक्षेपः**.	
निक्षेपादिस्थापनविधिः	415
तस्य पालनविधिः	416
सभ्यभूतग्रहीतृविषयाणि	417
सभ्याभासग्रहीतृविषयाणि	419
ग्रहीतृस्थापकादिकृत्यम्	421
प्रत्यनन्तरे प्रत्यर्पणप्रतिषेधापवादः	424
याचितान्वाहितविषयाणि	425

पुटसंख्या

(3) **संभूयसमुत्थानम्—**

संभूयकारिणां वणिजां विधयः 429
संभूय कृषिकाणां विधयः 434
,, शिल्पिनां विधयः 435
,, ऋत्विजां विधयः 436
,, नर्तकादीनां विधयः 440

(4) **दत्ताप्रदानिकम्—**

अदेयविषयाणि 441
देयविषयाणि 444
दत्तविषयाणि 449
अदत्तविषयाणि 451

(5) **अभ्युपेत्याशुश्रूषा—**

कर्मकरविषयाणि 454
दासनिरूपणम् 460
दासविषयाणि 463

(6) **वेतनानपाकर्म—**

वेतनसमर्पणविषयाणि 470
भृत्यविषयाणि 472
स्वामिविषयाणि 476
पण्यस्त्रीतदुपभोक्तृविषयाणि 481
स्वामिपालपदम् 482
पश्वादिव्यतिक्रमविषयाणि 487

(7) **अस्वामिविक्रयः—** पुटसंख्या

विप्रतिपन्नास्वामिविक्रयविषयः 501

स्वाम्यनार्पिततदीयवस्तुभोक्तृविष 508

(8) **विक्रीयासंप्रदानम्—**

विक्रीयासंप्रदानविधिः 509

(9) **क्रीत्वानुशयः—**

क्रीत्वानुशयविषयाणि 516

(10) **समयानपाकर्म—**

समयानपाकर्मविधिः 520

(11) **क्षेत्रजविवादः—**

सीमालिङ्गनिरूपणम् 534

सीमाविवादनिर्णयः 537

सीमासाक्ष्याद्यपराधविषयाणि 546

नद्यादिवशात्प्राप्तभूविषयाणि 548

गृहादिविषयाणि.... 550

सेत्वादिविषयाणि 555

क्षेत्रकर्तृविषयाणि 558

(12) **स्त्रीपुंसंबन्धः—**

स्त्रीरक्षणविधिः 561

स्त्रीरक्षणप्रकारः 565

अधिवेदनम् 572

अत्याज्यस्त्रीविषयाणि 575

त्याज्यस्त्रीविषयाणि 576

पुटसंख्या

जायापतिधर्माः 581

स्त्रीधर्माः 584

स्त्रीकर्माणि 583

प्रोषितभर्तृकाधर्माः 592

मृतभर्तृकाधर्माः 594

(13) **दायविभागः—**

विभागकालकर्तृप्रदर्शनम् 597

जीवद्विभागप्रकारः 607

तत्र समविभागप्रकारः 614

,, विषमविभागप्रकारः 618

अजीवद्विभागविषयाणि 622

दायानर्हविषयाणि 628

विभाज्यनिरूपणम् 635

अविभाज्यनिरूपणम् 636

पुत्रपौत्रादिविभागविषयाणि 646

स्त्रीधनविभागविषयाणि 651

स्त्रीधनकृत्यम् 654

स्त्रीद्वाराऽऽगतधनविभागः 660

गौणपितृद्वाराऽऽगतधनविभागः 667

अपुत्रद्वाराऽऽगतधनविभागे पत्नीविषयाणि 672

,, दुहित्रादिविषयाणि ... 682

संसृष्टभ्रात्रादिविषयाणि 700

विभक्तजपुत्रादिविभागः 709

अवलुप्तविभागः 713

			पुटसंख्या
विभक्तकृत्यम्	....	....	715
विभागतद्धर्मसद्भावनिर्णयहेतवः	...	....	,,
(14) **साहसपदम्—**			
वधलक्षणसाहसविषयाणि	....	....	722
स्तेयविषयाणि	....	....	733
केवलस्तेयविषयाणि	....	....	735
साहसस्त्रीसंग्रहविषयाणि	....	....	740
केवलस्त्रीसंग्रहविषयाणि	....	....	743
उभयपारुष्यविषयाणि	....	....	750
साहसकल्पापराधदण्डविषयाणि	...	....	752
(15) **वाक्पारुष्यम्—**			
वाक्पारुष्यविधिः	....	....	758
(16) **दण्डपारुष्यम्—**			
दण्डपारुष्यविधिः	....	...	761
(17) **द्यूतसमाह्वयः—**			
द्यूतसमाह्वयविधिः	....	....	768
(18) **प्रकीर्णकपदम्—**			
प्रकीर्णकविधिः	....	....	770

इति विषयानुक्रमणिका.

व्यवहारकाण्डस्यास्यादर्शपुस्तकोल्लेखः.

(1) लैब्ररि नंबरु (3884) ग्रन्थाक्षरमयः समग्रः शुद्धः तालपत्रकोशः.

(2) ,, (466) ,, पूर्वभागः ,, ,,

(3) ,, (452) ,, उत्तरभागः ,, ,,

(4) ,, (3694) ,, अनादिरनन्तश्च ,, ,,

(5) काञ्चीनगरनिवासिनां श्रीमतामाचार्यश्यामदेशिकश्रीशैलताताचार्यमहाशयानां तालपत्रकोशस्समग्रः नातीव शुद्धः.

(6) अडयार्लैब्ररी तालपत्रकोशः पूर्वभागः शुद्धः.

(7) ,, ,, ,, ,,

(8) कागदमयः दायभागः ,,

एवं पुस्तकाष्टकं निबन्धान्तरीयव्यवहारकाण्डांश्चोपजीव्य पर्यष्क्रियत निखिलकोविदोपादेयः स्मृतिचन्द्रिकाव्यवहारकाण्डः इति शम्.

अथ द्वितीयपरिच्छेदप्रकरणानुपूर्वी

---

1. ऋणादानम्
2. निक्षेपः
3. संभूयसमुत्थानम्
4. दत्ताप्रदानिकम्
5. अभ्युपेत्याशुश्रूषा
6. वेतनानपाकर्म, स्वामिपालविवादः
7. अस्वामिविक्रयः
8. विक्रीयासंप्रदानम्
9. क्रीत्वानुशयः
10. समयानपाकर्म
11 क्षेत्रजविवादः
12. स्त्रीपुंसंबन्धः
13. दायविभागः
14. साहसम्
15. वाक्पारुष्यम्
16. दण्डपारुष्यम्
17. द्यूतसमाह्वयः
18. प्रकीर्णकम्

इत्यष्टादशपदानि

अशुद्धसंशोधनम्.

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
357	1	तर्थो	तार्थो
421	17	गृहीत्व	ग्रहीत्व
423	18	,,	,,
460	19	क्वचित्,	क्वचित्'
499	20	दण्डीयत्वा	दण्डयित्वा
511	9	गृहीत	गृहीतं
576	19	त्पजतो	त्यजतो
,,	20	व्यवचाराद्दते क्रियाः	व्यभिचाराद्दते स्त्रियाः
599	12	तद्रव्य	तद्द्व्य
622	1	चक्रिरे'	चक्रिरे,
624	8	विभागनर्हं	विभागानर्हं
647	2	हतौ	हरौ
672	5	पुत्र	अपुत्र
682	6	,,	,,
685	17	सर्तव्य	सर्तव्यम्।
704	2	किंच	किंच ये
,,	7	संसृष्टीनां	संसृष्टिनां
,,	9	अन्यूना	अन्यूना
,,	15	यथा प्रतीयमान	यथाप्रतीययान

श्रीः

स्मृतिचन्द्रिकायां व्यवहारकाण्डे

द्वितीयपरिच्छेदः

बृहस्पतिमुखानेकमुनिवाग्वागुरान्तरम् ।
प्राविष्टो देवणाचार्यः कुरुते पदसंग्रहम् ॥

तत्र धनप्रयोगविधिः.

सर्वव्यवहारपदसाधारणो विधिकलापः प्राक्प्रतिपादितः । संप्रति प्रतिपदमसाधारणो विधिकलापः प्रतिपाद्यते । पदानां चाष्टादशानां स्वरूपमवान्तरभेदजातं च द्वितीये प्रकरणे दर्शितम्। इह पदोद्देशक्रमेणादावृणादानाख्यपदस्य विधिरुच्यते । तत्राप्यादौ धनदानधर्मा उच्यन्ते । तत्र धानिनं प्रत्याह बृहस्पतिः—

परिपूर्णं गृहीत्वाऽऽधिं बन्धं वा साधुलग्नकम् ।
लेख्यारूढं साक्षिमद्वा ऋणं दद्याद्धनी सदा ॥

परिपूर्णं सवृद्धिकमूलद्रव्यपर्याप्तमित्यर्थः । कः पुनराधिः कतिविधश्चेत्यपेक्षिते स एव—

आधिर्बन्धस्समाख्यातस्स च प्रोक्तश्चतुर्विधः ।
जङ्गमस्स्थावरश्चैव गोप्यो भोग्यस्तथैव च ॥
यादृच्छिकस्सावधिश्च लेख्यारूढोऽथ साक्षिमान् ।

इति । यद्यप्यत्राधिरष्टविधो दर्शितः, तथाऽपि गोप्यभोग्ययादृच्छिकसावधिरूपभेदानामत्रानेकविशेषविध्युपयोगार्थतात्पर्यातिशयेन कथनं नान्येषामिति वक्तुं प्रोक्तश्चतुर्विध इत्युक्तम् । यावद्दणं तव न ददामि तावदयमाधिरित्येवं कालविशेषावधिशून्यतया कृतो यादृच्छिकः । दीपोत्सवकाले ऋणं दत्वा अयमाधिर्मया मोक्ष्यते नो चेत्तवैव भवतीत्येवंकृतस्सावधिः । यद्येवमाधिरेव बन्ध इतीहोच्यते कथं तर्हि पूर्वस्मिन्वचने 'बन्धं वा' इति भेदेनोक्तम्, उच्यते—तत्र बन्धपदस्य यो विवक्षितार्थः स हि नारदेन दर्शितः—

निक्षेपो मित्रहस्तस्थो बन्धो विश्वासकस्स्मृतः ।

इति । उत्तमर्णाधमर्णयोर्यस्सखा तस्य पार्श्वे निक्षिप्तमेवाधमर्णधनमुत्तमर्णविश्वासार्थमधमर्णेनोपदिष्टं वन्ध इति गीयत इत्यर्थः। लग्नकः प्रतिभूः । स च स्वाम्यादिव्यतिरिक्तो ग्राह्यः, स्वाम्यादौ धनसिद्धेर्दुष्करत्वात् । अत एव तन्निषेधः कायायनेन दर्शितः—

न स्वामी न च वै शत्रुः स्वामिनाऽधिकृतस्तथा ।
निरुद्धो दण्डितश्चैव संदिग्धश्चैव न क्वचित् ॥
नैव रिक्थी न मित्रं च न चैवात्यन्तवासिनः ।
राजकार्यनियुक्तश्च ये च प्रव्रजिता नराः ॥
नाशक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् ।
नाविज्ञातो ग्रहीतव्यः प्रतिभूत्वक्रियां प्रति ॥

इति । संदिग्धोऽभिशस्तः । अत्यन्तवासिनो नैष्ठिकब्रह्मचारिणः । तत्समं विवादास्पदीभूतद्रव्यसमम् । नैव रिक्थीत्यविभक्तविषयम् । यदाह याज्ञवल्क्यः—

भ्रातृणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ॥

इति । नारदोपि—

साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्युः नाविभक्ताः परस्परम् ॥

'लेख्यारूढं साक्षिमत्' इति चाद्यश्लोकगतमृणस्य विशेषणं मन्तव्यम् । तत्र येन प्रकारेण ऋणस्य लेख्यारूढता कर्तव्या दिङ्मात्रेण तमेव प्रकारमाह सङ्ग्रहकारः—

चिरकं नाम लिखितं पुराणैः पौरलेखकैः ।
अर्थिप्रत्यर्थिनिर्दिष्टैः यथासम्भवसंस्तुतैः ॥
स्वकीयैः पितृनामाद्यैरर्थिप्रत्यर्थिसाक्षिणाम् ।
प्रतिनामभिराक्रान्तमर्थिसाक्षिस्वहस्तवत् ॥
स्पष्टावगमसंयुक्तं यथास्मृत्युक्तलक्षणम् ।

इति । संस्तुतैः प्रशस्तैः । प्रतिशब्दोऽत्राक्रान्तपदेन सम्बध्यते । विस्तरस्त्वस्य लेख्यप्रकरणे जानपदाख्यलेख्याभिधाने द्रष्टव्यः । साक्षिमत्ताप्रकारस्य दिङ्मात्रं तु व्यासेनोक्तम्—

धर्मज्ञाः पुत्रिणो मौलाः कुलीनास्सत्यवादिनः ।

श्रौतस्मार्तक्रियायुक्ता विगतद्वेषमत्सराः ॥
श्रोत्रिया नपराधीनाः सूरयश्चाप्रवासिनः ।
युवानस्साक्षिणः कार्या ऋणादिषु विजानता ॥

इति । विस्तरस्त्वस्यापि साक्षिप्रकरणादौ द्रष्टव्यः । एवमुक्तविधिना सदा धनी ऋणं दद्यात् । वृद्ध्यर्थं धनप्रयोगं कुर्यादित्यर्थः । वृद्धिपरिमाणभेदास्तूत्तरत्र वृद्धिप्रकरणे वक्ष्यन्ते

दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ।

इत्यादिवचनैः । ते चात्रानुसन्धेयाः । एवमनेकनियमानुबन्धं धनप्रयोगं कुर्वतो दृष्टमेव फलं, दृष्टार्थमात्रार्थत्वादासां स्मृतीनाम् । अत एव व्यतिरेकमुखेन दृष्टार्थमेवाह हारीतः—

आधिं विना लग्नकं वा प्रयुक्तं बन्धकाद्विना ।
साक्षिलेख्यविहीनं तु विसंवादे न सिध्यति ॥

नारदोपि—

विस्रम्भहेतू द्वावत्र प्रतिभूराधिरेव च ।
लिखितं साक्षिणश्च द्वे प्रमाणे व्यक्तिकारके ॥

विस्रम्भो विश्वासः । व्यक्तिरभिव्यक्तिः । एवंचाबन्धकादिप्रयोगोपि लभ्यते । तथा प्रयोगेऽपि प्रयुक्तस्य धनस्य कथंचित् सिद्धिसम्भवात् । अत एवाबन्धकप्रयोगेऽपि वृद्धिनियमो वक्ष्यते—

सम्बन्धे भाग आशीतः षाष्टो भागस्सलग्नके ।

निराधाने द्विकशतं मासलाभा उदाहृताः ॥

इत्यादिना । अस्वतन्त्रेषु प्रयोगनिषेधमाह कात्यायनः—

न स्त्रीभ्यो दासबालेभ्यः प्रयच्छेत् क्वचिदुद्धृतम् ।
दाता न लभते तत्तु तेभ्यो दद्यात्तु यद्वसु ॥

स्त्र्यादीनामस्वतन्त्रत्वादित्यभिप्रायः । उद्धृतं प्रयोगाय गृहीतम् ।

इति स्मृतिचन्द्रिकायां धनप्रयोगविधिः

अथ आधिविषयाणि कानिचिद्वचनानि लिख्यन्ते ।

तत्र हारीतः—

बन्धं यथा स्थापितं स्यात् तथैव प्रतिपालयेत् ।

इति । अधिग्रहणादूर्ध्वमाधेर्नाशवासविकारासारत्वव्यक्त्यन्तरत्वादयो यथा न भवन्ति तथा धनी प्रत्यर्पणपर्यन्तं प्रयतेन पालयेदित्यर्थः । एवं पाल्यमानेऽप्याधौ दैवादिवशान्नाशादिर्यदि भवेत्तदा न काश्चिद्दोषो धनिन इत्याह स एव—

दैवराजोपघाते तु न दोषो धनिनः क्वचित् ।

इति । अग्निदेशोपप्लवादिर्दैवोपघातः । अनपराधेऽप्युच्छृङ्खलत्वेन राज्ञा कृतः परोपघातो राजोपघातः । अत्र कात्यायनः—

आधीकृतं तु यत्किञ्चिद्विनष्टं दैवराजतः ।
तत्रर्णं सोदयं दाप्यो धनिनामधमर्णकः ॥

पक्षान्तरमप्याह व्यासः—

दैवराजोपधाते तु न दोषो धनिनः क्वचित् ।
ऋणं दाप्यस्तु तन्नाशे बन्धं वाऽन्यमृणी तदा ॥

एवमाधेरसारत्वेऽप्यनुसन्धेयम् । तथा च नारदः—

रक्ष्यमाणोऽपि यत्राधिः कालेनेयादसारताम् ।
आधिरन्योऽथवा कार्यो देयं वा धनिने धनम् ॥

असारता सवृद्धिकमूलद्रव्यापर्याप्तता । केचिदेकसंवत्सरभववृद्धिसहितमूलद्रव्यापर्याप्ततामसारतामाहुः, तच्चिन्त्यम्, एवंविधविशेषाश्रयणे किं कारणमिति चोद्यसम्भवात् । अन्यः पूर्वस्थितो वा आधिः पर्याप्तः कार्यः । अन्यग्रहणस्य पर्याप्तत्वेन भाव्यमित्येतावन्मात्रपरत्वात् । यतोऽसारत्वेऽपि पर्याप्तये किंचिद्देयं क्वचिदित्याह हारीतः—

आधेस्समधिकं द्रव्यं गृहीतं ग्राहकेण तु ।
अधिकं तव दास्यामि तद्ब्याद्धनिकस्य सः ॥

ग्राहकेण ऋणिकेन । अधिकं पूरकम् । यद्यपि दैवादिनिमित्तकाध्यपचारे पक्षद्वयमुक्तं, तथाऽपि धनिकदोषराहित्ये स्फुटे सति चोरस्वजनादिनिमित्तकाध्यपचारेऽपि एतत्पक्षद्वयं वेदितव्यम् । दैवादिग्रहणस्य धनिकदोषविहीननिमित्तपरत्वेन कृतत्वात् । अत एव—

दैवराजोपघाते तु न दोषो धनिनः क्वचित् ।

इति व्यासहारीताभ्यामुक्तम् । अत एव चाध्यन्तरदानपक्षं धनिकदोषविहीनत्वेनैवाह कात्यायनः—

न चेद्धनिकदोषेण निपतेद्विक्रियेत वा ।
आधिमन्यं स दाप्यस्स्याद्दणान्मुच्येत नार्णिकः ॥

इति । धनिकदोषादन्यत आध्यपचारे ऋणिक ऋणान्न मुच्यते । तेनान्यमाधिं स ऋणिको धनिने राज्ञा दाप्य इत्यर्थः । यत्तु स्मृत्यन्तरम्—

स्रोतसाऽपहृते क्षेत्रे राज्ञा चैवापहारिते ।
आधिरन्योऽधिकर्तव्यो देयं वा धनिने धनम् ॥

इति, तदपि धनिकस्यादोषे पक्षद्वयविधिपरं, अन्यथा अग्न्याद्यपहृते पक्षद्वयमनेनानुक्तं स्यात् ।

इति स्मृतिचन्द्रिकायां निर्दोषधनिकस्याधिविषयाणि.

अथ सदोषधनिकस्याधिविषयाणि.

तत्र हारीतः—

बन्धं यथा स्थापितं स्यात्तथैव प्रतिपालयेत् ।
अन्यथा नश्यते लाभो मूलं वा तद्व्यतिक्रमात् ॥

यथा येन प्रकारेण गोप्यत्वेन भोग्यत्वेन वा स्थापितमधमर्णेनाधीकृतं तथैव गोप्यमाधिं गोप्यत्वेनैव भोग्यं भोग्यत्वेनैव धनी पालयेत् । अन्यथा गोप्यं भोग्यत्वेन भोग्यं वा गोप्य-

त्वेन पालितं चेत् समयातिक्रमाल्लाभो नश्यते, मूलं वा द्रव्यं नश्यत इत्यर्थः। याज्ञवल्क्योपि लाभनाशमाह—'गोप्याधिभोगे नो वृद्धिः' इति। भोगे बलादिति शेषः। तथाच मनुः—

न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत्।

इति भोगप्रतिषेधं कुर्वन्तमाधातारमाक्रम्य गोप्याधिं भुञ्जानस्य अत्यन्तापराधित्वात् अल्पभोग एव सर्ववृद्धिनाशस्त्याद्यर्थः। सर्वमूलनाशस्तु नास्मिन् विषये विकल्प्यते। अत्यन्ताधिकहानित्वात्। तेन मूलं वेति हारीतवचनं सर्वमूलनाशरूपपक्षान्तराभिधायकं बलात्कारकृतमहाभोगविषयमिति मन्तव्यम्। यस्त्वाधातारं वञ्चयित्वा गोप्याधिं भुङ्क्ते तस्य भोगानुसारेण लाभद्रव्य एव भागशो नाश इत्याह मनुः—

यस्स्वामिनाऽननुज्ञातमार्धिं भुङ्क्ते विचक्षणः।
तेनार्धवृद्धिर्मोक्तव्या तस्य भोगस्य निष्कृतिः॥

अर्धग्रहणमननुज्ञातभोगानुसारेण कल्पितानिष्कृतिक्षमपरिमाणोपलक्षणार्थम्। अन्यथा महाभोगस्यार्धवृद्धिविसर्जनेन निष्कृतसम्भवात्तस्य भोगस्य निष्कृतिरिति वाक्यशेषविरोधस्स्यात्। अथ विरोधपरिहारार्थं अल्पभोगविषयमेवैतद्वचनमित्युच्यते त(स्या)दाऽननुज्ञातमहाभोगविषये लाभहानिरनेनानुक्ता स्यात्। न चानेनानुक्तत्वेऽपि 'गोप्याधिभोगे नो वृद्धिः' इति याज्ञवल्क्यवचनेन तत्र लाभहानिरुच्यते इति वाच्यं, वलकृताल्पभोगविषयत्वात्तस्य। तस्मादर्थग्रहणस्योपलक्षणत्वमेवेति युक्तम्।

भोग्याधौ तु गोप्यत्वेन पालिते लाभस्यैव नाशः। समयातिक्रममात्रेण मूलनाशपक्षानवतारात्। न च भोग्याधौ वृद्ध्यभावाल्लाभनाशपक्षस्याप्यनवतार इति वाच्यं, भोगस्यापि लाभत्वात्। न च तत्राभोगे वृद्धिलाभो भविष्यतीति वाच्यम्। यत आह मनुः—

न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्।

इति। सोपकारे आधौ भोग्याधावित्यर्थः। कौसीदी वृद्धिः 'अशीतिभागं गृह्णीयात्' इत्यादिवचनविहिता। एतदुक्तं भवति—आधिभोगमात्रार्थं प्रयुक्तधनस्यात्मापराधादितो भोगालाभे लाभहानिरेव, न पुनरङ्गीकृतवृद्धिसिद्धिरिति। आधात्राद्यपराधादभोगे तु भुञ्जानादधमर्णाद्वा भोगलाभ एव ग्राह्यो धनिना न तु वृद्धिरिति मन्तव्यम्। यद्येवं भोग्याधौ न कदाचिदपि वृद्धिः, कथं तर्हि याज्ञवल्क्येन—

गोप्याधिभोगे नो वृद्धिस्सोपकारेऽथ हापिते।

इति भोग्याधावप्युपेक्षया कार्याक्षमत्वे धनिकेन कृते वृद्धिप्रतिषेधः कृतः, प्राप्तृत्वभावात्प्रतिषेधानुपपत्तेः। उच्यते—यत्राधाता आधेरुपभोगं वृद्धिदानमप्याप्तृत्वभ्युपगच्छति, तत्र प्राप्ता वृद्धिः 'सोपकारेऽथ हापिते' इत्यनेन प्रतिषिध्यते। न च वृद्धिभोगयोस्समुच्चयेनाभ्युपगतिरेव नास्ति, 'न त्वेवाधौ' इति मनुवचनानिवारितत्वादिति वाच्यम्। मनुवचनस्य भोग्याधौ कदाचिदभोगेऽस्तु वृद्धिरिति शङ्काव्युदासार्थत्वात्। तस्मादन्यथा

भोगे कृते भोगानुसारेण मूलनाशः, अन्यथा बलाद्ग्रहणानर्थक्यापत्तेः । यस्त्वाधौ ह्रासादिकं करोति तं प्रत्याह याज्ञवल्क्यः—'नष्टो देयः' इति । धनिनः प्रमादान्नष्टो विकृतिं गतो बन्धः पूर्ववत्कृत्वाऽधमर्णायोत्तमर्णेन देय इत्यर्थः । अधमर्णाच्च सलाभमृणमुत्तमर्णो गृह्णीयात् । अविकृतस्यैवाधेरार्पितत्वात् । अथ विकृतमेवाधिमर्पयति तदा ऋणमेव लभते लाभहानेः । तथाच नारदः—

उपचारस्तथैवास्य लाभहानिविपर्यये ।
प्रमादाद्धनिनस्तद्वदाधौ विकृतिमागते ॥

इति । अत्र पूर्वार्धं 'बन्धं यथा स्थापितं' इत्यादिहारीतवचनसमानार्थम् । उत्तरार्धस्य त्वयमर्थः—यद्वद्विपर्यये लाभहानिः तद्वद्विकृतिमागते यदि विकृतमेवार्पयेदिति । अयं च पक्षो विकृतस्याधेः पूर्ववत्करणपर्याप्तलाभसद्भावे, अन्यथा प्राचीन एव पक्षः । प्रमादादिति धनिकदोषोपलक्षणार्थम् । तेन भोगव्यतिरिक्तदोषाद्विकृतिमागतेऽप्याधौ पूर्ववत्कृत्वार्पणं लाभहानिर्वा । भोगाद्विकृतिमागते तु गोप्याधौ द्वयमपीत्यनुसन्धेयम् । विकृतिमागत इत्यनेनैव ह्रासव्यक्तेरन्यत्वासारत्वाद्यपि सङ्गृहीतं, आधेरयथास्वरूपत्वतौल्यात् । तेन तत्राप्येष एव विधिर्ज्ञेयः । भोगादसारत्वे तु मूलद्रव्यमेव हीयत इत्याह बृहस्पतिः—

भुक्ते त्वसारतां प्राप्ते मूलहानिः प्रजायते ।

इति । असारत्वानुसारेणेत्यभिप्रायः । यदा तु धनिकदोषा-

पालिते सर्वत्राधौ लाभनाशो न गोप्यमात्र इति सिद्धम्। एतेन गोप्ये लाभस्य हानिः, भोग्ये तु लाभाभावान्मूलहानिरिति शम्भूक्तं निरस्तम्। कात्यायनोप्यन्यथापालने क्वचिद्मूलधननाशेन सह लाभनाशस्य विकल्पमाह—

अकाममननुज्ञातमाधिं यः कर्म कारयेत्।
भोक्ता कर्मफलं दाप्यो वृद्धिं वा लभते न सः॥

कर्मफलं दास्याद्याधौ वेतनं, शकटाद्याधौ भाटकादिकं, न तु दास्यादिकृतावघातादिकर्मणः फलं तण्डुलादिकं, अपराधाननुरूपत्वात्। अत्रापि कर्मानुसारेणेति द्रष्टव्यम्। दाप्यो बन्धस्वामिने राज्ञेति शेषः। अकामामिति दास्यादिबुद्धिमदाधिविषयं, अन्यत्रासम्भवात्। तथा कर्म कुर्वाणेऽप्यश्वाद्याधावतिक्रमकरणे दण्डो न मूलधनहानिर्भवतीत्याह स एव—

यस्त्वाधिं कर्म कुर्वाणं वाचा दण्डेन कर्मभिः।
पीडयेद्भर्त्सयेच्चैव प्राप्नुयात्पूर्वसाहसम्॥

अकुर्वति पीडनभर्त्सनकारिणोऽपि न दण्डः, कुर्वाणमित्यभिधानात्। क्वचिद्दण्डाध्यपगमाभ्यां हानिरित्याह स एव—

बलादकामं यत्राधिमनिसृष्टं प्रवेशयेत्।
प्राप्नुयात्साहसं पूर्वमाधाता चाधिमाप्नुयात्॥

अनिसृष्टमनाहितं, भोग्याधौ बलादल्पस्याप्यनाहितस्य भोगे भोक्तुर्दण्डस्सर्वमूलनाशश्च स्यादिति तात्पर्यार्थः। वञ्चनया तु

दाधिः विध्वस्तस्तदा मूल्यद्वारेणाधिं दत्वा धनी सलाभमृणं गृह्णीयात् । तदाह व्यासः—

ग्रहीतृदोषान्नष्टश्चेद्बन्धो हेमादिको भवेत् ।
ऋणं सलाभं संशोध्य तन्मूल्यं दापयेद्धनी ॥

आधितोप्यधिकभूतसलाभर्णविषयमेतत् । ऋणपर्याप्ताधिनाशे त्वाह नारदः—'विनष्टे मूलनाशः स्यात्' इति । सलाभर्णपर्याप्ताधिनाशे तु सलाभर्णनाशस्स्यादित्येतदप्याह हारीतः—

तत्समो द्विगुणो वाऽऽधिर्धनिकस्य समर्पितः ।
आधौ नष्टे धनं नष्टं धनिकस्याधिरेव च ॥

धनं समं द्विगुणं वा । धनिकस्याधिनाशोऽत्राध्यन्तरालाभात् । एतदुक्तं भवति—ध्वस्ताधिधनसमानधननाशः धनिकस्य स्यादिति। सलाभर्णात् बहुमूल्याधिनाशे तु सलाभर्णादुर्वरिताधिमूल्यमाधिदात्रे देयमित्याह बृहस्पतिः—

बहुमूल्यो यत्र नष्टः ऋणिकं तत्र तोषयेत् ।

इति । न च तोषयेदिति वचनाद्यावता धनेन तुष्यति तावद्धनं देयमिति शङ्कनीयम् । यत आह मनुः—

मूल्येन तोषयेदेनमाधिस्तेनोऽन्यथा भवेत् ।

इति । सलाभर्णापगतावशिष्टाध्यंशस्य मूल्येनेत्यर्थः । यदि धनी मूल्येन ऋणिकं न तोषयति तदा त्वाधिप्रत्यर्पणप्रतिभूर्मूल्येन ऋणिकं तोषयेत् । तथा च हारीतः—

खादको वित्तहीनश्चेल्लग्नको वित्तवान्यदि ।
मूल्यं तस्य भवेद्देयं न वृद्धिं दातुमर्हति ॥

आधीकृतस्य धनस्य प्रीतिदत्तधनस्येव कारितवृद्ध्यसम्भवादित्यभिप्रायः । खादखो बन्धखादकः । आधिनाशक इति यावत् । लग्नकः प्रतिभूः । मूल्यं खादिताधेर्मूल्यम् । यद्यत्र ऋणिको बलाद्वृद्धिं गृह्णाति तदा गृहीतवृद्ध्या सहापरा-धानुरूपदण्डभागित्याह स एव—

द्विगुणं त्रिगुणं वाऽपि यस्साधयति लग्नकम् ।
राजगामि तु तद्द्रव्यं साधको दण्डमर्हति ॥

लग्नकग्रहणं धनिकस्याप्युपलक्षणार्थम् । अविद्यमानवृद्धिसाधनन्यायस्य धनिकेऽपि तुल्यत्वात् । एवं धनिकोप्यन्यायकृद्दण्डभाक् । तथाच कात्यायनः—

आधिं दुष्टेन लेख्येन भुङ्क्ते यमृणिकाद्धनी ।
नृपो दमं दापयित्वा आधिलेख्यं विनाशयेत् ॥

ऋणिकद्रव्यभोगनिष्कृत्यर्थं वृद्धिहानिरत्राप्युन्नेया ।

इति स्मृतिचन्द्रिकायां सदोषधनिकाधिविषयाणि

अथाधेस्स्वत्वध्वंसादिविषयाणि

तत्र याज्ञवल्क्यः—

आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते ।

इति । प्रयुक्तार्थे द्विगुणीभूते यदि गोप्याधिर्न मोक्ष्यते तदा-ऽसौ प्रणश्यति, अधमर्णस्य स्वं न भवेदित्यर्थः । कृतकाल-

स्त्वाधिर्गोप्यो भोग्यो वा संप्रतिपन्ने काले यदि न मोक्ष्यते तदा तस्यापि पूर्ववन्नाशमाह स एव– 'काले कालकृतो नश्येत्' इति । यद्यहमिदमियता कालेन ऋणं न ददामि तदाऽऽधिरेवानृण्याय तव भविष्यतीत्येवमभिहितः कालकृतः । अत्र धनिनस्स्वत्वापत्तिमाह व्यासः—

हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ ।
बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य तु ॥

अनेनार्वाक्चतुर्दशदिनादाधिनाशोपि नेत्यर्थादुक्तम् । उक्तं च साक्षादेवानन्तरं—

अतोऽन्तरा धनं दत्वा ऋणी बन्धकमाप्नुयात् ।

इति । अतोऽन्तरा चतुर्दशदिनादर्वागित्यर्थः । ननूर्ध्वमपि चतुर्दशदिनाद्धनं दत्वा बन्धकमृणी किमिति नाप्नोति, स्वत्वध्वंसकाभावात् । धनद्वैगुण्यमवधिभूतकालातिक्रमणं च तद्ध्वंसकमिति चेत्, न—दानविक्रयादेरेव तद्ध्वंसकत्वात् । आदिशब्दपरिगृहीतवर्गान्तर्गतं द्वैगुण्यादिकमपीति चेत् न, स्वत्वध्वंसकतया लोकप्रसिद्धानामेवादिशब्देन परिग्रहात् । द्वैगुण्यादिकमपि तथेति चेत्, न—न हि लोके द्वैगुण्यादेस्तथा प्रसिद्धिरस्ति । उच्यते—सत्यं द्वैगुण्यादेर्नास्त्येव तथा प्रसिद्धिः, द्रव्यविनिमयस्य तु तथा प्रसिद्धिरस्त्येव तिलविक्रयप्रतिषेधाद्विक्रयाकरणेऽपि विनिमयेन तिलानां स्वत्वनिवृत्तिदर्शनात् । ततश्चात्रापि कृतकालाधौ ऋणग्रहणकाल एव यद्य-

हामियता कालेन न ददामि तदाऽऽधिरेवानृण्याय तव भविष्यतीति धनिकर्णिकयोर्धनविनिमयसम्प्रतिपत्तेर्ज्ञातत्वादव धिभूतकाले स्वत्वध्वंसो युक्त एव । एतदेव नाशनिमित्तं याज्ञ-वल्क्येन 'कालकृतः' इत्यनेनोक्तम् । द्वैगुण्ये तु यद्यपि ऋण-ग्रहणकाले यद्यहं द्वैगुण्येऽप्याधिं न मोक्षयामि तदाऽऽधि रेवानृण्याय तव भविष्यतीति धनिकर्णिकयोर्धनविधिमयस म्प्रतिपत्तिनियमाभावः । तथाऽपि यत्रैवेयं सम्प्रतिपत्तिः कृता तत्रैव द्वैगुण्ये स्वत्वध्वंसः, हेतुसद्भावात्, तद्विषयं च 'आधिः प्रणश्येत्' इति वचनमित्यनवद्यम् । एवं क्रयप्रतिग्रहाद्यभावेऽपि विनिमयेनैवाधौ धनिकस्य स्वत्वापत्तिः व्रीह्यादाविव तिल-विनिमयकर्तुरिति युक्तमुक्तं 'बन्धकस्य धनी स्वामी' इति। द्विसप्त दिनप्रतीक्षणं तु विनिमयदार्ढ्यज्ञानार्थमुक्तम् । द्रव्यविक्रयादे-रिव दृढविनिमयस्यैव स्वत्वध्वंसादिनिमित्तत्वात् । एवं च 'अतोऽन्तरा धनं दत्वा' इत्यपि वचनं युक्तमेव । यत्तु बृह-स्पतिनोक्तं—

पूर्णावधौ शान्तलाभे बन्धे स्वामी धनी भवेत् ।
अनिर्गते दशाहे तु ऋणी मोक्षितुमर्हति ॥

इति, तत् वृद्ध्यर्थप्रयुक्तवस्त्रादिविषयं, 'ब्राह्मणेभ्यो दधि दीयताम्' इत्यादिवत् सामान्यविशेषन्यायात् । लाभशान्तिरपि वस्त्रादौ त्रैगुण्यादिविधायकवचनानुसारेणावगन्तव्या । एवंच चतुर्दश-दिनादूर्ध्वमाधौ स्वत्वापत्तेः यथेष्टविनियोगो हिरण्यप्रयोक्तुर-

विरुद्धः । वस्त्रादिप्रयोक्तुस्तु दशादिनादूर्ध्वमेवेति मन्तव्यम् । यत्पुनस्तेनोक्तं—

गोप्याधिः द्विगुणादूर्ध्वं कृतकालो यथाविधि ।
आवेदयित्वार्णिकुले भोक्तव्यस्समनन्तरम् ॥

इति, तत् स्वत्वापत्तेरर्वागाधेरभोगमात्रविधिपरम्, न पुनर्यथेष्ट-विनियोगो न कदाचित्त्वाधेरस्तीयेवंपरं, समनन्तरमित्यभिधानात् । तस्मान्न बार्हस्पत्यवचनयोः परस्परविरोधः । नापि व्यासबृहस्पतिवचनयोः । यत्पुनर्मनुनोक्तं—

न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः ।

इति, तस्यायमर्थः—कालसंरोधः चिरकालावस्थानाद्द्विगुणीभूतेऽप्यमोक्षणमिति यावत् । तस्मात्कालसंरोधात् केवलाद्दणग्रहणकाले विनिमयसम्प्रतिपत्तिरहिताद्धेर्न निसर्गोऽस्ति नान्यत्राधीकरणं दानं वाऽस्ति, विक्रयश्च नास्ति, किंतु शान्तलाभस्तिष्ठत्येव तावत् यावदाधात्रा न विमोक्ष्यत इति । यदा तु शान्तलाभे धने बन्धकस्य तथैवावस्थितस्य मोचनात् प्राक् ऋणिकस्य मरणादिर्भवेत् तत्र किं कार्यमित्यपेक्षिते आह बृहस्पतिः—

हिरण्ये द्विगुणीभूते मृते नष्टेऽधमर्णिके ।
द्रव्यं तदीयं सङ्गृह्य विक्रीणीत ससाक्षिकम् ॥
रक्षेद्वा कृतमूल्यं तु दशाहं जनसंसदि ।

ऋणानुरूपं परतो गृहीतान्यत्तु वर्जयेत् ॥

इति । हिरण्ये द्विगुणीभूते पश्चादाधिमोक्षणादर्वागिति शेषः । नष्टे कुत्र गत इति चिरकालमविज्ञाते । अधमर्णग्रहणं ऋणदानाधिकारिणः पुत्रादेरुपलक्षणार्थम् । द्रव्यं आधीकृतद्रव्यम् । ऋणानुरूपं द्विगुणद्रव्यपर्याप्तम् । अन्यत्तु वर्जयेदिति वदन् हिरण्ये द्विगुणीभूतेऽपि धने धनिकस्याधावस्वामित्वं दर्शयति । ततश्च विनिमयहीनाधिविषयमनुवचनवदेतदपि वचनं मन्तव्यम् । 'हिरण्ये द्विगुणीभूते' इत्युदाहरणतयोक्तम्, ततश्च वस्त्रादौ शान्तलाभेऽपि वचनमेतदूह्यम् । अत एव सामान्येनोक्त कात्यायनेन—

आधाता यत्र न स्यात्तु धनी बन्धं निवेदयेत् ।
राज्ञे ततस्सविख्यातो विक्रेय इति धारणा ॥
सवृद्धिकं गृहीत्वा तु शेषं राजन्यथार्पयेत् ॥

इति । आधातृग्रहणमत्रापि पूर्ववदुपलक्षणार्थम् । राजन्यर्पयेदिति ज्ञात्यादिप्रत्यासन्नाभावविषयं, तत्सद्भावे तत्रैवार्पणस्य न्याय्यत्वात् । यत्र शेषार्पणं क्रियते तेनैव यदि सवृद्धिकं धनं दत्वा बन्धो गृह्यते तदा न विक्रयः, प्रयोजनस्य सिद्धत्वात् । अत एव तिष्ठेद्वति प्रतीक्षणपक्षोप्युक्तः । अन्यत्र त्वाधीकरणमप्यस्मिन्विषये न विरुद्धं, दण्डापूपन्यायात् । किंतु मूलमात्रमेवान्यत्राधीकृत्यादेयं न तु सवृद्धिकम् । यदाह प्रजापतिः—

धनी धनेन तेनैव परमाधिं नयेद्यदि ।
कृत्वा तदाधिलिखितं पूर्वं चास्य समर्पयेत् ॥

इति । यद्बन्धस्वामिनि धनं प्रयुक्तं तत्तुल्येनैव धनेन परं धनिकान्तरमाधिं नयेत्, न त्वधिकेनेत्यर्थः । अयं चान्वाधौ नियमस्संप्रतिपत्त्या द्वैगुण्यादवादिगन्वाधौ द्रष्टव्यः । एवमुक्तो ज्ञात्यादावर्पणान्तो विधिः बहुमूल्याधिविषय एव, शेषार्पणादेस्तत्रैव सम्भवात् । सममूल्ये तु ससाक्षिकं विक्रीय स्वयमेव सर्वं गृह्णीयात् । स्वल्पमूल्येऽप्येवं विक्रीय गृहीत्वा ऋणशेषमृणादानाधिकारिणि कथंचिदाप्ते ततो गृह्णीयादिसाद्युक्तवचनत एवोह्यम् । यदा त्वाधाता स्वल्पमूल्यधनं सुकृतं वाऽऽधाय ऋणं गृहीत्वा द्वैगुण्ये जातेऽपि शान्तलाभं धनं न वर्धते, न चाधेराधानान्तरं विक्रयणं वा धनिना कर्तुं मय्यवस्थिते शक्यामिति बुद्धचा ऋणदाने विलम्बमेवालम्बते तदाऽसौ राज्ञा दाप्य इत्याह याज्ञवल्क्यः—

चरित्रबन्धककृतं सवृद्धचा दापयेद्धनम् ।

इति । द्वयर्थी चायं ग्रन्थः । एकस्तावदर्थः—स्वच्छाशयाऽधमर्णाङ्गुलीयकाद्यल्पमूल्यं बन्धकमभूत्तच्चरित्रबन्धकं, तेन कृतमुपात्तमृणमददतमधमर्णमुत्तमर्णाय सवृद्धिकं राजा द्वैगुण्यादूर्ध्वं दापयेदिति । अन्यस्तु—चरित्रं इष्टापूर्तादिको धर्मः, स एव बन्धकमाधिः तेन कृतामित्यादि समानम् । एवंविधे

त्वाधौ धनमप्रयच्छतोऽधमर्णस्य नास्यानृण्यमित्यभिप्रायः । अकृतकालफलभोग्याधावप्यानृण्यमधमर्णस्य धनदानत एव नान्यतः, फलभोगादवृद्धिकत्वेऽपि मूलानपायात् । न चाधिनैव तदपाय इति वाच्यम्, यदाह स एव—'फलभोग्यो न नश्यति' इति।मूलधनाप्रदाने तवैवाधिर्भविष्यतीति विनिमयसम्प्रतिपत्तेर्धनग्रहणानन्तरक्षण एव मूलधनाप्रदानादाधिनाशापत्त्याऽसम्भवनिरस्तत्वादन्यस्य नाशकस्याविद्यमानत्वादित्यभिप्रायः ॥

इति स्मृतिचान्द्रिकायां आधेः स्वत्वध्वंसादिविषयाणि॥

अथाधिसिद्धिविषयाणि.

तत्र नारदः—

आधिस्तु द्विविधः प्रोक्तः जङ्गमस्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥

सिद्धिः आधित्वसिद्धिः । अन्यथा विना भोगमधमर्णोद्दिष्टस्योत्तमर्णस्वीकारमात्रेणेति यावत् । गोप्याधौ निर्भोगे भोगस्थानीयभाण्डागारान्तर्निधानादिव्यापारादाधत्वसिद्धिरध्यवसेया । एवमस्माकमेतदीयं गृहाद्याधिरिति ऋणिकसंनिधौ मध्यस्थजनेष्वावेदनं दूरस्थत्वादिना भोगाद्यभावे त्वाधिसाधकमित्यवगन्तव्यम् । अत एव व्यतिरेकमुखेन पूर्वोक्तेषु साधकत्वमाह बृहस्पतिः—

न भुङ्क्ते यस्स्वमाधानं नादद्यान्न निवेदयेत् ।
प्रमीतसाक्षी ऋणिकः तस्य लेख्यमपार्थकम् ॥

स्वं आधानम् । लेख्यं आधिलेख्यम् । सिद्धेस्संदिग्धलेख्यशुद्धिरपि प्रयोजनमित्यर्थादुक्तम् । एवमेवाधीयमानव्यक्तिविशेषोल्लेखनेन लेखनमप्याधिसाधकम् । तथाच कात्यायनः—

मर्यादाचिह्नितं क्षेत्रं ग्रामं वाऽपि यदा भवेत् ।
ग्रामादयश्च लिख्यन्ते तदा सिद्धिमवाप्नुयात् ॥

ग्रामादयश्च क्षेत्राद्याधेर्व्यावर्तकत्वेनेति शेषः । आदिशब्देन देशादयो गृह्यन्ते ।

इति स्मृतिचन्द्रिकायामाधिसिद्धिविषयाणि ॥

अथाध्यादिविवादापनोदविषयाणि

तत्र विष्णुः—

द्वयोर्निक्षिप्त आधौ तु विवदेतां यदा नरौ ।
यस्य भुक्तिर्जयस्तस्य बलात्कारं विनाकृता ॥

तस्यैव भोगादाधिसिद्धेर्जातत्वादित्यभिप्रायः । द्वयोरपि भुक्तियुक्तत्वे त्वाह बृहस्पतिः—

क्षेत्रमेकं द्वयोर्बन्धे दत्तं यत्समकालिकम् ।
येन भुक्तं भवेत्पूर्वं तस्य तत्सिद्धिमाप्नुयात् ॥

दत्तमधमर्णेनोद्दिष्टमित्यर्थः । क्षेत्रग्रहणं भोग्याधेरुपलक्षणार्थम् । अत एवाविशेषेणाह वसिष्ठः—

तुल्यकालेऽभिसृष्टानां लेख्यानामाधिकर्मणि ।
येन भुक्तं भवेत्पूर्वं तस्याधिर्बलवत्तरः ॥

तुल्यकालोत्पन्नानां लेख्यानां सद्भावसाम्येऽपि भोग्याधिसिद्धौ भोगस्य प्रधानकारणत्वात्तत्प्राथम्यनिबन्धना बलवत्ता युक्तेत्यर्थः। भोगविशेषेऽप्याह स एव—

यद्येकदिवसे तौ तु भोक्तुकामावुपागतौ ।
विभज्याधिस्समं तेन भोक्तव्य इति निश्चयः ॥

तेन ताभ्यामित्यर्थः । गोप्याधावपि तदुपादानादिकर्तुर्जयः, तस्यैवाधिसिद्धेर्जातत्वात् । द्वयोस्तात्सिद्धिसाम्येऽप्याह कात्यायनः—

आधिमेकं द्वयोर्यस्तु कुर्यात्का प्रतिपद्यवेत् ।
तयोः पूर्वकृतं ग्राह्यं तत्कर्ता चोरदण्डभाक् ॥

ऋणग्रहणोपक्रमत्वादाधिक्रिया प्रतिपादित्युच्यते । पूर्वकृतं पूर्वमुपादानादिना सिद्धम् । आधिविशेषे दण्डाविशेषमाह विष्णुः—'गोचर्ममात्राधिकां भुवमन्यस्याधीकृतां तस्मादनिर्मोच्यान्यस्य यः प्रयच्छेत् स वध्यः[1] ऊना चेत्तु षोडशसुवर्णं दण्ड्यः' इति । उपादानादौ यौगपद्येऽप्याह बृहस्पतिः—

तुल्यकालोपस्थितयोर्द्वयोरपि समं भवेत् ॥

इति । उपस्थितयोरुपादानादिकं कर्तुमिति शेषः । साक्षिलेख्यमात्रासिद्धानामाध्यादीनां मध्ये लेख्यासिद्धं विरोधे ग्राह्यमित्याह कात्यायनः—

---

[1] बन्ध्यः.

आधानं विक्रयो दानं लेख्यसाक्षिकृतं यदा ।
एकक्रियाविरुद्धं तु लेख्यं तत्रापहारकम् ॥

लेख्यं लेख्यकृतं लेख्यसिद्धमिति यावत् । अपहारकं बलवत् । लेख्यसिद्धत्वाविशेषेऽपि बलाबलमाह स एव—

अनिर्दिष्टं च निर्दिष्टमेकत्र च विलेखितम् ।
विशेषलिखितं ज्याय इति कात्यायनोऽब्रवीत् ॥

एकत्राधीकरणादौ विशेषलिखितं निर्दिष्टलिखितं तत् अनिर्दिष्टलिखिताज्ज्याय इत्यर्थः । लेख्ये निवेशितं विलेखितम् । अनिर्दिष्टनिर्दिष्टपदयोरर्थं स्वयमेव व्याचष्टे—

यो विद्यमानं प्रधनमनादिष्टस्वरूपकम् ।
आकाशभूतमादध्यादादिष्टं नैव तद्भवेत् ॥
यद्यत्तदाऽस्य विद्येत तदादिष्टं विनिर्दिशेत् ॥

इति । प्रशब्दः पादपूरणार्थः । अनादिष्टस्वरूपकं अनिरूपितस्वरूपकम् । आकाशभूतमविद्यमानप्रायम् । आदिष्टं नैव तद्भवेत् निर्दिष्टं नैव तद्भवेत्, अनिर्दिष्टं भवेदिति यावत्। आदिष्टं निर्दिष्टम्। एवं चायमर्थः—आधातुराधीकरणकाले यद्धनं विद्येत निरूपितस्वरूपं च तत्तद्धनमाधित्वेनादिष्टं सन्निर्दिष्टमित्युच्यते । तद्विपरीतं तु धनमाधित्वेन कल्प्यमानमनिर्दिष्टमित्युच्यत इति। आधीकरणकाले विद्यमानत्वसाम्येऽप्याह स एव—

यस्तु सर्वस्वमादिश्य प्राक् पश्चान्नामचिह्नितम् ।
आदध्यात्तत्कथं तु स्याच्चिह्नितं बलवत्तरम् ॥

अस्यार्थः—यः पूर्वमविशेषेण सर्वस्वमाधित्वेनोद्दिश्य कस्यचिद्धस्तादृणं गृहीत्वा कालान्तरे पुनर्धनिकसम्प्रतिपत्त्या क्षेत्रादिकं किंचिदेव घट्टादिचिह्नितं पूर्वगृहीतऋणार्थमेव दद्यात्, तत्र चिह्नितं बलवत्तरम्। पूर्वाधेराधिक्रियान्तरादिक्रियाप्रतिबन्धकधनिकेनैव त्यक्तत्वादिति। चिह्नितमिति विरोध्यन्तरक्रियोपलक्षणार्थम्। तेन यदा प्रथममाधिमादाय धनी धनं दत्वा पश्चादवश्चकत्वं विज्ञाय आधिमन्तरेणैवातऊर्ध्वमृणमास्तां त्वयीति प्रकारान्तरेण पुनः क्रियां करोति, तदा निराधिक्रियैव बलवतीत्यवगन्तव्यम्। अत एव याज्ञवल्क्यः—

सर्वेष्वर्थविवादेषु बलवत्युत्तरा क्रिया।

इति। तेन पूर्वस्याः क्रियाया बाधिका भवतीत्यभिप्रायः। उदाहरणान्तरं तु—अशीतिभागवृद्धिके धने पुनस्तदर्धवृद्धिके सौहार्दादिवशात् कृते सप्तशीतिभागवृद्धिक्रियायाः तदर्धभागवृद्धिक्रियया बाधनम्। चिह्नितादिकं च पूर्वोक्तमत्रैवोदाहरणमित्यनुसन्धेयम्। क्वचिदपवादमुत्तरक्रियाबलवत्त्वस्याह स एव—

आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा।

इति। स्वामित्वप्रतिबन्धापगमाभ्यां प्रागेव पूर्वस्याः क्रियायाः कृतत्वादित्यभिप्रायः। अनेनैवाभिप्रायेण वासिष्ठोपि—

यं पूर्वतरमाधाय विक्रीणाति तु तं पुनः।
किमेतयोर्बलीयस्त्यात्प्राक्तनं बलवत्तरम्॥

यद्यप्याधीकरणेन न स्वामिभावो निवर्तते, तथाऽपि प्रतिबध्यते। ततश्च प्रतिबन्धस्वामिभावेन कृतो विक्रयः परेण कृत इवासिद्धत्वाद्दुर्बलो बाध्य एवेत्यनवद्यम्। आद्यादीनां यौगपद्येऽप्याह स एव—

कृतं यत्रैकदिवसे दानाधमनविक्रयम्।
त्रयाणामिति संदेहे कथं तत्र विचिन्तयेत्॥
त्रयोपि तद्धनं धर्म्यं विभजेयुर्यथांऽशतः।
उभौ क्रियानुसारेण त्रिभागेन प्रतिग्रही॥

इति। यत्र त्रयाणां दानादिकं कृतं तत्र कथमिति संदेहे निर्णयाय विचिन्तयेदित्यर्थः। उभौ धनिकक्रेतारौ। क्रियानुसारेण दत्तधनानुसारेण। धने क्रियेतिशब्दः करणव्युत्पत्त्या वर्तितुमुत्सहते। बृहस्पतिरपि—

कृतं चेदेकदिवसे विक्रयाधिप्रतिग्रहम्।
त्रयाणामपि संदिग्धे कथं तत्र विचारणा॥
त्रीण्येवात्र प्रमाणानि विभजेयुर्यथांऽशतः।
उभौ चार्थानुसारेण त्रिभागेन प्रतिग्रही॥

इति। अर्थानुसारेण भागद्वयं गृह्णीयातामिति शेषः। एवं पूर्ववचनेऽपि क्रियानुसारेणेत्यत्र विशेषो द्रष्टव्यः। त्रिभागेन प्रतिग्रही सम्बध्यत इति शेषः। प्रतिग्रह इति तु पाठे पूर्ववचनवन्निष्पद्यत इति विशेषो ग्राह्यः।

इति स्मृतिचन्द्रिकायां विवादापनोदाविषयाणि॥

अथाधिमोचनविषयाणि.

तत्र व्यासः—

गोप्याधिं द्विगुणादूर्ध्वं मोचयेदधमर्णकः ।

इति । द्विगुणादूर्ध्वं प्रयुक्तधने शान्तलाभे सतीत्यर्थः । मोचयेत् सवृद्धिकमूलदानेनेति शेषः । एतच्च द्वैगुण्यादिनिबन्धनाधिनाशाभावविषये वेदितव्यम् । तन्निबन्धनाधिनाशविषये तु तन्नाशात्प्रागेव मोचयेत् । तथा चोक्तं तेनैव—

अतोऽन्तरा धनं दत्वा ऋणी बन्धकमाप्नुयात् ।

इति । धनमत्र सवृद्धिकमूलं विवक्षितम् । अतोऽन्तरा ऋणिकप्रतीक्षणायोक्तकालमध्यकाल इत्यर्थः । ऋणिकप्रतीक्षणकालश्च लाभशान्तिमारभ्य द्विसप्तादिनम् । लाभशान्तितः पूर्वकालमध्येऽपि सवृद्धिके धने दत्ते बन्धावाप्तिर्दण्डापूपन्यायादनेनैव वचनेनोक्तेति मन्तव्यम् । फलभोग्याधिं तु मूलमात्रं दत्वा फलकालान्ते वर्तमानमाप्नुयादृणीत्याह स एव—

फलभोग्यं पूर्वकालं दत्वा द्रव्यं तु सामकम् ।

इति । 'ऋणी बन्धकमाप्नुयात्' इति पूर्वार्धे पठितमिहानुषज्यते । सममेव सामकं, मूलमात्रमिति यावत् । फलभोग्यग्रहणात् स्वरूपेण भोग्यवस्त्राद्याधौ न कालव्यवस्था । तत्र धनिनं प्रत्याह बृहस्पतिः—

धनं मूलीकृतं दत्वा यदाऽऽधिं प्रार्थयेदृणी ।
तदैव तस्य मोक्तव्यो ह्यन्यथा दोषभाग्धनी ॥

भोग्याधावेवमेव । गोप्याधौ तु मूलीकृतं सवृद्धिकं दत्त्वा यदा प्रार्थयते तदैव मोक्तव्यम् । मूलीकृतग्रहणस्याधमर्णदेयधनपरत्वात् । दोषस्तेयदोषः । अत एव याज्ञवल्क्यः —

उपस्थितस्य मोक्तव्य आधिस्तेनोऽन्यथा भवेत् ।

इति । उपस्थितस्य धनदानपूर्वकमाधिमोक्षायोपस्थितस्य । स्तेनः स्तेनवद्दण्ड्य इत्यर्थः । उपस्थितस्य देशतः कालतो वा धानिकव्यवधाने सति धनिककुटुम्बेनाधिर्मोक्तव्यः । एतदप्यर्थादाह स एव—

प्रयोजके सति धनं कुले न्यस्याधिमाप्नुयात् ।

इति । प्रयोजको धनप्रयोक्ता । आप्नुयात्तदानीमेवेति शेषः । अथवा—अधमर्णः प्रयोक्तृकुले न्यस्तधनोपि प्रयोक्तुरागमनादूर्ध्वमेवाधिं तन्मूल्यधनं वा ऋणापाकरणकाले परिकल्पितमवृद्धिकमाप्नुयात् । एतदप्याह वचोभङ्ग्या स एव—

तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ।

इति । तिष्ठेत् आधिरिति शेषः । तत्र प्रयोक्तृकुल इत्यर्थः । सत्यपि धनप्रयोजके धने शान्तलाभेऽपि क्वचिद्विषये चिरेणैवाधिमृणी समाप्नुयादित्याह बृहस्पतिः—

क्षेत्रादिकं यदा भुक्तमुत्पन्नमाधिकं ततः ।
मूलोदयं प्रविष्टं चेत्तदाऽऽधिं प्राप्नुयाद्ऋणी ॥

आधीकृतं क्षेत्रादिकं धनिकेन लाभशान्तेः पश्चादेव यदा

भुक्तं ततो भुज्यमानाद्यदि धनमुत्पन्नमाधिकं क्षेत्रार्थव्ययाद-भ्यधिकं मूलोदयतुल्यं यदा यस्मिन् काले धनिनि प्रविष्टं तदा तस्मिन् काल एवाधिमृणी लभत इत्यर्थः। एवमाधिलाभः कस्मिन्विषये भवतीत्यपेक्षिते स एवाह—

परिभाष्य यदा क्षेत्रं प्रदद्याद्धानिके ऋणी।
त्वयैतच्छान्तलाभेऽर्थे भोक्तव्यामिति निश्चितम्॥
प्रविष्टे सोदये द्रव्ये प्रदातव्यं त्वया मम।

इति। त्वयैतदित्यादि परिभाष्य यदा ऋणग्रहणकाले-क्षेत्राद्याधिं प्रदद्यात्, तदा प्रागुक्तविधयाऽऽधिलाभ इत्यर्थः। एवमेवाधेर्लाभोऽनयैव परिभाषया लाभशान्तेः पश्चादाधौ दत्ते भवतीत्याह याज्ञवल्क्यः—

यदा तु द्विगुणीभूतमृणमाधौ तदा खलु।
मोच्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने॥

आधौ तदा दत्त इति शेषः। अत एव विष्णुः—'गृहीतधन-प्रवेशार्थमेव यत् स्थावरं दत्तं तद्गृहीतधनप्रवेशे दद्यात्'। एवं-भूतपरिभाषया चाभिहितं क्षयाधिमाचक्षते लौकिकाः। एवं-भूतपरिभाषाऽकरणे तु सोदयादस्यन्ताभ्यधिकेऽपि प्रविष्टे सामक-दानं विना न कदाचिदाधिलाभ इत्यनुसन्धेयम्। तथाऽन्य-त्रापि क्वचिद्विषये सामकदानं विना नाधिलाभ इत्याह बृहस्पतिः—

यत्राहितं गृहक्षेत्रं भोगेन प्रकर्षान्वितम्।

तत्रर्णी नाप्नुयाद्बन्धं धनी चैव ऋणं तथा ॥
पूर्णे प्रकर्षे तत्स्वाम्यं तूभयोः परिकीर्तितम् ।
अपूर्णेऽपि प्रकुर्यातां परस्परमतेन तौ ॥

इति । विषयज्ञानं विना नास्यार्थो ज्ञातुं शक्य इति विषयस्तावदभिधीयते—शान्तलाभे धने जाते वृद्धिमात्रावाप्त्यर्थमयमाधिर्भोक्तव्य इति परिभाषां कृत्वाऽऽधिर्दत्तः, ऋणग्रहणकाले लाभशान्तिकाले वाऽस्माच्चाधेरेतावति काल उत्पन्नं वृद्धेरपर्याप्तमपि समग्रवृद्ध्यर्थमेवास्त्विति परिभाषाकरणकालेऽनुक्तं च। अथवा तत्रास्माच्चाधेरित्याद्यास्त्वित्यन्तमुक्तमेवेति द्विधा विषयः । अर्थोप्यभिधीयते—आध्युत्पन्नोऽर्थः उत्पत्त्यर्थव्ययादवशिष्टः प्रकर्षपदेनात्रोक्तः, तस्मिन् समग्रवृद्ध्यपर्याप्ते धनिनि प्रविष्टे ऋणी मूलमात्रं दत्वा बन्धं परिभाषितकालात्ययेऽपि नाप्नुयात् । धनी च ऋणमूलमात्रं तदा नाप्नुयात् न गृह्णीयात्, किन्तु पूर्णे प्रकर्षे समग्रवृद्धिपर्याप्ते धनिनो मूलमात्रे ऋणिनो बन्ध इत्येवमुभयोस्तत्स्वाम्यं परिकीर्तितम् । तस्मात्तस्मिन्नेव काले सामकं दत्वाऽऽधिं मोचयेदिति शेषः । यदाऽप्यपूर्णः समग्रवृद्धेरपर्याप्तः प्रकर्षः तदाऽपि स्वाम्यं प्रकुर्यातां परस्परमतेन वृद्धेरपर्याप्तमपि समग्रवृद्ध्यर्थमेवास्त्विति परिभाषाकरणकाले कृतेन तौ धनिकर्णिकाविति । स्वाम्यकरणस्य च फलं परिभाषितकालात्यये समग्रवृद्धिपर्याप्तप्रकर्षप्रवेशाभावेऽपि सामकमेव दत्वा ऋणिकेन बन्धमोचनम् । परस्परमतेनेति वदन्

तदभावे धनिनस्स्वाम्यं वृद्धिशेषेऽपीति दर्शयति । तथा परिभाषितकालैकदेश एव समग्रवृद्धिपर्याप्तप्रकर्षप्रवेशेऽप्याह स एव—

यदि प्रकार्षितं तत्स्यात्तदा न धनभाग्धनी ।
ऋणी न लभते बन्धं परस्परमतं विना ॥

इति । द्वयोरपि वचनयोः परिभाषितकालात्यय इति शेषो द्रष्टव्यः । एवंचायमर्थः—तद्बन्धकं यदि प्रकार्षितं समग्रवृद्धिपर्याप्तप्रकर्षान्वितं परिभाषितकालैकदेशे स्यात्तदा न परिभाषितकालात्यये सति धनी धनभाक्, ऋणी च तस्मिन् सति न लभते बन्धं, किंतु समग्रवृद्धिपर्याप्तप्रकर्षानन्तरमेव धनी मूलधनभाक् ऋणी च मूलमात्रं दत्वा बन्धं लभत इति। परस्परमतं विनेति वदन् इदं दर्शयति—परिभाषितकालैकदेशे समग्रवृद्धिपर्याप्तप्रकर्षप्रवेशोऽस्तु वा मा वा, सर्वथा यावत्परिभाषितकालं वृद्ध्यर्थमाधिभोगः क्रियतामिति ऋणिकेनोक्ते यत्र धनिकेन ओमित्युक्तं तत्र वृद्धेरभ्यधिकप्रकर्षप्रवेशेऽपि परिभाषितकालात्यय एव सामकं दत्वा बन्धकमृणी लभते, न पुनः पारिभाषितकालमध्य इति । अनेनैव व्याख्यानेन—

यावत्प्रकार्षितं तत्स्यात्तावन्न धनभाग्धनी ।
ऋणी न लभते बन्धं परस्परमतं विना ॥

इति व्यासवचनमपि व्याख्यातम् ।

इति स्मृतिचन्द्रिकायां आधिप्रकरणम्.

अथ प्रतिभूविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र बृहस्पतिः —

दर्शने प्रत्यये दाने ऋणिद्रव्यार्पणे तथा ।
चतुष्प्रकारः प्रतिभूः शास्त्रे दृष्टो मनीषिभिः ॥

प्रत्ययो विश्वासः । दानं ऋणापाकरणार्थमर्थार्पणम् । ऋणिद्रव्यार्पणं ऋणिनो यद्द्रव्यं गृहोपकरणादि तदर्पणम् । चतुष्प्रकारप्रतिभुवामङ्गीकारप्रकारोपि तेनैव दर्शितः —

आहैको दर्शयिष्यामि साधुरेषोऽपरोऽब्रवीत् ।
दाताऽहमेतद्रविणमर्पयामीति चापरः ॥

एको दर्शनप्रतिभूरहमेनं पलायनप्रवृत्तं दर्शयिष्यामीति प्रातिभाव्यं भजन्नाह । अपरः प्रत्ययप्रतिभूः एष साधुरवश्चकः मत्प्रत्ययेनास्य धनं देहीति ब्रूते । दानप्रतिभूः यदा यदा यन्न ददाति द्रविणं गृहीतं सवृद्धिकं तदा तस्य द्रविणस्य अहमेव दातेति वदति । अपरः ऋणिद्रव्यार्पणप्रतिभूर्यदाऽयं गृहीतं धनं न ददाति तदाऽहमेतदीयं धनमर्पयामीति ब्रवीतीति वाक्यचतुष्टयस्यार्थः । हारीतोपि—

अभये प्रत्यये दाने उपस्थानेऽर्थदर्शने ।
पञ्चस्वेषु प्रकारेषु ग्राह्यो हि प्रतिभूर्बुधैः ॥

अभयं उपद्रवाकरणम् । उपस्थानमत्र बन्धद्रव्यार्पणमभिमतं न दर्शनं, तस्य स्वपदेनैवोपात्तत्वात् । पञ्चास्वित्यस्याघटनाच्च ।

व्यासोपि—

लेख्येऽकृते च दिव्ये वा दानप्रत्ययदर्शने ।
गृहीतबन्धोपस्थाने ऋणिद्रव्यार्पणे तथा ॥

प्रतिभुवो ग्राह्या इति शेषः । लेख्येऽकृते लेख्यादर्शने, दिव्ये वाऽकृत इत्यनुषङ्गः । एतदुक्तं भवति—विवादनिर्णयाय दृष्टमदृष्टं वा प्रमाणं यत्र कालव्यवधानेन भविष्यति तत्रापि प्रमाणाय प्रतिभूर्ग्राह्य इति । दानप्रत्ययदर्शनानि प्रागेव व्याख्यातानि । गृहीतबन्धोपस्थानं याचकत्वेन क्रेतुर्दर्शनाद्यर्थं वा उत्तमर्णानुज्ञयाऽधमर्णगृहीतस्य बन्धस्य पुनरर्पणम्। कात्यायनोपि—

दानोपस्थानवादेषु विश्वासशपथाय च ।
लग्नकं कारयेदेवं यथायोगं विपर्यये ॥

उपस्थानं दर्शनम् । वादो विवादः । तत्र प्रतिवाद्यानयनानन्तरं सभ्यैर्लग्नकग्रहणं साधितधनादिप्राप्त्यर्थं कार्यम् । दासादौ चोरत्वादिशङ्कायां विश्वासाय प्रतिभूः कार्यः । शपथाय लग्नकग्रहणं शपथविळम्बे कार्यम् । एवमन्यत्रापि विपर्यये कार्यस्य न्यायविषये यथासम्भवं लग्नकं कारयेदित्यन्वयः । ततश्च पूर्वाधिविक्रयदानेषु धूर्तदायादसम्भावनायां सत्यां गोप्याधावाधिपालाख्यः प्रतिभूर्भोग्याधौ भुञ्जापकाख्यो बहुमूल्याधावपि प्रसर्पकाख्यश्चानेनैव सङ्गृहीत इत्यवगन्तव्यम् ॥

इति स्मृतिचन्द्रिकायां प्रतिभूभेदाः.

अथ प्रतिभुवामसाधारणा विधयः.

तत्र कात्यायनः—

दर्शनप्रतिभूर्यस्तं देशे काले च दर्शयेत् ।

इति । यो यस्य दर्शनप्रतिभूरभूत् स यत्र देशे काले च धनिकस्य तद्दर्शनापेक्षा तत्र तं दर्शयेदित्यर्थः । दार्शितश्चेत् प्रातिभाव्यादसौ मोच्य इत्याह स एव—

यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ।

इति । यस्तु तत्र न दर्शयति तं प्रत्याह मनुः—

यो यस्य प्रतिभूस्तिष्ठेद्दर्शनायेह मानवः ।
अदर्शयन् स तं तस्य प्रयच्छेत्स्वधनाद्दणम् ॥

ऋणमत्र सवृद्धिकं विवक्षितम् । प्रतिभूपुत्रदेयर्णेऽपि सवृद्धिकत्वस्मरणात् । यदा तु दर्शनीयः कुत्र गत इत्यज्ञातः तदा त्वाह बृहस्पतिः—

नष्टस्यान्वेषणे कालं दद्यात्प्रतिभुवे धनी ।
देशानुरूपतः पक्षं मासं सार्धमथापि वा ॥

सार्धमासादधिकं न दद्यात्, नियमार्थत्वाद्वचनस्य । अत एव कात्यायनः—

नष्टस्यान्वेषणार्थं तु देयं पक्षत्रयं परम् ।
यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ॥
काले प्रतीते प्रतिभूर्यदि तं नैव दर्शयेत् ।
स तमर्थं प्रदाप्यस्त्यात्प्रेते चैवंविधिस्स्मृतः ॥

इति । परं परमावधिरूपम् । प्रतीते प्रतिपन्नेऽन्वेषणार्थं कल्पित इति यावत् । तमर्थं दर्शनीयाद्यल्लभ्यम् । एवंविधिः स तमर्थं प्रदाप्यस्त्यादिति विधिः । यदि प्रतिभुवा दर्शनीयो दैवकृते राजकृते वा निमित्ते असति न दर्शितः तदैव प्रागुक्तो विधिरित्याह स एव—

दर्शने प्रतिभूर्यस्तु देशे काले न दर्शयेत् ।
निबन्धमावहेत्तत्र दैवराजकृताद्ऋते ॥

निबन्धं देयद्रव्यम् । आवहेत् धनिने प्रापयेत् । दैवकृतं दीर्घरोगज्ञातिमरणादि, राजकृतं आसेधनबन्धनादि । अन्येषां तु केषाञ्चित्प्रतिभुवां विधिमाह नारदः—

ऋणिष्वप्रतिकुर्वत्सु प्रत्यये चाथ हापिते ।
प्रतिभूस्तद्धनं दद्यादनुपस्थापयंस्तथा ॥

ऋणिष्वप्रतिकुर्वत्स्विति दानप्रतिभूविषयम् । प्रत्यये चाथ हापिते इति प्रत्ययप्रतिभूविषयम् । अनुपस्थापयन्निति कथञ्चिदधमर्णगृहीतबन्धोपस्थानप्रतिभूविषयम् । अप्रतिकुर्वत्सु शाठ्येन निर्धनत्वादिना वा ऋणमददत्सु । प्रत्यये हापिते विश्वासे व्यभिचरिते । अनुपस्थापयन् उत्तमर्णपार्श्वस्थमाधिं कथंचिदधमर्णगतं पुनरुत्तमर्णसमीपस्थमकुर्वन् । पितामहोपि—

आधिपालकृतस्त्वाधिः मितकालोपलक्षितः ।
न चेत्स धनिने दत्तः तस्याधेस्तैस्समर्पणम् ॥

अचिरेण ऋणी स्वापराधादिनाऽन्याक्रान्तं यदि नाधिमर्पयति तदाऽस्माभिराधिस्समर्प्यत इति वदद्भिर्यैः प्रतिभूभिर्य आधिरर्पणीयतयाऽङ्गीकृतः, तस्य ऋणिकेनासमर्पितस्य तैस्समर्पणं कार्यमित्यर्थः। तैरिति बहुवचनमेकत्वादिसंख्योपलक्षणार्थं, अत एव हारीतः—

विश्वासार्थं कृतस्त्वाधिर्न प्राप्तो धनिना यदा ।
प्रापणीयस्तदा तेन देयं वा धनिने धनम् ॥

तेन आधिपालेनेत्यर्थः। यदा प्रापयितुमशक्यं तदैव द्वितीयः पक्षः। बहुमूल्याधावधमर्णायाधिप्रत्यर्पणप्रतिभूर्यः तमपि प्रत्याह स एव—

खादको वित्तहीनश्चेल्लग्नको वित्तवान्यदि ।
मूल्यं तस्य भवेद्देयं न वृद्धिं दातुमर्हति ॥

खादको बन्धभक्षकः बहुमूल्याधिनाशको धनिक इति यावत्। मूल्यं बहुमूल्यस्याधेर्मूल्यम्। साक्षात्प्रतिभूरप्यत्र वृद्धिं दातुं नार्हति। खादकेनाप्यत्र 'मूल्येन तोषयेदेनं' इति वचनान्मूल्यमात्रमेव देयम्। एवमवशिष्टप्रतिभुवामपि स्मृत्यन्तरेषु देयद्रव्यविधयो द्रष्टव्याः। प्रत्यये लेख्ये दिव्यदर्शने चाकृते सति 'ऋणं दाप्याः प्रतिभुवः' इत्यादिदापनाविधायकस्मृत्यन्तराद्वा उन्नेयाः, तुल्यन्यायाद्वा कल्पनीयाः। तथाहि—ऋणिद्रव्यार्पणप्रतिभूरप्रतिकुर्वति ऋणिके ऋणद्रव्यमर्पयेत्। अभयप्रतिभूर्भयोपस्थितौ तत्प्रतीकारमाचरेत्। प्रमाणप्रतिभूः प्रमाणा-

करणे विवादास्पदं धनं दद्यात्। विवादप्रतिभूरप्रतिकुर्वति वादिनि साधितधनं दण्डधनं च दद्यात्। दासाद्यपहृतं पुनरलब्धं चेत् विश्वासप्रतिभूर्मूल्यद्वारेण दद्यादितराद्यास्तत्र तत्र कल्पनीयाः ॥

इति स्मृतिचन्द्रिकायां प्रतिभुवामसाधारणबिधिः.

अथ प्रतिभूपुत्रादीनां विधयः.

तत्र याज्ञवल्क्यः—

दर्शनप्रतिभूर्यत्र मृतः प्रात्ययिकोपि वा।
न तत्पुत्रा ऋणं दद्युः दद्युर्दानाय यः स्थितः ॥

प्रात्ययिकः प्रत्ययप्रतिभूः, तस्मिन्मृते दर्शनप्रतिभुवि च तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः। दानप्रतिभुवि तु मृते तस्य पुत्राः पूर्वोक्तमृणं दद्युरित्यर्थः। यदा तु ऋणं जीवनशालिनः पूर्वोक्ताः प्रतिभुवो न दद्युः, मृतस्य दानप्रतिभुवः पुत्राश्च तदा ते दापनीया इति राज्ञो विधिमाह स एव—

आद्यौ तु वितथे दाप्यावितरस्य सुता अपि।

अपिशब्दाद्दानप्रतिभूरपि जीवनदशायां विसंवादे दाप्य इति दर्शयति। दर्शितं च साक्षादेव बृहस्पतिना—

आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम्।
उत्तरौ तु विसंवादे तौ विना तत्सुतौ तथा ॥

आद्यौ दर्शनप्रत्ययप्रतिभुवौ । वितथे अहमेनं दर्शयिष्यामि साधुरेष इत्येवंविधयोः प्रतिभूवाक्ययोर्मिथ्यात्वे । उत्तरौ दानर्णिद्रव्यार्पणप्रतिभुवौ । विसंवादे शाठ्यादिना धने ऋणिकेनाप्रतिदत्ते । तौ विना उत्तरयोः प्रवासे मरणे वा जात इत्यर्थः । एतदुक्तं भवति—ऋणं वाऽन्यद्वा धनादिकमहं तव दास्यामीत्येवं प्रतिभुवा यत्राङ्गीकृतं तत्र प्रतिभूर्दाप्यः, तस्याभावे तत्पुत्रो वा दाप्यः । अन्यत्र तु प्रतिभूरेवेति । एवंच प्रमाणप्रतिभुवां त्वेवमनङ्गीकारात् प्रमाणप्रतिभुव एव दाप्याः, न पुत्राः । विवादप्रतिभुवा तु साधितधनं दण्डधनं च दास्यामीत्यङ्गीकृतत्वाद्दानप्रतिभूवत् सति सम्भवे स एव दाप्योऽन्यथा तु तत्पुत्र इत्यवगन्तव्यम् । अत एव व्यासः—

विप्रत्यये लेख्यदिव्यदर्शने चाकृते सति ।
ऋणं दाप्याः प्रतिभुवः पुत्रं तेषां न दापयेत् ॥
दानवादप्रतिभुवौ दाप्यौ तत्पुत्रकौ तदा ।

इति । विप्रत्यये वितथे प्रत्यये प्रत्ययप्रतिभूर्दाप्य इत्यर्थः । एवमन्येषामभयगृहीतबन्धोपस्थापनादिप्रतिभुवामङ्गीकारानङ्गीकारप्रकारमालोच्य प्रत्ययप्रतिभूवद्दानप्रतिभूवद्वा दापनविधय ऊह्याः । यत्पुनर्मनुना 'प्रातिभाव्यं वृथादानं' इत्याद्यभिधाय 'न पुत्रो दातुमर्हति' इत्युक्तं, तत् दर्शनप्रतिभूविषयं यतोऽनन्तरमाह स एव—

दर्शनप्रातिभाव्ये तु विधिस्स्यात्पूर्वचोदितः ।

इति । पूर्वश्लोके चोदितः 'प्रातिभाव्यं न पुत्रो दातुमर्हति' इति दर्शनप्रातिभाव्यविषये ज्ञेय इत्यर्थः । तत्र विषये क्वचित्तस्यापवादमाह कात्यायनः—

गृहीत्वा बन्धकं यस्तु दर्शनप्रतिभूः स्थितः ।
विभाव्य वादिना तत्र दाप्यस्स्यात्तत्सुतोपृच्यणम् ॥

स्वविस्रम्भार्थमधमर्णादर्थं गृहीत्वा यो दर्शनप्रतिभूत्वमापद्य स्थितः संस्थितो मृत इति यावत् । तस्य सुतो वादिना धनिना ऋणिकार्थधारणनिबन्धनं प्रातिभाव्यमिति विभाव्य याच्यमानः प्रातिभाव्यागतमृणं दाप्य इत्यर्थः । यद्यपि तत्सुतग्रहणा दर्शनप्रतिभूसुतविषयोऽयमपवादः, न प्रमाणप्रतिभूसुतविषय इति प्रतिभाति, तथाऽपि प्रतिभूसुतदापने प्रमीतस्य पितुरधमर्णार्दर्थग्रहणपूर्वकं प्रातिभाव्यमत्र विवक्षितं निमित्तं, न तु दर्शनप्रतिभूसुतत्वमपीत्यस्मादेव वचनादपवादोऽन्यत्रापि विवक्षितनिमित्तसद्भावे स्मृत एवेति मन्तव्यम् । विवक्षितनिमित्तद्योतनार्थमेव च मनुना प्रश्नोत्तरत्वेनापवादो दर्शितः—

अदातरि पुनर्दाता विज्ञातप्रकृतावृणम् ।
पश्चात् प्रतिभुवि प्रेते परीप्सेत्केन हेतुना ॥
निरादिष्टधनश्चेत्तु प्रतिभूस्स्यादलंधनः ।
स्वधनादेव तद्दद्यात् निरादिष्ट इति स्थितिः ॥

इति । अत्र पदार्थाः प्रथममुच्यन्ते–अदातरि दर्शयितरि, दाता

धनप्रयोक्ता विज्ञातप्रकृतौ प्रायेणायं किञ्चिद्गृहीत्वा कस्यचित् प्रतिभूर्भवतीति विज्ञातस्वभावे ऋणं प्रातिभाव्यागतमृणं परीप्सेल्लब्धुमिच्छेत् । वाक्यार्थस्तु—अदातरि विज्ञातप्रकृतौ प्रतिभुवि प्रेते पश्चात्तत्पुत्राद्दणं दाता 'न ततत्पुत्रा ऋणं दद्युः' इति शास्त्राविरुद्धेन केन हेतुना परीप्सेदिति। उत्तरश्लोक-व्याख्याऽप्येवं क्रियते—निरादिष्टं समर्पितं बन्धत्वेन धनं यस्यासौ निरादिष्टधनः। अलं पर्याप्तं बन्धत्वेनोपात्तं धनं यस्यासावलंधनः । निरादिष्टशब्देन समस्तेन निरादिष्टधनस्य दर्शनप्रतिभुवः पुत्रो लक्ष्यते। स्थितिः शास्त्रमर्यादा । वाक्यार्थस्तु—निरादिष्टधनोऽलंधनो दर्शनप्रतिभूर्मृतश्चेत्स्यान्निरादिष्टः स्वधनादेव तद्दणं दद्यादिति स्थितिरिति । अनेन-निरादिष्टधनत्वेनैव हेतुना परीप्सेदित्युत्तरमर्थादुक्तम् । अस्यैव वचनस्याध्याहारलक्षणाश्रयणं विहायार्थान्तरमुच्यते—निरादिष्टधनः प्रतिभूरलंधनश्चेत्स्यात् स एव निरादिष्टः स्वधनादेव दद्यादिति । अनिरादिष्टधनवदधमर्णं दर्शयन्न मुच्यते निरादिष्टधनः, किंतु दानप्रतिभूवद्दद्यादिति तात्पर्यार्थः। एतच्चार्थान्तरं देवस्वामिनोक्तम्। प्रतिभूसुतदेयविषये तु विशेषमाह व्यासः—

ऋणं पैतमाहं पौत्रः प्रातिभाव्यागतं सुतः ।
समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः ॥

सुतः प्रतिभूसुतः । समं मूलमात्रम् । तत्सुतौ पौत्रप्रतिभूसुतयो-

स्सुतौ। यत्तु मनुनोक्तं—

दानप्रतिभुवि प्रेते दायादानपि दापयेत्।

इति, तत्र दायादशब्दस्सुतेष्वेव व्यवतिष्ठते, अन्यथा सपिण्डमात्राभिधाने 'तत्सुतौ तु न दाप्याविति निश्चयः' इति पूर्वोक्तवचनविरोधापत्तेः,

प्रातिभाव्यागतं पौत्रैर्दातव्यं न क्वचिद्भवेत्।

इति बृहस्पतिवचनविरोधापत्तेश्च। अनेकप्रतिभूदेयविषये तु विशेषमाह याज्ञवल्क्यः—

बहवस्स्युर्यदि स्वांशैः दद्युः प्रतिभुवो धनम्।
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि॥

एकस्याधमर्णस्य छायां सकलधनदायकत्वरूपसादृश्यं प्रत्येकं विकल्पेनाश्रिताः एकच्छायाश्रिताः, तेषु यं याचते धनिकस्स सर्वं दद्यादित्यर्थः। धनिकरुच्याविशेषे तु 'समं स्यादश्रुतत्वात्' इति न्यायेनात्रापि स्वांशैर्दद्युः। एकच्छायाश्रितप्रतिभूसुते तु विशेषमाह कात्यायनः—

एकच्छायाश्रिते सर्वं दद्यात्तु प्रोषिते सुतः।
मृते पितरि पित्र्यंशं परर्णं न बृहस्पतिः॥

सर्वं परर्णमपि, न पित्र्यंशमात्रमित्यर्थः। न तु सर्वं सवृद्धिकमिति व्याख्येयम्,

पुत्रेणापि समं देयमृणं सर्वं तु पैतृकम्।

इति बृहस्पतिस्मरणात् । समं मूलमात्रऋणं प्रातिभाव्यागतं पैतृकम् । एतच्च धनिकेच्छायां 'प्रोषितस्य पुत्रो मह्यं दद्यात्' इत्येवंविधायां सत्यां सर्वदानविधानं द्रष्टव्यम् । असत्यां तु धनिकेच्छायां 'पित्र्यंशं अप्रवृद्धिकं प्रोषितपुत्रो दद्यात्' इति चावगन्तव्यम् । परंतु परस्य पितृव्यतिरिक्तस्य एकच्छायाश्रितस्य ऋणांशं पितरि मृते तत्सुतः सत्यामपि धनिकेच्छायां न दातुमर्हति, किंतु पित्र्यंशमवृद्धिकमेवेति बृहस्पतिर्ब्रूत इत्यर्थः । प्रतिभूदौष्ट्यविषये त्वाह पितामहः—

यो यस्य प्रतिभूर्भूत्वा मिथ्या चैव तु गच्छति ।
धनिकस्य धनं दाप्यो राज्ञा दण्डं च तत्समम् ॥
कुर्याच्चेत्प्रतिभूर्वादमृणिकार्थेऽर्थिना सह ।
सोपसर्गस्तदा दण्ड्यो विवादाद्द्विगुणं धनम् ॥

इति । सोपसर्गो विप्लवकारी ॥

इति स्मृतिचन्द्रिकायां प्रतिभूपुत्रादीनां विधयः.

अथ प्रतिभ्वादिदत्तप्रतिक्रियाविधयः.

तत्र कात्यायनः—

यस्यार्थे येन यद्दत्तं विवा (दा) देऽभ्यर्थितेन तु ।
साक्षिभिर्भावितेनैव प्रतिभूस्तमवाप्नुयात् ॥

यस्य प्रातिभाव्यं कारयितुः कृते येन प्रतिभुवा धनिकादि-

भिर्याचितेन साक्ष्यादिभिश्चान्यार्थमर्पितर्थोऽयमित्यवधृतेन यत्स्वकीयं सुवर्णपशुधान्यवस्त्रादिकं धनिकादिभ्यो दत्तं तत्सममेवार्थं प्रातिभाव्यकारयितुः सकाशात् स समाप्नुयादित्यर्थः। यत्तु याज्ञवल्क्येनोक्तम्—

प्रतिभूर्दापितो यत्र प्रकाशं धनिने धनम् ।
द्विगुणं प्रतिदातव्यमृणिकैस्तस्य तद्भवेत् ॥

इति, तद्धनिकपीडितप्रतिभूविषमम् । तथाच नारदः—

यं चार्थं प्रतिभूर्दद्याद्धनिकेनोपपीडितः ।
ऋणिकं तं प्रतिभुवे द्विगुणं प्रतिदापयेत् ॥

एतदपि प्रतिदानविलम्बविषयम् । तथाच कात्यायनः—

प्रातिभाव्यं तु यो दद्यात्पीडितः प्रतिभावितः ।
त्रिपक्षात् परतस्सोऽर्थं द्विगुणं लब्धुमर्हति ॥

प्रतिभावितः प्रतिभूत्वेन कारितः । त्रिपक्षात्प्राक् तु सममेव लब्धुमर्हतीत्यर्थोऽपि गम्यते । यद्यपि प्रायेण प्रीत्यैव प्रतिभूर्भवति, न च प्रीतिदत्ते वृद्धिरस्ति न च द्वैगुण्यं, एतावति काले धर्म्यं भवितुमर्हति । तथाऽपि वचनबलात् सर्वं भविष्यति । न हि वचनस्यातिभारोऽस्तीत्यवगन्तव्यम् । एवमुक्तो द्विगुणलाभो हिरण्यविषयः । पश्वादौ तु—

संततिः स्त्रीपशुष्वेव धान्यं त्रिगुणमेव च ।
वस्त्रं चतुर्गुणं प्रोक्तं रसश्चाष्टगुणः स्मृतः ॥

इति याज्ञवल्क्येन द्वैगुण्यापवादस्मरणात् ।

उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गुणा स्मृता ।

इत्यादेरुपलक्षणार्थमिदमुक्तं तद्भाष्यकृद्भिः, तेन शाकादौ पञ्चगुणादि देयम् । एवमुक्तानेकविधसवृद्धिकदानमृणिकाज्ञया दत्तविषयं, अन्यत्र तु दत्तसममेव देयम् । तथाचोचथ्यः—

प्रतिभ्वा प्रतिदत्तं यदपृष्टे ऋणिके धनम् ।
द्विगुणं न प्रतिभुवे प्रदेयमृणिकेन तत् ॥

प्रष्टुंयोग्यदेशकालस्थर्णिकादिविषयमेतत् । तेनान्यत्रापृष्टेऽपि ऋणिके नायं प्रतिषेधः, किंतु पृष्टतुल्यतैव । लग्नकालग्नकोपक्षयप्रतिक्रियां साधारणीमपि लग्नकोपक्षयप्रतिक्रियाविधिप्रसङ्गादत्रैवाह नारदः—

यस्य दोषेण यत्किञ्चिद्विनश्येत द्रियेत वा ।
वोढव्यं तद्भवेत्तेन यच्चाज्ञानविनाशितम् ॥

इति स्मृतिचन्द्रिकायां प्रतिभ्वादिदत्तप्रतिक्रियाविधयः.
प्रतिभूप्रकरणं समाप्तम्.

अथ वृद्धिविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र बृहस्पतिः—

वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधाऽन्यैः प्रकीर्तिता ।
षाड्विधाऽस्मिन् समाख्याता तत्त्वतस्तान् निबोधत ॥

अस्मिन् अस्मदीये धर्मशास्त्रे । कथं षड्विधत्वमित्यपेक्षिते स एवाह—

कायिका कालिका चैव चक्रवृद्धिरथापरा ।
कारिताऽथ शिखावृद्धिर्भोगलाभस्तथैव च ॥

किं पुनः कायिकादीनां स्वरूपमित्यपेक्षितेऽप्याह स एव—

कायिका कर्मसंयुक्ता मासग्राह्या तु कालिका ।
वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता ॥
प्रत्यहं गृह्यते या तु शिखावृद्धिस्तु सा स्मृता ।
गृहात्तोषश्शदः क्षेत्रात् भोगलाभः प्रकीर्तितः ॥

इति । गोघोटकादेराधीकृतस्य दोहनवाहनादिकः कायिको व्यापार एव यत्र वृद्धित्वेन कल्पितः सा कायिकेत्यर्थः । तथाच व्यासः—

दोह्यवाह्यक्रियायुक्ता कायिका समुदाहृता ।

इति । मासग्राह्या प्रतिमासं लभ्या वृद्धिः कालिका,

प्रतिमासं स्रवन्ती या सा वृद्धिः कालिकोरिता ।

इति नारदस्मरणात् । वृद्धेरपि प्रतिमासं मूलभावेन पुनर्वृद्धिश्चक्रवृद्धिः । ऋणिकेच्छया कृता वृद्धिः कारिता । 'इच्छाकृता कारिता स्यात्' इति स्मृत्यन्तरेऽभिधानात् । तेन छान्दसोऽयं स्वार्थ एव कारितेति णिच्प्रत्ययो द्रष्टव्यः । परप्रेरणया तु कारिता वृद्धिर्निषिद्धैव । तथाच कात्यायनः—

ऋणिकेन तु या वृद्धिराधिका सम्प्रकल्पिता ।
आपत्कालकृता नित्यं दातव्या कारिता तु सा ॥

अन्यथा कारिता वृद्धिर्न दातव्या कथञ्चन ।

इति । शास्त्रोक्तादधिका धनदातृप्रतिलोभनार्थं स्वयं कल्पिता कारिताख्या दातव्या, न पुनरनेवंविधा धनिकेन कारिता दातव्येत्यर्थः । प्रतिदिनं लभ्या तु शिखासादृश्याच्छिखावृद्धिरिति व्यपदिश्यते । किं पुनश्शिखासादृश्यं वृद्धेरित्यपेक्षिते बृहस्पतिरेवाह—

शिखेव वर्धते नित्यं शिरश्छेदान्निवर्तते ।
मूले दत्ते तथैवैषा शिखावृद्धिस्ततः स्मृता ॥

प्रसहं गृह्यत इति सम्प्रतिपन्नदिनसङ्ख्याविशिष्टवृद्धिग्रहणोपलक्षणार्थम् । अत एव कात्यायनः—

एकान्तेनैव वृद्धिं तु शोधयेद्यत्र चार्णिकम् ।
प्रतिकालं ददात्येव शिखावृद्धिस्तु सा स्मृता ॥

गृहात्तोष इत्यादेरयमर्थः—निवासनिबन्धनः गृहसकाशात् सन्तोषः । क्षेत्रात् सम्भूतं धान्यादिफलं च भोगलाभाख्यो वृद्धिभेद इति। गृहक्षेत्रग्रहणं स्थावरात्मकभोग्याधेरप्युपलक्षणार्थम्। अत एव कात्यायनः—

आधिभोगस्त्वशेषो यो वृद्धिं तु परिकल्पितः ।
प्रयोगो यत्र चैवं स्यादाधिभोगस्स उच्यते ॥

अशेषः स्थावरमात्रसम्बन्धीत्यर्थः ।

इति स्मृतिचन्द्रिकायां वृद्धिभेदाः.

अथ वृद्धिपरिमाणनियमाः

तत्र मनुः—

अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकश्शते ।

इति । निष्कशते प्रयुक्ते मासस्य सपादनिष्कपरिमितां वृद्धिं वाधुषिको वृद्ध्यर्थं धनप्रयोक्ता गृह्णीयादित्यर्थः । एतत्सबन्धकविषयं,

अशीतिभागो वृद्धिस्स्यान्मासेमासि सबन्धके ।

इति, याज्ञवल्क्यस्मरणात् । आधिग्रहणपूर्वके धनप्रयोगे यावद्धनं प्रयुक्तं तस्याशीतितमो भागः प्रतिमासं वृद्धिस्स्यादित्यर्थः । यत्तु मनुना विकल्पत्वेनोक्तं 'द्विकं शतं वा गृह्णीयात्' इति, तद्व्यवस्थितविकल्पत्वेनोक्तम् । यत आह व्यासः—

सबन्धे भाग आशीतः षाष्टो भागस्सलग्नके ।
निराधाने द्विकशतं मासलाभ उदाहृतः ॥

अशीतिषष्टिभागावाधिप्रतिभूसहितयोः प्रयोगयोः प्रतिमासं यथाक्रमेण ग्राह्यौ, एतद्रहिते तु प्रयोगे पञ्चाशद्भागः प्रतिमासं ग्राह्य इत्यर्थः । द्वे दीयते वृद्धिरस्मिन् शत इति द्विकशतम् । अनेन वचोभङ्ग्या पञ्चाशद्भाग उक्तः । ब्राह्मणाधमर्ण एवायं द्विकं शतमिति नियमः, क्षत्रियाद्यधमर्णे अन्यथा नियमः । तथाच मनुः—

द्विकं त्रिकं चतुष्कं च पञ्चकं च शतमेव वा ।
मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः ॥

अबन्धकालग्नकप्रयोगविषयमेतत्, द्विकशतस्थाते वर्णान्तरे त्रिक शतादिविधानात्। अत एव याज्ञवल्क्यः—

वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा।

इति। अन्यथा बन्धकलग्नकराहित्य इत्यर्थः। तथाऽधमर्णविशेषे प्रतिमासं वृद्धेः परिमाणान्तरं द्विकशतादिस्थाने स एवाह—

कान्तारगास्तु दशकं सामुद्रा विंशकं शतम्।

इति। वृद्ध्या धनं गृहीत्वा ये दुर्गवर्त्मगन्तारः ते प्रतिमासं दशकं शतं दद्युः। ये तु समुद्रगन्तराः तेऽपि विंशकं शतं दद्युरित्यर्थः। एवमुक्ताशीतिभागादिशास्त्रीयवृद्धिपरिमाणेन सह विकल्पमधमर्णाभ्युपगतवृद्धिपरिमाणस्याह स एव—

दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु।

इति। सर्वे ब्राह्मणादयोऽधमर्णास्स्वाभ्युपगतां वृद्धिं सर्वासु जातिषूत्तमर्णभूतासु दद्युर्वेत्यर्थः। अयं च विकल्पः कारितायामेव वृद्धौ, अन्यत्र तु शास्त्रतः परिमाणनियमविधिरित्ययं स्वकृतपक्ष एव। पश्वादिद्रव्यस्य तु वृद्ध्यर्थं प्रयुक्तस्य तदीया सन्ततिरेव वृद्धिरित्याह स एव—'सन्ततिस्तु पशुस्त्रीणाम्' इति। स्त्रियो दास्यः। सन्तत्यभावे तु प्रयुक्तस्य पश्वादेः पुष्टिरविनाशो वा लाभ इति॥

इति स्मृतिचन्द्रिकायां वृद्धिपरिमाणनियमाः॥

अथाकृतवृद्धिविधयः.

तत्र विष्णुः—

यो गृहीत्वा ऋणं पूर्वं श्वो दास्यामीति सामकम् ।
न दद्याल्लोभतः पश्चात्तदहा वृद्धिमाप्नुयात् ॥

सममेव सामकं अवृद्धिकमिति यावत् । एतदुक्तं भवति— प्रतिदानकालावधिमङ्गीकृत्य गृहीतमवृद्धिकमपि ऋणमवधेरनन्तरकालादारभ्य वर्धत एवेति । वयस्यादेरुपभोगाद्यर्थमार्पितविषये त्वाह नारदः—

न वृद्धिः प्रीतिदत्तानां स्यादनाकारिता क्वचित् ।
अनाकारितमप्यूर्ध्वं वत्सरार्धाद्विवर्धते ॥

अनाकारिता अकृता । प्रीतिदत्तानां प्रतियाचनप्रतिदानदिंनानिर्देशशून्यानामिति शेषः । अनाकारितमपीत्यादेरयमर्थः— प्रतिदानदिनानिर्देशे तु तद्दिनमारभ्य सषण्मासादूर्ध्वं वर्धते प्रीतिदत्तमपीति । गृहीतपण्यमूल्यानर्पणविषये तु कात्यायनः—

पण्यं गृहीत्वा यो मूल्यमदत्त्वैव दिशं व्रजेत् ।
ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात् ॥

अप्रतियाचितविषयमेतत् । किमत्र वृद्धेः परिमाणं? उच्यते— अधमर्णाद्यङ्गीकारायत्तपरिमाणस्यात्रासम्भवादन्यस्य च पुरुषबुद्धिकल्पितस्य शास्त्रबाह्यस्यायुक्तत्वाच्छास्त्रोक्तमेव परिमाणं ग्राह्यं, तच्च पूर्वस्मिन् प्रकरणे दर्शितं 'अशीतिभागं' इत्यादिना ।

अत एव विष्णुना 'वृद्धिं दद्यादकृतामपि संवत्सरातिक्रमे यथाऽभिहितम्' इत्युक्तम्। यथाऽभिहितं धर्मशास्त्र इति शेषः। न च यथा प्रत्यर्थिना मध्यस्थेनार्थिना वाऽभिहिता तथा दद्यादिति यथाऽभिहितमिति वचनार्थः कस्मान्न स्यादिति वाच्यं, यत आह मनुः—

कृतानुसारादधिका व्यतिरिक्ता न सिध्यति।
कुसीदपथमाहुस्तं पञ्चकं शतमर्हति॥

इति। कुसीदपथमाहुरित्युच्छास्त्रवृद्धिं निन्दयति। शास्त्रकृतवृद्ध्यनुसारो हि यो वृद्धिग्रहणे लौकिकानां समयाचारः स कृतानुसारः, तस्मादधिका वृद्धिरुत्तमर्णादेरकृतवृद्धौ न सिध्यति, यतस्सा व्यतिरिक्ता धर्मशास्त्रबाह्येत्यर्थः। अत एव कुसीदपथमाहुः तन्न धर्मपथमिति निन्दाऽप्युपपन्ना। 'पञ्चकं शतमर्हति' इत्यस्य विषयविशेषो वक्ष्यते। यत्तु वैष्णववचने संवत्सरातिक्रम इत्युक्तं, तद्याचितकविषयम्। तथाच कात्यायनः—

यो याचितकमादाय तमदत्वा दिशं व्रजेत्।
ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्॥

इति। कृतोद्धारं याचितकमादायेत्यर्थः। प्रवासाभावे तु प्रतियाचनकालादारभ्य याचितकस्य वृद्धिमाह स एव—

स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितं क्वचित्।
तत्ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत्॥

न दद्याद्याचितमिति प्रकृतेन सम्बन्धः । ततः प्रतियाच नकालादारभ्येत्यर्थः । प्रीतिदत्ते च प्रतिमाचिते याचनकालादारभ्य वृद्धिविशेषनियमार्थमेव वचनान्तरमारब्धं तेनैव—

प्रीतिदत्तं न वर्धेत यावन्न प्रतियाचितम् ।
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम् ॥

निक्षेपादाबपि याच्ययानमदत्तमेव वर्धते इत्याह स एव—

निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च ।
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम् ॥

क्रयविक्रयशब्देन पण्यमूल्यं लक्ष्यते । यत्तु पूर्वप्रदर्शिते मानवे वचने 'पञ्चकं शतमर्हति' इति सामान्येनोक्तं तत्प्रतियाचितप्रीतिदत्तादिविषयं मन्तव्यम् ।

इति स्मृतिचन्द्रिकायामकृतवृद्धिविधयः ॥

अथ अकृतवृद्ध्यपवादः.

तत्र नारदः—

पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः ।
वृथादानाक्षिकपणा वर्धन्ते नाविवक्षिताः ॥

पण्यस्य वस्त्रादेर्मूल्यं पण्यमूल्यम् । वृथादानं नर्तक्यादिभ्यः प्रतिश्रुतम् । आक्षिकपणो द्यूतद्रव्यम् । उक्तेषु सत्सु अकृतवृद्धिर्नास्तीत्यर्थः । अत्र पण्यमूल्यस्य वृद्धिः प्रवासप्रतियाच-

नाभावे। न्यासस्य त्ववृद्धिः प्रतियाचनाभावे यथास्थितस्यैव। अतो न पूर्वप्रकरणोक्तवचनविरोधापत्तिः। संवर्तोऽपि—

न वृद्धिः स्त्रीधने लाभे निक्षेपे च यथास्थिते।
संदिग्धे प्रातिभाव्ये च यदि न स्यात्स्वयंकृता॥

लाभे न वृद्धिः। यथास्थिते इति वदन् निक्षेपे व्यक्तयन्यत्वादिकरणे वृद्धिः भवतीति दर्शयति। संदिग्धे धने केनचित् संदेहेन दातुमनुचितत्वेन स्थिते। प्रातिभाव्ये ऋणिद्रव्यार्पणादौ साक्षात्प्रतिभूविषयेऽपि। प्रतियाचनादेः परस्तादपि न वृद्धिः। 'यदि न स्यात् स्वयंकृता' इति वदन् स्त्रीधनादावपि कृता चेद्वृद्धिः देयैवेति दर्शयति। कात्यायनोपि—

चर्मसस्यासवद्यूतपण्यमूल्ये च सर्वदा।
स्त्रीशुल्के च न वृद्धिस्स्यात् प्रातिभाव्यागतेषु च॥

सर्वदेति वदन् प्रतियाचनादेः परस्तादपि नास्त्यकृता वृद्धिरिति दर्शयति। पण्यमूल्ये वचनान्तराविरोधः पूर्ववदवसेयः। यद्यपि सर्वदेति सर्वशेषः प्रतिभाति, तथाऽप्याविरोधाय पण्यमूल्यशेषता मन्तव्या। व्यासोपि—

प्रातिभाव्यं भुक्तबन्धमगृहीतं च दित्सवः।
न वर्धते प्रपन्नस्य दमश्शुल्कं प्रतिश्रुतम्॥

भुक्तबन्धग्रहणमुपभुक्तगोप्यधौ निक्षेपोपभोग इव वृद्धिर्माभूदित्येवमर्थम्। अर्थस्तु गौतमेन स्पष्टीकृतः—'भुक्ताधिर्न वर्धे-

त वस्त्रालङ्कारादिः' इति । अगृहीतं च दित्सव इति कृतवृद्ध्यपवादोऽपि वृद्ध्यभावकथनप्रसङ्गादकृतवृद्ध्यपवादैस्सहोक्तः । तस्यार्थो याज्ञवल्क्येन स्पष्टीकृतः—

दीयमानं न गृह्णाति प्रयुक्तं यस्स्वकं धनम् ।
मध्यस्थस्थापितं तत्तु वर्धते न ततःपरम् ॥

न गृह्णाति रक्षणाक्षमत्ववृद्धिलोलुपत्वादिहेतुनेति शेषः । मध्यस्थस्थापनाभावे स्थापितस्यापि याच्यमानस्याप्राप्तौ पूर्ववद्वर्धत एव, प्रतिदानोद्यमस्य कृतत्वासंभवात् ।

इति स्मृतिचन्द्रिकायामकृतवृद्ध्यपवादः ॥

अथ वृद्धिग्रहणप्रतिषेधाः.

तत्र मनुः—

नातिसांवत्सरीं वृद्धिं न चादृष्टां विनिर्हरेत् ।
चक्रवृद्धिं कालवृद्धिं कारिता कायिका च या ॥

अत्राद्यपादार्थं केचिदेवमाहुः—आ द्वैगुण्याद्वृद्धिग्रहणाविधानात् वत्सरादूर्ध्वमपि वृद्धिग्रहणे दोषाभावादभ्युदयार्थी चेत् संवत्सरादूर्ध्वं या वृद्धिः तां न विनिर्हरेत् न गृह्णीयादिति । अयं तावदर्थो ग्राह्यः, विरोधाभावात् । अन्ये तु—संवत्सराधिकां वृद्धिं न गृह्णीयात्, यदि वृद्धिमहत्त्वेन तावदेव द्वैगुण्यं भवेदित्यध्याहृत्यार्थमाहुः, ते मन्दाः—'कुसीदवृद्धिर्द्वैगुण्यान्नास्येति'

इत्यनेन फलतो गतार्थत्वापत्तेः, वत्सरमात्रेण द्वैगुण्णापादकवृद्धिमहत्त्वस्य निषिद्धस्यानुपपत्तेश्च। अपरे पुनरेवं व्याचक्षते—यत्राधमर्णे प्रतिमासं पञ्चकं शतं गृह्णीयादिति या वृद्धिः प्रागुक्ता सा ब्राह्मणाद्यधमर्णके कथञ्चिदङ्गीकारवशात् गृह्यमाणा संवत्सरं यावद्ग्रहीतव्या न ततःपरमिति। अयमप्यर्थोस्तु, प्राक्तनार्थवद्बहुदोषाभावात्। 'न चादृष्टां विनिर्हरेत्' इत्यस्यायमर्थः—धर्मशास्त्रेष्वदृष्टां च षट्कं शतमिसेवंभूतां स्वबुद्धिकल्पितां वृद्धिं न गृह्णीयादिति॥

ननु—

कृतानुसारादधिका व्यतिरिक्ता न सिध्यति।

इत्यनेन गतर्थामिदं वाक्यमेवंव्याख्यायमाने स्यात्। अस्तु व्यर्थोऽनुवादः गत्यन्तराभावादिति केचिदाचक्षते। दार्ढ्यार्थमुक्तस्यैव पुनराभिधानमित्यन्ये मन्यन्ते। वस्तुतस्तु—अनेन निषेधे कृतेऽप्यकृतवृद्धौ वृद्धिसम्प्रतिपत्त्यभावात् शास्त्रोक्तैव वृद्धिर्सिध्याति, नान्या सम्प्रतिपत्तिमात्रलभ्या वृद्धिरिति कथनार्थं तद्वचनमित्यगतार्थतैव। 'न विनिर्हरेत्' इति पदद्वयमुत्तरार्धपदैरनुषङ्गात् सम्बध्यते। ततश्चायमर्थः—या चक्रवृद्ध्यादिभेदेन चतुर्विधा वृद्धिः तां न गृह्णीयादिति। एतदुक्तं भवति—चक्रवृद्ध्यादयः स्वरसतो न ग्राह्या इति॥

नन्वशीतिभागादिवृद्धिरपि प्रतिमासं ग्राह्या कालिका भवति, सा च स्वरसतो ग्राह्या, तथाऽनतिभूरिपरिमाणा कारिताऽपि

स्वरसतो ग्राह्यैव । तथा कायिकाऽप्यतिपीडारहिता । तेन तासां कथं प्रतिषेधः? उच्यते— केन वोक्तं तासां प्रतिषेध इति। कासां तार्हि प्रतिषेधः? उच्यते—यथा,

पञ्चमाषास्तु विंशत्या एवं धर्मो न हीयते ॥

इति वासिष्ठवचनविहिता वृद्धिः, 'वसिष्ठविहितां वृद्धिम्' इति मानववचनान्तरे प्रतिषिध्यते । एवं 'कुसीदवृद्धिर्धर्म्या विंशतेः पञ्चमाषिकी मासम्' इति गौतमेन विहिता कालिकाऽत्र प्रतिषिध्यते, कायिकाऽप्यतिपीडावती तेन न कश्चिद्दोषः। ननु—गौतमोक्ता कालिका धर्म्यत्वेन तेन विहिता कथं प्रतिषिध्यते? यथा 'एवं धर्मो न हीयते' इति धर्म्यत्वेनापि वसिष्ठविहिता प्रतिषिद्धा तथैव प्रतिषिध्यते । अत्यर्थाधिकपरिमाणत्वेनाधर्म्यत्वात् । अधर्म्यत्वं चोक्तं मनुना 'वित्तविवर्धिनीम्' इति वदता । कथं तार्हि वसिष्ठगौतमयोः धर्म्यत्वेनाभिधानं? पञ्चकशतवच्छूद्राधमर्णविषयत्वेनेति ब्रूमः । एवञ्च शूद्रेतराधमर्णविषयत्वे अधर्म्यत्वात्तत्रैव कथञ्चिदङ्गीकारवशात् प्राप्ता मनुना प्रतिषिद्धेति मन्तव्यम् ।

केचित्तु त्रैवार्णिकेष्वापि धर्म्यत्वमापादयितुं गौतमादिवचनमेवं व्याचक्षते—

माषो विंशतितमो भागः पणस्य परिकीर्तितः।

इति स्मृत्युक्तो माषः कार्षापणस्य विंशतितमो भागः पञ्चमाषिकीत्यत्र परिगृह्यते । तथाच सति कार्षापणविंशतेः प्रयु-

क्ता या पञ्चमाषिकी वृद्धिरशीतिभागवृद्धेरीषदधिकेति कुतस्त्या वृद्धेरधर्म्यतेति व्याख्याद्वयमप्ययुक्तम् । वसिष्ठवचने तावदुभयथा व्याख्यानेऽपि 'वासिष्ठाविहिताम्' इत्यादिमनुवचन विरोधो दुर्वारः । 'धर्म्यत्वे वित्तवर्धिनीमुत्सृजेत्' इत्यस्याघटनात् । गौतमवचने तु 'एवं षोडशमासैर्द्विगुणा भवतीति' इति स्ववाक्यशेषविरोधो दुष्परिहरः। तथाहि प्रथमव्याख्यातृणां व्याख्याने षोडशमासैः कार्षापणचतुष्कं भवति । द्वितीयव्याख्यातृणां तु सुवर्णपञ्चकं भवति, तस्माद्व्याख्याद्वयमप्यसम्बद्धम् । मत्पक्षे पुनर्न वाक्यशेषविरोधः, व्यावहारिकनिष्कविंशतेः प्रसिद्धमाषपञ्चकवृद्धौ षोडशमासैः द्वैगुण्यसिद्धेः । किन्तु धर्म्यत्वविरोधः, स चास्माभिः परिहृतः तेन चोद्यानवकाशः। यत एव 'स्वरसतो न ग्राह्या' इति प्रतिषेधो न पुनस्सर्वथा न ग्राह्या इति, अत एव चक्रवृद्धौ कथञ्चिदङ्गीकृतायां धनिकदोषात् क्वचित्तस्यालाभमाह स एव—

चक्रवृद्धिं समारूढो देशकालव्यवस्थितः ।
अतिक्रामन् देशकालौ न तत्फलमवाप्नुयात् ॥

अतिक्रामन् देशकालौ यदि परिभाषितं देशं कालं वाऽतिक्रामति न सन्निहितस्तत्र भवति ततः स्वदोषान्न तत्फलमवाप्नुयात् न तां वृद्धिं लभत इत्यर्थः । फलप्रतिषेधान्मूलं लभते, यथोक्तप्रतिषेधादन्यां वृद्धिं लभेतेति गम्यते । अन्येऽपि 'ब्राह्मणस्य न वार्धुषम्' इत्याद्या वृद्धिग्रहणप्रतिषेधा

नारदाद्युक्ताः सन्ति । ते त्वाह्निकमध्य एवापवृत्तिप्रकरणे प्रदर्शिता इतीहास्माभिर्न प्रदर्शिताः ॥

इति स्मृतिचन्द्रिकायां वृद्धिग्रहणप्रतिषेधाः ॥

अथ वृद्ध्युपरमावधिनिरूपणम्.

तत्र नारदः—

ऋणानां सार्वभौमोऽयं विधिर्वृद्धिकरः स्मृतः ।
देशाचारस्थितिस्त्वन्या यत्रर्णमवतिष्ठते ।
आपदं निस्तरेद्वैश्यः कामं वार्धुषिकर्मणा ॥

इत्यादिना स्मृतः ऋणिनां वृद्धिकरो विधिः सर्वत्र भूमावपीष्टः । यत्र द्वैगुण्यादावृणं वर्धमानमवतिष्ठते तत्र देशाचारस्थितिः देशान्तराचारस्थितितोऽन्येत्यर्थः । कथमन्येत्यपेक्षिते स एवाह—

द्विगुणं त्रिगुणं चैव तथाऽन्यस्मिन् चतुर्गुणम् ।
तथाऽष्टगुणमन्यस्मिन् देयं देशेऽवतिष्ठते ॥

देयमृणं वर्धमानं क्वचिद्देशे द्विगुणं क्वचित्त्रिगुणं क्वचिच्चतुर्गुणं वा यावद्वर्धत इत्यर्थः । एवं प्रयुक्तद्रव्यभेदादपि भेदव्यवस्थानम् । तथाच बृहस्पतिः—

हिरण्ये द्विगुणा वृद्धिः त्रिगुणा वस्त्रकुप्ययोः ।
धान्ये चतुर्गुणा प्रोक्ता शदवाह्यलवेषु च ॥

उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गुणा स्मृता ।
लवणस्नेहमद्येषु वृद्धिरष्टगुणा मता ॥
गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिके ।

इति । कुप्यं त्रपुसीसकम् । शदः क्षेत्रफलं, तच्च गोबलीवर्द-न्यायाद्धान्यव्यतिरिक्तं पुष्पमूलफलादिकम् । वाह्यो बलीवर्द-तुरगादिः । लवो मेषलोमचमरीकेशादिः । स्नेहो मधू-च्छिष्टादिः । 'प्रयुक्ते चिरकालिके' इति पदद्वयं सप्तम्ये-कवचनान्तेन हिरण्यादिपदेन सम्बध्यते । शदवाह्यलवेषु चिर कालिकेष्वित्यध्याहारः । एवं लवणस्नेहमद्येष्वित्यत्राप्यध्याहारः । द्वैगुण्यहेतुभूतं चिरकालमुदाहर्तुमशीतिभागवृद्ध्या प्रयुक्तं धनमष्ट-मासाधिकषड्वत्सरे पूर्णे द्वैगुण्यमापद्यत इत्याह स एव—

अशीतिभागो वर्धेत लाभे द्विगुणतामियात् ।
प्रयुक्तं सप्तभिर्वर्षैस्त्रिभागोनैर्न संशयः ॥

लाभे प्रतिमासमशीतिभागात्मके सङ्गृह्यमाणे हिरण्यवद्वज्रादाव-पि द्विगुणैव वृद्धिः । तथाच वसिष्ठः—

वज्रशुक्तिप्रवाळानां हेम्नश्च रजतस्य च ।
द्विगुणा त्विष्यते वृद्धिः कृता कालानुसारिणी ॥

वज्रसाहचर्याच्छुक्तिरिति मुक्ताफलं लक्षणयोच्यते । कात्याय-नेन तु 'मणिमुक्ताप्रवाळानाम्' इति वाचकशब्देनोक्तं, तद-प्यत्र लक्षणानिश्चये कारणम् । कुप्यवत्ताम्रादावपि त्रिगुणैव वृद्धिः । तथाच स एव—

ताम्रायःकांस्यरीतीनां त्रपुणस्सीसकस्य च ।
त्रिगुणा तिष्ठते वृद्धिः कालाच्चिरकृतस्य तु ॥

बीजवत् कार्पासेऽपि षड्गुणैव वृद्धिः । तथाच व्यासः—

शाककार्पासबीजेक्षौ षड्गुणा परिकीर्तिता ।

इति । स्नेहवद्रसस्याप्यष्टगुणैव वृद्धिः । तथाच स एव—

वदन्त्यष्टगुणान् काले मद्यस्नेहरसासवान् ।

इति । कात्यायनोपि—

तैलानां चैव सर्वेषां मद्यानामथ सर्पिषाम् ।
वृद्धिरष्टगुणा ज्ञेया गुडस्य लवणस्य च ॥

गुडवत्तुलामेयासितादावप्यष्टगुणैव वृद्धिः । तथाच वसिष्ठः—
'तुलाधृतमष्टगुणम्' इति । यत्पुनस्तेनोक्तं—
'त्रिगुणं धान्यं धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च'
इति, तत् यत्र देशे त्रिगुणं देयमवातिष्ठते तद्विषयं, दरिद्राधमर्णविषयं वा । यत्तु मनुनोक्तम्—

धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम् ।

इति, तत् प्रत्यर्पणसमयसमृद्धाधमर्णविषयम् । ये तु कम्बलादयो 'हिरण्ये द्विगुणा वृद्धिः' इत्यादिधर्मशास्त्रेष्वनुक्ताः तेषां द्विगुणैव वृद्धिः, 'अनुक्तानां द्विगुणा' इति विष्णुस्मरणात् । चिरकालमदानेनाधमर्णोपरि वृद्धिस्थितावेव प्रयुक्तधनस्य द्वैगुण्यानतिक्रमो नान्यत्रेत्यर्थः । चिरस्थानाभावे तु प्रयुक्तं वर्धत

एव, शतगुणत्वेऽपि 'यावत्प्रतिदानम्' इति व्यतिरेकाद्गम्यते। चिरस्थानेऽपि सकृदाहितवृद्धावेव द्वैगुण्यानतिक्रमो नान्यत्रेत्याह मनुः—

कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहिता।

अधिकं ग्रहीष्यामीति यदल्पं दीयते तत् कुसीदं, तच्च द्वैगुण्यसमभिव्याहारादत्र हिरण्यमभिप्रेतम्। तस्य वृद्धिस्सकृदाहिता। पुरुषान्तरमसंक्रामिता न वा मूलीकृता द्वैगुण्यमूलेन सह द्विगुणत्वं नातिक्रामतीत्यर्थः। अत्रापि पुरुषान्तरसंक्रामिता पुनर्वा मूलीकृता वृद्धिर्द्वैगुण्यमत्येतीति व्यतिरेकाद्गम्यते। यदा ऋणिकस्स्वयमेव ऋणं सवृद्धिकं पुरुषान्तरदेयं करोति, यदा वा मूलीकरोति, धनिको वा धनिकान्तरे त्वार्धिं कृत्वा स्वधनं गृह्णाति, तदा तद्दिनमारभ्य द्वैगुण्यपर्यन्तं प्रतिदानपर्यन्तं वा वर्धते इति मन्तव्यम्। एवं त्रैगुण्यादावपि सकृदाहिता वृद्धिर्नात्येति, वस्त्रादावन्यथा त्वत्येति, न्यायसाम्यात्। चिरस्थान एव त्रैगुण्यादौ वृद्ध्युपरमोऽन्यथा तु वर्धत एवेत्यवगन्तव्यम्॥

इति स्मृतिचन्द्रिकायां वृद्ध्युपरमावधिनिरूपणम्.

अथ वृद्ध्युपरमापवादः.

तत्र बृहस्पतिः—

तृणकाष्ठेष्टकासूत्रकिण्वचर्मास्थिवर्मणाम्।
हेतिपुष्पफलानां च वृद्धिस्तु न निवर्तते॥

किण्वः सुराद्रव्योपादानभूतो मूलविशेषः । चर्म बाणादिनिवारकं फलकम् । वर्म कवचम् । हेतिः आयुधम् । पुष्पफलयोर्वृद्ध्यनिवृत्तिः प्रतिदानवेलायामत्यन्तसमृद्धाधमर्णविषये वेदितव्या, अन्यथा पूर्वप्रकरणोक्तत्रिगुणादिप्रतिपादकवचनविरोधापत्तेः । विष्णुरपि—'किण्वकार्पाससूत्रचर्मवर्मायुधेष्टकाङ्गाराणामक्षया' इति । कार्पासे तु पूर्वप्रकरणोक्तषड्गुणाभिधायकवचनाविरोधः पूर्ववद्विज्ञेयः । वासिष्ठोपि—

दन्तचर्मास्थिशृङ्गाणां मृन्मयानां तथैव च ।
अक्षया वृद्धिरेतेषां पुष्पमूलफलस्य च ॥

अक्षया मूलप्रतिदानाभावे शतगुणाऽपि वर्धत एवेत्यर्थः । बृहस्पतिरपि—

शिखाबृद्धिं कायिकां च भोगलाभं तथैव च ।
धनी तावत्समादद्याद्यावन्मूलं न शोधितम् ॥

शिखावृद्ध्यादीनां स्वरूपं वृद्धिभेदाभिधानप्रकरणे दर्शितम् । न शोधितं न प्रतिदत्तमृणिकेनेत्यर्थः । अत एव याज्ञवल्क्यः—

आधिस्तु भुज्यते तावद्यावत्तन्न प्रदीयते ।

इति । एवमुक्तो वृद्ध्युपरमापवादः चिरस्थाने सकृदाहितायां च वृद्धौ द्रष्टव्यः, तत्रैवौत्सर्गिकवृद्ध्युपरमप्राप्तेः.

इति स्मृतिचन्द्रिकायां वृद्ध्युपरमापवादः ।
समाप्तं च धनदानाधमर्णप्रकरणम् ॥

अथ ऋणप्रतिदानविधिः.

तत्र बृहस्पतिः—

याचमानाय दातव्यमल्पकालमृणं कृतम् ।
पूर्णेऽवधौ शान्तलाभमभावे च पितुस्सुतैः ॥

अल्पकालं अदीर्घकालमिति यावत् । कृतं दीपोत्सवादौ प्रतिदेयमित्येवं सावधित्वेन कृतम् । शान्तलाभं उपरतवृद्धिकम् । एतदुक्तं भवति—अदीर्घकालिकमृणं याच्ञानन्तरं दातव्यं, सावधिकत्वेन कृतं तु पूर्णेऽवधौ । शान्तलाभं तु लाभशान्त्यनन्तरम् । ऋणिकाभावे च तत्सुतैरप्येवमेव दातव्यमिति । एतच्च याच्ञादेस्समनन्तरं प्रतिदानविधानं, न ततः प्राक्प्रतिदानव्युदासकं, सति सम्भवे शीघ्रमपाकरणीयत्वादृणस्य। यस्तु ऋणं नापाकरोति तस्यादृष्टहानिः पुराणे दर्शिता—

तपस्वी चाग्निहोत्री च ऋणवान् म्रियते यदि ।
तपश्चैवाग्निहोत्रं च सर्वं तद्धानिनो भवेत् ॥

तेनावश्यमृणमपाकरणीयमित्यर्थः । अनेनैवाभिप्रायेण कात्यायनेनाप्युक्तं—

उद्धारादिकमादाय स्वामिने न ददाति यः ।
स तस्य दासो भृत्यः स्त्री पशुर्वा जायते ऋणी (गृहे) ॥

इति । उद्धारादिकं प्रतिदेयतयैवावस्थितं प्रीतिदत्तादिकम् । दासभृत्ययोर्भेदो वक्ष्यते । यत्तु नारदेनोक्तं—

याच्यमानं न दद्याद्यदृणं वाऽधिप्रतिग्रहम् ।
तद्द्रव्यं वर्धते तावद्यावत्कोटिशतं भवेत् ॥
ततः कोटिशते पूर्णे वेष्टितस्तेन कर्मणा ।
अश्वः खरो वृषो दासो भवेज्जन्मनि जन्मनि ॥

इति ; तत्र याच्यमानग्रहणं याच्यमानस्य ऋणादेरप्रतिदाने क्लेशातिशयप्रतिपादनार्थं, न तु याच्यमानस्यैवाप्रतिदाने क्लेशो नान्यस्येत्यभिधानार्थमिति मन्तव्यम् । लेख्यारूढर्णप्रतिदानानन्तरं प्रतिदातुः कर्तव्यमाह याज्ञवल्क्यः—

दत्वर्णं पाटयेल्लेख्यं शुद्धयै वाऽन्यत्तु कारयेत् ।

इति । अनृणत्वप्रख्यापनार्थं प्रतिदत्तपत्रं वोत्तमर्णाद्गृह्णीयादिति द्वितीयपादार्थः । ऋणलेख्यस्य स्थापनापरिज्ञानादिना पाटनासम्भवे त्वयं पक्ष इत्युक्तं तद्भाष्ये । अस्यापि कथञ्चिदसम्भवे पक्षान्तरं नारदेनोक्तं—

लेख्यं दद्याद्दृणे शुद्धे तदभावे प्रतिश्रवः ।
धनिकर्णिकयोरेवं विशुद्धिस्स्यात् परस्परम् ॥

प्रतिश्रवः प्रतिदत्तमिसास्मिन्नर्थे साक्ष्यसिद्धयै श्रोत्रियादिश्रावणम्। साक्षिमद्दृणप्रतिदातारं प्रत्याह याज्ञवल्क्यः—

साक्षिमच्च भवेद्यद्वा तद्दातव्यं ससाक्षिकम् ।

इति । ससाक्षिकं ऋणं पूर्वसाक्षिसमक्षमेव दातव्यमित्यर्थः । पूर्वसाक्षिणां कथञ्चिदसम्भवे साक्ष्यन्तरसमक्षं वा दातव्यं,

ससाक्षिकमिति सामान्योनोक्तेः पक्षद्वयसमर्थनार्थत्वात् । पूर्वसाक्ष्यन्तरं तु पूर्वसाक्षिबाधनक्षमत्वाय सङ्ख्यागुणाधिकमेव कार्यम् ॥

इति स्मृतिचन्द्रिकायां ऋणप्रतिदानविधिः.

अथासमर्थाधमर्णविषयाणि.

तत्र मनुः—

ऋणं दातुमशक्तो यः कर्तुमिच्छेत्पुनःक्रियाम् ।
स दत्वा निर्जितां वृद्धिं करणं परिवर्तयेत् ॥

प्रमाणमात्रवाचकोपि क्रियाशब्दोऽत्र ऋणविषयप्रमाणपरत्वाल्लेख्यसाक्षिष्वेवावतिष्ठते । एवंचायमर्थः—प्रतिदानकाले धनासम्पत्त्यादिवशात् सवृद्धिकमूलदानाशक्तो योऽधमर्णः ऋणस्य चिरन्तनत्वपरिहारतो धनिकसमाधानार्थं क्रियां लेख्यादिरूपां पुनः कर्तुमिच्छेत्, स निष्पन्नां वृद्धिं दत्वा करणं परिवर्तयेत्, पुनर्लेख्यादिक्रियां वर्तमानवत्सरादिचिह्नितां कुर्यादिति । यदा तु निर्जितां वृद्धिं दातुं न शक्नोति तदाऽप्याह स एव—

अदर्शयित्वा तत्रैव हिरण्यं परिवर्तयेत् ।
यावती संभवेद्वृद्धिस्तावतीं दातुमर्हति ॥

अस्यार्थः—हिरण्यमदर्शयित्वा निर्जितां वृद्धिमदत्वा तत्रैव पूर्वकृतरकण एव परिवर्तयेत् निर्जितां वृद्धिं मूलत्वेनारोपयेत्। तस्यास्तु वृद्धिर्न प्रयुक्तधनवृद्धितुल्या, किंतु अत्यन्ताल्पपरिमाणेनैवारोपणीयेति । वृद्धावप्यंशमात्रदानशक्तेन शक्यांशं दत्वा पश्चादशक्यांशान्तरं पूर्वकरण एव पूर्ववदारोपणीयं, न्यायसाम्यात्। यस्तु प्रतिदानकाले सवृद्धिकं मूलांशं दातुमशक्तः तं प्रत्याह याज्ञवल्क्यः—

लेख्यस्य पृष्ठेऽभिलिखेत् दत्वा दत्वार्णिको धनम्।

इति। कालान्तरेऽपि यावन्निखिलऋणापाकरणं न भवति तावदेवंकृत्वाऽन्ते पाटनं कुर्यादिति। अथवा यथाशक्ति स्तोकं दत्वा लेख्यमुपगताख्यमुत्तमर्णात् गृह्णीयात्, उत्तमर्णेन च तदवश्यं देयम्।

धनी वोपगतं दद्यात् स्वहस्तपरिचिह्नितम्।

इति पक्षान्तरतया तेनैवानन्तरमभिधानात्। एतावन्मह्यमनेन दत्तमिति प्रवेशपत्रं वा धनी प्रतिदात्रे दद्यादिति तस्यार्थः। अर्थान्तरं च तस्योपरिष्टाद्वैरवक्ष्यामः। अयं च पक्षः प्राचीनपक्षालाभे, तथाच विष्णुः—'असमग्रदाने लेख्यासन्निधाने चोत्तमर्णस्स्वालिखितं दद्यात्' इति। ऋणिकायेति शेषः। तथाच नारदः—

गृहीत्वोपगतं दद्यादृणिकायोदयं धनी।

इति । उदयमृणिकेनोपार्जितं गृहीत्वा धनी ऋणिकायोपगतं दद्यादित्यन्वयः । उदयशब्देनोपार्जितं ब्रुवन्,

ब्राह्मणस्तु परिक्षीणश्शनैर्दाप्यो यथोदयम् ।

इत्युक्ताविषयेऽप्ययं पक्षोविज्ञेय इति दर्शयति । तेन पत्रपृष्ठे-लेखनपक्षोप्यनेन विकल्पितत्वादस्मिन्नेव विषये विज्ञेयः । एवं भागश ऋणग्रहणविधिबलादस्मिन्नेव विषये भागशो ग्रहणं, अन्यत्र कृत्स्नस्यैवर्णस्य ग्रहणमिति मन्तव्यम् । तेन यत्र भागशो ग्रहणविधिः तत्रैव दत्तांशस्य वृद्धिनिवृत्तिः, अन्यत्र तु यावत् कृत्स्नं न ददाति तावद्दीयमानमप्यकृत्स्नं प्रत्याख्येयं, दत्तांशस्यापि वा वृद्धिर्ग्राह्यैव, तत्राकृत्स्नादानस्य निक्षेपमा-त्रतुल्यत्वात् । न च परिक्षीणविषये स्तोकं दीयमानं वृद्धि भङ्गभयात् प्रत्याख्येयं, परिक्षीणस्यानुसरणीयत्वात्, शनैर्दा प्यत्वविधानाच्च । परिक्षीणविषयेऽप्याधिमोचनं कृत्स्नर्णापा-करणानन्तरं सकृदेव, नपुनर्दत्तांशानुसारेण बहुशः, यावद्दृणं तव न ददामि तावदयमाधिरिति बहुमूल्यस्याप्यानृण्यपर्य-न्तमाधीकरणात् । न चाधीकृतधनस्वामित्वेनाप्यसावपरिक्षीण इति वाच्यं, प्रतिबद्धधनस्वामित्वेन निस्स्वतुल्यत्वात् । आधि-भोगेऽपि न वृद्धिन्यायेन दत्तांशानुसारेण भोगानिवृत्तिः । प्रतिनिष्कं अशीतिभागादिवृद्ध्यङ्गीकारो हि धार्यमाणधना-नुसारेण कृतः, तेन प्रतिदत्तांशस्य धार्यमाणस्य वृद्धिनि-वृत्तिर्युक्ता । आधिभोगस्तु भोग्याधित्वस्थित्यनुयायी, न धार्य-

माणधनानुयायी, स्वल्पधनप्रयोगविषयेऽपि बहुमूल्यस्याप्याधित्वेन स्थितस्याशेषस्यैव भोग्यत्वदर्शनात् । न चाङ्गीकारवशात्तत्र तथा भोग्यत्वदर्शनमिति वाच्यं, कृत्स्नं भोग्यं त्वयैतादियेवमनुक्तेऽपि दर्शनात् । भोग्याधित्वेन स्थितेश्चाविमोचनात् । विमोचनं च कृत्स्नर्णापाकरणानन्तरं सकृदेवेत्युक्तम् । तेन परिक्षीणविषयेऽपि न दत्तांशानुसारेणाध्यंशवशात्तत्र भोगनिवृत्तिः । यथा कायिकवृद्ध्या गवादिकमाधीकृत्य निष्के ऋणिना गृहीते चतुस्स्तनभवं क्षीरं प्रतिदत्तेऽपि निष्कैकदेशे धनी गृह्णाति, न पुनर्दत्तांशानुसारेण एकस्तनं द्विस्तनं त्रिस्तनं वाऽधमर्णायार्पयति । अश्वेऽप्याधिभूते धनी स्वयमेवाश्वमारुह्य कृत्स्नं मार्गं गच्छति तथेहापीत्यलमतिबहुना प्रपञ्चेन ॥

यस्तु दौरात्म्याद्याच्ययानोप्युपगतं न ददाति, तस्य हानिमाह स एव—

न दद्याद्याच्यमानस्तु शेषहानिमवाप्नुयात् ।

इति । शेषो दास्यमानतया स्थितो भागः । शेषस्य स्वल्पत्वे सत्येतद्द्रष्टव्यम् । तस्यानल्पत्वे त्वधिकहानित्वात्तां नाप्नुयात्, अपितु गृहीतभागस्य वृद्धिदाननिबन्धनां हानिम् । अत एव बृहस्पतिः—

ऋणं धर्मादितो ग्राह्यं यस्तूपरि न लेखयेत् ।
न चैवोपगतं दद्यात्तस्य तद्वृद्धिमाप्नुयात् ॥

यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णकः।
तैस्तैरुपायैस्सङ्गृह्य दापयेदधमर्णिकम्॥

के ते उपाया इत्यपेक्षिते बृहस्पतिः—

धर्मोपधिबलात्कारैः गृहसंरोधनेन च ।

इति । आचारिताख्योपाय एव गृहसंरोधनेनेत्यनेनोपादिष्टः । धर्मादीन् स्वयमेव व्याचष्टे—

सुहृत्सम्बन्धिसंदिष्टैस्सामोक्त्याऽनुगमेन च ।
प्रायेण वा ऋणी दाप्यो धर्म एष उदाहृतः ॥
छद्मना याचितं चार्थमानीय ऋणिकाद्धनी ।
अन्वाहितादि वाऽऽहृत्य दाप्यते तत्र सोपधिः ॥
यदा स्वगृहमानीय ताडनाद्यैरुपक्रमैः ।
ऋणिको दाप्यते यत्र बलात्कारस्स कीर्तितः ॥
दारपुत्रपशून् बध्वा कृत्वा दारोपवेशनम् ।
यत्रर्णी दाप्यतेऽर्थं स्वं तदाचारितमुच्यते ॥

इति । सुहृत्सम्बन्धिसंदिष्टैः मान्यजनादेशैः । सामोक्त्या प्रिय-पूर्ववाक्येन । अनुगमनेन अनुव्रजनेन । प्रायेण प्रार्थनाबहुल्येन । छद्मना उत्सवादिच्छलादानीतभूषणादिना । याचितं याचितकम् । अन्वाहितमन्यस्मै दातुर्मार्पितम् । आदिग्रहणादन्यदापि यथाकथञ्चिदानीतं सङ्गृह्यते । अर्थं स्वं स्वकीयमर्थम् । दाप्यते प्रतिदानोन्मुखीक्रियते । शेषं व्यक्तार्थम् । धर्मादयश्चोपाया न

अस्यार्थकथनार्थमादौ विषयतात्पर्ये निरूप्येते—

धनी वोपगतं दद्यात्स्वहस्तपरिचिह्नितम् ।

इति याज्ञवल्क्यवचनस्य द्वावर्थौ—तत्रैतावद्द्रव्यं मम प्राप्तमिति धनी ऋणलेख्यपृष्ठे स्वहस्तपरिचिह्नितमुपगतं लिखेदित्येकोऽर्थः। अर्थान्तरं च तस्य प्राग्दर्शितम् । तयोरन्यतरमर्थमकुर्वतो धनिकस्य हानिरनेन वचनेनोच्यते । अक्षरार्थस्तु धर्मोपधिबलात्, कारागृहसंरोधनाद्युपायैरधमर्णादकृत्स्नमृणमुपादाय यो धनी ऋणलेख्यस्योपरि मयैतावत् प्राप्तमिति न लिखेत्, न च प्रवेशपत्रं दद्यात्, तस्य तद्दिनमारभ्य यावल्लेखनं लेख्यदानं वा न करोति तावदधमर्णादुपात्तं धनं वृद्धिमाप्नुयात् अधमर्णाय वर्धत इति यावत् । कया वृद्धेयत्यपेक्षिते नारदः—

यदि वा नोपरि लिखेद्दाणिना चोदितोपि सन् ।
धनिकस्यैव वर्धेत तथैव ऋणिकस्य तत् ॥

यथैव तद्द्रव्यमृणिकस्योपरि स्थितं धनिकाय वर्धते तथैवार्णिकाय धनिकस्योपरि स्थितं वर्धत इत्यर्थः ।

इति स्मृतिचन्द्रिकायामसमर्थाधमर्णविषयाणि.

अथ प्रतिदानपराङ्मुखाद्दाणिकाद्दणग्रहणोपायाः.

तत्र बृहस्पतिः—

प्रतिपन्न ऋणी दाप्यस्सामादिभिरुपक्रमैः ।

इति । प्रतिपन्नः ऋणसत्तायां सम्प्रतिपन्नः दाप्यः प्रतिदानोन्मुखः कार्यः धनिनेत्यर्थः । तथाच मनुः—

यथाकामं प्रवोक्तव्याः । किंतु यथायोग्यं प्रयोज्याः । तथाच कात्यायनः—

राजानं स्वामिनं विप्रं सान्त्वेनैव प्रदापयेत् ।
रिक्थिनं सुहृदं वाऽपि छलेनैव प्रदापयेत् ॥
वणिजः कर्षकाश्चैव शिल्पिनश्चाब्रवीद्भृगुः ।
देशाचारेण दाप्यास्स्युर्दुष्टान् संपीड्य दापयेत् ॥

इति । सान्त्वेन धर्माख्योपायेन । संपीड्यशब्देन बलात्काराचरिताख्योपाययोर्ग्रहणम् । कः पुनः देशाचार इत्यपेक्षिते स एवाह—

धार्योऽवरुद्धस्त्वृणिकः प्रकाशं जनसंसदि ।
यावन्न दद्याद्देयं च देशाचारस्थितिर्यथा ॥

यत्र देशे धनी स्वयमेवावरुध्य धारयति, तत्र तथैव धार्यः । यत्र पुनरधमर्णसकाशाद्धेतनार्थिना निर्घृणेन पुरुषान्तरेणावरुध्य ध्रियते तत्र तथा पुरुषान्तरद्वारा धार्य इति 'देशाचारस्थितिर्यथा' इत्यस्यार्थः । एवंच अवरुध्य धारणमेव देशाचारानुरोधित्वाद्देशाचार इत्युच्यते । अवरुद्धस्यावश्यकरणीयेषु मनागनुग्रहः कार्य इत्याह स एव—

विण्मूत्रशङ्का यस्य स्याद्धार्यमाणस्य देहिनः ।
पृष्ठतो वानुऽगन्तव्यो निबद्धं वा समुत्सृजेत् ॥

निबद्धं शृङ्खलादिना । अधमाधमर्णविषयो द्वितीयः पक्षः तदि-

तरविषयस्त्वाद्यः पक्षः इत्यौचित्यात् व्यवस्थाऽवगन्तव्या। उभयविषयेऽपि पक्षान्तरमाह स एव—

स कृतप्रतिभूश्चैव मोक्तव्यस्त्याद्दिनेदिने।
आहारकाले रात्रौ च निबन्धे प्रतिभूः स्थितः॥

सः धार्यमाणो वाणिगादिः। कृतदर्शनप्रतिभूरावश्यककृत्यकाले विमोक्तव्यः। पलायनप्रतिबन्धे प्रतिभूर्यतः स्थित इत्यर्थः। यदा तु प्रतिभूर्न लभ्यते लब्धं वा प्रतिभुवं न ददाति तदा अधमाधमर्णविषये पुनः पक्षान्तराभिधानार्थमाह—

यो दर्शनप्रतिभुवं नाधिगच्छेन्न चाश्रयेत्।
स चारके निरोद्धव्यः स्थाप्यो वाऽऽवेद्य रक्षिणः॥

चारके संचारके, संचरण इति यावत्। स्थाप्यः प्रस्थाप्यः। आद्यः पक्षः प्रतिभूलाभेऽपि यो न ददाति तद्विषयः, तस्याति-दौष्ट्यात्। अलब्धप्रतिभूविषयो द्वितीयः षक्षः, तस्यातिदौष्ट्याभावात्। अधमेतरविषये त्वेतत्पक्षद्वयस्थानेऽन्यपक्षद्वयमाह स एव—

न चारके निरोद्धव्यः आर्यः प्रात्ययिकश्शुचिः।
सोऽनिबद्धः प्रमोक्तव्यो निबद्धश्शपथेन वा॥

प्रात्ययिकः अपलायित्वेन विश्वासी। अनिबद्धः रक्षकेण असम्बद्ध इत्यर्थः। एवंच रक्षिणः आवेद्य प्रस्थाप्य इत्यस्य स्थाने पक्षोऽयमिति गम्यते। इतरस्तु पक्षः पारिशेष्यात् 'स चार-

के निरोद्धव्यः' इति पक्षस्य स्थाने द्रष्टव्यः । यद्यपि वणिगादिविषयता देशाचाराख्योपायस्योक्ता, तथाऽप्यार्यादियोग्यानुग्रहपक्षप्रतिपादनाद्धर्माख्योपायसाध्यविप्रादावपि देशाचाराख्योपायो योग्यानुग्रहपक्षसहितः प्रयोक्तव्य इति मन्तव्यम् । एवमुक्तविधया धर्माद्युपायप्रयोक्ता राज्ञा न निवारणीयः, स्मृत्याचारमार्गेण क्रियमाणधर्षणस्यानिवार्यत्वात् । अत एव मनुः—

यस्स्वकं साधयेदर्थमुत्तमर्णोऽधमर्णिकात् ।
स राज्ञा नाभियोक्तव्यः स्वकं संसाधयन् धनम् ॥

नाभियोक्तव्यो न किमपि वचनीयः । तथाच विष्णुः—'प्रयुक्तमर्थं यथाकथञ्चित्साधयमानो न राज्ञा वाच्यस्स्यात्' इति । यथाकथञ्चित् स्मृत्याचारमार्गाविरोधेनेति शेषः । तद्विरोधेन साधयमानो राज्ञा निवारणीय एव, दुष्टत्वात् । यच्च तेनैवोक्तं—'साध्यमानश्चेद्राजानमभिगच्छेत्तत्समं दण्ड्यः' इति तत्रापि स्मृत्याचारमार्गाविरोधेनेति शेषो द्रष्टव्यः, अन्यथा दण्ड्यत्वानुपपत्तेः । तत्समं साध्यमानर्णसमम् । न केवलं दण्ड्यः, ऋणं च दाप्यः । तथाच याज्ञवल्क्यः—

प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत् ।
साध्यमानो नृपं गच्छन् दण्ड्यो दाप्यश्च तद्धनम् ॥

दण्ड्य इति सामान्याभिधानमसमर्थविषये स्वल्पोपि दण्डो यथा स्यादित्येवमर्थम् । अत एव मनुना स्वल्पदण्डो दर्शितः—

यस्साधयन्तं छन्देन वेदयेद्धानिकं नृपे ।
स राज्ञर्णचतुर्भागं दाप्यस्तस्य च तद्धनम् ॥

छन्देन स्वाभिप्रायेण, राजन्यनावेद्यैवेति यावत् । अत्र बृहस्पतिः—

प्रतिपन्नस्य धर्मोऽयं व्यपलापी तु संसदि ।
लेख्येन साक्षिभिर्वाऽपि भावयित्वा प्रदाप्यते ॥

अयं पूर्वोक्तो धर्मगणः ऋणसत्तायां संप्रतिपन्नस्य ऋणिकस्य । यस्तु व्यपलापी ऋणमपह्नोतुं तत्सत्तायां विप्रतिपन्नः, संसदि प्रमाणेनर्णं प्रसाध्य प्रतिपादनोन्मुखीकार्य इत्यर्थः । एवञ्च यदुक्तं मनुना—

धर्मेण व्यवहारेण छद्मना चरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥

इति, तत्र व्यवहारेणेति व्यपलापिविषयं, अन्यत्सम्प्रतिपन्नविषयमिति मन्तव्यम् । अत एवासम्प्रतिपन्ने व्यवहारातिरिक्तोपायनिषेधमाह बृहस्पतिः—

न रोद्धव्यः क्रियावादी संदिग्धेऽर्थे कथंचन ।
आसेधयंस्त्वनासेध्यं दण्ड्यो भवति धर्मतः ॥

न रोद्धव्य इति छलादिप्रतिषेधप्रदर्शनार्थम् । क्रियावादिसंदिग्धपदयोरर्थं स्वयमेव कथयति—

प्रदातव्यं यद्भवति न्यायतः प्रददामि तत् ।
एवं यत्रार्णिको ब्रूते क्रियावादी स उच्यते ॥

रूपसङ्ख्यादिलाभेषु यत्र भ्रान्तिर्द्वयोर्भवेत् ।
देयानादेययोर्वाऽपि संदिग्धोऽर्थस्स कीर्तितः ॥

इति । संदिग्धेऽर्थे प्रतिपन्नधर्मतः कुर्वतोऽर्थहानिर्दण्डश्चेत्याह स एव—

अनावेद्य तु राज्ञे यः संदिग्धेऽर्थे प्रवर्तते ।
प्रसह्य स विनेयस्स्यात्स चाप्यर्थो न सिध्यति ॥

प्रसह्य बलात्कारेणेत्यर्थः । कात्यायनोपि—

पीडयेत्तु धनी यत्र ऋणिकं न्यायवादिनम् ।
तस्मादर्थात्स हीयेत तत्समं चाप्नुयाद्दमम् ॥

तेन विप्रतिपन्नेऽपि विप्रतिपत्तिनिवृत्तये व्यवहाराख्य एवोपाये प्रवृत्तिः कार्येत्याभिप्रायः । स चोपायः प्रतिज्ञादण्डान्तः प्रथमपरिच्छेदे निरूपित इत्युपरम्यते ।

इति स्मृतिचन्द्रिकायां प्रतिदानपराङ्मुखादृणिकादृणग्रहणोपायाः ।

अथान्यान्यपि दुस्साधाधमर्णविषयाणि वचनानि.

तत्र यमः—

ऋणिकस्सधनो यस्तु दौरात्म्यान्न प्रयच्छति ।
राज्ञा दापयितव्यस्स्यात् गृहीत्वा द्विगुणं ततः ॥

ततः दुरात्मार्णिकसकाशादित्यर्थः । द्विगुणमिति सवृद्धिकमूल्यप्रदर्शनार्थम् । धनिनो दुरात्मनस्सकाशादृणं बलच्छलाद्युपायेन गृह्णीयात् । तथा च बृहस्पतिः—

पूर्णेऽवधौ शान्तलाभमृणमुद्ग्राहयेद्धनी ॥

इति। उद्ग्राहणं च बलाद्युपायेन साधनम्। पूर्णेऽवधौ सावधिकत्वेन कृतर्णस्य उद्ग्रणं लाभशान्त्यनन्तरं लाभस्य निरवधिकत्वेन कृतशान्तलाभस्य च दुस्साधत्वशङ्कया उद्ग्राहणं कार्यं, अन्यथा त्वनुचितत्वात् । ऋणिकं तु प्रतिपादनात् पक्षान्तरमाह स एव—

कारयेद्वा ऋणी लेख्यं चक्रवृद्ध्यादिव्यवस्थया ।

इति । वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिः । मूलेऽपि विशेषमाह स एव—

द्विगुणस्योपरि यदा चक्रवृद्धिः प्रगृह्यते ।
भोगलाभस्तदा तत्र मूलं स्यात्सोदयं नृणाम् ॥

अनेनैव वचनेन द्विगुणद्रव्यानुरूपभोगसमर्थाधिर्वा चक्रवृद्धि-स्थाने भवतीत्यवगम्यते । द्विगुणग्रहणाच्छान्तलाभ एव पूर्वोक्तलेख्यान्तरकरणपक्षो न पुनः पूर्णावध्यादाविति गम्यते । तेन तत्र यथासम्प्रतिपत्ति लेख्यान्तरमृणिना कार्यं, न चक्रवृद्ध्यादिनियमेन द्विगुणग्रहणादि । प्रागुदितपक्षत्रये धनिकेच्छातो व्यवस्था । यस्त्वृणिको निर्धनत्वेनैव न प्रयच्छति सोपि-स्तोकंस्तोकं दाप्य इत्याह नारदः—

अथ शक्तिविहीनस्स्यादृणी कालविपर्ययात् ।
शक्त्यपेक्षमृणं दाप्यः काले काले यथोदयम् ॥

दाप्यो ब्राह्मण इति शेषः । तथा च याज्ञवल्क्यः—

हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ।
ब्राह्मणस्तु परिक्षीणश्शनैर्दाप्यो यथोदयम् ॥

कारयेद्बलात्कारेणापीति शेषः ।

धनदानासहं बद्ध्वा स्वाधीनं कर्म कारयेत् ।

इति कात्यानस्मरणात् । कर्मकरणासहं तु बन्धनागारे वासयेत् ॥

अशक्तो बन्धनारे प्रवेश्यो ब्राह्मणादृते ।

इति तेनैवोक्तत्वात् । प्रवेशनफलं सामर्थ्योत्पत्तौ कथञ्चिद्दृणप्राप्तिः। यत्पुनस्तेनैवोक्तं—

कर्षकान् क्षत्रविट्शूद्रान् समीहानांस्तु दापयेत् ।

इति, तद्यथोदयं धनदानसहिष्णुविषयम् । 'धनदानासहं बध्वा' इति सर्वथा धनदानासहविषयमिति न काश्चिद्विरोधः । यस्त्वनेकर्णसमवायाद्युगपदनेकधनिकैर्दुस्साधः स कथं दाप्य इत्यपेक्षिते याज्ञवल्क्यः—

गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ।
दत्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् ॥

नृपतेः क्षत्रियस्येत्यर्थः । वचनार्थस्तु कात्यायनेन विवृतः—

नानर्णसमवाये तु यद्यत्पूर्वकृतं भवेत् ।
तत्तदेवाग्रतो देयं राज्ञस्स्याच्छ्रोत्रियादनु ॥

श्रोत्रियोऽत्र ब्राह्मणजातिमात्रशाली, न तु श्रुताध्ययनशाली

त्रैवर्णिकः, राजजात्यपेक्षयोत्कृष्टजातिपरत्वेनात्र श्रोत्रियपद प्रयोगात्। ग्रहीतृजातिक्रमयोर्विरोधे जातिक्रमो ग्राह्यः, ब्राह्मणस्य पूज्यतयाऽनुग्राह्यत्वात्। एवं क्षत्रियवैश्ययोर्वैश्यशूद्रयोर्वा युगपदुपस्थाने वर्णक्रमेण दातव्यं, पूर्वपूर्वस्य श्रेष्ठत्वेनानुग्राह्यत्वात्। एवं क्रमेण ऋणापाकरणे क्रियमाणे यस्य ऋणापाकरणादर्वागल्पधन ऋणिकः परिक्षीणो जातः तस्य 'हीनजातिं परिक्षीणम्' इत्यादिनोक्तमार्गानुसरणमेव शरणम्। एकादिनकृतनानर्णसमवाये तु न पूर्वोक्तो दापनक्रमः, किं तु युगपदेव प्रतिपादनमृणिकस्य धनबाहुल्ये, धनाल्पत्वे तु तत्तदृणानुसारेण विभज्य युगपदंशदापनम्। तदाह कात्यायनः—

एकाहे लिखितं यत्र तत्र कुर्यादृणं समम्।
ग्रहणं लक्षणं लाभमन्यथा तु यथाक्रमम्॥

ग्रहणं आधिधनं, रक्षणं तस्यैव पालनं, लाभं भोगरूपलाभं च समेव कुर्यात्। अन्यथाऽहर्भेदे लिखितक्रमेण वर्णभेदक्रमेण वा ऋणप्रतिपादनम्। आध्यादौ त्वाधि विवादापनोदविषयवचनसङ्ग्रहणप्रकरणोक्तमनुसंधेयम्। 'तत्र कुर्यादृणं समम्' इत्यादेः क्वचिदपवादमाह स एव—

यस्य द्रव्येण यत्पण्यं साधितं यो विभावयेत्।
तद्द्रव्यमृणिकेनैव दातव्यं तस्य नान्यथा॥

यस्य उत्तमर्णस्य धनाद्यत्पण्यमधमर्णेन वाणिज्यार्थं गृहीतं तत्प-

ण्यविक्रयावाप्तं धनं नानर्णसमवायेऽपि ऋणिकेन तस्यैवोत्तमर्णस्य ऋणापाकरणार्थं दातव्यं, नान्यथा पूर्वोक्तप्रकारेण दातव्यमित्यर्थः ।

इति स्मृतिचन्द्रिकायां दुस्साधाधमर्णविषयाणि ॥

समाप्तं च प्रयुक्तधनग्रहणधर्मसङ्ग्राहकं महाप्रकरणम्.

अथर्णप्रतिदातृनिर्णयः.

तत्र बृहस्पतिः—

याचमानाय दातव्यमल्पकालमृणं कृतम् ।
पूर्णेऽवधौ शान्तलाभमभावे च पितुस्सुतैः ॥

दातव्यं धनग्राहिणेति शेषः, सति संभवे ऋणस्य ग्राहकेणैवापाकरणीयत्वात् । अभावे च पितुस्सुतैरिति । अस्यायमर्थः—ऋणग्रस्तावस्थस्य पितुरभावे शरीरत्यागे सुतैरवश्यं पितृकृतमृणं धनिने दातव्यमिति । पितृकृतर्णस्यापाकरणमावश्यकमित्यत्र हेतुमाह नारदः—

इच्छन्ति पितरः पुत्रान् स्वार्थहेतोर्यतस्ततः ।
उत्तमर्णाधमर्णाभ्यां मामयं मोक्षयिष्यति ॥
अतः पुत्रेण जातेन स्वार्थमुत्सृज्य यत्नतः ।
ऋणात्पिता मोचनीयो स यथा नरकेऽपतेत् ॥

यतस्ततो भार्योपगमनपुत्रिकाकरणपुत्रपरिग्रहाद्युपायानां मध्ये

येनकेनचिदुपायेनेत्यर्थः। उत्तमर्णं 'जायमानो वै ब्राह्मण-स्त्रिभिर् ऋणवा जायते' इत्यादिश्रुत्युक्तम्। अधमर्णं परहस्तात्कुसीदविधिना गृहीतम्। अथवा—उत्तमर्णाधमर्णशब्दतो लक्षणया कुसीदविधिना गृहीतमेवर्णमवगन्तव्यम्।यदाह कात्यायनः—

पितृणां सूनुभिर्जातैर्दानेनैवाधमाद्दणात्।
विमोक्षस्तु यतस्तस्मादिच्छन्ति पितरस्सुतान्॥

इति। दानेन ऋणप्रतिदानेन स्वार्थमुपभोगादिरूपमुत्सृज्येत्यर्थः। धर्मरूपस्वार्थोत्सर्गानुपपत्तेः।वाक्यार्थस्तु--यत एवमिच्छन्ति अतः ऋणादवश्यं पिता मोचनीय इति। न च जातैरित्याभिधानाज्जातमात्रस्य ऋणमोचनेऽधिकार इति वाच्यम्। स्वार्थमुत्सृज्येत्यादेश्शैशवदशायामघटनात्। तेन व्यवहाराभिज्ञतया जातेनेति जातपदस्याध्याहारसापेक्षोऽर्थो बोद्धव्यः। अतएव—

अप्राप्तव्यवहारश्चेत् स्वतन्त्रोपीह नर्णभाक्।

इति तेनैवोक्तम्। प्राप्तव्यवहारश्च षोडशवार्षिको भवति।तस्यां दशायां हेयोपादेयपरिज्ञानपरिपाकात्। स्वतन्त्रस्तु बाल्यदशायामपि पितृमरणात् भवति। तेन स्वतन्त्रोपीहेत्युक्तम्। एवञ्च—पितर्युपरतेऽप्यप्राप्तव्यवहारैर्न देयम्, अदानेऽपि दोषाभावात्। किन्तु प्रबुद्धकाले सर्वशक्त्या देयम्, अदाने दोषसद्भावात्। तदाह कात्यायनः—

नाप्राप्तव्यवहारैस्तु पितर्युपरते क्वचित्।

काले तु विधिना देयं वसेयुर्नरकेऽन्यथा ।

क्वचिदित्यत्र देयमित्यनुषज्यते । विधिना ऋणप्रतिदानप्रकरण-प्रतिपादितेन विधिना । अनुपरतेऽपि पितरि सुतैः पितृकृतमृणं पितरि प्रतिदानासमर्थे देयमित्याह स एव—

विद्यमानेऽपि रोगार्ते स्वदेशात्प्रोषिते तथा ।
विंशात्संवत्सरादेयमृणं पितृकृतं सुतैः ॥

विंशात्संवत्सरात् प्रवासमारभ्येति शेषः । कुत्र गत इत्यज्ञात-विषये सुतैर्देयं, अन्यत्र प्रस्थापनादिनाऽपि पित्रैव दातुं शक्यत्वात् । रोगार्ते तु स्वरूपसंख्यादिविप्रतिपत्तौ निर्णयात्पश्चादेव देयम् । तथाच बृहस्पतिः—

सान्निध्येऽपि पितुः पुत्रै ऋणं देयं विभावितम् ।
जात्यन्धपतितोन्मत्तक्षयश्वित्रादिरोगिणः ॥

अविप्रतिपत्तौ तु—'याचमानाय दातव्यम्' इत्यादिनोक्तयाचनानन्तरकाल एव दातव्यम्, कालान्तरस्मृतेः । क्षयश्वित्रादीत्यादिशब्देन क्षयश्वित्रादिसदृक्षदुश्चिकित्सा एव रोगा गृह्यन्ते, न पुनर्ज्वरादयः । जात्यन्धादिभिश्च पुत्रैः पितर्युपरते प्रोषिते व्याध्यादिना पीडितेऽसमर्थेऽपि न देयं, पितृद्रव्यभागानर्हत्वात्, क्षयादिरोगिणामत्यन्तोपद्रुतत्वात् । तथा च कात्यायनः—

ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवः ।
द्रविणार्हश्च धुर्यश्च नान्यथा दापयेत्सुतम् ॥

द्रविणार्हः पितृद्रव्यभागार्हः। धुर्यः पितुर्धुराया वोढा। अर्ह इति वदन् पितृद्रव्याग्रहणेऽपि अर्हत्वे सति पुत्रो दाप्य इति दर्शयति। दुश्चिकित्सरोगादिनोपद्रुतः पितृद्रव्यानर्हश्च अन्धादिः अधुर्यश्च पितृकृतर्णापाकरणानधिकारीति 'नान्यथा दापयेत्सुतम्' इत्यनेनोक्तम्। धुर्यश्चेत्येतत् गुणप्रधानभावेन वर्तमाननानापुत्रविषयम्, तथाच नारदः—

पितर्युपरते पुत्रा ऋणं दद्युर्यथांशतः।
विभक्ता वाऽविभक्ता वा यो वा तामुद्वहेद्धुरम्॥

यथांशत इति विषमांशविभागविधायकशास्त्रानुसारेण विभक्तपुत्रविषयम्। समभागाविभक्तास्तु समानमेव धनं दद्युः। अविभक्तास्तु समप्रधानतया वर्तमानास्सम्भूयसमुत्थानेन दद्युः। गुणप्रधानतया वर्तमानेष्वविभक्तेषु प्रधानभूत एव सर्वं दद्यात्, गुणभूतस्यानधिकरणात्। यत्र पुनः पित्रा सह विभक्ता अविभक्ताश्च पुत्रास्सन्ति, तत्र येषां विभागादूर्ध्वं पित्रा यद्दणं कृतं तत्तैर्न देयम्, अविभक्तेषु सुतेषु सत्सु विभक्तानां विभागतः पितृद्रव्यार्हत्वस्यापगतत्वेन मृते पितरि पुनः पितृद्रव्याग्रहणात्। अत एव कात्यायनः—

पित्रर्णे विद्यमाने तु न च पुत्रो धनं हरेत्।
देयं तद्धनिने द्रव्यं मृते गृह्णंस्तु दाप्यते॥

मृते पितरि तद्द्रव्यं गृह्णन्नेव पुत्रो दाप्य इत्यर्थः। पितृकृतस्वकृ-

तर्णसमवाये तु पितृकृतमादौ देयम् 'पश्चादात्मीयमेव च' इति बृहस्पतिस्मरणात् आत्मीयवदेव च पित्र्यं देयम्,

ऋणमात्मीयवत् पित्र्यं पुत्रैर्देयं विभावितम् ।

इति तेनैवोक्तत्वात्। आत्मीयवत् यथाऽऽत्मीयं सवृद्धिकं देयं तथेत्यर्थः। न वयं विद्म इति यत्र पुत्रैर्निह्नवः क्रियते तत्र प्रमाणेन विभावितं चेद्देयम्, नो चेन्न देयमिति विभावितपदस्यार्थः। सर्वथा कानिचिदृणानि पित्र्याणि पुत्रैर्न देयानीत्याह स एव—

सौराक्षिकं वृथादानं कामक्रोधप्रतिश्रुतम् ।
प्रातिभाव्यं दण्डशुल्कशेषं पुत्रैर्न दापयेत् ॥

सौरं सुरासम्पादननिमित्तं, आक्षिकं द्यूतपराजयनिमित्तकं चेति यावत्। वृथादानं स्मृत्यन्तरेऽभिहितम्—

धूर्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे ।
चाटुवारणचोरेषु दत्तं भवति निष्फलम् ॥

कामप्रतिश्रुतं क्रोधप्रतिश्रुतं च कात्यायनेनोक्तम्—

लिखितं मुक्तकं वाऽपि देयं यत्तु प्रतिश्रुतम् ।
परपूर्वस्त्रियै तत्तु विद्यात्कामकृतं नृणाम् ॥
यत्र हिंसां समुत्पाद्य क्रोधाद्द्रव्यं विनाश्य वा ।
उक्तं तुष्टिकरं यत्तु विद्यात्क्रोधकृतं तु तत् ॥

इति। मुक्तकं लेखरहितत्। परपूर्वस्त्रियै परभार्यायै । यत्र

हिंसामित्यादेरयमर्थः—परस्य हिंसां धनाविनाशं वा क्रोधात् कृत्वा तत्तुष्टये द्रव्यं दास्यामीति प्रतिश्रुतं तद्दणं क्रोधजमिति। प्रातिभाव्यं दर्शनप्रतिभूदेयमत्र विवक्षितं, तथा च मनुः—

प्रातिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्।
दण्डशुल्कावशिष्टं च न पुत्रो दातुमर्हति॥
दर्शनप्रातिभाव्ये तु विधिस्स्यात्पूर्वचोदितः।

इति। पूर्वचोदितविधिः 'प्रातिभाव्यं न पुत्रो दातुमर्हति' इति विधिः। पुत्रैस्तु दातव्यं यत् प्रातिभाव्यं येन च प्रकारेण दातव्यं, तत्सर्वं प्रतिभूप्रकरण एव दर्शितम्। दण्डशुल्कशेषमिति पदद्वयस्यार्थः उशनसा स्पष्टीकृतः—

दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा।
न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम्॥

व्यावहारिकं सौरिकमित्यर्थः॥

इति स्मृतिचन्द्रिकायां ऋणप्रातिदातृनिर्णये पुत्रविषयाणि.

अथ पौत्रविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र कात्यायनः—

पित्रा दृष्टमृणं यत्तु क्रमायातं पितामहात्।
निर्दोषं नोद्धृतं पुत्रैः देयं पौत्रैस्तु तद्गुणः॥

पित्रा दृष्टं स्वपितृकृतत्वेन पित्रा निस्संदिग्धमवगतम्। पिता-

महात्क्रमप्राप्तं पूर्वपूर्वपूरुषाभावादिना प्राप्तम् । निर्दोषमदेयत्वापादकदोषरहितम् । पुत्रैर्नोद्धृतं पुत्रैर्दुश्चिकित्सरोगादिवशादनपाकृतम् । तथा च स एव—

पैतामहं तु यत्पुत्रैर्न दत्तं रोगिभिस्स्थितैः ।
तस्मादेवंविधं पौत्रैर्देयं पैतामहं समम् ॥

समं वृद्धिरहितं मूलमात्रमिति यावत् । पुत्रैरेकदेशापाकरणे तु अनपाकृतांशान्तरं देयम् ।

यदृणं दत्तशेषं वा देयं पैतामहं तु तत् ।

इति तेनैवोक्तत्वात् । अनेवंविधमदेयमिति स एवाह—

सदोषं व्याहतं पित्रा नैव देयमृणं क्वचित् ।

इति । सदोषं सुरादिनिमित्तत्वेन दोषयुक्तम् । पित्रा व्याहतं निराकृतं, पित्रा त्वदृष्टमपह्नुतं वा प्रमाणसाधितं देयम्.

पुत्रपौत्रै ऋणं देयं निह्नवे साक्षिभावितम् ।

इति याज्ञवल्क्येनोक्तेः । अदेयोपलक्षणार्थं सदोषग्रहणं तेनान्यदप्यदेयं पुत्रेषूक्तं पौत्रेष्वपि शुल्काद्यवगन्तव्यम् । प्रातिभाव्यं पुनः सर्वप्रकारमपि पौत्रैर्न देयमिति प्रतिभूप्रकरणे दर्शितम् । पौत्रैरपि प्राप्तव्यवहारैरेव देयं, अप्राप्तव्यवहाराणां पुत्रेषूक्तन्यायेनानधिकारात् । प्रोषितविषये च पुत्राणां यः प्रतिदानकालः स एव पौत्राणामपि, तथा च विष्णुः—

'धनग्राहिणि प्रेते प्रव्रजिते द्विदशास्समाः । प्रोषिते वा तत्पु-

त्रपौत्रैर्धनं देयम् । नातःपरमनीफ्सुभिः ' इति । प्रव्रजिते संन्यस्त इत्यर्थः । द्विदशास्समाः प्रोषिते वा विंशतिवर्षव्यापितया वा प्रवासे धनग्राहिणा कृत इत्यर्थः । नातःपरमनीफ्सुभिरित्यस्य विंशतिवर्षादूर्ध्वं न विलम्बः कार्यः ऋणप्रतिदानानीफ्सुभिरपीत्यर्थः । अथवाऽयमर्थः— अतः पुत्रपौत्रेभ्यः परमूर्ध्वं ये जातास्तैः प्रपौत्रादिभिरनीफ्सुभिर्न देयमिति। एतदुक्तं भवति— पुत्रपौत्राणामेव जायन्धादिव्यतिरिक्तानां निरुपाधिकारिक्थार्हत्वं, नान्येषां प्रपौत्रादीनामिति । रिक्थग्रहणाभावे प्रपौत्रादिभिरवश्यं पुत्रपौत्रवन्न देयमिति । अत एव नारदः—

क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम् ।
दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते ॥

कात्यायनोपि—

पुत्राभावेऽपि दातव्यमृणं पौत्रेण यत्नतः ।
चतुर्थेन न दातव्यं तस्मात्तद्धि निवर्तते ॥

एवञ्च प्रपितामहादिकृतर्णापाकरणानधिकारश्चतुर्थादेरगृहीतरिक्थस्यैव न पुनर्गृहीतरिक्थस्येत्यवगन्तव्यम् । पित्रात्मीयर्णदानात्पूर्वमेव पैतामहर्णं पौत्रेणात्मपितृपितामहकृतर्णत्रयसमवाये देयं,

तयोः पैतामहं पूर्वं देयमेव ऋणं सदा ।

इति बृहस्पतिस्मरणात् । तयोस्ताभ्यां पित्रात्मीयाभ्यामित्यर्थः । एवं पौत्रेण रिक्थार्हत्वेन ऋणदानं धुर्यपौत्रान्तरस्याभावे धु-

र्यस्य वा पितृव्यस्य। धुर्यस्य सद्भावे त्वधुर्यस्यानधिकारात्। समप्रधानभूतेषु पौत्रादिषु विभक्तेषु यथांशतः ऋणापाकरणं, विभक्तेषु तु सम्भूयसमुत्थानेनेत्याद्यत्राप्यवगन्तव्यम्। पौत्रविषयवचनानां विशेषमात्रप्रदर्शनपराणां प्रदर्शितविशेषादन्यत् पुत्रैस्समानमित्याभिप्रायिकार्थावगमात्। गृहीतरिक्थानां तु पौत्राणामधिकारो वृद्धिसहितर्णापाकरणे 'देयं पैतामहं समम्' इत्यस्यागृहीतरिक्थविषयत्वात्।

तयोः पैतामहं पूर्वं देयमेव ऋणं सदा।

इत्युक्तस्तु क्रमात्मको विशेषः अगृहीतरिक्थानामपि पौत्राणां, सदेत्यभिधानात्।

इति स्मृतिचन्द्रिकायामृणप्रतिदातृनिर्णये पौत्रविषयाणि.

अथ रिक्थग्राहादिविषयाणि.

तत्र याज्ञवल्क्यः—

ऋणग्राह ऋणं दाप्यो योषिद्ग्राहस्तथैव च।
पुत्रोऽनन्याश्रितद्रव्यः पुत्रहीनस्य रिक्थिनः॥

अत्र पदार्थस्तावदुच्यते—विभागक्रमेण यो द्रव्यं गृह्णाति स रिक्थग्राहः। रागादिवशात् परभार्यां यो भार्यात्वेन स्वीकरोति स योषिद्ग्राहः, न पुनः पुत्रोत्पादकतया नियुक्तो जारो वा, तयोरुपभोगमात्रकारित्वेन ग्राहकत्वाभावात्। यो दाया-

नर्हतया पङ्गादिर्मातापित्राश्रितद्रव्यवान्न भवति सोऽनन्याश्रितद्रव्यः। ये रिक्थग्राहास्त एव पुनश्च रिक्थिपदेनोक्ताः । अथ पादार्था उच्यन्ते, तत्राद्यन्तपादयोरयमर्थः—दायानर्हपुत्रसद्भावेऽप्यसद्भावेऽपि रिक्थग्राही ऋणं दद्यादिति। तथाच विष्णुः—'सपुत्रस्य वाऽपुत्रस्य वा रिक्थग्राही धनं दद्यात्' इति । एतदुक्तं भवति—यथा पुत्रपौत्रयोर्दायभागार्हयोर्भावे ऋणभाक् न तद्व्यतिरिक्तः, तथाऽत्रेति । यथैव पङ्गादिलक्षणपुत्रसद्भावे असद्भावेऽपि रिक्थग्राही ऋणं ददाति तथैव पङ्गादिलक्षणपुत्रसद्भावे चासद्भावे च रिक्थग्राहाभावे सति योषिद्ग्राहो ऋणं दद्यादिति द्वितीयपादस्यार्थः । तथाच विष्णुरेव—'विधनस्य स्त्रीग्राही' इति । सपुत्रस्य वाऽप्यपुत्रस्य वेत्यनुवर्तते। विधनस्येति वदन् धनहारिरहितस्योते दर्शयति । बृहस्पतिना तु स्पष्टमुक्तं—

स्त्रीहारी च तथैव स्यादभावे धनहारिणः।

इति। यथैव धनहारी ऋणभाक् तथैव धनहार्यभावे स्त्रीहारी स्यादित्यर्थः । धनहारिस्त्रीहारिणोरभावे दायानर्हः पुत्रो दद्यादिति तृतीयपादस्यार्थः। तथाच नारदेन—

धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत् ।

इत्युक्त्वा उक्तं—'पुत्रोसतोः स्त्रीधनिनोः' इति । ऋणभागित्यनुवर्तते । स्त्रीग्राहधनग्राहयोरभावे दायानर्हः पुत्र ऋणभा-

गित्यर्थः । यत्पुनस्तेनैवानन्तरमुक्तं 'स्त्रीहारी धनिपुत्रयोः' इति, तदयुक्तमिव प्रतिभाति । धनहारिपुत्राभावे स्त्रीहारी ऋणभागिति वचनान्तरेण प्राक्प्रतिपादितार्थविरोधात्, पुत्रस्य स्त्रीहारिराहित्ये ऋणभागित्वमिति स्वोक्तेन विरोधाच्च । सत्यमस्ति विरोधः । तथाऽपि विषयभेदादसावपगच्छति । तथाहि—'विधनस्य स्त्रीग्राही' इति विष्णुवचनेन पक्षद्वयमुक्तं—सपुत्रस्य धनहारिरहितस्य स्त्रीहारी दद्यात्, अपुत्रस्य वा धनहारिरहितस्येति । तत्र द्वितीयः पक्षः 'स्त्रीहारी धनिपुत्रयोः' इत्यनेनोक्तः । धनहारिपुत्रयोरसतोः स्त्रीहारी ऋणभागिति द्वितीयपक्षसमानत्वात् । वचनान्तरेण प्राक्प्रतिपादितोऽर्थः प्रथमपक्ष एव । अतो न तेन सह द्वितीयपक्षस्येवास्यापि विरोधः, विकल्पितत्वात् । 'पुत्रोसतोस्त्रीधनिनोः' इत्यनेन सपुत्रस्य स्त्रीहारिधनहारिराहित्यस्य ऋणं दायानर्हः पुत्रो दद्यादित्युक्तम् । 'पुत्रोऽनन्याश्रितद्रव्यः' इति वचनेन तुल्यार्थत्वात् । एवंच न प्राक्प्रतिपादितेन स्वोक्तेन वा विरोध इति युक्तमुक्तं नारदेन ॥

यत्तु कात्यायनेनोक्तम्—

व्यसनाभिप्लुते पुत्रे बालो वा यत्र दृश्यते ।
द्रव्यहृद्दाप्यते तत्र तस्याभावे पुरन्ध्रिहृत् ॥

इति, तत्तस्यां दशायां दायार्हपुत्रस्यानधिकारप्रदर्शनार्थं, न तु दायानर्हपुत्रस्य व्यसनोपप्लुत्याद्यवस्थायामेव धनग्राहादिरुक्तक्र-

मेणर्णभाक्, अन्यत्र तु दायानर्हः पुत्र एव प्रथमतः पश्चाद्धन-ग्राहादिरिति क्रमान्तरविधानार्थम्, तस्यात्राश्रुतत्वात्, आदौ दायानर्हपुत्रदानासामञ्जस्याच्च । यत्पुनस्तेनैवोक्तं—

पूर्वं दद्याद्धनग्राहः पुत्रस्तस्मादनन्तरम् ।
योषिद्ग्राहस्सुताभावे पुत्रो वाऽस्यन्तनिर्धनः ॥

इति, तद्योषिद्ग्राहापेक्षयाऽत्यन्तबहुधनो यः पुत्रस्तस्य धनग्रा-हानन्तर्यार्थमिति सर्वमाविरुद्धम् । न च योषिद्ग्राहदानाधिका रशास्त्रान्यथाऽनुपपत्त्या योषिद्ग्रहणमपि पूर्वपतिकृतर्णदातुः शास्त्रीयमिति शङ्कनीयम् । यतो रागप्राप्तयोषिद्ग्रहणस्य सम्भवान्न शास्त्रस्यानुपपत्तिः । अत एवाह सङ्ग्रहकारः—

यत्र दद्याद्ऋणं वोढुः पुनर्भूस्वैरिणीपतिः ।
न तेन तदुपादानं शास्त्रेण विहितं भवेत् ॥

तदुपादानं पुनर्भुवां स्वैरिणीनां सङ्ग्रहणम् । तास्तु नारदेन निरूपिताः—

परपूर्वाः स्त्रियस्त्वन्यास्सप्त प्रोक्ता यथाक्रमम् ।
पुनर्भूस्स्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥
कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनस्संस्कारकर्मणा ॥
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता ॥

असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति ।
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता ॥
मृते भर्तरि तु प्राप्ता देवरादीनपास्य वा ।
उपगच्छेत्परं कामात् सा तृतीया प्रकीर्तिता ॥
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या ।
तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ॥

इति । उत्पन्नसाहसा क्षतयोनिः प्रौढेति यावत् । अन्यस्मै देवरायेत्यर्थः । देवरायेत्यभिप्रायेणात्रान्यशब्दप्रयोगात्, स चाभिप्रायः 'असत्सु देवरेषु' इति उत्तरत्रोक्त्या गम्यते । समाश्रयेत् सुरतार्थमिति शेषः । एवं श्रितेत्यत्रापि शेषोऽध्यवसेयः । पुनः पत्युर्गृहं यायात् निवासार्थमिति शेषः । एवंच यः प्रथमेतरपुनर्भुवमुपगच्छति स नियुक्तमात्रो न योषिद्ग्राह इति न पुनर्भूभर्तृकृतर्णदानाधिकारीत्यवगन्तव्यम् । एवं यस्स्वैरिणीं चतुर्थीव्यतिरिक्तामुपगच्छति सोपि जारमात्रो न योषिद्ग्राह इति स्वैरिणीपतिकृतर्णानधिकारीत्यवगन्तव्यम् । आद्यपुनर्भ्वास्तु यः पाणिं गृह्णाति स योषिद्ग्राही भवत्येव भा-

र्यात्वेनैव स्वीकारात्। चतुर्थ्या अपि स्वैरिण्याः भार्यात्वेनैव स्वीकार इति स्वीकर्ता योषिद्ग्राह एव। तेन ताभ्यां पुनर्भ्वाः प्रथमायाः पत्या कृतमृणं स्वैरिण्याश्चतुर्थ्याः पत्या कृतं च ऋणं देयम्। तथाच तेनैवोक्तम्—

अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम्।
ऋणं तयोः पतिकृतं दद्याद्यस्ते उपाश्नुते॥

पतित्वेनेति शेषः। अत एव—

यस्तु दद्याद्दणं वोढुः पुनर्भूस्वैरिणीपतिः।

इति सङ्ग्रहकारेणोक्तम्। यत्तु नारदेनोक्तं—

अधनस्य ह्यपुत्रस्य मृतस्योपैति यस्स्त्रियम्।
ऋणं वोढुस्स भजते सैवास्य च धनं स्मृतम्॥

इति, तत्र स्त्रियमुपैतीत्यस्य यथाश्रुतार्थपरत्वे नियुक्तजारयोरपि ऋणभागित्वमिति प्रागुक्तविरोधः। स्त्रीग्राहपरत्वे पौनरुक्त्यमिति सङ्कटमिति। उच्यते—धनग्राहपुत्रयोषिद्ग्राहविहीनस्य योषिदुपभोक्ताऽपि ऋणभागिति प्रतिपादनार्थमिदं वचनमारब्धमिति न सङ्कटं किञ्चित्। यदपि तेनैवोक्तम्—

या पुनस्सधनैव स्त्री सापत्या वाऽन्यमाश्रयेत्।
सोऽस्या दद्याद्दणं भर्तुरुत्सृजेद्वा तथैव ताम्॥

इति, तस्यायमर्थः—या स्त्री सधना सबालतनया च रक्षार्थं मातुलादिकमाश्रयेत्, स चाश्रयभूतो मातुलादिः भर्तृकृतर्णं दा-

पयेत्। यदि तु सा दातुं नेच्छति तदा सधनां सतनयां त्यजे-
दिति। तथाच कात्यायनः—

बालपुत्राऽधिकार्था च त्रातारं याऽन्यमाश्रिता।
आश्रितस्तद्धनं दद्याद्बालपुत्राविधिस्स्मृतः॥

दद्यात् दापयेदित्यर्थः।

इति स्मृतिचन्द्रिकायामृणप्रतिदातृनिर्णये
रिक्थग्राहादिविषयाणि.

अथ कुटुम्बविषयाणि.

तत्र बृहस्पतिः—

पितृव्यभ्रातृपुत्रस्त्रीदासशिष्यानुजीविभिः।
यद्गृहीतं कुटुम्बार्थे तद्गृही दातुमर्हति॥

शिष्यग्रहणेनान्तेवास्यपि सङ्गृहीतः। छात्रमात्रस्य विवक्षित-
त्वात्। गृहीत्यनेन न गृहिमात्रस्याभिधानं, किन्तु कुटुम्बिनः,
तस्यैव विवक्षितत्वात्। तथाच नारदः—

शिष्यान्तेवासिदासस्त्रीप्रेष्यकृत्यकरैश्च यत्।
कुटुम्बहेतोरुत्क्षिप्तं दातव्यं तत्कुटुम्बिना॥

शिष्यो वेदविद्यार्थी। शिल्पविद्यार्थी त्वन्तेवासी। कुटुम्बहेतोः
कुटुम्बार्थं उत्क्षिप्तं असंनिधानादिना स्वानुज्ञां विनाऽपि कृत-

मृणम्। कुटुम्बिनैव ऋणकर्तुः प्रवासव्यसनाद्यभावेऽपि देयम्, कुटुम्बभरणस्य स्वकार्यत्वादित्यर्थः। कात्यायनोप्यमुमेवार्थमाह—

प्रोषितस्यामतेनापि कुटुम्बार्थमृणं कृतम्।
दासस्त्रीमातृशिष्यैर्वा दद्यात्पुत्रेण वा भृगुः॥

स्त्रिया मात्रा वा कृतमकुटुम्बार्थमपि किञ्चिदृणं देयमित्याह स एव—

देयं भार्याकृतमृणं भर्त्रा पुत्रेण मातृकम्।
भर्तुरर्थे कृतं यत् स्यादभिधाय गते दिशम्॥

नारदोपि—

पुत्रिणी तु समुत्सृज्य पुत्रं स्त्री याऽन्यमाश्रयेत्।
तस्या ऋणं हरेत्सर्वं निस्स्वायाः पुत्र एव तु॥

अन्यं मातुलादिकम्। अनुज्ञया तु यस्यकस्यचिदर्थे कृतमपि सदा कुटुम्बिनैव देयम्। 'प्राक्प्रतिपन्नं देयं यस्यकस्यचित्कुटुम्बार्थं वा' इति विष्णुस्मरणात्। प्रतिपन्नपदस्यार्थः कात्यायनेन प्रपञ्चितः—

देयं पुत्रकृतं तत्स्याद्यच्च स्यादनुवर्णितम्।
कृतासंवादितं यच्च श्रुत्वा चैवानुचोदितम्॥

कृतं अकृच्छ्र इति शेषः। कृच्छ्रकृतं त्वप्रतिपन्नमपि देयम्। तथाच नारदः—

पितुरेव नियोगाद्वा कुटुम्बभरणाय वा।

कृतं वा यदृणं कुर्य्यं दद्यात्पुत्रस्य तत्पिता ॥

अत्र च पूर्वत्र च पुत्रग्रहणं कुटुम्बोपलक्षणार्थं, पितृग्रहणं चेह गृहप्रभोरुपलक्षणार्थम् । तथाच कात्यायनः—

कुटुम्बार्थमशक्ते तु गृहीतं व्याधितेऽथवा ।
उपप्लवनिमित्तं च विद्यादापत्कृतं च तत् ॥
कन्यावैवाहिकं चैव प्रेतकार्ये च यत्कृतम् ।
एतत्सर्वं प्रदातव्यं कुटुम्बेन कृतं प्रभोः ॥

इति । अशक्ते कुटुम्बभरणासमर्थे कुटुम्बिनीत्यर्थः । कन्यावैवाहिकं कन्याविवाहनिमित्तकम् । यत्कृतं येन कृतम् । प्रभोः प्रभुणा कुटुम्बिनेति यावत् । यथा पुत्रपितृशब्दयोरुपलक्षणार्थत्वं नारदीये, तथा—

ऋणं पुत्रकृतं पित्रा शोध्यं यदनुमोदितम् ।
सुतस्नेहेन वा दद्यात् नान्यथा दातुमर्हति ॥

इति बार्हस्पत्यवचनेऽप्यवगन्तव्यम् । शोध्यमपाकरणीयम् । अनुमोदितग्रहणं प्रतिश्रुतस्याप्युपलक्षणार्थम् ।

देयं प्रतिश्रुतं यत्स्यात् यच्च स्यादनुमोदितम् ।

इति कात्यायनस्मरणात् । स्नेहादानं प्राङ्निरूपितनानाविधदेयर्णव्यतिरिक्तर्णविषयम् । भार्याकृतर्णविषयेऽपि समानं, सुतग्रहणस्य स्नेहमात्रोदाहरणतया कृतत्वात् । एवंच यदुक्तं कात्यायनेन—

ऋणं पुत्रकृतं पित्रा न देयमिति धर्मतः ।

इति, तदुक्तनानाविधदेयर्णेतरर्णाविषयमित्यवगन्तव्यम् । धर्मत इति वदन् स्नेहतो देयमिति दर्शयति । यदापि नारदेनोक्तं—

न भार्यया कृतमृणं कथञ्चित्पत्युरावहेत् ।

इति, तदपि निरूपितदेयर्णव्यतिरिक्तविषयम् । एवम्भूतविषयत्वप्रदर्शनार्थमेवानन्तरमुक्तं तेनैव—

आपत्कृताद्ऋते पुंसा कुटुम्बार्थो हि दुस्तरः ।

इति । भार्ययाऽप्यापदिकृतं कुटुम्बार्थं च कृतं पत्युरपाकरणीयं भवेदित्यर्थः । पूर्वोक्तो यो निषेधः स रजकादिस्त्रीभ्योऽन्यत्रेत्याह स एव—

अन्यत्र रजकव्याधगोपशौण्डिकयोषिताम् ।

तेषां तत्प्रत्यया वृत्तिः कुटुम्बं च तदाश्रयम् ॥

तेषां रजकादीनाम् । तत्प्रत्यया वृत्तिः योषिदधीनं वर्तनमित्यर्थः। तेनानापदि कुटुम्बार्थं कृतमपि पतिभिर्देयमित्याभिप्रायः । रजकादिग्रहणं योषिदधीनवृत्तीनां तैलिकशैलूषादीनामुपलक्षणार्थम् । याज्ञवल्क्योपि हेतुकथनेनोपलक्षणार्थत्वं दर्शयन्नारदाभिप्रायविषयत्वेनोक्तमेवार्थमाह—

गोपशौण्डिकशैलूषरजकव्याधयोषिताम् ।

ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया ॥

शैलूषो नटः । एवंच यदुक्तं विष्णुना 'न स्त्रीकृतं पतिपुत्रौ'

इति, तदुक्तदेयभूतव्यतिरिक्तविषयमिति मन्तव्यम् । मनुस्तु कुटुम्बार्थे भृत्यादिकृतक्रियादिरपि कुटुम्बिनाऽङ्गीकरणीय इत्याह—

कुटुम्बार्थे त्वधीनोपि व्यवहारं यमाचरेत् ।
स्वदेशे वा विदेशे वा तन्नयायान्न विचालयेत् ॥

किन्तु स्वीकुर्यादिति शेषः ।

इति स्मृतिचन्द्रिकायां ऋणप्रतिदातृनिर्णये कुटुम्बविषयाणि.

अथ कुटुम्बजनविषयाणि.

तत्र याज्ञवल्क्यः—

अविभक्तैः कुटुम्बार्थे यद्दणं तु कृतं भवेत् ।
दद्युस्तद्रिक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥

अविभक्तधनैर्भ्रात्रादिभिस्समप्रधानैः कुटुम्बव्ययाय यद्दणं कृतं तत्तैस्सदा न देयम्, किन्तु तदानाधिकारिणि कुटुम्बिनि प्रेते प्रोषिते वा दातव्यमित्यर्थः । तत्रापि केषाञ्चिदभावे यस्तिष्ठति स दद्यात् 'अविभक्तैः कृतमृणं यस्तिष्ठेत् स दद्यात्' इति विष्णुस्मरणात् । अविभक्तैरिति बहुवचनं पूर्वत्रात्र चाविवक्षितम् । तथाच नारदः—

पितृव्येणाविभक्तेन भ्रात्रा वा यद्दणं कृतम् ।
मात्रा वा यत्कुटुम्बार्थे दद्युस्तत्सर्वरिक्थिनः ॥

ऋणकर्तरि प्रेते प्रोषिते वेति शेषः। तस्मिन् प्रधानभूते स्थिते सत्येषां गुणभूतानामृणदानानधिकारात्। अत एव मनुः—

ग्रहीता यदि नष्टस्स्यात्कुटुम्बे च कृतो व्ययः।
दातव्यं बान्धवैस्तत्स्यात् प्रविभक्तैरपि स्मृतः॥

ऋणस्य ग्रहीता पितृव्यादिर्यदि नष्टः प्रोषितो वा मृतो वा स्यात्तदा रिक्थिभिर्विभक्तैस्तत्कुटुम्बव्ययाय कृतमृणं दातव्यं स्वतः किमुताविभक्तैरित्यर्थः। एवं वृत्तिकारेण व्याख्यातम्। अस्मिन्व्याख्याने वचनानन्तरे वा वृथैवाविभक्तग्रहणं स्यादिति मत्वा भाष्यकारेण प्रविभक्तधनैः पितृव्यादिभिः स्वतः स्वधनाद्दातव्यमित्यर्थ इति वचनार्थमुक्त्वा मध्यगादेव धनादविभक्तैर्दत्वाऽवशिष्टविभागः कार्यो नादत्वेति वचनान्तरार्थो दर्शितः। यदा प्रविभक्तधना ऋणं प्रयच्छन्ति तदा दायानुरूपमंशं दद्युः, 'विभक्ताश्च दायानुरूपमंशम्' इति विष्णुस्मरणात्।

इति स्मृतिचन्द्रिकायां ऋणप्रतिदातृकुटुम्बजनविषयाणि.

अथ परतन्त्रस्त्रीविषयाणि.

तत्र कात्यायनः—

भर्त्रा पुत्रेण वा सार्धं केवलं वाऽऽत्मना कृतम्।
ऋणमेवंविधं देयं नान्यथा तत्कृतं स्त्रिया॥

अन्यथा तत्कृतं केवलं भर्त्रा पुत्रेण वा कृतं स्त्रिया तयोरभा-

वेऽपि न देयं, किंतु भर्त्रा पुत्रेण वा सार्धं सम्भूय गृहीतमृणं तयोरभावे देयम्। स्वयमेव गृहीतं तु तयोरभावेऽपीत्यर्थः। एवंविधमिति वदन् अन्यदप्यस्ति स्त्रिया देयमिति दर्शयति। किं तदित्यपेक्षिते याज्ञवल्क्यः—'प्रतिपन्नं स्त्रिया देयम्' इति। प्रतिपन्नं पतिकृतं पुत्रकृतं वा ऋणमहं दास्यामीत्यभ्युपेतामित्यर्थः।

न स्त्री पतिकृतं दद्यात् ऋणं पुत्रकृतं तथा।
अभ्युपेताहते .... ॥

इति नारदस्मरणात्। एवंच पतिपुत्रेतरकृतं प्रतिपन्नमपि स्त्रिया न देयमिति परिसङ्ख्यार्थतया याज्ञवल्क्यवचनमिति मन्तव्यं, स्पष्टत्वेन विध्यार्थत्वासम्भवात्। अप्रतिपन्नमपि पतिकृतं क्वचिद्विषये स्त्रिया देयमित्याह कात्यायनः—

मर्तुकामेन या भर्त्रा उक्ता देयमृणं त्वया।
अप्रपन्नाऽपि सा दाप्या धनं यद्याश्रितं स्त्रिया ॥

अत्रार्थादनाश्रितभर्तृधना स्त्री अप्रपन्ना चेन्न देयमिति गम्यते। यत्तु नारदेनोक्तं—

दद्याच्चापुत्रविधवा नियुक्ता वा मुमूर्षुणा।
यो वा तद्रिक्थमादद्याद्यतो रिक्थमृणं ततः ॥

इति, तत् आश्रितभर्तृधनविधवाभिप्रायेणोक्तमिति न पूर्वोक्तेन विरुद्धम्। यत्तु विष्णुनोक्तं—'न स्त्रीपतिपुत्रकृतम्' इति, तत्सामान्येन प्रतिषेधबोधकं बिशेषेण विधायकप्रागुक्तवचन-

आनृण्यापादनेन परलोकाहितं जलादौ प्राक्षिप्तं धनं भवतीत्युत्तरार्धस्यार्थः। अग्नौ चेत्यत्र हुतमिति शेषोऽध्याहार्यः, न पुनः क्षिप्तमिस्यस्यानुषङ्गः कार्यः। यदाह गोभिल—'ऋणेष्वज्ञायमानेषु गोळकामध्यमपर्णेन जुहुयात् यत्कुसीदम्' इति। मान्त्रवर्णिकी च अग्निरत्र देवता। आनृण्यार्थं चायं होमः। अनृणो भवामीति मन्त्रलिङ्गात्। गोळका पलाशः। तथाच सङ्ग्रहकारः—

द्रव्यं यत्त्वधमर्णस्थं क्वचिद्ब्राह्मणगं भवेत्।
सुतादिब्राह्मणान्तानां रिक्थभाजामसम्भवे॥
पलाशस्य पलाशेन जुहुयान्मध्यमेन तु।
यत्कुसीदमिति प्रास्येदथवाऽप्स्वेव तद्धनम्॥

इति। क्वचित् उत्तमर्णादिबन्ध्वन्तानामभावविषय इत्यर्थः। यत्कुसीदमिति पूर्वेणैव सम्बध्यते, मूलस्मृतौ जलप्रक्षेपणमन्त्रास्मरणात्। निक्षिप्तादिधनेऽप्येष एव विधिर्निक्षेपादिस्वामिन्यतीते द्रष्टव्यः, समानकारणत्वादित्युक्तं देवस्वामिना॥

इति स्मृतिचन्द्रिकायामतीतोत्तमर्णऋणापाकरणविषयाणि.

इति सकलविद्याविशारदश्रीकेशवादित्यभट्टोपाध्याय-
सूनुयाज्ञिकदेवणभट्टोपाध्यायसोमयाजिविरचि-
तायां स्मृतिचन्द्रिकायामृणादानाख्यस्य
पदस्य विधिवितानस्समाप्तः.

विषयव्यतिरिक्तविषयेऽवतिष्ठत इत्यविरुद्धम् । देयादेयनिर्णयाः पृथक्पृथक्कर्तुमसुकरा इति प्रतिदातृनिर्णयान्तःपातितयाऽस्माभिः कृताः प्रत्येतव्याः ।

इति स्मृतिचन्द्रिकायां प्रतिदातृनिर्णये परतन्त्रस्त्रीविषयाणि.

समाप्तं च प्रतिदातृनिर्णयप्रकरणम्.

अथातीतोत्तमर्णऋणापाकरणविषयाणि.

तत्र नारदः —

ब्राह्मणस्य तु यद्देयं सान्वयस्य न चास्ति सः ।
निवपेत्तत्सकुल्येषु तदभावेऽस्य बन्धुषु ॥

ब्राह्मणग्रहणमुत्तमर्णोपलक्षणार्थम् । एवंचायमर्थः—उत्तमर्णस्य देयं यद्दणं तत्तदभावे तत्सन्तानस्य तनयादेस्तद्द्रव्यग्राहिणः ऋणप्रतिदात्रा देयम् । ससन्तानस्योत्तमर्णस्याभावे तत्सकुल्येष्वन्तरङ्गानतिक्रमेण देयम् । सकुल्यानामप्यभावे मातुलादिषु बन्धुष्वन्तरङ्गानतिक्रमेण देयामिति । यदा तु पूर्वोक्तानामभावः तदाऽप्याह स एव—

यदा तु न सकुल्यास्स्युर्न च संबन्धिबान्धवाः ।
तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेत् ॥

प्रजापतिरपि—

बन्ध्वभावे तु विप्रेभ्यो देयं क्षेप्यं जलेऽपि वा ।
जले क्षिप्तं तथाऽग्नौ च धनं स्यात्पारलौकिकम् ॥

अथ द्वितीयस्य पदस्य निक्षेपोपनिध्यादिभे-
देनानेकविधस्य विधिरुच्यते.

तत्र मनुः—

कुलजे वृत्तसम्पन्ने धर्मज्ञे सत्यवादिनि ।
महापक्षे धनिन्याप्ते निक्षेपं निक्षिपेद्बुधः ॥

महापक्षे बन्धुशालिनि । कः पुनर्निक्षेप इत्यपेक्षिते व्यासः—

स्थानत्यागाद्राजभयाद्दायादानां च वञ्चनात् ।
स्वद्रव्यमर्प्यतेऽन्यस्य हस्ते निक्षेपमाह तम् ॥

स्वद्रव्यं स्वकीयद्रव्यं वस्त्रनिष्कादिकमन्यस्य कुलजत्वादिगुणव-तो हस्ते समर्प्यते ग्राहकसमक्षमेवार्प्यते क्षेमार्थं यत्तत्र निक्षे-पशब्दो वर्तत इत्यर्थः । तच्चार्पणं ग्राहकस्य पुरतो गणनं कृत्वा कार्यं, 'निक्षेपं गणितं विदुः' इति नारदस्मरणात् ।

उपनिधिस्थापनाविधिमाह बृहस्पतिः—

स्थानं गृहं गृहस्थं च तद्वर्णं विविधान् गुणान् ।
सत्यं शौचं बन्धुजनं परीक्ष्य स्थापयेन्निधिम् ॥

निधिं उपनिधिमित्यर्थः । तस्य स्वरूपमपि तेनैवोक्तं—

अनाख्यातं व्यवहितं असङ्ख्यातमदर्शितम् ।
मुद्राङ्कितं च यद्दत्तं तदौपनिधिकं स्मृतम् ॥

व्यवहितं करण्डकादौ प्रक्षिप्य निहितं, नास्य समर्पणे ग्रा-

हकसमक्षासमक्षलक्षणो नियमः, दत्तमिति सामान्येनोक्तेः ।

न्यासस्य तु स्वरूपनिरूपणमुखेनैव स्थापनप्रकारमाह स एव—

राजचोरारातिभयाद्दायादानां च वञ्चनात् ।
स्थाप्यतेऽन्यगृहे द्रव्यं न्यासस्तत्परिकीर्तितम् ॥

द्रव्यं बलीवर्दकांस्यादिकम् । गृह इति वदता गृहस्वामिनः परस्थानगतस्य असमक्षे तस्मिन्नागते समर्पणीयमिति कथयित्वा स्थापितो न्यासो, न पुनः तत्समक्षे समार्पित इति दर्शितम् ॥

इति स्मृतिचन्द्रिकायां निक्षेपादिस्थापनविधिः.

अथ निक्षेपादिपालनविधिः.

तत्र बृहस्पतिः—

ससाक्षिकं रहो दत्तं द्विविधं समुदाहृतम् ।
पुत्रवत्परिपाल्यं तद्विनश्यत्यनवेक्षया ॥

पालयितुः फलं चाह स एव—

ददतो यद्भवेत्पुण्यं हेमकुप्याम्बरादिकम् ।
तत्स्यात्पालयतो न्यासं तथैव शरणागतम् ॥

कुप्यं त्रपुसीसादिकम् । भक्षकादेर्दोषोपि तेनैव दर्शितः—

भर्तृद्रोहे यथा नार्याः पुंसः पुत्रसुहृद्वधे ।
दोषो भवेत्तथा न्यासे भक्षितोपेक्षिते नृणाम् ॥

न्यासद्रव्यं न गृह्णीयात् तन्नाशस्त्वयशस्करः ।

इति । न्यासग्रहणं प्राचीनवचनत्रयेऽप्युपलक्षणार्थं, तेन फल-श्रुत्यादिकं निक्षेपादित्रयसाधारणमिति मन्तव्यम् ।

इति स्मृतिचन्द्रिकायां निक्षेपादिपालनविधिः.

अथ सभ्यभूतग्रहीतृविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र बृहस्पतिः—

दैवराजोपघातेन यदि तन्नाशमाप्नुयात् ।
ग्रहीतृद्रव्यसहितं तत्र दोषो न विद्यते ॥

ग्रहीतुरिति शेषः । उपेक्षाद्यभावादित्यभिप्रायः । ग्रहीतृद्रव्य-सहितमित्येतदुपेक्षाद्यभावनिश्चायकत्वेनोक्तम् । निक्षिप्तमात्रस्यापि कारणान्तरेणोपेक्षाद्यभावे निश्चिते ग्रहीतुर्दोषो न विद्यत इत्य-वगन्तव्यम् । दैवराजग्रहणं ग्रहीतृसमाधेयनिमित्तोपलक्षणार्थ म् । अत एव कात्यायनः—

अराजदैविकेनापि निक्षिप्तं यत्र नाशितम् ।
ग्रहीतुस्सह भाण्डेन दातुर्नष्टं तदुच्यते ॥

भाण्डेन अर्थेनेत्यर्थः । तथाच नारदः—

ग्रहीतुस्सह योऽर्थेन नष्टो नष्टस्स दायिनः ।
दैवराजकृते तद्वन्न चेत्तत् जिह्मकारितम् ॥

तत् ग्रहीत्रर्थेन सह प्रध्वंसनं कूटकारितं न चेदित्यन्त्यपादस्यार्थः। दायिनस्स नष्ट इति वदता वचनभङ्ग्या ग्रहीता मूल्यद्वारेण न दाप्यो नष्टं धनमित्युक्तम्। उक्तं च याज्ञवल्क्येन—

न दाप्योऽपहृतं तत्तु राजदैविकतस्करैः।

इति। दैविकपदस्यार्थो मनुना स्पष्टत्वेनोक्तः—

चोरैर्हृतं जलेनोढमग्निना दग्धमेव च।
न दद्याद्यदि तस्मात्स न संहरति किञ्चन॥

तस्माद्धनाद्यादि स्तोकमपि न गृह्णातीत्यर्थः। उपनिधिग्रहीतर्यप्युक्तं तेनैव—

समुद्रान्नाप्नुयात् किञ्चित् यदि तस्मान्न संहरेत्।

इति। एवं न्यासग्रहीतर्यप्युपेक्षाद्यभावे द्रष्टव्यं, असभ्यत्वाभावात्। 'समुद्रान्नाप्नुयात्' इति वचनान्तरेण पृथगुपनिधावभिधानं प्रपञ्चरुचित्वेनेति मन्तव्यम्। क्वचिद्येनकेनचिद्धेतुना नष्टमपि ग्रहीता मूल्यद्वारेण न दाप्य इत्याह कात्यायनः—

ज्ञात्वा द्रव्यवियोगं तु दाता यत्र विनिक्षिपेत्।
सर्वोपायविनाशेऽपि ग्रहीता नैव दाप्यते॥

इति स्मृतिचन्द्रिकायां सभ्यभूतग्रहीतृविषयाणि.

अथ सभ्याभासभूतग्रहीतृविषयाणि.

तत्र कात्यायनः—

निक्षिप्तं यस्य यत्किञ्चित् तत्प्रयत्नेन पालयेत् ।
दैवराजकृतादन्यो विनाशस्तस्य कीर्त्यते ॥

यस्य पार्श्वे यत् स्थापितं तत्तेनावहितेन पालनीयं, यतो दैवराजकृतादन्यो विनाशादिस्तस्य ग्राहकस्य दोषेण कृतत्वेन कीर्त्यत इत्यर्थः न केवलं दुष्कीर्तिरेव किंतु वस्तुवृत्त्या स्वदोषाद्विनाशादौ जाते बह्वर्थहानिश्चेसाह स एव—

यस्य दोषेण यत्किञ्चिद्विनाश्येत ह्रियेत वा ।
तद्द्रव्यं सोदयं दाप्यो दैवराजकृताद्विना ॥

उपेक्षादिलक्षणोऽत्र दोषोऽभिमतः । तथाच बृहस्पतिः—

भेदेनोपेक्षया न्यासं ग्रहीता यदि नाशयेत् ॥
याच्यमानो न दद्याद्वा दाप्यस्तत्सोदयं भवेत् ॥

नाशे मूल्यद्वारेण दाप्यः । अनाशे तु स्वरूपत एव । अकृतवृद्धिप्रकरणे सामान्येनोक्तं वृद्धिपरिमाणं नाशे ग्राह्यं, अदाने तु—

याच्यमानो न चेद्दद्याद्धर्धते पञ्चकं शतम् ।

इति विशेषेण तैरेवोक्तं ग्राह्यम् । भेदेनोपेक्षयेति वदन् स्वीयद्रव्येण सहैवोपेक्षया नाशे तु सोदयविधिर्नेति दर्शयति । तेन 'तत्र समं दाप्य उपेक्षितः' इति स्मृत्यन्तरविहितं मूलमात्रमेव देयम् । एवं याच्यमानस्यादत्तस्य दैवराजकृतेऽपि नाशे स्थापकाय मूलमात्रं देयम् । तथाच कात्यायनः—

याचितानन्तरं नाशे दैवराजकृतेऽपि सः ।
ग्रहीता प्रतिदाप्यस्स्यात् ..... ॥

इति । मूलमात्रमिति शेषः । प्रत्यर्पणविलम्बमात्रापराधे सवृद्धिकदापनायोगात् । राज्ञे च तत्समो देयः, तथाच नारदः—

याच्यमानस्तु यो दातुं निक्षेपं न प्रयच्छति ।
दण्ड्यस्स राज्ञो भवति नष्टे दाप्यश्च तत्समम् ॥

नष्ट इत्यत्र दैवाद्राजतो वेति शेषोऽध्याहार्यः । यः पुनः स्थापितधनाद्व्ययं कुरुते, उपभोगं वा, लाभार्थं प्रयोगं वा । तत्राप्याह स एव—

यत्रार्थं साधयेत्तेन निक्षेप्तुरननुज्ञया ।
तत्रापि दण्ड्यस्स भवेत्तं च सोदयमावहेत् ॥

साधितार्थानुसारेण दण्ड्यः । याज्ञवल्क्योपि—

आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तच्चापि सोदयम् ।

इति । आजीवन् उपजीवन् । स्वेच्छया उपनिधात्रननुज्ञया । तच्छब्देनोपनिधिरत्र परामृश्यते, प्रकृतत्वात् । बृहस्पतिरपि—

न्यासद्रव्येण यः कश्चित् साधयेत्कार्यमात्मनः ।
दण्ड्यस्स राज्ञो भवति दाप्यस्तच्चापि सोदयम् ॥

साधयेत् स्वाम्यननुज्ञयेति शेषः । स्वाम्यनुज्ञया तु साधयतो न दोष इति प्राचीनवचनेष्वेवार्थादवगम्यते । कात्यायनोपि—

न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितम् ।
अज्ञाननाशितं चैव येन दाप्यस्स एव तत् ॥

अत्र विशेषमाह व्यासः—

भक्षिते सोदयं दाप्यस्समं दाप्य उपेक्षिते ।
किञ्चिन्न्यूनं प्रदाप्यस्स्याद्द्रव्यमज्ञाननाशितम् ॥

किञ्चिन्न्यूनमित्यस्य पादांशहीनमित्यर्थो ग्राह्य इति कैश्चिदुक्तम्। भक्षितवदपहृतं दाप्यः 'निक्षेपापहारी वृद्धिसहितं धनं धनिकस्य दाप्यः' इति विष्णुस्मरणात्। अत्र दण्डमपि दाप्यः॥

निक्षेपस्यापहर्तारं तत्समं दापयेद्दमम् ।
तथोपनिधिहर्तारं विशेषेणैव पार्थिवः ॥

इति मनुस्मरणात्। अपह्नवे त्ववृद्धिकमेव साधितं दाप्य इत्याह व्यासः—

निक्षेपं निह्नुते यस्तु नरो बन्धुबलान्वितः ।
साक्षिभिर्वाऽथ दिव्येन विभाव्य प्रतिदाप्यते ॥

बृहस्पतिस्तु दण्डदापनमप्याह—

गृहीत्वाऽपह्नुते यत्र साक्षिभिश्शपथेन वा ।
विभाव्य दापयेन्न्यासं तत्समं विनयं तथा ॥

इति स्मृतिचन्द्रिकायां सभ्याभासभूतग्रहीतृविषयाणि.

अथ गृहीतृस्थापकादिकृत्यविषयाणि.

तत्र ग्रहीतारं प्रत्याह बृहस्पतिः—

स्थापितं येन विधिना येन यच्च यथाविधि ।
तथैव तस्य तद्देयं न देयं प्रत्यनन्तरे ॥

स्थापकेतरस्य यस्य स्थापितद्रव्ये स्वाम्यमस्ति सः इहप्रत्य नन्तर इत्युच्यते । स्थापकं प्रत्याह मनुः—

यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः ।
स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥

दायो दानं स्थापनमिति यावत् । ग्रहो ग्रहणम् । एतदुक्तं भवति—ससाक्षिकत्वेन स्थापितं साक्षिसमक्षं ग्रहीतव्यम् । रहसि स्थापितं रहस्येव ग्राह्यमिति । कदा ग्राह्यमित्यपेक्षिते कात्यायनः—

ग्राह्यस्तूपनिधिः काले कालहीनं तु वर्जयेत् ।
कालहीनं ददद्दण्डं द्विगुणं च प्रदाप्यते ॥

यद्भयादुपनिधिरन्यहस्ते न्यस्तः, तद्भयातीते काले स ग्राह्य इत्यर्थः । तद्भयातीते कालेऽपि स्वयमेव नायाचितमर्पणीयं 'सकृद्याचितमर्पयेत्' इति बृहस्पतिस्मरणात् । तद्भये वर्तमाने स्वयमयाचितं दीयमानं कालहीनं तस्य दानं दौष्ट्येनैवेति ददतो दण्डो युक्तः । स्थापकस्य दौष्ट्ये दण्डमाह मनुः—

निक्षेपो यः कृतो येन यावांश्च कुलसंनिधौ ।
तावानेव स विज्ञेयो विब्रुवन् दण्डमर्हति ॥

कुलं साक्षिभूतम् । एतदुक्तं भवति—ससाक्षिके साक्षिवचनं विरुद्धं ब्रुवन् दण्ड्य इति । असाक्षिके त्वाह बृहस्पतिः—

रहो दत्ते निधौ यत्र विसंवादः प्रजायते ।

विभावकं तत्र दिव्यमुभयोरपि च स्मृतम् ॥

निधावुपनिधौ । उभयोर्मध्य एकस्येत्यर्थः । उभयोर्ग्रहणं 'रुच्या वाऽन्यतरः कुर्यात्' इत्ययमेव पक्षो यथा स्यादिति । पार्थिवं प्रत्याह मनुः—

निक्षेपस्यापहर्तारमनिक्षेप्तारमेव च ।
सर्वैरुपायैरन्विच्छेच्छपथैश्चैव वैदिकैः ॥
यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते ।
तावुभौ चोरवच्छास्यौ प्रदाप्यौ तत्समं दमम् ॥'

इति । चोरवच्छास्यौ चोरदण्डेन दण्ड्यौ । चोरदण्डश्च प्रथमसाहस इत्युक्तं मनुवृत्तौ । प्राड्विवाकं च प्रत्याह स एव—

तेषां न दद्याद्यदि तु तद्धिरण्यं यथाविधि ।
द्वयं निगृह्य दाप्यं स्यादिति धर्मस्य धारणा ॥
निक्षिप्तस्य धनस्यैवं प्रीत्योपनिहितस्य च ।
राजा विनिर्णयं कुर्यादक्षिण्वन् न्यासधारणम् ॥

इति । तेषां अभियोक्तृणाम् । तद्धिरण्यं तन्मूल्यहिरण्यमभियोक्तृभ्यो दाप्यम् । द्वयामपिं द्विगुणं निगृह्य दण्डयित्वा । अक्षिण्वन् अताडयन् ॥

इति स्मृतिचन्द्रिकायां गृहीतृस्थापकादिकृत्यविषयाणि.

अथ प्रत्यनन्तरे प्रत्यर्पणप्रतिषेधस्यापवादः.

तत्र मनुः—

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे ।
न स राज्ञाऽभियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥

प्राचीने प्रकरणे या प्रत्यनन्तरपदस्य व्याख्या कृता, साऽत्रापि द्रष्टव्या। अनेन वचनेन वचोभङ्ग्या स्थापके मृते प्रत्यनन्तरे प्रत्यर्पणं ग्राहकेण कार्यमित्युक्तम् । अयाचितेनार्पणमप्यत्र भावदोषपरिहारार्थत्वात् भूषणं न तु दूषणमित्यभिसन्धायोक्तं 'स्वयमेव तु यो दद्यात्' इति । प्रत्यनन्तरेऽपि कालहीनमयाचितेन न देयं, भावदोषापत्तेः । प्रत्यनन्तरबहुत्वे तु नैकस्मिन् प्रत्यनन्तरे देयं सर्वप्रत्यनन्तरसान्निधौ देयं, तथा सति निक्षेप्तुः बन्धुभिः प्रत्यनन्तरभूतैरभियोक्तव्यो न भवति। यदा तु स्वयमेव न ददाति तदा प्रत्यनन्तरं प्रत्याह स एव—

अच्छलेनैव चान्विच्छेत्तमर्थं प्रीतिपूर्वकम् ।
विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् ॥

अन्वेषणं निक्षेपादिरस्मिन्नेऽस्तीत्यवधारणम् । स्वतः तदच्छलेनैव भूतानुसारेणैव कार्यं न छलानुसारेण । परिसाधनं ग्राहकसकाशादादानम् । वृत्तग्राहकविषये साम्नैव प्रियपूर्ववचसैव कार्यं न भयदर्शनादिना । वृत्तं विचार्य दुर्वृत्तग्राहकविषये तु छलानुसारेण वाऽन्विच्छेत् । भयदर्शनाद्युपायान्तरेण छलादिना

वा ऋणादानप्रकरणोक्तेन परिसाधयेदित्यस्मादेव वचनादवगम्यते यथा सद्वृत्ते छलादिप्रयोगवच्छपथेन शोधनस्याप्यनुचितत्वम् । ग्राहके तु मृते पश्चाद्यदधीनमुपनिध्यादि जातं तेनैव स्थापके प्रत्यनन्तरे वा प्रत्यर्पणीयमित्येतदातिस्थूलत्वात् स्मृतिकारैरुपेक्षितमित्यस्मरणकारणमुन्नेयम् । यदि ग्राहकवदसौ स्वयं न ददाति तदा स्थापकः प्रत्यनन्तरो वा पूर्वोक्तमार्गेणान्विच्छेत् । संप्रतिपन्नं पूर्वोक्तप्रकारेण परिसाधयेत् । एतदापि स्मृतिकारैरनुक्तमूहेनापि ज्ञातुं शक्यत्वात् ॥

इति स्मृतिचन्द्रिकायां प्रत्यनन्तरे प्रत्यर्पणस्य प्रतिषेधापवादः.

अथ याचितान्वाहितविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र याज्ञवल्क्यः—

याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ।

इति । याचितं उत्सवादिषु परकीयमलङ्काराद्यर्थं याचित्वा स्वसमीपमानीतम् । अन्वाहितं स्वस्मिन् स्थितं परधनमन्यान्तिकस्थतया कृतम् । न्यासनिक्षेपयोस्स्वरूपं निक्षेपादिस्थापनविधिप्रकरणे दर्शितम् । यद्यपि स्मृत्यन्तरे न्यासनिक्षेपयोः स्थापनादिधर्मा उपदिष्टाः, तथाऽप्यस्यां स्मृतौ नोपदिष्टा इत्युपदिष्टोपनिधिधर्माणामतिदेशोऽयं युक्तः । बृहस्पत्यादिनाऽप्यनुपदिष्टधर्मकेष्वेवान्वाहितादिष्वतिदिष्टम् —

अन्वाहिते याचितके शिल्पन्यासे सबन्धके ।
एष एवोदितो धर्मस्तथा च शरणागते ॥

इति । शिल्पिन्यासे कङ्कणादिकरणाय स्वर्णकारादिहस्तन्यस्त-हिरण्यादावित्यर्थः । अनेनाप्रतियाचितस्य शिल्पिन्यासस्य दैवादिना नाशे स्वर्णकारप्रभृतिर्न दाप्य इत्यादिधर्मोऽतिदिष्ट इति मन्तव्यम् । अत्र क्वचिदपवादमाह कात्यायनः—

यैश्च संस्क्रियते न्यासो दिवसैः परिनिश्चितैः ।
तदूर्ध्वं स्थापयेच्छिल्पी दाप्यो दैवहतेऽपि तम् ॥

यत्र जीर्णान्येव वस्त्रादीनि नैर्मल्याद्यर्थं रजकादौ न्यस्तानि नूतनान्येव वा, तन्नाशश्च शिल्पिकृताभिघाताद्युपेतजीर्णत्वादिदोषादभिघातादिमात्राद्वा जातः, तत्र 'यस्य दोषेण' इत्यादिनोक्तसोदयदापनमतिदेशात् प्राप्तमिति वदन्ति । वस्तुतस्तु—जीर्णादौ न शिल्पिदोषः, नैर्मल्याद्यर्थत्वादभिघातस्य । नूतनादौ नैवमिति शिल्पी दोषवान् । तेन जीर्णादौ न किञ्चिद्दाप्यः, नूतनादौ तु मूल्यमात्रं दाप्यं, नैर्मल्यार्थादभिघातादधिकांशस्यैव दोषत्वेन स्वल्पदोषत्वात् । एतत्सर्वमभिसन्धायाह स एव—

न्यासदोषाद्विनाशस्याच्छिल्पिनं तन्न दापयेत् ।
दापयेच्छिल्पिदोषात्तत् संस्कारार्थं यदर्पितम् ॥

शिल्पिदोषादित्यत्र विनाशस्यादित्यनुषज्यते । यत्र तन्त्वादिकं वस्त्राद्यर्थं कुविन्दादौ न्यस्तं खण्डपटादिदशायां नष्टं परिपू-

र्णदशायां वा कुविन्दादिना दीयमानं स्वामिना न गृहीतं नष्टं च, तत्राप्याह स एव—

स्वल्पेनापि च यत्कर्म नष्टं चेद्भृतकस्य तत् ।
पर्याप्तं दित्सतस्तस्य विनश्येत्तदगृह्णतः ॥

यत्कर्म वस्त्रनिर्माणादि स्वल्पेनापि भ्रान्तवानादिना विकलं नष्टं चेत् भृतकस्य शिल्पिन एव नष्टं पुनर्वेतनग्रहणमन्तरेणैव वानादिक्रियां कुर्यादित्यर्थः । यदि स्वामी पुनस्तन्त्वादिकं नार्पयति तदा पुनर्वानाद्यभावेऽपि वेतनं शिल्पिने दत्तं न लभते। पर्याप्तं परिपूर्णं वस्त्रादिकं दित्सतो भृतस्य यस्स्वामी तस्य दीयमानमगृह्णतस्तत्पर्याप्तं विनश्येदित्युत्तरार्धस्यार्थः । एवंचात्र भृतको नष्टं न दाप्य इति वचोभङ्ग्या भणितमित्यवगन्तव्यम् । एवं शिल्पिन्यासविषये विशेषमुक्त्वा याचितविषयेऽप्याह स एव—

यदि तत्कार्यमुद्दिश्य कालं परिनियम्य वा ।
याचितोऽर्धकृते तस्मिन्नप्राप्ते न तु दाप्यते ॥

तात्पर्यं तावदुच्यते—

याच्यमानो न दद्याद्वा दाप्यस्तत्सोदयं भवेत् ।

इत्ययं धर्मोऽतिदेशाद्याचितके प्राप्तोऽनेन क्वचित् प्रतिषिध्यते । प्रतिषेधवचनस्यायमर्थः—यत्कार्यं दीर्घकालसाध्यं तत्कार्यमध्ये यदि याचितः यदि वा संवत्सरपर्यन्तं दीयतामित्येवं कालं परिनियम्य याचितः, तस्मिन् कार्यमध्ये परिनियतकालमध्ये

वा प्रतियाच्यमानो याचितकं यो नददाति, असौ न सोदयं दाप्य इति। याचितकमात्रमेवासौ कृते कार्ये परिनियतकालात्यये वा दद्यात्। यदि तदाऽपि न ददाति तदा दैवादितो विनाशे हरणे वा जाते मूल्यं देयमित्याह स एव—

प्राप्तकाले कृते कार्ये न दद्याद्याचितोपि सन्।
तस्मिन्नष्टे हृते वाऽपि ग्रहीता मूल्यमाहरेत् ॥

ननु—

याचितानन्तरं नाशे दैवराजकृतेऽपि सः।
ग्रहीता प्रतिदाप्यस्स्यात्..... ॥

इत्यादिस्मृत्या मूल्यमात्रदापनमुपादिष्टमिहातिदेशेनैव प्राप्तं, किमर्थमिह पुनरुपदिश्यते? उच्यते—स्मृत्यन्तराद्दण्डोप्येवं प्राप्तस्तन्निवृत्त्यर्थमिहाप्युक्तम्। क्वचिदप्राप्तेऽपि काले कार्यमध्येऽपि याचितकं दाप्य इत्याह स एव—

अथ कार्यविपत्तिस्तु तस्यैव स्वामिनो भवेत्।
अप्राप्ते वै स काले तु दाप्यस्त्वर्धकृतेऽपि तत् ॥

याचितकस्वामिकार्यविपत्तिरप्रतिदाने चेन्मध्येऽपि प्रतियाचितो याचितकं दाप्य इत्यर्थः। यदि मध्ये न ददाति तदाऽत्र सोदयं दाप्यः। आतिदेशिकस्यापि प्रतिषेधकोपदेशाभावे ग्राह्यत्वात्। स्थापकपार्थिवयोः कृत्यमतिदेशाद्याचितके प्राप्तमपि सामाद्युपायप्रयोगनिवृत्त्यर्थमाह स एव—

यो याचितकमादाय न दद्यात्प्रतियाचितः ।
स निगृह्य बलाद्दाप्यो दण्ड्यश्च न ददाति यः ॥

निगृह्य बलादुपवासादि कारयित्वा स्थापकेन दाप्यो दानोन्मुखं कृत्वा ग्राह्यः । एवमपि यदि न ददाति, स राज्ञा दाप्यो दण्ड्यश्चेत्यर्थः । स्थापके मृते स्वयमेव प्रतियाचनाभावेऽपि भावदोषपरिहारार्थं प्रयनन्तरे दद्यादित्येतद्याचितकेऽप्यतिदिष्टधर्मवर्गान्तर्गतत्वेन प्राप्तमप्यवश्यानुष्ठेयं न भवतीत्याह बृहस्पतिः—

याचितं स्वाम्यनुज्ञातं प्रददन्नापराध्नुयात् ।

इति । याचनादूर्ध्वमपीति शेषः ॥

इति स्मृतिचन्द्रिकायां याचितान्वाहितविषयाणि
समाप्तं च निक्षेपाख्यपदस्य विधिवितानम्

अथ सम्भूयसमुत्थानाख्यस्य पदस्य विधिरुच्यते.

तत्र बृहस्पतिः—

कुलीनदक्षानलसैः प्राज्ञैर्नाणकवेदिभिः ।
आयव्ययज्ञैश्शुचिभिः शूरैः कुर्यात्सह क्रियाम् ॥

वाणिज्यकृषिशिल्पक्रतुसङ्गीतस्तैन्यात्मकामिसर्थः । तत्र वाणिज्यक्रिया नाणकवेदिभिरायव्ययज्ञैस्सम्भूय कार्या, कृषिक्रिया त्वायव्ययज्ञैः, शिल्पक्रिया सङ्गीतक्रिया च प्राज्ञैः, क्रतुक्रिया कुलीनैः प्राज्ञश्शुचिभिः, स्तैन्यक्रिया शूरैः, वाणिज्यादिष-

द्विधाऽपि क्रिया दक्षैः अनलसैश्चेत्यवगन्तव्यम् । दक्षानलस-ग्रहणं भाग्याधिकव्याध्यपीडितानां प्रदर्शनार्थम् । नाणकवे-दिग्रहणं चाढ्यानाम् । अत एवादक्षालसप्रतिषेधं कुर्वन् मन्द-भाग्यादीनपि स एव प्रतिषेधयति—

अशक्तालसरोगार्तमन्दभाग्यनिराश्रयैः ।
वाणिज्याद्यास्सहैतैस्तु न कर्तव्या बुधैः क्रियाः ॥

इति । आश्रयो मूलधनम् । तथाच नारदः—

फलहेतोरुपायेन कर्म सम्भूय कुर्वताम् ।
आधारभूतः प्रक्षेप उत्तिष्ठेरंस्ततोंऽशतः ॥

आधारभूत आश्रयभूतः । प्रक्षेपो मूलधनप्रक्षेपः । ततो मूल-धनप्रक्षेपानुसारादुत्तिष्ठेरन् लाभभाजो भवेयुरित्यर्थः । हान्या-दिकमप्येवमेवेत्याह स एव—

समोऽतिरिक्तो हीनो वा यत्रांशो यस्य यादृशः ।
क्षयव्ययौ तथा वृद्धिः तत्र तस्य तथाविधाः ॥

क्षयव्ययौ वृद्धिरित्येते प्रक्षिप्तांशानुसारेण वेदितव्या इत्यर्थः । बृहस्पतिरपि—

प्रयोगं कुर्वते ये तु हेमधान्यरसादिना ।
समन्यूनाधिकैरंशैर्लाभस्तेषां तथाविधः ॥

लाभवदेव कर्मव्ययावपीत्याह स एव—

समो न्यूनाधिको वांऽशो येन क्षिप्तस्तथैव सः ।
व्ययं दद्यात्कर्म कुर्याल्लाभं गृह्णीत चैव हि ॥

याज्ञवल्क्योपि—

समवायेन वणिजां लाभार्थं कर्म कुर्वताम् ।
लाभालाभौ यथाद्रव्यं यथा वा संविदा कृतौ ॥

समवायेन मूल्यद्रव्यसंसर्गेण यथाद्रव्यं संसृष्टद्रव्यवर्तितत्तदंशभूत-द्रव्यानुसारेण लाभालाभौ ज्ञेयावित्यर्थः । संविदा समयेन कृतौ कल्पितौ, पुरुषानुसारेण कल्पितौ लाभालाभौ ज्ञेयाविति यावत् । व्यासस्तु सम्भूयकारिणां कार्यमाह—

समक्षमसमक्षं वाऽवञ्चयन्तः परस्परम् ।
नानापण्यानुसारात्ते प्रकुर्युः क्रयविक्रयौ ॥
अगोपयन्तो भाण्डानि शुल्कं दद्युश्च तेऽध्वनि ।
अन्यथा द्विगुणं दाप्याश्शुल्कस्थानाद्बहिस्स्थिताः ॥

इति । नारदोपि—

भाण्डापिण्डव्ययोद्धारभारसारान्ववेक्षणम् ।
कुर्युस्तेऽव्यभिचारेण समये स्वे व्यवस्थिताः ॥

अथवा सर्वानुज्ञया सर्वेषां कार्यमेक एव कुर्यात् । तथाच बृहस्पतिः—

बहूनां संमतो यस्तु दद्यादेको धनं रहः ।
करणं कारयेद्वाऽपि सर्वैरेव कृतं भवेत् ॥

करणं लेख्यादिकम् । सम्भूयकारिणां मिथो विवादेऽप्याह स एव—

परीक्षकास्साक्षिणश्च त एवोक्ताः परस्परम् ।
संदिग्धेऽर्थे वञ्चनायां नो चेद्विद्वेषसंयुताः ॥

यदा तु विद्वेषसंयुक्तास्तदाऽप्याह स एव—

यः कश्चिद्वञ्चकस्तेषां विज्ञातः क्रयविक्रये ।
शपथैस्स विशोध्यस्स्यात्सर्ववादेऽप्ययं विधिः ॥

विशोध्यः सभ्यैरिति शेषः । सर्ववादेऽपि वञ्चनेतरविवादेऽपीत्यर्थः । वञ्चकत्वे सिद्धे सति किं कार्यमित्यपेक्षिते याज्ञवल्क्यः—'जिह्मं त्यजेयुर्निर्लाभम्' इति । जिह्मं वञ्चकं निर्लाभं लाभहीनं कृत्वा त्यजेयुः । बहिस्स्थिताः इतरे सम्भूयकारिण इत्यर्थः । सम्भूयकारिष्वसमर्थं प्रत्याह स एव—'अशक्तोऽन्येन कारयेत्' इति । स्वांशानुरूपं कर्मेति शेषः । बृहस्पतिस्तु सर्वान् प्रत्याह—

क्षयहानिर्यदा तत्र दैवराजकृता भवेत् ।
सर्वेषामेव सा प्रोक्ता कल्पनीया यथांऽशतः ॥

सम्भूयकारिभिः सर्वैरिति शेषः । क्षयायैव हानिः उपचयार्थव्यतिरिक्ता हानिरिति यावत् । दैवराजग्रहणं प्रातिस्विकदोषेतरनिमित्तोपलक्षणार्थम् । प्रातिस्विकदोषाद्धानौ त्वाह स एव—

अनिर्दिष्टो वार्यमाणः प्रमादाद्यस्तु नाशयेत् ।
तेनैव तद्भवेद्देयं सर्वेषां समवायिनाम् ॥

अनिर्दिष्टः समवाययाननुज्ञातः स्वबुद्धयैव कुर्वन् समवायिद्रव्यं यो नाशयेत्, निवार्यमाणो वा समवायिभिः इत्याद्यपादार्थः। प्रमादः प्रज्ञाहीनता सा प्रातिस्विकदोषोपलक्षणार्थतयाऽत्रोक्ता। तेन कामक्रोधलोभाद्यपि समुत्थाननाशनिमित्तभूतं सर्वमेवात्रोक्तमिति मन्तव्यम्। यस्त्वित्यादि वचनशेषं सुगमम्। पालनेऽप्याह स एव—

देवराजभयाद्यस्तु स्वशक्त्या परिपालयेत्।
तस्यांशं दशमं दत्वा गृह्णीयस्तेऽन्ततः परे॥

तस्य तस्मै दशममंशं दद्युः। ते समवायिनः। पालयेत् समवायिद्रव्यमिति शेषः। तथाच कात्यायनः—

चोरतस्सलिलादग्नेर्द्रव्यं यस्तु समाहरेत्।
तस्यांशो दशमो देयः सर्ववादेष्वयं विधिः॥

समाहरेत् स्वशक्त्या प्रत्याहरेदित्यर्थः। असमवायिद्रव्यपालनेऽप्ययं विधिर्विज्ञेय इत्यन्त्यपादार्थः। अधमर्णादिभ्यो दत्ते यस्तु प्रतियाचनादिना समवायिद्रव्यं समवायिभिस्सह न साधयति तस्य लाभहानिरित्याह बृहस्पतिः—

समवेतैस्तु यद्दत्तं प्रार्थनीयं तथैव तत्।
न याचते च यः कश्चिल्लाभात्स परिहीयते॥

याचनग्रहणमंशानुसारेण करणीयकर्मणः प्रदर्शनार्थम्। तेन कर्मान्तराकरणेऽप्यकरणानुसारेण लाभहानिरित्यस्मादेव वचनात् प्रतिपत्तव्यम्॥

इति स्मृतिचन्द्रिकायां सम्भूयकारिणां वणिजां विधयः.

अथ सम्भूयकारिणां कृषिकाणां विधयः.

तत्र बृहस्पतिः—

वाह्यकर्षकबीजाद्यैः क्षेत्रोपकरणेन च ।
ये समानास्तु तैस्सार्धं कृषिः कार्या विजानता ॥

वाह्या लाङ्गलादिवाहकाः बलीवर्दाः । कर्षकाः कृष्यर्थं स्वीकृताः पुरुषाः । आद्यशब्देन कृष्यर्थस्य धनस्य ग्रहणम् । वाह्येषु वर्जनीयानाह स एव—

कृशातिवृद्धं क्षुद्रं च रोगिणं प्रपलायिनम् ।
काणं खञ्जं च नादद्याद्वाह्यं प्राज्ञः कृषीवलः ॥

काण एकाक्षः । खञ्जो हीनचरणः । क्षेत्रेषु वर्जनीयमाह स एव—

पर्वते नगराभ्याशे तथा राजपथस्य च ।
ऊषरं मूषिकाव्याप्तं क्षेत्रं यत्नेन वर्जयेत् ॥

पर्वते पर्वतान्ते । नगराभ्याशे नगरसमीपे । राजपथस्य च समीप इति शेषः । एतदुक्तं भवति—पर्वताद्यासन्नं, अनासन्नमप्यूषरं मूषिकाव्याप्तं च क्षेत्रं वर्जयेदिति । लाभविभागादिकं यत्सम्भूयवाणिज्यकृष्यादिकर्मणामसाधारणं पूर्वस्मिन् प्रकरणे दर्शितं तदप्यत्राप्यनुसन्धेयम् । पूर्वत्र दर्शितात् प्रातिस्विकदोषाद्दोषान्तरेणाप्येकस्याहानिमाह स एव—

बाह्यबीजाक्षयाद्यस्य क्षेत्रहानिः प्रजायते ।
तेनैव सा प्रदातव्या सर्वेषां कृषिजीविनाम् ॥

सम्भूयकारिणामिति शेषः । बाह्यबीजग्रहणं कृषिसाधनानामुपलक्षणार्थमिति मन्तव्यम् ॥

इति स्मृतिचन्द्रिकायां सम्भूयकारिणां कृषिकाणां विधयः.

अथ सम्भूयकारिणां शिल्पिनां विधयः.

शिल्पिस्वरूपनिरूपणार्थमाह बृहस्पतिः—

हिरण्यकुप्यसूत्राणां काष्ठपाषाणचर्मणाम् ।
संस्कर्ता च कलाभिज्ञश्शिल्पी प्रोक्तो मनीषिभिः ॥

कुप्यं हेमरूप्यव्यतिरिक्तं त्रपुसीसादिकम् । हेमरूप्ये प्रकृत्य 'ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरसिंहेनोक्तम् । शिल्पिनां लाभस्य विभागमाह स एव—

हेमकारादयो यत्र शिल्पं सम्भूय कुर्वते ।
कर्मानुरूपं निर्वेशं लभेरंस्ते यथांऽशतः ॥

निर्वेशो भृतिः । कात्यायनोपि—

शिक्षकाभिज्ञकुशला आचार्यश्चेति शिल्पिनः ।
एकद्वित्रिचतुर्भागान् हरेयुस्ते यथोत्तरम् ॥

काष्ठादिमयहर्म्यादिनिर्मातृणां मुख्यस्य भागमाह बृहस्पतिः—

हर्म्ये देवगृहं चापि चार्मिकोपस्कराणि च ।
सम्भूय कुर्वतां चैषां प्रमुखो द्व्यंशमर्हति ॥

अवश्यकत्वेन कर्मकरणादिधर्मजातं यत्पूर्वतरप्रकरणे दर्शितं तदप्यत्राप्यनुसन्धेयम् ॥

इति स्मृतिचन्द्रिकायां सम्भूयकारिणां शिल्पिनां विधयः.

अथ सम्भूयकारिणामृत्विजां विधयः.

तत्र मनुः—

ऋत्विजस्समवेतास्तु यथा सत्रे निमन्त्रिताः ।
कुर्युर्यथार्हतः कर्म गृह्णीयुर्दक्षिणां तथा ॥

अत्र सत्रशब्दो यज्ञमात्रविवक्षया प्रयुक्तो न पुनस्सत्राख्ययज्ञविशेषविवक्षया, तत्र यजमानानामेव कर्तृत्वेन[1] ऋत्विजामसम्भवात् । तेन सोमयागादावनेन वचनेन व्यापारलाभावुक्तौ । तत्रैव लाभविभागाभिधानाथमाह स एव—

सम्भूय स्वानि कर्माणि कुर्वद्भिरिह मानवैः ।
अनेन कर्मयोगेन कर्तव्यांऽशप्रकल्पना ॥

स्वानि कर्माणि याजमानव्यतिरिक्तानीति शेषः । अंशप्रकल्पना च 'तस्य द्वादशशतं दक्षिणा' इत्येवं क्रतुसम्बन्धिमात्रतया विहितायां दक्षिणायामेव न तु 'रथमध्वर्यवे, निविदां वरमश्वं होत्रे, ब्रह्मणेऽश्वमाधाने, सुब्रह्मण्याय सोमक्रये शक-

[1] ऋत्विक्त्वेन.

टम्' इत्येवमृत्विग्विशेषसम्बन्धित्वेन विहितायां, श्रुतिविरोधापत्तेः। अत एवोक्तं तेनैव—

रथं हरेत चाध्वर्युः ब्रह्माऽऽधाने च वाजिनम्।
होता निविद्वरं चाश्वमुद्गाता चाप्यनः क्रये॥

ऋत्विग्विशेषोल्लेखेन विहितांशं स एव गृह्णीयादित्यर्थः। पूर्णाहुतौ हुतायां वरं दद्यादित्यङ्गकर्मोल्लेखेन या दक्षिणा विहिताः, ताः प्रत्याह स एव—

यस्य कर्मणि यास्तु स्युरुक्ताः प्रयङ्गदक्षिणाः।
स एव ता आददीत भजेरन् सर्व एव वा॥

यस्य कर्मणि यत्कर्तृके कर्मणि या दक्षिणा उक्ताः स एव तत्कर्मणि ता आददीतेत्यर्थः। एवंच पूर्णाहुतावध्वर्युर्वरं गृह्णीयात्, तत्र तस्य कर्तृत्वात्। 'भजेरन् सर्व एव वा' इति पक्षान्तरमनेककर्तृकाङ्गदक्षिणाविषयं, तेन स्तोत्रदक्षिणाः स्तोत्रकारिण एव छन्दोगा भजेरन्। प्रधानदक्षिणास्वंशप्रकल्पनायाः प्रकारमाह स एव—

सर्वेषामर्धिनो मुख्यास्तदर्धेनार्धिनोऽपरे।
तृतीयिनस्तृतीयांशाश्चतुर्थांशास्तु पादिनः॥

मुख्या गणाद्या ब्रह्मादयः। अपरे गणिनां द्वितीयाः प्रतिप्रस्थात्रादयः। तृतीयिनः गणिनां तृतीयाः प्रतिहर्त्रादयः। पादिनो गणिनां चतुर्थाः ग्रावस्तुदादयः प्रत्येतव्याः। ततश्चायमर्थः—सर्वेषामृत्विजां मध्ये अर्धिनो विहितदक्षिणार्धवन्तो

मुख्याः । अर्धशब्दोऽत्र किञ्चिन्न्यूनदक्षिणार्धे वर्तते । तदर्धेन किञ्चिन्न्यूनदक्षिणार्धस्यार्धेनापरे गणिनो द्वितीयाः अर्धिनोऽर्धवन्तः । तृतीयिनस्तृतीयांशाः किञ्चिन्न्यूनदक्षिणार्धस्य तृतीयांशभागिनः । पादिनस्तु किञ्चिन्न्यूनदक्षिणार्धस्य चतुर्थांशभागिनः । एवंच शतदक्षिणापक्षे चतुर्णां मुख्यानामष्टचत्वारिंशत् गावो भवन्ति, तदनन्तराणां चतुर्णां चतुर्विंशतिर्गावः, तदनन्तराणां चतुर्णां षोडश गावः, तदनन्तराणां द्वादश गाव इति मन्तव्यम् । मुख्यानां चतुर्णां मिथो विभागः समत्वेनैव । एवमेव तदनन्तरादीनामपि मिथो विभागः । तथाच कात्यायनसूत्रं—'द्वादशद्वादशाद्येभ्यः, षट्षट् द्वितीयेभ्यः, चतस्रश्चतस्रस्तृतीयेभ्यः, तिस्रस्तिस्र इतरेभ्यः' इति । पशुबन्धादौ विषमविभागानभिधानात् समत्वेनैव विभागो ज्ञेयः । स्वकीयकर्मकलापांशकर्तुः कृतानुसारेण भागो देय इत्याह मनुः—

ऋत्विग्यादि वृतो यज्ञे स्वकर्म परिभावयेत् ॥
तस्य कर्मानुरूपेण देयोंऽशस्सह कर्तृभिः ॥

कर्तृभिः सम्भूयकारिभिरित्यर्थः । यद्वा कर्तृभिस्सह देयो दक्षिणादानकाले देयो यजमानेनेत्यर्थः । अथवा कर्माणि ऋत्विक्परित्यक्तांशकर्तृभिस्सह देय इत्यर्थः । एतदुक्तं भवति—स्वकर्मैकदेशकर्तुर्या दक्षिणा तां तस्य चैकदेशान्तरकर्तुश्च दक्षिणाकाले सम्भूयकारिसङ्घो यजमानो वा तत्कृतकर्मानुसा-

रेणार्पयेदिति । अस्य क्वचिदपवादमाह स एव—

दक्षिणासु च दत्तासु स्वकर्म परिभावयेत् ।
कृत्स्नमेव लभेतांशमन्येनैव च कारयेत् ॥

अन्येन स्वगणवर्तिनां मध्ये प्रत्यासन्नेन । येनकेनचिदन्येन वा कार्यमाणे त्वाध्वर्यवादिसमाख्याबाधापत्तेः । एवमृत्विजि मृतेऽप्यूह्यम् । अत एव नारदः—

ऋत्विजां व्यसनेऽप्येवमन्यस्तत्कर्म निस्तरेत् ।
लभेत दक्षिणाभागं स तस्मात्संप्रकल्पितम् ॥

अन्यशब्दार्थः पूर्ववदिहापि द्रष्टव्यः । यत्तु बृहस्पतिनोक्तं—

एवं क्रियाप्रवृत्तानां यदा कश्चिद्विपद्यते ।
तद्बन्धुना क्रिया कार्या सर्वैर्वा सहकारिभिः ॥

इति । यच्च शङ्खेन—'तत्र चेदनुप्राप्ते सवनमृत्विङ्म्रियेत तस्य गोत्रोऽथ शिष्यो वा तत्कार्यमनुपूरयेदथ चेदबान्धवस्ततोऽन्यमृत्विजं वृणुयात्' इति, तत्सर्वमवान्तरगणशून्यऋत्विक्कर्तृकयज्ञविषयमिति मन्तव्यम् । जीवत्येव ऋत्विजि यजमानेन ऋत्विगन्तरकरणे कस्य दक्षिणेति विवादापनोदार्थमाह स एव—'अथ ऋत्विजि वृते पश्चादन्यं वृणुयात् पूर्वाहूतस्यैव दक्षिणा पश्चादाहूतः किञ्चिल्लभेत' इति ॥

इति स्मृतिचन्द्रिकायां सम्भूयकारिणां
ऋत्विजां विधयः

अथ सम्भूयकारिणां नर्तकादीनां स्तेनादीनां च विधयः.

तत्र बृहस्पतिः—

नर्तकानामेष एव धर्मस्साद्धिरुदाहृतः ।
तालज्ञो लभतेऽध्यर्धं गायनास्तु समांशिनः ॥

एष धर्मः शिल्पिमुख्यस्योक्तो धर्मः । तेनायमर्थः— 'प्रमुखो द्व्यंशमर्हति' इति योऽयं सम्भूय हर्म्यादिकं कुर्वतां शिल्पिनां मुख्यस्योक्तः स एव धर्मो द्व्यंशभागित्वरूपो नर्तकादीनां सम्भूय नृत्तादिकं कुर्वतां मुख्यस्य साद्धिरुदाहृत इति। अध्यर्धं अर्धाधिकं भागं तालज्ञो लभते । स्तेनानपि प्रत्याह स एव—

स्वाम्याज्ञया तु यच्चोरैः परदेशात्समाहृतम् ।
राज्ञे दत्वा तु षड्भागं भजेयुस्ते यथांऽशतः ॥
चतुरोंशान् भजेन्मुख्यः शूरस्त्र्यंशमवाप्नुयात् ।
समर्थस्तु हरेद्व्यंशं शेषात्त्वन्ये समांशिनः ॥

परदेशात् वैरिदेशादित्यर्थः । प्रबलतरवैरिदेशादाहृतविषयमेतत् । दुर्बलवैरिदेशाहृतविषये त्वाह कात्यायनः—

परराष्ट्राद्धनं यत्स्याच्चोरैस्स्वाम्याज्ञया हृतम् ।
राज्ञो दशांशमुद्धृत्य विभजेरन्यथाविधि ॥
चोराणां मुख्यभूतस्तु चतुरोंशांस्ततो हरेत् ।
शूरोंऽशांस्त्रीन् समर्थो द्वौ शेषास्त्वेकैकमेव च ॥

समर्थः शक्तः । एतेषां हानिरप्येवमेवेत्याह स एव—

तेषां चेत्प्रसृतानां यो ग्रहणं समवाप्नुयात् ।
तन्मोक्षणार्थं यद्दत्तं वहेयुस्ते यथांशतः ॥

ननु सम्भूयकारिणां समयानुसारत एवांशकल्पनया लाभहान्योर्विभागो भविष्यतीति व्यर्था विभागविधय इत्याशङ्क्याह स एव ॥

वणिजां कर्षकाणां च चोराणां शिल्पिनां तथा ।
अनियम्यांशकर्तॄणां सर्वेषामेष निर्णयः ॥

लाभहान्योस्समयेन प्रतिपुरुषमंशमनियम्य वाणिज्यादिकर्तॄणा मित्यर्थः ॥

इति स्मृतिचन्द्रिकायां सम्भूयकारिणां नर्तकादीनां
स्तेनादीनां च विधयः
समाप्तं च सम्भूयसमुत्थानाख्यपदस्य विधिवितानम् ॥

अथ दत्ताप्रदानिकाख्यस्य पदस्य विधिरुच्यते.

तत्र बृहस्पतिः—

एषाऽखिलेनाभिहिता सम्भूयोत्थाननिष्कृतिः ।
अदेयदेयदत्तानामदत्तस्य च कथ्यते ॥

अदेयादीनां स्वरूपमधुना कथ्यत इत्यर्थः । तत्र तावददेयस्य स्वरूपभेदौ कथयति—

सामान्यं पुत्रदाराधिसर्वस्वन्यासयाचितम् ।
प्रतिश्रुतं तथाऽन्यस्य न देयं त्वष्टधा स्मृतम् ॥

सामान्यं स्वमनेकस्वामिकं रथ्याद्यत्र विवक्षितं, न त्वविभक्त-कुटुम्बस्वामिकं कनकादिकं, तस्य देयत्वेन वक्ष्यमाणत्वात्। यद्यपि अनेकस्वामिकत्वेन रथ्यादिकमपि कुटुम्बधनतुल्यं, तथाऽपि स्वतन्त्रानेकस्वामिकत्वाददेयम् । तथाहि—न तावत्स्वाम्यन्तरानुमतिमन्तरेण केनचित्स्वामिना तद्दातुं शक्यते । स्वतन्त्रबहुस्वामिके रथ्यादावनुमतिर्दुर्घटैव । कुटुम्बधने तु स्वतन्त्रकतिपयस्वामिकेऽनुमतिस्सुलभैवेति भेदः । ननु पुत्रदारसर्वस्वेषु पित्रादिस्वामिकेषु दानार्हेषु कथमदेयत्वं, उच्यते—यथा यजमानधनानामपि माषाणां 'अयज्ञिया वै माषाः' इति निषेधश्रुतेरयज्ञियत्वं, तथा पुत्रदारसर्वस्वानि स्वभूतान्यपि 'देयं दारसुताद्दते । नान्वये सति सर्वस्वं' इत्यादिदाननिषेधकस्मृतिबलात् अदेयानि । आधिन्यासयाचितकेषु तु अदेयत्वं स्वत्वाभावादिति मन्तव्यम् । अन्यस्मै प्रतिश्रुतं अन्यस्मै वाचा दत्तम् । यद्यपि वाग्दाने स्वत्वं नापैति, तथाऽपि 'नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्' इति निषेधस्मृतिबलात् सर्वस्ववददेयं प्रतिश्रुतमपीति मन्तव्यम् । सर्वस्वस्याप्यदेयत्वमविभक्तान्वयद्रव्यसंयुक्तस्यैव, दातुः तस्यैव दाननिषेधात् । तेन स्वसन्तानविहीनस्य स्वसन्तानाय दत्त-

दायस्य वा सर्वस्वं देयम्। नारदेनाप्यदेयत्वमेवमेवान्वाहिता-दीनामुक्तं—

अन्वाहितं याचितकमाधिस्साधारणं च यत्।
निक्षेपः पुत्रदारं च सर्वस्वं चान्वये सति॥
आपत्स्वपि हि कष्टासु वर्तमानेन देहिना।
अदेयान्याहुराचार्याः यच्चान्यस्मै प्रतिश्रुतम्॥

इति। अन्वाहितं अन्यस्मै दातुमर्पितम्। अन्वाहितवत् स्त्रीधन-मप्यदेयं, स्वत्वाभावात्। अत एव दक्षः—

सामान्यं याचितं न्यासः आधिर्दाराश्च तद्धनम्।
अन्वाहितं च निक्षेपः सर्वस्वं चान्वये सति॥
आपत्स्वपि न देयानि नव वस्तूनि पाण्डितैः।
यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः॥

इति। मूढात्मा दानानिर्वर्तकसामान्यद्रव्यादौ तन्निर्वर्तकत्व-बुद्ध्या प्रवर्तमानत्वात्। प्रायश्चित्तीयते पुत्रदारादिदानेऽतिक्रान्त-निषेधत्वात्। एवंच अत्र प्रतिग्रहीताऽप्यसाधुरेव, अयुक्तका-रित्वात्। अत एवोभयोरपि दण्डमाह नारदः—

गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति।
दण्डनीयावुभावेतौ धर्मज्ञेन महीक्षिता॥

अदत्तग्रहणमदेयस्याप्युपलक्षणार्थम्। तेनादेयप्रतिग्रहीतुरदत्त-

प्रतिग्रहीतुश्च दण्डोऽनेन वचेननोक्त इति मन्तव्यम् । गृहीतस्य च परावर्तनमपि महीक्षिता कार्यमित्यदत्तादेयग्रहणाद्गम्यते, अदत्तेनादेयेन च दानासिद्ध्यभावात् परस्वत्वानुत्पत्तेः ॥

इति स्मृतिचन्द्रिकायामदेयविषयाणि.

अथ देयविषयाणि.

अत्र नारदः—

कुटुम्बभरणाद्द्रव्यं यत्किञ्चिदतिरिच्यते ।
तद्देयमुपहत्यान्यं ददद्दोषमवाप्नुयात् ॥

अन्यमुपहत्य भर्तव्यकुटुम्बमुपरुध्येत्यर्थः । उपरोधश्च निस्स्वतया भोजनाच्छादनोच्छेदननिबन्धनोऽत्राभिमतो न तु ताम्बूलादि-भोगसाधनवैकल्यनिबन्धनः । यदाह बृहस्पतिः—

कुटुम्बभक्तवसनाद्देयं यदतिरिच्यते ।

इति । भक्तं भोजनम् । वसनं आच्छादनम् । धनधान्यादि-द्रव्यमत्र यत्पदेनोक्तम् । उपवनादिद्रव्यं तु प्रत्याह स एव—

सप्तारामगृहक्षेत्राद्यद्यत् क्षेत्रं प्रचीयते ।
पित्र्यं वाऽथ स्वयं प्राप्तं तद्दातव्यं विवक्षितम् ॥

सप्तभ्य आरामादिभ्यो यत्प्रचीयते अधिकं स्यात्तद्दातव्यमिति स्मृतिशास्त्रे विवक्षितमित्यर्थः । यत्तु कात्यायनेनोक्तं—

सर्वस्वगृहवर्जं तु कुटुम्बभरणाधिकम् ।
यद्द्रव्यं तत्स्वकं देयम् .....॥

इति, तत्समानधिकगृहविषयम् । स्वकं स्वकीयं यथेष्टविनियोगार्हद्रव्यमिति यावत् । कथं तर्हि पुत्रदानं? स्वस्वामिलक्षणसम्बन्धाभावात् केवलं जन्यजनकलक्षण एव तत्र सम्बन्ध इत्याशङ्क्याह वसिष्ठ — 'पुत्रस्त्रीपितृसम्भवः पुरुषः मातापितृनिमित्तकः, तस्य मद्गृहविक्रयपरित्यागेषु मातापितरौ प्रभवतः' इति । उत्पादननिमेण पितृभ्यामर्जितत्वात् यथेष्टविनियोगार्हत्वं पुत्रस्यापीति मत्वा नमस्वत इत्युक्तम् । तेन पुत्रोपि देयभूतो भवतीत्यभिप्रायः । यत्तु स्मृत्यन्तरं—

सुतस्य सुतदारार्थं वसित्वं धनुशासने ।
विक्रये चैव दाने च वसित्वं न सुते पितुः ॥

इति, यच्च याज्ञवल्क्येनोक्तं—

स्वकुटुम्बाविरोधेन देयं दारसुताहते ।

इति, तद्वचनद्वयमनेकसुतशून्यविषयम् । तत्र हि पुत्रदाने कृते सन्तानविच्छेदापत्तेः । अत आह वसिष्ठः—'न त्वेकं पुत्रं दद्यात् प्रतिगृह्णीयाद्वा स हि सन्तानाय पूर्वेषाम्' इति । अनेकपुत्रेष्वापि मातापितृवियोगसहनक्षम एव देयः ॥

विक्रयं चैव दानं च न नेयास्युरनिच्छवः ।
दाराः पुत्रश्च.... .... ॥

इति कात्यायनस्मरणात् । यथा दाराः विक्रयं दानं वा भर्त्रा न नेयास्तथा मातृपितृभ्यां पुत्रा अपि मातृपितृवियोगानिच्छवो न नेयास्स्युरित्यर्थः । 'न नेयास्स्युरनिच्छवः' इत्येतदनापद्विषयम् ।

आपत्काले तु कर्तव्यं दानं विक्रय एव वा ।
अन्यथा न प्रवर्तन्त इति शास्त्रविनिश्चयः ॥

इति तानेवाधिकृत्य तेनैवानन्तरमुक्तत्वात् । यत्तु नारदेनोक्तं—

निक्षेपः पुत्रदारं च सर्वस्वं चान्वये सति ।
आपत्स्वपि हि कष्टासु वर्तमानेन देहिना ॥
अदेयान्याहुराचार्याः ..... ॥

इति, तदप्येकपुत्रविषयम्, अन्यथा पूर्वोक्तवचनविरोधस्य दुष्परिहरत्वात् । ननु मातुः प्रभुत्वेऽपि पुत्रदानमयुक्तं, अस्वतन्त्रत्वात् । सत्यं—स्वतन्त्रपुरुषानुज्ञया तु युक्तमेव । अत एव वसिष्ठः—'न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानात् भर्तुः' इति । किञ्चिद्भर्त्राऽपि भार्यानुज्ञातमेव देयं, किञ्चिन्मुख्येनापि भ्रात्रनुज्ञातमेव देयं, किञ्चित्स्वार्जितमपि दासेन स्वाम्यनुज्ञातमेव देयम् । तथाच बृहस्पतिः—

सौदायिकं क्रमायातं शौर्यप्राप्तं च यद्भवेत् ।
स्त्रीज्ञातिस्वाम्यनुज्ञातं दत्तं सिद्धिमवाप्नुयात् ॥

सौदायिकं विवाहलब्धं, तद्यस्या विवाहे लब्धं तया भार्य-

याऽनुज्ञातमेव देयं, पितामहादिक्रमायातं त्वविभक्तधनैर्ज्ञातिभिरनुज्ञातमेव देयं, भृत्येन युद्धलब्धं स्वाम्यनुज्ञातमेव देयमित्यर्थः। स्त्रीज्ञात्यनुज्ञातं सावशेषं देयम्,

वैवाहिके क्रमायाते सर्वदानं न विद्यते।

इति तेनैवोक्तत्वात्। स्वार्जितं त्वविभक्तधनैरननुज्ञातमपि देयं, स्वयं प्राप्तामिति तेनैवाभिहितत्वात्। एवंच स्वार्जितं स्थावरमपि सप्ताधिकं ज्ञात्यननुज्ञातं देयम्। यत्पुनस्तेनैवोक्तम्—

विभक्ता वाऽविभक्ता वा दायादाः स्थावरे समाः।
एको ह्यनीशस्सर्वत्र दानाधमनविक्रये॥

इति, तत्सप्तानधिकाविभक्तस्थावरविषयम्। विभक्ता अपि समाः, किं पुनराविभक्ता इति व्याख्येयम्। अन्यथा विभागोऽनर्थकस्स्यात्। एवंच यदुक्तं स्मृत्यन्तरे—

एकोपि स्थावरे कुर्याद्दानाधमनविक्रयम्।
आपत्काले कुटुम्बार्थे धर्मार्थेऽपि विशेषतः॥

इति, तत्क्रमायाताविभक्तस्थावरविषयं सप्तानधिकस्थावरविषयं चेति मन्तव्यम्, अपेः काकाक्षिवदुभयत्र सम्बन्धात्। यदा परेण सम्बन्धस्तदाऽयमर्थः— स्थावरेऽपि स्थावरबहुत्वाभावेऽपि एको दानादिकं कुर्यादिति। आधिरपि दानं, तेन रूपेण स्वत्वावगतेः 'बन्धाचारेण बन्धकम्' इति श्रवणाच्च देयमित्यनुषज्यते। एवंचाधेरदेयत्वं पूर्वस्मिन् प्रकरणेऽभि-

हितमाधिरूपाद्रूपान्तरेणेति मन्तव्यम् । देयोक्तिप्रसङ्गाद्देयस्य प्रतिग्रहीष्यतः प्रतिग्रहप्रकारविशेषो याज्ञवल्क्येन दर्शितः—

प्रतिग्रहः प्रकाशस्स्यात् स्थावरस्य विशेषतः ।

इति । प्रकाशः प्रकटः ससाक्षिक इति यावत् । पुत्रस्य प्रतिग्रहे प्रकारविशेषो वसिष्ठेन दर्शितः—'पुत्रं प्रतिग्रहीष्यन् बन्धूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वाऽदूरेबान्धवमसंनिकृष्टमेव गृह्णीयात्' इति । अदूरेबान्धवं संनिहितमातुलादिबान्धवम् । असंनिकृष्टं संनिकृष्टभ्रातृपुत्रादिव्यतिरिक्तमेव प्रतिगृह्णीयादित्यर्थः । प्रासङ्गिकमुक्त्वा प्रकृतमपि याज्ञवल्क्येनोक्तं—

देयं प्रतिश्रुतं चैव दत्त्वा नापहरेत्पुनः ।

इति । इदं ते दास्यामीति वाचा यत्प्रतिश्रुतं तदवश्यं तस्मै दातव्यं, दत्तं च न सर्वथा पुनरपहर्तव्यमित्यर्थः । यः पुनः प्रतिश्रुतं न ददाति, दत्तं वाऽपहरति तस्य दोषमाह हारीतः—

प्रतिश्रुतार्थादानेन दत्तस्योच्छेदनेन च ।
विविधान्नरकान् याति तिर्यग्योनौ च जायते ॥

प्रतिश्रुतार्थस्तु विना दानेन ऋणवन्नापैतीत्याह स एव—

वाचैव यत्प्रतिज्ञातं कर्मणा नोपपादितम् ।
ऋणवद्धर्मसंयुक्तमिह लोके परत्र च ॥

यद्दित्तं धर्मसंयुक्तं प्रतिग्रहीतृप्रवृत्तधर्मसम्पत्त्यर्थं वाचा प्रतिज्ञातं न पश्चात्समर्पितं, तदिह परत्र च ऋणवन्नापैतीत्यर्थः। ऋणवदित्यभिधानेनार्थादप्रदायको दाप्यो दण्ड्यश्चेत्युक्तम्। उक्तं च कात्यायनेन—

स्वेच्छया यः प्रतिश्रुत्य ब्राह्मणाय प्रतिग्रहम्।
न दद्याद्दणवद्दाप्यः प्राप्नुयात् पूर्वसाहसम्॥

ब्राह्मणाय प्रवृत्तधर्मपरित्यागरहितायेति शेषः। 'प्रतिश्रुत्याप्यधर्मसंयुक्ते न दद्यात्' इति गौतमस्मरणात्॥

इति स्मृतिचन्द्रिकायां देयविषयाणि.

अथ दत्तविषयाणि.

तत्र नारदः—

पण्यमूल्यं भृतिस्तुष्ट्या स्नेहात्प्रत्युपकारतः।
स्त्रीशुल्कानुग्रहार्थं च दत्तं दानविदो विदुः॥

पण्यस्य क्रीतद्रव्यस्य मूल्यम्। भृतिस्तु कात्यायनेन दर्शिता—

अविज्ञातोपलब्ध्यर्थं दानं यत्र निरूपितम्।
उपलब्धक्रियालब्धं सा भृतिः परिकीर्तिता॥

सप्रयोजनक्रियासम्पादनार्थं दत्तं भृतिरुच्यत इत्यर्थः। तुष्ट्येत्यनेन वन्दिजनादिभ्यो दत्तं लक्ष्यते। स्नेहादित्यनेन च दुहित्रादिभ्यो दत्तम्। प्रत्युपकारतः प्रत्युपकारार्थमुपकृतसकाशाल्लब्धम्। तत्प्रदर्शनार्थमाह कात्यायनः—

भयत्राणाय रक्षार्थं तथा कार्यप्रसाधनात् ।
अनेन विधिना लब्धं विद्यात्प्रत्युपकारतः ॥

भयत्राणाय भयाद्रक्षणाय । रक्षार्थं बालधनादिरक्षार्थम् । कार्यप्रसाधनात् विवाहादिसम्पादनात् । अनेन विधिना लब्धं भयत्राणादिलक्षणोपकरणाल्लब्धमिति यावत् । स्त्रीशुल्कं परिणयनार्थं कन्याज्ञातिभ्यो दत्तम् । अनुग्रहार्थं परोपकारः कर्तव्य इति विधिबलाद्दत्तम् । तत्र सत्पात्रेऽनुग्रहाद्दत्तं सफलं भवतीत्याह नारदः—

मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि ।
दीनानाथविशिष्टेभ्यो दत्तं तु सफलं भवेत् ॥

उपकारिणि परोपकारपरे । सफलं फलातिशयोपेतमित्यर्थः । दत्तं दानविदो विदुः तदेतत्पण्यमूल्यादि सप्तविधं दत्तमेव दानविदो विदुः, अपरावर्तनीयं विदुरित्यर्थः । बृहस्पतिरपि—

भृत्या तुष्ट्या पण्यमूल्यं स्त्रीशुल्कमुपकारिणे ।
श्रद्धानुग्राहसंप्रीत्या दत्तमष्टविधं विदुः ॥

उपकारिणे यदि सर्वस्वमर्प्यते तदा दत्तं न भवतीत्याह कात्यायनः—

प्राणसंशयमापन्नं यो मामुत्तारयेदितः ।
सर्वस्वं तस्य दास्यामीत्युक्तेऽपि न तथा भवेत् ॥

इति स्मृतिचन्द्रिकायां दत्तविषयाणि

अथादत्तविषयाणि.

अदत्तं तु भयक्रोधशोकवेगरुगान्वितैः ।
तथोत्कोचपरीहासव्यत्यासच्छलयोगतः ॥
बालमूढास्वतन्त्रार्तमत्तोन्मत्तापवर्जितम् ।
कर्ता ममायं कर्मेति प्रतिलाभेच्छया च यत् ॥
अपात्रे पात्रमित्युक्ते कार्ये चाधर्मसंहिते ।
यद्दत्तं स्यादविज्ञानाददत्तं तदपि स्मृतम् ॥

इति । एतदुक्तं भवति— भयोपतप्तेन बन्दिग्रहादिभ्यो दत्तं, क्रोधोपतप्तेन क्रोधविषयभूतानामविभक्तधनानां धनव्ययं कर्तुमितरेभ्यो दत्तं, शोकवेगाद्युपतप्तेन किं स्थितेन धनेनेति तात्कालिकया बुद्ध्या दत्तं, उत्कोचेन राजकीयादिभ्यो दत्तं, उपहासेन दत्तं, व्यत्यासच्छलयोगतः प्रच्छन्नतया ग्रहीतुं परप्रतारणार्थं जनसमक्षं दत्तं, अप्राप्तव्यवहारेण दत्तं, मूढेन मनसि स्थितादन्यस्मै दत्तं, अस्वतन्त्रेण दासादिना दत्तं-आर्तेन रोगोपहतप्रकृतिना दत्तं, मत्तेन धुत्तूरादिभक्षणस्व, लितधिया दत्तं, उन्मत्तेन पित्तोद्रेकादिना स्खलितधिया दत्तं, कर्मकरणार्थं सत्काररूपेणाकर्मकराय दत्तं, प्रतिलाभेच्छया प्रतिलाभमकुर्वाणाय दत्तं, अयोग्याय योग्योक्तिमात्रेण दत्तं, असद्विनियोगकारिणे सद्विनियोगकृदित्युक्तिमात्रेण दत्तमित्येवं षोडशप्रकारमपि पुनःप्रत्याहरणीयत्वाददत्तमित्युच्यत इति । पुनःप्रत्याहरणीयत्वमेवंविधेष्वाह कात्यायनः—

कामक्रोधास्वतन्त्रार्तक्लीबोन्मत्तप्रमोहितैः ।
व्यत्यासपरिहासाच्च यद्दत्तं तत्पुनर्हरेत् ॥
या तु कार्यस्य सिद्ध्यर्थमुत्कोचा स्यात् प्रतिश्रुता ।
तस्मिन्नपि प्रसिद्धेऽर्थे न देया स्यात्कथञ्चन ॥
अथ प्रागेव दत्ता स्यात्प्रतिदाप्यस्तथा बलात् ।
दण्डं चैकादशगुणं आहुर्गार्गीयमानवाः ॥

इति । उत्कोचायास्स्वरूपमपि तेनैव दर्शितम्—

स्तेनसाहसिकोद्वृत्तपारजायिकशंसनात् ।
दर्शनाद्वृत्तनष्टस्य तथाऽसत्यप्रवर्तनात् ॥
प्राप्तमेतैस्तु यत्किञ्चित्तदुत्कोचाख्यमुच्यते ।
न दाता तत्र दण्ड्यस्स्यान्मध्यस्थश्चैव दोषभाक् ॥

इति । एतदुक्तं भवति—यदि मह्यं न प्रयच्छसि तदा त्वत्कृतं कथयामीति भीतिमुत्पाद्य स्तेनादिसकाशाद्यत्किञ्चिद्धनमादत्ते, तथा यदि मह्यं न प्रयच्छसि तदा त्वां वारकस्य दर्शयामीति भीतिमुत्पाद्य पलायितसकाशाद्यत्किञ्चिदादत्ते, तथा यदि मह्यं प्रयच्छसि तदा सत्यं कृतामिति स्वामिनः पुरस्तादसत्यतया वच्मीत्यनुकूलमुक्त्वा दासादिसकाशात् यत्किञ्चिदादत्ते, तत्सर्वमुत्कोचाख्यम् । तद्राज्ञा दात्रे दाप्यं, उत्कोचापादकग्राहकौ च दण्डनीयाविति । बृहस्पतिः पुनःप्रत्याहरणीयमित्याह—

प्रतिलाभेच्छया दत्तमपात्रे पात्रशङ्कया ।
कार्ये बाऽधर्मसंयुक्ते स्वामी तत्पुनराप्नुयात् ॥

मनुरपि—

धर्मार्थं येन दत्तं स्यात् कस्मैचिद्याचते धनम् ।
पश्चाच्चेन्न तथा तत्स्यादादेयं तेन तद्भवेत् ॥

यज्ञादिधर्मं कर्तुं याचमानाय यद्दत्तं तेन धनेन यद्यसौ यज्ञादिधर्मं न कुर्यात्तदा दत्तधनं पुनरादेयमित्यर्थः । यदि पुनरेवंविधस्यानपहार्यतां साधयितुमिच्छेद्याचकस्तदाऽसौ राज्ञा तद्धनं सुवर्णादिकं दाप्यः । तथाच स एव—

यदि संसाधयेत्तत्तु दर्पाल्लोभेन वा पुनः ।
राज्ञा दाप्यस्सुवर्णं स्यात्तस्य स्तेयस्य निष्कृतिः ॥

बृहस्पतिरप्यदत्तानि कानिचिद्दर्शयति—

क्रुद्धभ्रष्टप्रमत्तार्तबालोन्मत्तभयातुरैः ।
मत्तातिवृद्धनिर्धूतैः संमूढैश्शोकवेगिभिः ॥
नर्मदत्तं तथैतैर्यत्तददत्तं प्रकीर्तितम् ।

इति । प्रमत्तेन दुर्ग्रहगृहीतेन । निर्धूतोऽवधूतः । नर्मदत्तं परिहासेन दत्तम् । आर्तदत्तस्यादत्तत्वं धर्मकार्यव्यतिरिक्तबिषयं—

स्वस्थेनार्तेन वा दत्तं श्राद्धितं धर्मकारणात् ।
अदत्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥

इति कात्यायनस्मरणात् । तथेदमपरं सर्वविवादपदसाधारणं मनुनोक्तं—

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र वाऽप्युपधिं पश्येत् तत्सर्वं विनिवर्तयेत् ॥

योगः उपायः । एवंचायमर्थः—येनागामिनोपाधिविशेषेणाधिक्रयदानप्रतिग्रहाद्याः कृतास्तदुपाधिविगमे ते सर्वे विनिवर्तनीया इति । अत्र नारदः—

गृह्णात्यदत्तं यो मोहाद्यश्चादेयं प्रयच्छति ।
दण्डनीयावुभावेतौ धर्मज्ञेन महीक्षिता ॥

इति। अत्र संप्रदानकारकीभूतो निर्दिश्यते । कर्तृकारकीभूतनरस्य त्वदेयादत्तयोः प्रतिपादनमपहरणं वा न दण्ड्यत्वापादकं स्मृत्याचारमार्गानुसारित्वात् । नापि प्रत्यवायापादकं,

दत्तस्यैषोदिता धर्म्या यथावदनपक्रिया ।

इति मनुना धर्म्येत्यभिधानात् ॥

इति स्मृतिचन्द्रिकायामदत्ताविषयाणि.
समाप्तं च दत्ताप्रदानिकाख्यस्य पदस्य विधिवितानम्.

अथाभ्युपेत्याशुश्रूषाख्यस्य पदस्य विधिरुच्यते.

तत्र नारदः—

शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत् ।
एते कर्मकरा ज्ञेया दासास्तु गृहजातयः ॥

सामान्यमस्वतन्त्रत्वमेषामाहुः मनीषिणः ।
जातिकर्मकृतस्तूक्तो विशेषो वृत्तितस्तथा ॥

इति । एते शिष्यादयश्चतुर्विधाः शुश्रूषकाः कर्मकरा ज्ञेयाः । गृहजातयस्तु पञ्चदशविधाः शुश्रूषकाः दासाः ज्ञेयाः । एषां कर्मकराणां दासानां चास्वतन्त्रत्वलक्षणं धर्मं साधारणमाहुर्मनीषिणो मन्वादयः । जातिकृतः कर्मकृतो वृत्तिकृतश्च विशेषः शिष्यान्तेवासिदासानामेवोक्त इत्यर्थः । तत्र शिष्याणां त्रैवार्णिकान्यतमत्वलक्षणः जातिकृतो विशेषः 'वसन्ते ब्राह्मणमुपनयीत' इत्यादिशास्त्रसिद्धोऽध्यवसेयः । कर्मकृतस्तु तेषां विशेषो बृहस्पतिनोक्तः—

विद्या त्रयी समाख्याता ऋग्यजुस्सामलक्षणा ।
तदर्थं गुरुशुश्रूषां प्रकुर्याच्छास्त्रचोदिताम् ॥

शिष्य इति शेषः । तथाच नारदः—

आ विद्याग्रहणाच्छिष्यश्शुश्रूषेत्प्रयतो गुरुम् ।

इति । एवं गुरुदारादावपि शुश्रूषा कार्या—

तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च ।

इति तेनैवोक्तम् । भिक्षादानादिवृत्तितो विशेषस्संस्कारकाण्डे शिष्याणामुक्त इति पुनरुक्तिभयान्नेहोच्यते । वृत्तितो विशेषं कञ्चिदभिधायाह स एव—

समावृत्तस्तु गुरवे प्रदाय गुरुदक्षिणाम् ।

प्रतीयात्स्वगृहानेषा शिष्यवृत्तिरुदाहृता ॥

स्वगृहान् प्रतीयात् स्वमन्दिरं प्रति यायादित्यर्थः । कः पुनरन्तेवासिनां जातिकर्मकृतो विशेष इत्यपेक्षिते बृहस्पतिः—

विज्ञानमुच्यते शिल्पं हेमकुप्यादिसंस्कृतिः ।
नृत्तादिकं च यत्प्राप्तुं कर्म कुर्यादुरोर्गृहे ॥

कङ्कणकटकादिनिर्माणविषयं नृत्तगीतादिकरणविषयं च चकारात् स्तम्भकुम्भादिरचनाविषयं च विज्ञानं शिल्पविज्ञानमुच्यते, तत्प्राप्त्यर्थमन्तेवासी गुरोर्गृहे कर्म कङ्कणकटकादिकं कुर्यादित्यर्थः । अनेन हेमकारादिजातिकृतः कङ्कणकटकादिकर्मकृतश्च विशेषोऽन्तेवासिनां दर्शितः । नारदस्त्वन्तेवासिनां कर्माभ्यासोपक्रमकाले कर्तव्यमाह—

स्वशिल्पमिच्छन्नाहर्तुं बान्धवानामनुज्ञया ।
आचार्यस्य वसेदन्ते कालं कृत्वा सुनिश्चितम् ॥

अन्ते समीपे कालं कृत्वा सुनिश्चितं एतावन्तं कालं मत्समीपे स्थातव्यमित्याचार्योक्तकालपरिमाणं सुनिश्चितं कृत्वेत्यर्थः । आचार्यस्यापि कर्तव्यमाह स एव—

आचार्यश्शिक्षयेदेनं स्वगृहे दत्तभोजनम् ।
न चान्यत्कारयेत्कर्म पुत्रवच्चैनमाचरेत् ॥

अन्यत्कर्म स्वशिल्पव्यतिरिक्तं कर्म । एवञ्चान्तेवासिना कङ्कणादिकर्मफलार्पणमात्रेण गुरुशुश्रूषा कार्येत्यवसेयम् । स्वगृहे

दत्तभोजनामिति वदता वृत्तितो विशेषोऽन्तेवासिनां दर्शितः। यस्त्वनेवंविध आचार्यस्तस्य दण्डमाह कात्यायनः—

यस्तु न ग्राहयेच्छिल्पं कर्माण्यन्यानि कारयेत् ।
प्राप्नुयात्साहसं पूर्वं तस्माच्छिष्यो निवर्तते ॥

शिष्यदौष्ट्येऽप्याह नारदः—

शिक्षयन्तमदुष्टं च यस्त्वाचार्यं परित्यजेत् ।
बलाद्वासयितव्यस्स्याद्वधबन्धौ च योऽर्हति ॥

वासयितव्यस्स्यादाचार्यस्य पार्श्वे इति शेषः । वधोऽत्र ताडनं न प्राणच्छेदः, अपराधस्याल्पत्वात् । कृतविद्यस्य कृत्यमाह स एव—

शिक्षितोपि कृतं कालमन्तेवासी समापयेत् ।
तत्र कर्म च यत्कुर्यादाचार्यस्यैव तत्फलम् ॥

कृतं कालं आचार्यसमीपस्थितेरवधित्वेन परिभाषितं कालम्। तत्र समापनीये कालशेषे प्रतिदिनमभ्यासोपरमेऽप्याचार्यस्यार्थलाभार्थमवश्यमभ्यस्तं कर्म कार्यम्। कालशेषेऽपि गुरु गृह एव भोजनम्। तथाच याज्ञवल्क्यः—

कृताशिल्पोपि निवसेत् कृतं कालं गुरोर्गृहे ।
अन्तेवासी गुरुप्राप्तभोजनस्तत्फलप्रदः ॥

विद्याप्राप्तिशुश्रूषासमाप्त्यनन्तरमन्तेवासिनः कृत्यमाह नारदः—

गृहीतशिल्पस्समये कृत्वाऽऽचार्यप्रदक्षिणम् ।
शक्तितश्चानुमान्यैनमन्तेवासी निवर्तयेत् ॥

भृतकानां तु नान्तेवासिवज्जातिकृतो वृत्तिकृतो वा विशेषः, किंतु भृतिकृतः कर्मकृतः कालकृतश्च विशेषः । तथाच बृहस्पतिः—

यो भुङ्क्ते परदासीं तु स ज्ञेयो वानेताभृतः ।
कर्म तत्स्वामिनः कुर्याद्यथाऽन्योऽर्थभृतो नरः ॥
बहुधाऽर्थभृतः प्रोक्तस्तथा भागभृतोऽपरः ।
हीनमध्योत्तमत्वं च सर्वेषामेव चोदितम् ॥
दिनमासार्धषण्मासत्रिमासाब्दभृतस्तथा ।
कर्म कुर्यात्प्रतिज्ञातं लभेत परिभाषितम् ॥

इति । तत्स्वामिनो दासीस्वामिन इत्यर्थः । अर्थभृतस्य बहुविधत्वमर्थाल्पत्वमहत्त्वतारतम्येन ज्ञेयम् । तत्तारतम्यं च भृत्यशक्त्यनुसारतः प्रत्येतव्यम् ।

भृत्यशक्त्यनुरूपा स्यादेषां कर्माश्रया भृतिः ।

इति नारदस्मरणात् । स्वयमेव भागभृतस्य विभागमाह—

द्विप्रकारा भागभृताः कृषिगोजीविनस्स्मृताः ।
जातसस्यात्तथा क्षीरात्स लभेत न संशयः ॥

हीनमध्यमोत्तमत्वलक्षणः कर्मकृतो भेदो रक्षणादिकर्मनिबन्धनः इत्याह स एव—

आयुधीयोत्तमस्तेषां मध्यमस्सीरवाहकः ।
भारवाहोऽधमः प्रोक्तस्तथैव गृहकर्मकृत् ॥

सीरवाहकः कर्षकः । यथैव भारवाहोऽधमः प्रोक्तस्तथैव पाककरणाद्यखिलगृहव्यापारकृदधमः प्रोक्त इत्यर्थः । कालकृतस्तु भृत्यानां विशेषः कालाल्पत्वमहत्त्वनिबन्धनः । स च प्रागेव दिनमासेत्यादिनैवोक्तोऽनुसन्धेयः । अधिकर्मकृतस्तु स्वरूपमाह नारदः—

सर्वेष्वधिकृतो यस्स्यात्कुटुम्बस्य तथोपरि ।
सोऽधिकर्मकृतो ज्ञेयः स च कौटुम्बिकस्स्मृतः ॥

सर्वेषु भृतकेषु अधिकृत उपरिकृतोऽधिष्ठायक इति यावत्। अर्थेष्वधिकृत इति केचित् पठन्ति । तदाऽयमर्थः—अर्थेषु क्षेत्रहिरण्यादिष्वधिकृतः पालकत्वेन नियुक्त इति । कुटुम्बस्योपरीत्यत्र कृत इत्यध्याहार्यः । कुटुम्बस्योपरिकरणमायव्ययकर्तृत्वेन नियोग एव । एवं निरूपिताश्शिष्यान्तेवासिभृतकाधिकर्मकराः शुभकर्मकरा इत्याह स एव—

शुभकर्मकरा ह्येते चत्वारस्समुदाहृताः ।

इति । शुभकर्म च जुगुप्सितकर्मेतरद्विज्ञेयामिति स एवाह—

गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
इष्टतस्स्वामिनश्चाङ्गैरुपस्थानमथान्ततः ।
अशुभं कर्म विज्ञेयं शुभं तु यदतःपरम् ॥

इति । अवस्करः संमार्जितरेणुराशिः । शोधनशब्दः प्रत्येकं

गृहद्वारादिचतुर्ष्वभिसम्बध्यते । उज्झनं त्यागः । अन्ततो मूत्र पुरीषविरामे लेपनिर्मार्जनार्थं स्वामीच्छया स्वहस्तार्घर्पणम् ॥

इति स्मृतिचन्द्रिकायां कर्मकराविषयाणि.

अथ दासनिरूपणम्.

तत्र नारदः—

जघन्यकर्मभाजस्तु शेषा दासास्त्रिपञ्चकाः ॥

इति । शेषाः शिष्यान्तेवासिभृतकाधिकर्मकृद्भ्योऽवशिष्टाः । जघन्यकर्मभाजः गृहद्वाराशुचिस्थानशोधनाद्यशुभकर्मभाजः । अनेन दासानां कर्मतो भेद उक्तः । त्रिपञ्चकाः पञ्चदशसङ्ख्याकाः । दासशब्दव्युत्पत्तिप्रदर्शनमुखेन दासानां कर्मकरेभ्यो भेदमाह कात्यायनः—

स्वतन्त्रस्यात्मनो दानाद्दासत्वं दारवद्भृगुः ।

इति । यथा भर्तुस्सम्भोगार्थं स्वशरीरदानाद्दारत्वं तथा स्वतन्त्रस्यात्मनः परार्थत्वेन दानाद्दासत्वमिति भृगुराचार्यो मन्यत इत्यर्थः । अनेनात्यन्तपारार्थ्यमासाद्य शुश्रूषका दासाः, पारार्थ्यमात्रमासाद्य शुश्रूषका कर्मकरा इति भेदोप्युक्त इत्यवगन्तव्यम् । अत्यन्तपारार्थ्यं तु तेषां भवति, यैस्तु स्वपुरुषार्थवृत्तिनिरोधेन पारार्थ्यमाश्रितम् । एवंभूतं दासत्वं ब्राह्मणेतरेष्वेव त्रिषु वर्णेषु विज्ञेयं 'दास्यं विप्रस्य न क्वचित्,

इति तेनैवाभिधानात्। अनेन दासानां जातितो भेद उक्तः। विप्रेतरेष्वापि दास्यमानुलोम्येनैव—

वर्णक्रमानुलोम्येन दास्यं न प्रतिलोमतः।
राजन्यवैश्यशूद्राणां त्यजतां हि स्वतन्त्रताम्॥

स्वतन्त्रतां त्यजतां अत्यन्तपारार्थ्यं भजतामित्यर्थः। प्रतिलोमत इत्येतत्स्वधर्मपरित्यागिभ्यो यतिभ्योऽन्यत्र द्रष्टव्यम्—

वर्णानां प्रातिलोम्येन दासत्वं न विधीयते।
स्वधर्मत्यागिनोऽन्यत्र दारवद्दासता मता॥

इति नारदस्मरणात्। यथोत्तमवर्णं प्रति हीनवर्णा सवर्णा वा भार्या भवति न पुनर्हीनवर्णं प्रत्युत्तमवर्णा, तथैव दासोऽपि भवेदित्यर्थः। दारवद्दासतेतिवचनाद्विप्रस्य सवर्णं प्रति दासत्वमापदि प्राप्तमिवाभातीति बुद्ध्या तन्निषेधार्थमाह कात्यायनः—

समवर्णेऽपि विप्रं तु दासत्वं नैव कारयेत्।

इति। यत्पुनः पुनरुक्तमिव तेनैवोक्तं—

ब्राह्मणस्य हि दासत्वान्नृपतेर्जो विहन्यते।
क्षत्रविट्शूद्रधर्मस्तु समवर्णे कदाचन॥
कारयेद्दासकर्माणि ब्राह्मणं न बृहस्पतिः॥

इति। अत्र वाक्यत्रयं—तत्राद्यवाक्यस्य प्रातिलोम्येन दासत्वे कारिते कारयितुस्तेजोहानिर्जायत इत्यर्थः। दासत्वं तु

न सङ्करजातिधर्म इति द्वितीयवाक्यस्यार्थः । दासवद्दासकर्माण्यपि सर्वथा ब्राह्मणं न कारयेत् सवर्णोपीति तृतीयवाक्यस्यार्थ इति न किञ्चित्पुनरुक्तमिव । स्वकीयेच्छाया विशिष्टपुरुषोपकारार्थं तत्कर्म कुर्वन्नपि ब्राह्मणो नाशुभं कर्म कुर्यादित्याह स एव—

शीलाध्ययनसंपन्ने तदूनं कर्म कामतः ।
तत्रापि नाशुभं किञ्चित् प्रकुर्वीत द्विजोत्तमः ॥

यस्मात्परोपकारः कर्तव्यः तस्मात्तदूनं कर्म मध्यमोत्तमकर्मव्यतिरिक्तमपि कर्म कामतो वेतनमन्तरेण स्वेच्छया परहितार्थमपरः कुर्यादिति पूर्वार्धस्यार्थः । स्वामिनं प्रत्याह मनुः—

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ ।
बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत् ॥

वृत्तिकर्शितावित्यत्र द्वितीया पाशमन्त्रस्थद्वितीयावत् कर्मत्वमात्रविवक्षया प्रयुक्ता । एवंचायमर्थः—वृत्तिकर्शितं क्षत्रियं वैश्यं च दासभूतमकौर्येण कर्माणि कारयन् स्वामी पोषयेदिति । वृत्तिकर्शितावितिवदनेनगत्यैव क्षत्रियवैश्ययोर्दासत्वाङ्गीकारः कार्यो न पुनस्सति सम्भव इति दर्शयति । स्वानीतिवदन्न सम्बन्धिजनकर्माणि कारयेदित्याह । कर्माणीति सामान्याभिधानेन जघन्यकर्माण्येव कारयितव्यानीति नास्ति नियम इति सूचयति । वृत्तिकर्शितौ बिभृयादिति वदन्नाका

क्षानुसारेण क्षत्रियवैश्ययोर्दास्यं कारयितव्यं, न प्रभुत्वमात्रेणेत्येतदपि ज्ञापयति। अत एव यः प्रभुत्वमात्रेण कारयति तस्य ज्ञापितार्थाज्ञत्वनिबन्धनमपराधित्वमनूद्य दण्डमाह स एव—

दास्यं तु कारयेन्मोहात् ब्राह्मणस्संस्कृतान् द्विजान्।
अनिच्छतः प्राभवत्याद्राज्ञा दाप्यः शतानि षट्॥

प्रभवतो भावः प्राभवत्यं तस्मात् प्राभवसात् प्रभुत्वादेवेति यावत्। द्विजानिति वदन्न दण्डश्शूद्रविषय इति दर्शयति। अत एव शूद्रं यथाकथञ्चिदपि दास्यं कारयेदित्याह स एव—

शूद्रं तु कारयेद्दास्यं क्रीतमक्रीतमेव वा।
दास्यायैव हि सृष्टोसौ स्वयमेव स्वयम्भुवा॥

विष्णुस्तु प्रातिलोम्येन दास्यं कारयितुर्दण्डमाह—'यस्तूत्तमवर्णं दास्ये नियोजयति तस्योत्तमसाहसो दण्डः' इति॥

इति स्मृतिचन्द्रिकायां दासनिरूपणम्.

अथान्यानि दासविषयाणि कानिचिद्वचनानि लिख्यन्ते।

तत्र नारदः—

गृहजातस्तथा क्रीतो लब्धो दायादुपागतः।
अनाकालभृतस्तद्वदाहितस्स्वामिना च यः॥

मोक्षितो महतश्चर्णाद्युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव बडबाहृतः ।
विक्रेता चात्मनश्शास्त्रे दासाः पञ्चदश स्मृताः ॥

इति । गृहजातः स्वगृहदास्यां जातः । क्रीतो मूल्येन स्वाम्यन्तरात् प्राप्तः । लब्धस्तत एव प्रतिग्रहादिना प्राप्तः । दायादुपागतः रिक्थग्राहित्वेन लब्धः । अनाकालभृतः दुर्भिक्षे पोषितः । आहितः स्वामिन ऋणदातर्याधित्वं नीतः । ऋणान्मोक्षितः ऋणमोचनप्रत्युपकारतया दासत्वमभ्युपगतः । युद्धे प्राप्तः समरे विजित्य गृहीतः । पणे जितो दासत्वपणके द्यूतादौ जितः । तवाहमित्युपगतः तव दासोऽस्मीति स्वयमेवाभ्युपगतः । प्रव्रज्यावसितः प्रभ्रष्टसंन्यासी । कृतः एतावन्तं कालं तवाहं दासो भवामीत्युपगतः । भक्तदासः, भक्षितं भक्तं, मूल्यद्वारेण यावत्ते ददामि तावदहं ते दास इत्युपगतः । बडबाहृतः, बडबा गृहदासी तामुद्वाह्य तत्स्वाम्यनुमत्यर्थं दासत्वेन प्रविष्टः । आत्मनो विक्रेता स्वयमेवात्मनो विक्रयमर्थाद्यर्थं कृतवान् । इत्येवं धर्मशास्त्रे दासाः पञ्चदशप्रकाराः स्मृता इत्यर्थः । अत्राद्यानां गृहजातक्रीतलब्धदायागतानां चतुर्णां दासत्वापगमः स्वामिप्रसादवशादेव नान्यथेत्याह स एव—

तत्र पूर्वश्चतुर्वर्गो दासत्वान्न विमुच्यते ।
प्रसादात्स्वामिनोऽन्यत्र दास्यमेषां क्रमागतम् ॥

एवमन्यस्याप्यात्मविक्रेतुर्दासत्वं स्वामिप्रसादादन्यतो न विमुच्यत इत्याह स एव—

विक्रीणीते स्वतन्त्रस्सन् य आत्मानं नराधमः ।
स जघन्यतमस्तेषां सोपि दास्यान्न मुच्यते ॥

प्रसादात्स्वामिनोन्यत्रेत्यत्रानुषज्यते । ततश्चायमर्थः—आत्मविक्रेताऽपि गृहजातादिवत् स्वामिप्रसादादन्यतो दास्यान्न विमुच्यत इति । एवंच गृहजातादयोप्यात्मविक्रेतृपञ्चमाः स्वामिप्रसादादनाकालभृतादय इव दास्यान्मुच्यन्त इति वचोभङ्ग्या दर्शितमिति मन्तव्यम् । स्वामिप्राणरक्षणादपि गृहजातादयोऽनाकालभृतादयश्च सर्वे दास्याद्विमुच्यन्त इत्याह स एव—

यो वैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात् ।
दासत्वात्स विमुच्येत पुत्रभागं लभेत च ॥

एषां पञ्चदशविधदासानां मध्य इत्यर्थः । एतच्च स्वामिनः प्रसादात् प्राणरक्षणाद्वा दास्यापगमनं प्रव्रज्यावसितेतरविषयं,

प्रव्रज्यावसितो राज्ञो दास आमरणान्तिकः ।

इति याज्ञवल्क्यस्मरणात् । राज्ञो दासः पार्थिवस्यैव दासः नान्यस्येत्यर्थः । अत एव नारदः—

राज्ञ एव तु दासस्स्यात् प्रव्रज्यावसितो नरः ।
न तस्य प्रतिमोक्षोऽस्ति नात्र शुद्धिः कथञ्चन ॥

नरो विप्रेतरोऽभिमतः, विप्रस्य दास्यप्रतिषेधात्। अत एव कात्यायनः—

प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजातयः।
निर्वासं कारयेद्विप्रं दासत्वं क्षत्रविड्भृगुः॥

निर्वासं कारयेद्राजेति शेषः। तथाच नारदः—

पारिव्राज्यं गृहीत्वा तु यस्स्वधर्मे न तिष्ठति।
श्वपादेनाङ्कयित्वा तु राजा शीघ्रं प्रवासयेत्॥

श्वपादेन शुनःपादसदृशतप्रायसेन राज्ञा दास्यमकुर्वतोः क्षत्रियवैश्ययोरपि निर्वासमुक्तविधिना कार्यं, स्वधर्मे न तिष्ठतीति सामान्येनाभिधानात्। यत्तु तेनैवोक्तं—

द्वावेतौ कर्मचण्डालौ लोके दूरबहिष्कृतौ।
प्रव्रज्योपनिवृत्तश्च वृथाप्रव्रजितश्च यः॥

इति, तत् राजदासेतरविषयं, राजदासस्य बहिष्कारानुपपत्तेः। एवञ्च प्रव्रज्यावसितेतरदासविमोक्षः स्वामिनः प्रसादप्राणरक्षणाभ्यां भवतीत्यवगन्तव्यम्। अनाकालभृतादीनां तु प्रव्रज्यावसितात्मविक्रेतृव्यतिरिक्तानां नवानां प्रत्येकमेकैकेनापि गोयुगदानादिना दास्यमपनीयत इत्याह स एव—

अनाकालभृतो दास्यान्मुच्यते गोयुगं ददत्।
आहितोऽपि धनं दत्त्वा स्वामी यद्येनमुद्धरेत्॥
ऋणं तु सोदयं दत्त्वा ऋणी दास्यात् प्रमुच्यते।

तवाहमित्युपगतो युद्धे प्राप्तः पणे जितः ॥
प्रतिशीर्षप्रदानेन मुच्येरन् तुल्यकर्मणा ।
कृतकालव्यपगमात् कृतकोपि विमुच्यते ॥
भक्तस्योत्क्षेपणात्सद्यो भक्तदासः प्रमुच्यते ।
निग्रहाद्भडबायास्तु मुच्यते बडबाहृतः ॥

इति । एतदुक्तं भवति—दुर्भिक्षे पोषणेन कारितो दासो गोद्वयार्पणाद्विमुच्यते । आहितदासस्त्वादात्रा स्वगृहीते ऋणे प्रत्यर्पिते सत्युत्तमर्णदास्याद्विमुच्यते । ऋणदासस्तु स्वकृतमृणं येन यावद्धनं दत्वाऽपाकृतं तस्मै तावद्धनं सवृद्धिकं ददाद्विमुच्यते । तवाहमित्युपगतादयस्त्रयो दासविशेषास्तु स्वाभिनिर्वर्त्याखिलव्यापारनिर्वर्तकदासान्तरप्रदानाद्विमुच्यन्ते । कृतस्तु दासविशेषो दास्यावधित्वेन परिभाषितकालस्यात्यया द्विमुच्यते । गृहदासीलोभेन दासत्वमापन्नस्तु तत्संभोगत्यागाद्विमुच्यत इति । याज्ञवल्क्यस्तु दासाभासानां विसर्जनमाह—

बलाद्दासीकृतश्चोरैः विक्रीतश्चापि मुच्यते ।

इति । यो बलात्कारेणादासोपि केनचित्प्रभुणा दासः कृतः, यश्च चोरैरपहृत्य दासत्वेन विक्रीतः, आहितो दत्तो वा स यस्य पार्श्वे दासभावेन तिष्ठति तेन प्रभुणा मोचनहेतुमन्तरेणैव शीघ्रमेवासौ मोचनीय इत्यर्थः । यदि तेन लोभा-

दिवशादसौ न मुक्तस्तदा राज्ञा मोचयितव्यः । तथाच नारदः—

चोरोपहतविक्रीता ये च दासीकृता बलात् ।
राज्ञा मोचयितव्यास्ते दासत्वं तेषु नेष्यते ॥

यस्तु पूर्वमेकस्य दासस्सन्नपरस्य दास्यमङ्गीकरोति असावपरेण विसर्जनीय इति वचोभङ्ग्या स एवाह—

तवाहमिति चात्मानं योऽस्वतन्त्रः प्रयच्छति ।
न समं प्राप्नुयात् कामं पूर्वस्वामी लभेत तम् ॥

अस्वतन्त्रः परदासत्वेनास्वतन्त्रः कामं नूतनस्वामिनि दास्यं, पुरातनस्वामिनि दासेन काम्यमानत्वात् । एवं यदेतदासमधिकृत्योक्तं तत्सर्वं यथायोग्यं दास्यामपि द्रष्टव्यम् । दासीस्वामिनमधिकृत्य विशेषमाह कात्यायनः—

स्वदासीं यस्तु संगच्छेत् प्रसूता च भवेत्ततः ।
अवेक्ष्य बीजं कार्या स्यान्न दासी सान्वया तु सा ॥

स्वकृतगर्भाधानमनुसंधाय स्वामिना स्वदासी सन्तानसहिता दासत्वविमोचकविधिना स्वकृतगर्भाधानादेर्दासत्वपरिहारार्थम दासीत्वेन कार्या स्यादित्यर्थः । कः पुनर्दासत्वविमोचको विधिरित्यपेक्षिते नारदः—

स्वदासमिच्छेद्यः कर्तुमदासं प्रीतमानसः ।
स्कन्धादादाय तस्यासौ भिन्द्यात् कुम्भं सहाम्भसा ॥

साक्षताभिस्सपुष्पाभिः मूर्धन्यर्द्धरवाकिरेत् ।
अदास इति चोक्त्वा त्रिः प्राङ्मुखस्तमथोत्सृजेत् ॥

एवं समुत्सर्गे सति दासत्वकृतमयोग्यत्वमपैतीत्याह स एव—

ततः प्रभृति कर्तव्यः स्वाम्यनुग्रहपालितः ।
भोज्यान्नोऽथ प्रतिग्राह्यो भवत्यभिमतस्सताम् ॥

स्वाम्यनुग्रहेण कष्टतरदशापाकरणरूपेण पालितः निजस्वरूपं नीतः संभाषणादियोग्यो भवति तदानीमेवेत्यर्थः । दासीमदासीं कर्तुमिच्छतोऽपि समानमेतद्विधानं, दासमित्यत्र लिङ्गवचनयोरुद्देश्यविशेषणयोरविवक्षितत्वात् । स्वाम्यनुज्ञया पालितो रक्षितः भोज्यान्नः प्रतिग्राह्यः, सतां संमतश्च भवतीत्यर्थः । अत एव—

दासस्य तु धनं यत्स्यात् स्वामी तस्य प्रभुः स्मृतः ।

इति कात्यायनेन दासधनप्रभुत्वे स्मृतेऽपि दासीधनेऽपि स्वामिनः प्रभुत्वं स्मृतामिति मन्तव्यम् । तथा च स एव दासेन या परिणीता साऽपि दासीत्वमापद्यत इत्याह—

दासेनोढा त्वदासी या साऽपि दासीत्वमाप्नुयात् ।
यस्माद्भर्ता प्रभुस्तस्याः स्वाम्यधीनः प्रभुर्यतः ॥

इति स्मृतिचन्द्रिकायां दासविषयाणि.
समाप्तमभ्युपेत्याशुश्रूषाख्यस्य पदस्य विधिवितानम्.

अथ वेतनानपाकर्माख्यस्य पदस्य विधिरुच्यते ॥

तत्र मनुः—

अतःपरं प्रवक्ष्यामि वेतनस्यानपक्रियाम् ॥

इति । वेतनं कर्ममूल्यं, तस्यानपाक्रिया भृत्यायासमर्पणं, समर्पितस्य वा परावर्तनम् । तत्र समर्पणे विशेषमाह नारदः—

भृत्याय वेतनं दद्यात् कर्मस्वामी यथाक्रमम् ।
आदौ मध्येऽवसाने च कर्मणो यद्विनिश्चितम् ॥

तुभ्यमियद्दास्यामीति यद्वेतनं परिमाणतो विनिश्चितं त्रिधा विभज्य कर्मण आदिमध्यावसानेषु दद्यादित्यर्थः । एतत्सकृदादौ देयमित्यादिविशेषपरिभाषाभावे वेदितव्यम् । इयद्दास्यामीति परिभाषाया अभावे विशेषमाह स एव—

भृतावनिश्चितायां तु दशभागमवाप्नुयुः ।
लाभगोवीर्यसस्यानां वणिग्गोपकृषीवलाः ॥

दशभागं दशमं भागमित्यर्थः । गोवीर्यं पाल्यमानगवादिपशुप्रभवं पयःप्रभृति अवाप्नुयुः, यथाक्रमेणेति शेषः । यदि कर्मस्वामी प्रागुक्तभागावाप्तिप्रतिबन्धको भवति तदा त्वाह याज्ञवल्क्यः—

दाप्यस्तु दशमं भागं वाणिज्यपशुमस्यतः ।
अनिश्चित्य भृतिं यस्तु कारयेत्स महीक्षिता ॥

सस्यदशमभागभृतिरियमल्पप्रयाससाध्यकृष्टक्षेत्रकर्तृविषये द्रष्टव्यम् । बह्वायाससाध्यकृष्टक्षेत्रकर्तृविषये त्वाह बृहस्पतिः—

त्रिभागं पञ्चभागं वा गृह्णीयात्सीरवाहकः ।

इति । व्यवस्थितविकल्पश्चायम् । कथमत्र व्यवस्थेत्यपेक्षिते स एवाह—

भक्ताच्छादभृतस्सीरात् भागं गृह्णीत पञ्चमम् ।
जातस्यात्त्रिभागं तु प्रगृह्णीयादथाभृत ॥

अशनाच्छादनाभ्यां भृतः कृषीवलः लाङ्गलविकृष्टक्षेत्रजातस्य स्यात् पञ्चमभागं गृह्णीयात् । ताभ्यामभृतस्तु तृतीयभागमित्यर्थः । अथवा यत्र इयद्दास्यामीति परिभाषाया अभावस्तत्र मनूक्तं द्रष्टव्यम् ॥

समुद्रयानकुशला देशकालार्थदर्शिनः ।
नियच्छेयुः भृतिं यां तु सा स्यात्प्रागकृता यदि ॥

इयद्दास्यामीति परिभाषितेऽपि क्वचित्ततो न्यूनं स्वामिबुद्धिमात्रपरिकल्पितं वेतनं देयं, क्वचित्ततोऽप्यधिकं देयमित्याह याज्ञवल्क्यः—

देशं कालं च योऽतीयाल्लाभं कुर्याच्च योऽन्यथा ।
तत्र स्यात्स्वामिनश्छन्दोऽधिके देयं कृतेऽधिके ॥

यो भृतः स्वाम्याज्ञां विना स्वातन्त्र्येण वाणिज्यादिकर्मणः फलसाधकत्वापादकं देशं कालं वाऽतिक्रामति, लाभं वा बहुतरव्ययकरणेन स्वल्पं करोति, तस्मै पूर्वपरिभाषितभृतिमध्ये स्वामी स्वेच्छानुसारेण किञ्चिद्दद्यात् । यस्तु स्वातन्त्र्येण

बहुलाभं करोति, तस्मै परिभाषितमूल्याधिकं किञ्चिद्देयं स्वामिना पारितोषकमित्यर्थः । अनेकनिर्वर्त्ये कर्माणि परिभाषितभृतेरर्पणप्रकारमाह स एव—

यो यावत्कुरुते कर्म तावत्तस्य तु वेतनम् ।
उभयोरप्यसाध्यं चेत् साध्ये कुर्याद्यथाश्रुतम् ॥

अयमर्थः—कूपे कृते तत्कर्तृणामियद्दास्यामीति वेतने प्रतिश्रुते द्विबहुकर्तृभिरारब्धे विघ्नवशादसमाप्तौ तत्तत्कृतकर्मानुसारेण प्रतिकर्तृ किञ्चिद्देयं, अथाविघ्नेन समाप्ते यावत्परिभाषितमेव देयमिति ॥

इति स्मृतिचन्द्रिकायां वेतनसमर्पणविषयाणि.

अथ भृत्यविषयाणि.

तत्र नारदः—

कर्मोपकरणं चैषां क्रियां प्रति यदाहितम् ।
आत्मभावेन तद्रक्ष्यं न जैह्मेन कदाचन ॥

एषां कर्मस्वामिनां कर्मोपकरणं लाङ्गलादिकं कृष्यादिक्रियामुद्दिश्य यद्भृत्यपार्श्वे निहितं तत्तेन सदा निश्शाठ्येन रक्ष्यमित्यर्थः । बृहस्पतिरपि—

भृतकस्तु न कुर्वीत स्वामिनश्शाठ्यमण्वपि ।
भृतिहानिमवाप्नोति ततो वादः प्रवर्तते ॥

ततः शाठ्यकरणात् विवादः स्वामिना सह स्वस्य प्रवर्तते, तत्र पराजितो भृतकः शाठ्यानुसारात् भृतिहानिमवाप्नोतीत्यर्थः। कर्मणोऽकरणेऽप्याह स एव—

गृहीतवेतनः कर्म न करोति यदा भृतः।
समर्थश्चेद्दमं दाप्यो द्विगुणं तच्च वेतनम् ॥

दमं शक्त्यपराधानुसारेण राज्ञे दद्यात्। गृहीतं च वेतनं द्वैगुण्येन स्वामिने दद्यादित्यर्थः। अस्मिन्नेव विषये वेतनाग्रहणे त्वाह याज्ञवल्क्यः—'अगृहीते समं दाप्यः' इति। यावता वेतनेन भृत्यत्वमङ्गीकृतं तावदेव स्वामिने दद्यान्न तु राज्ञे दण्डमित्यर्थः। अथवाऽङ्गीकृतां भृतिं दत्वा स्वामिना भृत्यो बलात्कारेण कारयितव्यः। यदाह नारदः—

कर्म कुर्वन् प्रतिश्रुत्य कार्यो दत्वा भृतिं बलात्।

इति। प्रतिश्रुत्येतत्प्रारम्भस्योपलक्षणार्थम्। यदाह कात्यायनः—

कर्मारम्भं तु यत्कृत्वा सिद्धं नैव तु कारयेत्।
बलात्कारयितव्योऽसावकुर्वन् दण्डमर्हति ॥

कार्षापणद्विशतमिति शेषः। यदाह वृद्धमनुः—

प्रतिश्रुत्य न कुर्याद्यस्स कार्यस्स्यात् बलादपि।
स चेन्न कुर्यात्तत्कर्म प्राप्नुयाद्द्विशतं दमम् ॥

इति। यत्तु मनुनोक्तं—

भृतोऽनार्तो न कुर्याद्यो दर्पात्कर्म यथोदितम्।
स दण्ड्यः कृष्णलानष्टौ न देयं चास्य वेतनम् ॥

इति, तदल्पदण्डत्वात् भागासिद्धिविषयं, दानप्रतिषेधादत्तमप्यदत्तप्रायत्वात् प्रत्याहरणीयम्। किञ्चिन्मात्रासिद्धौ तु पूर्वोक्तमेव दण्डवर्जं भवतीत्याह स एव—

यथोक्तमार्तस्स्वस्थो वा यस्तत्कर्म न कारयेत्।
न तस्य वेतनं देयमल्पोनस्यापि कर्मणः॥

स्वस्थो न कारयेदिति वदन्नस्वस्थेऽपि स्वयं कर्तृत्वनियमो नास्तीति दर्शयति। यस्त्वार्तस्स्वार्तिसमये धनाद्यभावेन न कारयति, किंत्वार्त्यपगमानन्तरं स्वयं करोति तत्रार्तेः दीर्घकालतया कालक्षेपेऽपि भृत्यदोषाभावाद्वेतनमसौ निर्विवादं लभते इत्याह स एव—

आर्तस्तु कुर्यात् स्वस्थस्सन् यथाभाषितमादितः।
सुदीर्घस्यापि कालस्य लभेतैव च वेतनम्॥

यस्तु कालविशेषावधिकं कर्म प्रतिज्ञाय प्रतिज्ञातकालापूर्तावेव कर्म त्यजति तं प्रत्याह नारदः—

कालेऽपूर्णे त्यजन् कर्म भृतेर्नाशमवाप्नुयात्।

अत्र दण्डमप्याह विष्णुः—'पणशतं च राज्ञे दद्यात्' इति। अस्मिन्नेव विषये महापारुष्यकरणादिस्वामिदोषतस्त्यजन् भृत्यो यावति काले कर्म तत्कालानुसारेण कल्पितं वेतनं लभत इत्याह नारदः—

स्वामिदोषादपक्रामन् यावत्कृतमवाप्नुयात्।

इति। यस्तु प्रमादादिना स्वदोषेण स्वामिद्रव्यं बलीवर्दा-

दिकं नाशयति तं प्रत्याह विष्णुः—'तद्दोषेण च यद्विनश्येत्तत्स्वामिने देयमन्यत्र राजदैवोपघातात्' इति। नष्टस्य यन्मूल्यं योग्यं तद्देयमित्यर्थः। अत्र दोषविशेषाद्विशेषमाह वृद्धमनुः—

प्रमादान्नाशितं दाप्यं समं द्विर्द्रोहनाशितम्।

इति। प्रमादान्नाशितं अनवधानान्नाशितं समेव दद्यात्, द्रोहनाशितं तीव्रप्रहारादिना नाशितं तद्द्विर्दाप्यो द्विगुणं दद्यादित्यर्थः। भृत्यदोषाभावे यदन्यत एव नष्टं तन्न देयमित्याह स एव—

न तु दाप्यो हृतं चोरैर्दग्धमूढं जलेन वा।

इति। ऊढं नीतम्। यस्तु वाहको वाह्यद्रव्यं प्रज्ञाहीनत्वादिना स्वदोषेण विनाशयति तं प्रत्याह नारदः—

भाण्डव्यसनमागच्छेद्यदि वाहकदोषतः।
दाप्यो यत्तत्र नश्येत्तु दैवराजकृताद्ऋते॥

भाण्डं गोण्यादिषु न्युप्य प्रापणीयं क्रमुकादिकम्। व्यसनमागच्छेत् दोषादिकं प्राप्नुयात्। अत्रापि,

प्रमादान्नाशितं दाप्यः समं द्विर्द्रोहनाशितम्।

इति वृद्धमनूक्तो विशेषो द्रष्टव्यः। यस्तु वाहकः स्वदोषेण प्रस्थानविघ्नं करोति तं प्रत्याह कात्यायनः—

विघ्नयन्वाहको दाप्यः प्रस्थाने द्विगुणं स्मृतम्।

इति। वाहक इत्युदाहरणमात्रमेव, न तु विवक्षितं, तेनायुधी-

यादिभृत्येऽपि विघ्नकारिणि वचनमेतदिति मन्तव्यम्। अत एव नारदेन—

द्विगुणां तु भृतिं दाप्यः प्रस्थाने विघ्नमाचरन्।

इति सामान्येनोक्तम्। विघ्नाचरणमङ्गीकृतकर्माकरणमेवात्र विवक्षितं न पुनरासेधादिकम्। अङ्गीकृतकर्माकरणस्यापि यदा सहायान्तरलाभेन प्रस्थानविघ्नानापादकत्वं तदा त्वाह याज्ञवल्क्यः—

प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन्।
भृतिमर्धपथे सर्वां प्रदाप्यः॥

इति। प्रक्रान्ते प्रस्थानकर्मणि स्वाङ्गीकृतं कर्म त्यजन् भृतेस्सप्तमं भागं दाप्यः। पथि गन्तव्यभागाधिक्ये त्यजन् भृतेश्चतुर्थं भागमर्धपथे त्यजन् सर्वां भृतिमित्यर्थः॥

इति स्मृतिचन्द्रिकायां भृत्यविषयाणि.

अथ स्वामिविषयाणि.

तत्र बृहस्पतिः—

प्रभुणा विनियुक्तस्सन् भृतको विदधाति यः।
तदर्थमशुभं कर्म स्वामी तत्रापराध्नुयात्॥

अशुभं कर्म सीमोल्लङ्घनाद्यन्यायेन क्षेत्रकर्षणादिकम्। स्वाम्यनुज्ञया भृत्येनाशुभकर्मकरणे स्वामिनो दण्ड इति वक्तुमिदमुक्तम्। कात्यायनोपि—

त्यजेत्पथि सहायं यः श्रान्तं रोगार्तमेव वा।
प्राप्नुयात् साहसं पूर्वं ग्रामे त्र्यहमपालयन् ॥

सहायं भृत्यम्। बृहस्पतिरपि—

कृते कर्मणि यस्स्वामी न दद्याद्वेतनं भृते।
राज्ञा दापयितव्यस्स्याद्विनयं चानुरूपतः ॥

भृते भृत्ये। विष्णुरपि—'स्वामी चेद्भृतमपूर्णकाले जह्यात्तस्य सर्वमेव मूल्यं दद्यात्, पणशतं च राज्ञे, अन्यत्र भृतदोषात्' इति। तस्येति चतुर्थ्यर्थे षष्ठी, शेष इत्यनुवृत्तौ 'चतुर्थ्यर्थे बहुलं छन्दसि' इति पाणिनिस्मरणात्। दोषोऽत्र चौर्यादिरभिप्रेतः, न पुनर्बह्वाशित्वादिः। याज्ञवल्क्योपि—

प्रक्रान्ते सप्तमं भागं चतुर्थं पथि संत्यजन्।
भृतिमर्धपथे सर्वां प्रदाप्यस्तत्याजकोपि च ॥

प्रस्थानकर्मणि प्रक्रान्ते, गन्तव्यभागाधिके पथि अर्धपथे वा यो भृत्यं कर्म कुर्वाणं सामी त्याजयति, सोऽत्र त्याजको मतः। सोपि पूर्वोक्तप्रदेशेषु भृत्यं त्यजन् भृत्याय सप्तमभागं दाप्य इत्यर्थः। पथि चतुर्थभागदापनमविक्रीतभाण्डस्वामिविषयम्। विक्रीतभाण्डस्वामिविषये त्वाह वृद्धमनुः—

पथि विक्रीय तद्भाण्डं वणिग्भृत्यं त्यजेद्यदि।
अथ तस्यापि देयं स्याद्भृतेरर्धं लभेत सः ॥

पथि गन्तव्यभागाधिक इति शेषः। शौल्किकादीनामासेधेन प्रतिबद्धभाण्डस्वामिविषये राजाद्यपहृतभाण्डस्वामिविषये चाह कात्यायनः—

यदा तु पथि तत् भाण्डमासिध्येत ह्रियेत वा ।
यावानध्वा गतस्तेन प्राप्नुयात्तावतीं भृतिम् ॥

गतसरण्यनुसारेण स्वामी भृतिं प्रागदत्तां दद्यात् । प्राग्दत्तायास्तु भृतेराधिकमाददीतेत्यर्थः । भाटकगृहीतेन यानादिना भाण्डनेतारं प्रत्याह नारदः—

अनयन् भाटयित्वा तु भाण्डवान् यानवाहने ।
दाप्यो भृतिचतुर्भागं सर्वामर्धपथे त्यजन् ॥

यानं शकटादि । वाहनं अश्वादि । ते भाटयित्वा प्रापणादिकार्योपाधिकपरिक्रयं कृत्वा सहायार्थं परिक्रीतं यद्यपि न गृह्णाति, तथाऽपि भृतिचतुर्भागं मूल्यचतुर्थांशं दाप्य इत्यर्थः । अर्धपथे च सर्वदापनवचनात्ततो न्यूनपथे भाटकाहृतयानानि त्यजन् त्रिभागद्विभागकल्पनया दाप्य इत्यूह्यम् । यस्तु शकटादिकं भाटयित्वा तमेवोपकारशून्य आदाय देशान्तरं गच्छति, भाटकं तु न प्रयच्छति तं प्रत्याह वृद्धमनुः—

यो भाटयित्वा शकटं नीत्वा चान्यत्र गच्छति ।
भाटं न दद्याद्दाप्यस्स्याद्रूढस्यापि भाटकम् ॥

कार्योपाधिकपरिक्रयमूल्यामिति यावत् । अरूढस्यापि अकृतोपकारस्यापि शकटादेर्भाटकं दाप्य इत्यर्थः । कात्यायनस्तु—कृते कृत्ये समनन्तरमसमर्पितस्य वाहनादेस्समर्पणपर्यन्तं भाटकानिवृत्तिरित्याह—

हस्त्यश्वगोखरोष्ट्रादान् गृहीत्वा भाटकेन यः ।
नार्पयेत्कृतकृत्यार्थस्स तु दाप्यस्सभाटकम् ॥

एवं गृहादेरपीत्याह स एव—

गृहवार्यापणादीनि गृहीत्वा भाटकेन यः ।
स्वामिने नार्पयेद्यावत्तावद्दाप्यस्स भाटकम् ॥

वारिशब्देनात्र तदाधारपात्रं माणिकादिकं लक्ष्यते । नार्पयेत् कृतकृत्यस्सन्निति शेषः । माणिकादिपात्रस्य कृत्स्नभ्रंशविषये त्वाह नारदः—

स्तोमवाहीनि भाण्डानि पूर्णकालान्युपानयेत् ।
ग्रहीतुराभवेत् भग्नं नष्टं चान्यत्र संप्लुवात् ॥

स्तोमेन भाटकेन भाण्डानि द्रवद्रव्यप्रापणार्थं गृहीतानि स्तोमवाहीनि, तानि पूर्णभाटककालानि तत्स्वामिनं प्रापयेदित्यर्थः । सिद्धमुक्त्वा ग्रहीतुराभवेदित्याद्युक्तम् । तस्यायमर्थः—संप्लुवः परस्परमन्येन वा द्रव्येण संघट्टनं, तत्र लेशतः कात्स्न्र्येन वा भिन्नं पूर्ववत्कृतं तुल्यरूपमापन्नं वा भाण्डस्वामिने देयम् । संप्लुवादन्यत्र तु तथाभूतं भाटकग्रहीतुराभवेत् आत्मसंबन्धि भवेत् भाटकदात्रा न समाधेयामिति यावत् । गृहाधारदेशाय भाटकदातारं च प्रत्याह स एव—

परभूमौ गृहं कृत्वा स्तोमं दत्वा वसेत्तु यः ।
स तद्गृहीत्वा निर्गच्छेत्तृणकाष्ठेष्टकादिकम् ॥

इति । स्तोमाप्रदानेऽप्याह स एव—

अथ पण्यस्त्रीतदुपभोक्तृविषयाणि.

तत्र नारदः—

शुल्कं गृहीत्वा पण्यस्त्री नेच्छन्ती द्विगुणं वहेत् ।
अनिच्छन् शुल्कदाताऽपि शुल्कहानिमवाप्नुयात् ॥

'नेच्छन्ती द्विगुणं वहेत्' त्यस्य क्वचिदपवादः स्मृत्यन्तरे दर्शितः—

व्याधिता सम्भ्रमा व्यग्रा राजधर्मपरायणा ।
आमन्त्रिता च नागच्छेदवाच्या बडबा स्मृता ॥

असन्तावश्यकेषु कार्येषु जातसम्भ्रमा तदुपभोक्तृविटाविषये सम्भ्रमापदेनोक्ता । तत्रैव व्याकुला व्यग्रापदेनोक्ता । बडबा दासी, तद्ग्रहणमत्र पण्यस्त्रीप्रदर्शनार्थम्, व्याध्याद्यन्वयनिबन्धनस्याबाच्यत्वस्यान्यत्रापि तुल्यत्वात् । उपभोक्तारं तु प्रत्याह नारदः—

अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम् ।
अक्रमेण तु सङ्गच्छेत् घातदन्तनखादिभिः ॥
अयोनौ यस्समाक्रामेत् बहुभिर्वाऽपि साधनैः ।
शुल्कं सोऽष्टगुणं दाप्यो विनयं तावदेव तु ॥

इति । पण्यास्त्रियास्त्वपराधे दण्डादिकं मत्स्यपुराणे दर्शितं—

गृहीत्वा वेतनं वेश्या लोभादन्यत्र गच्छति ।
तां दमं दापयेद्द्यादितरस्यापि भाटकम् ॥

स्तोमाद्विना वासित्वा तु परभूमावनिश्चितः ।
निर्गच्छंस्तृणकाष्ठादि न गृह्णीयात्कथञ्चन ॥
यान्येव तृणकाष्ठानि त्विष्टका विनिवेशिता ।
स निर्गच्छंस्तु तत्सर्वं भूमिस्वामिनि वेदयेत् ॥

इति। स्वामिनि स्वामिने। वेदयेत् निवेदयेदित्यर्थः। अनिश्चित इति वदन् तृणकाष्ठादिग्रहणाग्रहणपरिभाषाविहीनविषयमेतदिति दर्शयति । परिभाषितविषये तु यथा परिभाषा कृता तथैव। 'स तत् गृहीत्वा निर्गच्छेत्' इति मूलग्रहणव्यतिरिक्तविषयमित्याचाराविरोधाय कल्पनीयम् । शम्भुस्तु 'तत् गृहीत्वा' इत्यस्य गृहं गृहीत्वा गृहोपकरणं गृहीत्वेति यावत् इति व्याख्यानं कृतवान्, तत् 'तृणकाष्ठेष्टकादिकम्' इत्यादिना विरुद्धमित्युपेक्षणीयम्। व्यासोपि मन्दिरद्रव्यस्यैव सम्बन्धमाह—

स्नेहेन तु चिरं कालं मन्दिरं कुरुते तु यः ।
निर्गच्छतस्तस्य दारु दत्तस्तोमस्य नान्यथा ॥

तस्य परभूमौ मन्दिरादि कर्तुः। निर्गच्छतः तत् स्थानं परित्यज्य गच्छतः। यद्दार्वादिकं मन्दिररूपेण स्थितं तद्भाटके दत्ते तद्दातुरेव, नो चेद्भूमिस्वामिन एवेत्यर्थः ॥

इति स्मृतिचन्द्रिकायां स्वामिविषयाणि.

विवादान्तरानिर्णेतॄन् विना निर्णेतॄनाह नारदः—

वेश्याप्रधाना ये तत्र कामुकास्तद्गृहोषिताः ।
तत्समुत्थेषु कार्येषु निर्णयं संशये विदुः ॥

इति स्मृतिचन्द्रिकायां पण्यस्त्रीतदुपभोक्तृविषयाणे. समाप्तश्च वेतनानपाकर्माख्यस्य पदस्य विधिवितानः.

अथ नारदाभिप्रायतः प्राचीनपदशेषभूतस्य स्वामिपालविवादाख्यस्य पदस्य विधिरुच्यते । मनोर्मत्या तु क्रयविक्रयानुशयाख्यपदानन्तरं स्वतन्त्रतयाऽस्य पदस्योक्तत्वादनन्तरमेवोद्देशक्रमाद्वक्तव्यम् । नारदीयोद्देशक्रमानुसारिणश्च वयमित्यनवद्यमिहाभिधानम् । अभिधानप्रतिज्ञा च मनुना स्वातन्त्र्यप्रकटनार्थं कृता—

पशुषु स्वामिनां चैव पालानां च व्यतिक्रमे ।
विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः ॥

विवादं विवादापनोदकं विधिमित्यर्थः । पशुष्विति प्रतिज्ञाविषयनियमार्थमुक्तम् । तेन पशुविषये तत्स्वामिपालयोर्व्यतिक्रमे भृतिकल्पनादिविधिरस्मिन् पदे प्रतिपाद्यतया प्रतिज्ञातः, न पुनस्सस्यादिषु पशूनां स्वामिनां पालानां च व्यतिक्रमे निवारणदण्डताडनादिविधिः । अतोऽत्र निवारणादिविधिः प्रासङ्गिक एवेति मन्तव्यम् । अतोऽस्मिन् पदेऽस्मा-

भिः प्रतिज्ञातभृतिकल्पनादिविधिप्रतिपादकानि यानि वचनानि तान्येव लिख्यन्ते, तत्र नारदः—

गवां शताद्वत्सतरी धेनुस्त्र्याद्द्विशते भृतिः ।
प्रतिसंवत्सरं गोपे सन्दोहश्चाष्टमेऽहनि ॥

प्रतिसंवत्सरं वत्सतरी समतिक्रान्तवत्सत्वावस्था गौर्भृतिः । पालके पाल्यमानगोशतवशाद्देया भवति शतादधिके तु वत्सतरीस्थाने सवत्सा गौरष्टमेऽहनि संदोहश्च भवतीत्यर्थः । सन्दोहस्सर्वदोहः । यथाऽऽह बृहस्पतिः—

तथा धेनुभृतः क्षीरं लभेतास्याष्टमेऽखिलम् ।

इति । एतेन शम्भूक्तं धेनुसन्दोहयोर्नैरपेक्ष्येण भृतित्वं निरस्तमित्युपेक्षणीयम् । अनया दिशा शतद्विशतसङ्ख्यातो न्यूनाधिकसङ्ख्याकानां गवां महिष्यादिपश्वन्तराणां च भृतीयत्ता कल्पनीया । परिभाषितभृतिविशेषाभावविषयमेतत्, तत्सद्भावविषयेऽपीयत्तापरिभाषाभावे त्वाह मनुः—

गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् ।
गोस्वाम्यनुमतो भृत्यः..... ॥

इति । दुह्यात् स्वभृत्यर्थमिति शेषः । एतदुक्तं भवति—दशतो दशदोग्ध्रीणां मध्ये वरामुत्कृष्टां स्वीकृत्य तत्क्षीरं क्षीरभृतो भृत्यो गृह्णीयादिति । दशदोग्ध्रीपालनार्था भृतिरियम् । अनया दिशा दशसंख्यातो न्यूनाधिकसंख्याकानां गवां पालनार्थो महि-

ष्यादिपालनार्थाऽपि भृतिः कल्पनीया। अक्षीरपशूनां तु भृतिः क्षीरमूल्यतः कल्पनीया। द्रव्यान्तरेणाभृतपालकविषये क्षीरभृते या प्रोक्ता भृतिः सैव भवतीत्याह स एव—'सा स्यात्पालेऽभृते भृतिः'। नारदस्तु स्वामिपालयोः कर्तव्यमाह—

उपानयेद्गां गोपाय प्रत्यहं रजनीक्षये।
समर्पिताश्च ता गोपः सायाह्ने प्रत्युपानयेत्॥

गोग्रहणं पशूपलक्षणार्थम्। अत एव याज्ञवल्क्यः—

यथाऽर्पितान् पशून् गोपः सायं प्रसर्पयेत्तथा।

इति। यावन्तः प्रातस्समर्पितास्सायं तावन्तः प्रत्यर्पणीया इत्यर्थः। तथाच बृहस्पतिः—'सायं समर्पयेत्सर्वम्' इति। असर्वसमर्पणे त्वाह याज्ञवल्क्यः—

प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः।

कृतवेतनः पालक इत्यर्थः। प्रमादग्रहणं पालकदोषोपलणार्थम्। तेन मरणादौ निर्दोषः पालको न दाप्यः। न पुनः प्रमादमात्ररहितः, अत एव मनुः—

विघुष्य तु हृतं चौरैर्न पालो दातुमर्हति।
यदि देशे च काले च स्वामिनस्स्वस्य शंसति॥

विघुष्य पशूनामनुधावनार्थं शृङ्गकळहवेण्वादिभिर्घोषं कृत्वेत्यर्थः। देशो यत्र स्वामी स्थितस्सोऽभिमतः, कालोप्याहरणकालादनतिविलम्बितोऽभिमतः। एवम्भूतं देशं कालं वा यदा स्व-

दोषेणातिक्रम्य देशान्तरे कालान्तरे वा शंसति तदा त्वपराधित्वात्तदनुसारेण दातुमर्हतीति गम्यते। व्यासस्त्वदाप्यत्वं निर्दोषत्वाभिधानादभिहितं भवतीत्याभिसन्धाय निर्दोषत्वमेव पालकस्य क्वचिदाह—

पालग्रहे ग्रामघाते तथा राष्ट्रस्य विभ्रमे।
यत् प्रणष्टं हृतं वा स्यान्न पालस्तत्र किल्बिषी ॥

पुरुषकाराकरणेऽपीति शेषः। अन्यत्र तु पुरुषकाराकरणे भवत्येव किल्बिषी। अत एव मनुः—

नष्टं विनष्टं क्रिमिभिश्श्वहतं विषमे मृतम्।
हीनं पुरुषकारेण प्रदद्यात्पाल एव तु ॥

नष्टं कुत्रेत्यविदितम्। क्रिमिभिर्विनष्टं प्रध्वस्तम्। श्वहतं शुना हतम्। विषमे हतं कन्दररन्ध्रप्रदेशादौ मृतम्। पुरुषकारस्तु नारदेन दर्शितः—

क्रिमिचोरव्याघ्रभयाद्दरीश्वभ्राच्च पालयेत्।
व्यायच्छेच्छक्तितः क्रोशेत्स्वामिने वा निवेदयेत् ॥

व्यायच्छेत् व्यसननिरासाय यतेतेत्यर्थः। स्वामिने निवेदनमशक्तपालकविषयम्। यदाह स एव—

स्याच्चेद्गोव्यसनं गोपो व्यायच्छेत्तत्र शक्तितः।
अशक्तस्तूर्णमागत्य स्वामिने वा निवेदयेत् ॥

पुरुषकारमकुर्वाणः प्रागुक्तविनाशकैर्विनष्टां व्यार्तिं दण्डं च यथाक्रमं स्वामिनि दातुमर्हतीत्याह स एव—

अव्यायच्छन्नविक्रोशन् स्वामिने वाऽनिवेदयन् ।
वोढुमर्हति गोपस्तां विनयं चैव राजनि ॥

विनयप्रमाणमाह याज्ञवल्क्यः—

पालदोषाद्विनाशे तु पाले दण्डो विधीयते ।
अर्धत्रयोदशपणः स्वामिने द्रव्यमेव च ॥

अर्धत्रयोदशपणः सार्धत्रयोदशकार्षापणः, सः पाले विधेयो दण्ड इत्यर्थः । 'द्रव्यं विनष्टद्रव्यं मूल्यं विनष्टपशुमूल्यं च स्वामिने दद्यात्', इति विष्णुस्मरणात् । पालदोषप्रदर्शनार्थं तेनैव काश्चित्पालदोषोपि दर्शितः—'दिवा पशूनां वृकाद्युपघाते पाले त्वनायाति पालदोषः' इति । अनायाति उपघातनिवारणायानागच्छतीत्यर्थः । उपघातश्चात्र प्राणान्तिको विघातो विवक्षितो न पुनरुपद्रवलेशः । यदाह मनुः—

अजाविके तु संरुद्धे वृकैः पाले त्वनायति ।
यां प्रसह्य वृको हन्यात् पाले तत्किल्बिषं भवेत् ॥

यामजाविकजातीयां व्यक्तिमित्यर्थः । वृकग्रहणं तादृशहिंस्रप्रदर्शनार्थम् । सुगमस्थलस्थितविषयमेतत् । दुर्गमस्थलस्थितविषये तु शक्यपुरुषकारस्यापि पालकस्य निष्किल्बिषत्वमित्याह स एव—

तासां चेदवरुद्धानां चरन्तीनां मिथो वने ।
यामुपेत्य वृको हन्यान्न पालस्तत्र किल्बिषी ॥

वने दुर्गमारण्येऽवरुद्धानां पालकेन स्थापितानाम् । नारदेन तु मनूक्तवचनद्वयसमानार्थवचनत्रयानन्तरमजाविकेतरपशुपालकेषु स्ववचनत्रयार्थातिदेशः कृतः—

अनेन सर्वपालानां विवादस्समुदाहृतः ।

इति । तथा पालके विशुद्धीसिद्ध्युपायमाह स एव—

मृतेषु च विशुद्धिस्स्याद्वालशृङ्गादिदर्शनात् ।

इति । कालवशादप्यरण्ये मृतेषु पशुषु पश्वपहारशङ्कानिवृत्त्यर्थं वालशृङ्गादि पश्ववयवभूतं पालको दर्शयेदित्यर्थः । आदिशब्दार्थो मनुना प्रपञ्चितः—

कर्णौ चर्म च वालांश्च वास्तिं स्नायुं च रोचनाम् ।
पशुषु स्वामिनां दद्यात् मृतेष्वङ्गानि दर्शयेत् ॥

इति स्मृतिचन्द्रिकायां स्वामिपालाख्यस्य पदस्य विधिवितानम् ।

अथ प्रासङ्गिकानि पश्वादिव्यतिक्रमविषये यानि विवादापनोदकवचनानि तानि लिख्यन्ते । तत्र कात्यायनः—

क्षेत्रारामविवीतेषु गृहेषु पशुपादिषु ।
ग्रहणं तत्प्रविष्टानां ताडनं वा बृहस्पतिः ॥

आरामः उपवनम् । विवीतशब्देन तृणकाष्ठसमृद्धः परपरिगृहीतः प्रदेश उच्यते । पशुपादिः गोष्ठादिः । ग्रहणं नि-

वारणार्थं कर्णाद्यवयवग्रहणं ताडनं वा क्षेत्रादिषु प्रविष्टानां परपशूनां कर्तव्यमिति बृहस्पतिः ब्रूत इत्यर्थः । ग्रहणं वत्सादीनां, स्थूलवृषादीनां तु ताडनमिति व्यवस्था तु योग्यतयाऽध्यवसेया । ताडनमपि निवारणार्थादधिकं न कार्यं, यदाह स एव—

अधमोत्तममध्यानां पशूनां चैव ताडने ।
स्वामी तु विवदेद्यत्र दण्डं तत्र प्रकल्पयेत् ॥

यत्र स्वामी स्मृत्याचारमार्गव्यपेतादधिकताडने विवदेत तत्र तांडनाधिक्यानुसारेण दण्डप्रकल्पनम् । पशुनिवारणोपायान्तरं चाह स एव—

अजातेष्वेव सस्येषु कुर्यादावरणं महत् ।
दुःखेनेह निवार्यन्ते लब्धस्वादुरसा मृगाः ॥

अटवीनिकटवर्तिक्षेत्रविषयमेतदिति मृगग्रहणात् गम्यते । मार्गासन्नक्षेत्रविषये त्वाह नारदः—

पथि क्षेत्रे वृतिः कार्या यामुष्ट्रो नावलोकयेत् ।
न लङ्घयेत्पशुर्नाश्वो न च भिन्द्याच्च सूकरः ॥

वृतिः वरणं कण्टकितशाखाभिः प्रान्ततः परिश्रयणमिति यावत् । पथिग्रहणं संबाधस्थानोपलक्षणार्थम् । सञ्चारपथग्रहणोपाध्यन्तरमाह—

पथि ग्रामविवीतान्ते न दोषो ह्यल्पकालकम् ।

इति। दीर्घकालचारे तु दण्डमर्हतीति व्यतिरेकाद्गम्यते, पालकस्य तत्र दोषसम्भवात्। तथाच दोष इत्यनुवृत्तौ गौतमः—'पथि क्षेत्रेऽनावृत पालक्षेत्रिकयोः' इति। दीर्घकालं पशुतस्सस्यपीडन इति शेषः। क्षेत्रिक क्षेत्रकारी, तस्य वृतिमकुर्वतो राजभागविनाशनिबन्धनो दोष, ततश्च सोपि दोषानुसारेण दण्ड्य इत्याभिप्रायः। सपालपशुस्वामिनस्तु दोषस्तदभावे पालकस्यैव विज्ञेयो भृत्यापराधनिबन्धनत्वात्स्वाम्यपराधस्य। एवञ्च यत्र पालस्य दोषो न विद्यते तत्र सपालपशुस्वामिनोपि दोषाभावाद्विनष्टधान्यादिमूल्यं क्षेत्रिकाय स्वामिना न देयमिति मन्तव्यम्। विपालपशुस्वामिनाऽपि न देयं, पशोर्व्यतिक्रमेऽपि सपालस्येव तस्याप्यपरिहार्यतया व्यतिक्रमाभावात्। अत एवादण्ड्यत्वमपि पालकवत्तस्यास्मिन् विषये वेदितव्यम्। अत एवास्य क्षेत्रिकेणापि शदो न दाप्यः। दोषस्मरणाच्च, तथाचोशना—

गोभिर्विनाशितं धान्यं यो नरः प्रतियाचते।
पितरस्तस्य नाश्नन्ति नाश्नन्ति त्रिदिवौकसः॥

इति। एवञ्च यदुक्तं मनुना—

सर्वत्र तु शदो देयः क्षेत्रिकायेति धारणा।

इति, तत् निर्दोषविषयादन्यत्रेति मन्तव्यम्। सर्वत्रग्रहणं तु विपालेऽपि पशौ क्षेत्रिकस्य शदलाभो यथा स्यादित्येव-

मर्थम्। शदः क्षेत्रफलं इति धारणा एष निश्चय इत्यर्थः। दण्डस्तु निर्दोषविषयादन्यत्रेति स एवाह—

क्षेत्रेष्वन्येषु तु पशुः सपादं पणमर्हति।

इति। पशुरर्हति पशोस्स्वामी पालो वाऽर्हतीत्यर्थः। पशुमुखेन तत्स्वामिनः पालकस्य वाऽभिधानं पशुबहुत्वे प्रतिपशु सपादपणविधानार्थम्। तेन ग्रामादिसमीपवृत्तिक्षेत्रादावपि वृतिः कार्यैव। वृतौ श्वादिभिः कृतं छिद्रं कण्टकादिभिः पुनर्नाश्छिद्रं कुर्यादित्याह मनुः—

छिद्रं च पूरयेत्सर्वं श्वसूकरमुखानुगम्।

इति। एवं पशुनिवारणोपाये कृतेऽपि तमतिक्रम्य सस्यनाशे स एवाह—

पथि क्षेत्रे परिवृते ग्रामान्तीयेऽथवा पुनः।
सपालश्शतदण्डार्हो विपालं वारयेत्पशुम्॥

ग्रामान्तीये ग्रामारामादिसमीपवर्तिक्षेत्रे। परिवृत इति विशेषणमिहान्वीयते। एवञ्चायमर्थः—वृतिमतिक्रम्य ग्रासादाधिकसस्यघाती सपालः पशुः कार्षापणशतदण्डार्हः, तत्पशुपालकः शतदण्डनं दण्डनीय इति यावत्। विपालं पशुं पुनः क्षेत्रिको लगुडादिना निवारयेदिति। क्षेत्रिकायात्र सपालस्य पशोस्स्वामिना विनष्टधान्यं देयं, अस्मिन्नर्थे मूलं वक्ष्यामः। वृतिमुत्क्रामतः पशोर्यथाशक्त्यनिवारण एवायं दण्डः। तत्र नारदः—

उत्क्रम्य तु वृतिं यस्त्यात् सस्यघातो गवादिभिः ।
पालश्शास्यो भवेत्तत्र न चेच्छक्त्या निवारयेत् ॥

वृतिराहित्येनापरिहार्यसस्यघातविषयेऽप्याह स एव—

ग्रामोपान्ते च यत् क्षेत्रं विवीतान्ते महापथे ।
अनावृतं चेत्तन्नाशे न पालस्य व्यतिक्रमः ॥

महापथ इति वदन्नपरिहार्यमार्गगामिनो व्यतिक्रमाभावं दर्शयति । अत्रार्थादण्डाभावोप्युक्तः । मानवे तु साक्षादेवोक्तः—

तत्रापरिवृतं धान्यं विहिंस्युः पशवो यदि ।
न तत्र प्रणयेद्दण्डं नृपतिः पशुरक्षिणाम् ॥

निवारणेऽनिच्छूनामिति शेषः । यदाह याज्ञवल्क्यः—

पथि ग्रामे विवीतान्ते क्षेत्रे दोषो न विद्यते ।
अकामतः कामचारे चोरवद्दण्डमर्हति ॥

अन्तशब्दोऽत्र समीपे वर्तते, स च पथ्यादिषु प्रत्येकमभिसम्बध्यते । अत्र दण्डव्यवस्थामाह गौतमः—'पशुपीडने स्वामिदोषः पालसंयुक्ते तु तस्मिन्' इति । पशुपीडने पशुवशात्सस्यपीडन इति यावत् । विपालपशुपीडने स्वामिन एव दोषः, पालसंयुक्ते तु पालेऽपीत्यर्थः । तत्र स्वामिन एव दोषे तस्य शदद्दण्डौ, द्वयोर्दोषे तु स्वामिनश्शदः पालस्य दण्ड एव, न पुनः शदोपीति मन्तव्यम् । यत्तु नारदेनोक्तम्—

या नष्टा पालदोषेण गौः क्षेत्रं तु विनाशयेत् ।
न तत्र स्वामिनो दोषः पालस्तं दण्डमर्हति ॥

इति, तत्र स्वामिनो दण्डप्रापकदोषाभाव उक्तो न पुनः शददानप्रापकदोषाभावोपीत्यविरोधः । नष्टा अविदितस्थाना । यत्तु बृहस्पतिनोक्तं—

सस्यान्निवारयेद्वास्तु चीर्णदोषो द्वयोर्भवेत् ।
स्वामी शददमं दाप्यः पालस्ताडनमर्हति ॥

इति, शदश्च दमश्चेति शददमित्यस्य विग्रहः । यच्च याज्ञवल्क्येनोक्तं—

गोपस्ताड्यस्तु गोमी तु पूर्वोक्तं दण्डमर्हति ।

इति, गोपः पशुपालः, गोमी पशुस्वामी । तदिदं द्वयमपि समूलसस्यनाशविषयं, तत्र पुनः प्ररोहाभावेनापराधाधिक्यात्, स्वामिनोपि दण्डार्हत्वाच्च । अत एव नारदः—

समूलसस्यनाशे तु तत्स्वामी प्राप्नुयाच्छदम् ।
वधेन गोपो मुच्येत दण्डं स्वामिनि पातयेत् ॥

तत्स्वामी सस्यस्वामी । शदोऽत्र अत्यन्तविनाशानुसारेण शदकल्पकैः कल्पित । शदकल्पकाश्च बाधितक्षेत्रस्य समन्ततो यानि क्षेत्राणि तत्कारिणो विज्ञेयाः ।

गोभिस्तु भक्षितं सस्यं यो नरः प्रतियाचते ।
सामन्तानुमतं देयं धान्यं वा तत्र वापितम् ॥

इति तेनैवोक्तत्वात् । वधोऽत्र कशादिना ताडनम् । दण्डोऽत्र स एव वेदितव्यो यो याज्ञवल्क्येन पूर्वमुक्तः । कः पुनरसौ? उच्यते—

माषानष्टौ तु महिषी सस्यघातस्य कारिणी ।
दण्डनीया तदर्धं तु गौस्तदर्धमजाविकम् ॥
भक्षयित्वोपविष्टानां यथोक्ताद्विगुणो दमः ।
सममेषां विवीतस्थे खरोष्ट्रमहिषीसमम् ॥

इति । अयमर्थः—परसस्यघातकारिण्या बालेतरमहिष्याः स्वामी प्रतिमहिष्यष्टौ माषान् दण्डनीयः । उक्तविशेषणद्वययुक्तगोस्वामी चतुरो माषान् । तथाविधच्छागमेषस्वामी च द्वौद्वौ माषौ । एषामेव पशूनां सस्यभक्षणादारभ्य यावच्छयनमनिवारितानां स्वामी यथोक्तदण्डाद्विगुणं पूर्ववद्दण्डनीयः । विवीतस्थतृणाद्युपघातेऽपि पूर्वोक्तपशुस्वामी सस्यक्षेत्रोपघातवद्दण्डनीयः । खरोष्ट्रस्वामी महिषीस्वामिवद्दण्डनीय इति । वाचकपदेन महिषीस्वामीत्यादिना दण्डे वक्तव्ये महिषीत्याद्यवाचकपदेन दण्डोक्तिः प्रतिपश्वेवं दण्डनीय इत्यभिधानार्थेति मन्तव्यम् । अत्रापराधानुसारेण दण्डनार्थं ताम्रिकमाषो ग्राह्यः, न पुनस्सौवर्णो राजतो वा । ताम्रिकश्च माषः कार्षापणस्य षोडशो भागो भवति । यैस्त्वनुरूपदण्डनार्थं—

माषो विंशतितमो भागः पणस्य परिकीर्तितः ।

इति नारदेनोक्तमाषः स्वीकृतः, तेषां—

सङ्ख्या रश्मिरजोमूला मनुना समुदाहृता ।
कार्षापणोना सा दिव्ये नियोज्या विनये तथा ॥

इति बार्हस्पत्यवचनविरोधो दुर्वारः, मनुनोदाहृतमाषास्वीकारात् ।

ताम्रिकमाषस्य तु मनुनोक्तस्य स्वीकारे न केनापि विरोध इत्यलं परपक्षयुक्तायुक्तचिन्तया। यत्तु मनुनोक्तं 'सपादपणमर्हति' इति, तत् स्वामिमतिपूर्वपशुव्यतिक्रमविषयम्। याज्ञवल्क्यवचनं त्वबुद्धिपूर्वविषयमिति न तयोर्विरोधः। यत्तु विष्णुनोक्तं 'महिषी चेत् सस्यघातं कुर्यात् पालस्त्वष्टौ माषान् दण्ड्यः अपालायां स्वामी' इति, तदसमूलसस्यनाशविशयं, अन्यतरदण्डस्याल्पापराध एव युक्तत्वात्। यत्तु शङ्खलिखिताभ्यामुक्तं 'महिषी दश' इति, तन्नारदोक्तमाषाभिप्रायं, तथात्वे फलतस्ताम्रिकाष्टमाषात्मक एव दण्डो भविष्यति, तेन न 'माषानष्टौ' इति याज्ञवल्क्यवचनेन विरोधः, न च 'सङ्ख्या रश्मि' इत्यादिबार्हस्पत्यवचनेन। यच्च ताभ्यामेवोक्तं 'खरोष्ट्रं षोडश अजाविकं चतुरः' इति, तत् भक्षयित्वोपविष्टखरादिविषयम्। यत्तु कात्यायनेनोक्तं—

दापयेत्पणपादं गां द्वौ पादौ माहषीं तथा।

इति, यच्च नारदेन—

गावः पादं प्रदण्ड्यास्तु महिष्यो द्विगुणं ततः।

इति, तत्ताम्रिकमाषस्वीकारपक्षे फलतः समानत्वादाविरुद्धमेव। नारदोक्तमाषस्वीकारपक्षे तु परं विरोधः। अत एव चासौ पक्षो नास्माकमिति सर्वमाविरुद्धम्। यत्तु स्मृत्यन्तरं—

पणस्य पादौ द्वौ गां तद्विगुणां महिषीं तथा।
तथाऽजाविकवत्सानां पादौ दण्डः प्रकीर्तितः॥

इति, तत् भक्षयित्वोपविष्टविषयं, वचोभङ्ग्या तद्विषयदण्ड स्यैवाभिधानात्। यत्पुनर्नारदेनोक्तं—

माषं गां दापयेद्दण्डं द्वौ माषौ महिषीं तथा।
तथाऽजाविकवत्सानां दण्डस्स्यादर्धमाषकः॥

इति, अत्र राजतस्य माषस्य माषशब्देनाभिधानं भक्षयित्वोपविष्टवत्सविषयं मन्तव्यम्।

वसतां द्विगुणः प्रोक्तः सवत्सानां चतुर्गुणः।

इति स्मृतेस्समानार्थत्वमेवास्य वचनस्य भविष्यति। दक्षिणापथे षोडश ताम्रिकमाषाणामेकस्य राजतमाषस्य तुल्यमूलत्वात्। अथवाऽत्रापि ताम्रिकमाषस्यैवाभिधानमस्तु, तथाऽपि मुहूर्तमात्रभक्षणाविषयत्वादाविरोधः। तथाच 'दण्डं प्राप्नुयात्' इत्यनुवृत्तावाहतुश्शङ्खलिखितौ—'रात्रौ चरन्ती गौः पञ्च माषान् दिवा त्रीन् मुहूर्ते माषं ग्रासे त्वदण्डः' इति। एतदप्रत्यक्षचारकविषयं,

प्रत्यक्षचारकाणां तु चोरदण्डः स्मृतो बुधैः।

इति नारदस्मरणात्। ग्रासे त्वदण्ड इत्यस्यायमर्थः— महिष्यादिभिः परसस्यादिषु कबळमात्रभक्षणे कथञ्चित् कृते पालस्य स्वामिनो वा स्वल्पोपि दण्डो नास्तीति। आतुरपशुविषये तु बहुसस्यनाशेऽप्येवमेवादण्ड इति दोषाभावाभिधानमुखेनाह नारदः—

राजग्रहगृहीतो वा वज्राशनिहतोपि वा ।
अथ सर्पेण वा दष्टो वृक्षाद्वा पतितो भुवि ॥
व्याघ्रादभिहतो वाऽपि व्याधिभिर्वाऽप्युपद्रुतः ।
न तत्र दोषः पालस्य न च दोषोस्ति गोमिनाम् ॥

इति । आतुराणामनिवार्यत्वादिति शेषः । निवार्याणामपि केषां चित्पशूनां व्यतिक्रमे दण्डो नास्तीत्याह स एव—

गौः प्रसूता दशाहान्तं महोक्षो वाजिकुञ्जराः ।
निवार्यास्तु प्रयत्नेन तेषां स्वामी न दण्डभाक् ॥

दशदिनपर्यन्तं प्रसूतायाः निरोद्धुमशक्यायाः तत्स्वामी न दण्डभाक् । महोक्षस्य सर्वासां गर्भाधानार्थं सर्वदा बन्धनायोगात् तत्स्वामी न दण्डभाक् । वाजिकुञ्जराणां स्वामिनोऽदण्डभाक्त्वे हेतुरुशनसा दर्शितः—

अदण्ड्या हस्तिनो ह्यश्वा प्रजापालहिताः स्मृताः ।

इति । एवञ्च राजकीयानामुक्तवद्भावाददण्ड्यत्वमेव । स्वामिग्रहणं पालस्याप्युपलक्षणार्थम् । यदाह मनुः—

अनिर्दशाहां गां सूतां वृषान् देवपशूंस्तथा ।
अपालान्वा सपालान्वा न दण्ड्यान्मनुरब्रवीत् ॥

वृषाः महोक्षाः, अथवा वृषोत्सर्गविधानेन उत्सृष्टाः,

अदण्ड्याः काणकूटाश्च वृषश्च कृतलक्षणः ।

इत्युशनसोक्तत्वात् । काणः एकाक्षः । कूटः एकशृङ्गः ।

कृतलक्षणः प्रतप्तायसेन कृतलाञ्छनः, अस्य अस्वामिकत्वात् स्वामिदण्डाभावेऽपि सस्यरक्षणार्थं कदाचित् कृतलक्षणानां पाले कृते न तस्य दण्डभागित्वं, तेषां दुर्निवारत्वादिति वक्तुं 'वृषश्च कृतलक्षणः' इत्युक्तम्। एवमेव वक्तुं मानवे 'देवपशूंस्तथा' इत्युक्तम्। देवपशवो हि देवताप्रतिमादीनां क्षीरस्नानाद्यर्थं तदुद्देशेन दत्ताः, न च तत्र वस्तुतस्स्वस्वामिभावोस्तीति कृतलक्षणवृषवत्पालदण्डापवादार्थमेव देवपशुग्रहणम्। प्रसूतगोवदुभयदण्डाभाव एवोशनसा गोविशेषे दर्शितः—

अदण्ड्याऽऽगन्तुकी गौश्च प्रसूता ह्यभिचारिणी।

आगन्तुकी अनभ्यस्तस्थाना। अभिचारिणी प्रचुरताडनात् प्रच्युता पुनः स्वयूथाभिगामिनी। एवं कालविशेषे तेनैव गोमात्राविषये दण्डाभावो दर्शितः—

अदण्ड्याश्चोत्सवे गावः श्राद्धकाले तथैव च।

इति। अत्र व्यासः—

आक्रम्य यद्द्विजैर्भुक्तं परिक्षीणैश्च बान्धवैः।
गोभिश्च नरशार्दूल! वाजिमेधाद्विशिष्यते॥

अत्र मनुः—

एतद्विधानमातिष्ठेद्धार्मिकः पृथिवीपतिः।
स्वामिनां च पशूनां च पालानां च व्यतिक्रमे॥

इति स्मृतिचन्द्रिकायां पश्वादिव्यतिक्रमविषयाणि.

एवं वेतनानपाकर्माख्यपदशेषभूतं स्वामिपालविवादाख्यं पदं, तत्प्रसक्तानि च पश्वादिव्यतिक्रमविषयाण्युक्त्वा इदानीमुद्देशक्रमप्राप्तास्वामिविक्रयाख्यस्य पदस्य विधिरुच्यते ।

तत्र नारदः—

द्रव्यमस्वामिविक्रीतं प्राप्तुस्स्वामी तदाप्नुयात् ।

इति । अस्वामिना विक्रीतं स्वकीयं द्रव्यं यस्य पार्श्वे दृष्टं तस्य सकाशात् स्वामी तत् गृह्णीयादित्यर्थः । एतत्स्वाम्यननुमता विक्रीतद्रव्यविषयं,

विक्रीणीते परस्य स्वं योस्वामी स्वाम्यसंमतः ।

इति मनुना विशेषितत्वात् । परस्य स्वमित्यस्यार्थो बृहस्पतिना प्रपञ्चितः—

निक्षेपान्वाहितन्यासहृतयाचितबन्धकम् ।

उपांशु येन विक्रीतमस्वामी सोऽभिधीयते ॥

हृतं अपहृतम् । इतराणि पूर्वार्धवर्तीनि पदानि बहुधा व्याख्यातानि । उपांशु अप्रकाशम् । प्रपञ्चोऽयं परद्रव्यतया प्रसिद्धानां प्रदर्शनार्थः । प्रायिकाभिप्रायेणोपांशुग्रहणम् । तेन प्रणष्टाधिगतादिकमपि परद्रव्यं येन विक्रीतं, प्रकाशमपि येन निक्षेपादिकं विक्रीतं, सोप्यस्वामी । अस्वामिविक्रयनिरूपणस्य किं प्रयोजनमित्यपेक्षिते नारदः—

अस्वामिना कृतो यस्तु क्रयो विक्रय एव च ।

अकृतस्स तु विज्ञेयो व्यवहारेषु नित्यशः ॥

कात्यायनोपि—

अस्वामिविक्रयं दानमाधिं च विनिवर्तयेत् ।

इति । एवंच विक्रयादितः प्रागेवास्वामिहस्ते दृष्टं नष्टमपहृतं वा स्वकीयद्रव्यमस्वामिनः सकाशात् स्वामी गृह्णीयादिति दण्डापूपन्यायसिद्धं बोद्धव्यमिति । यत्तु याज्ञवल्क्येनोक्तं—

हृतं प्रणष्टं यो द्रव्यं परहस्तादवाप्नुयात् ।
अनिवेद्य नृपे दण्ड्यः स तु षण्णवतिं पणान् ॥

इति । अत्र न परहस्तादवाप्तिः दण्ड्यत्वे हेतुः न्याय्यत्वात्तस्याः, किंत्वनिवेदनं, तस्य तस्करप्रच्छादनफलकत्वेनान्याय्यत्वात् । यदा पुनः परहस्तादवाप्तुमसमर्थः स्वामी तदाह स एव—

नष्टापहृतमासाद्य हर्तारं ग्राहयेन्नरम् ।
देशकालातिपत्तौ वा गृहीत्वा स्वयमर्पयेत् ॥

अयमर्थः—विनिष्टमपहृतं वा स्वकीयं द्रव्यमासाद्य अधिगन्तुरपहर्तुर्वा हस्ते दृष्ट्वा अधिगन्तारमपहर्तारं वा ग्राहयेद्राजपुरुषादिभिः सामाद्युपायैः । देशकालातिपत्तौ पुरुषाद्यानयनार्थं देशान्तरगमने कालक्षेपे च क्रियमाणे पलायनशङ्कायां स्वयमेव वा गृहीत्वा राजपुरुषेभ्यो राज्ञे वा समर्पयेदिति । ततो राजपुरुषादिभिः सामाद्युपायैः स्वामिने तद्धनं दापयित्वा दण्डयित्वा चोत्सृष्टव्य इति ग्राहणगृहीत्वार्पणविध्यो-

र्दृष्टार्थत्वबलाद्गम्यमानमिह बोद्धव्यम्। यदा तु विक्रयादूर्ध्वमेव क्रेतुर्हस्ते क्रीतं पश्यति तदाऽप्याह स एव—'स्वं लभेतान्यविक्रीतम्' इति। अन्याविक्रीतं स्वाम्यनुमतिमन्तरेणास्वामिना विक्रीतमात्मीयद्रव्यं क्रेतुः सकाशात् स्वामी गृह्णीयादित्यर्थः विष्णुरपि—"अज्ञानतः प्रकाशं यः परद्रव्यं क्रीणीयात् तत्र तस्यादोषः, स्वामी द्रव्यमवाप्नुयात्" इति। अज्ञानतः विक्रेतुरस्वामित्वाज्ञानतः। तत्र परद्रव्यक्रये। तस्य क्रेतुः। अदोषः तस्य तस्करदोषो नास्तीत्यर्थः। विक्रेतुस्तदोषोस्त्येव, तेनात्र विक्रैतैव तस्करवद्दण्ड्यः न पुनः क्रेताऽपि। यत्र पुनर्विक्रेतुरस्वामित्वं रहसि हीनमूल्येन वा विक्रयकरणादिना ज्ञात्वैव लोभादिना परद्रव्यं क्रीणाति तत्र क्रेतुरपि तस्करदोषोस्तीति सोपि तस्करवद्दण्ड्यः। तथाच स एव—'यद्यप्रकाशं हीनमूल्यं वा विक्रीणीयात्तदा क्रेता च चोरवच्छास्यः' इति। बृहस्पतिरपि ज्ञानतोऽज्ञानतश्च क्रये यथाक्रमेण स्तेनता निर्दोषता च क्रेतुर्भवतीति दर्शयति—

येन क्रीतं तु मूल्येन प्राग्राज्ञे विनिवेदितम्।
न तत्र विद्यते दोषः स्तेनः स्यादुपविक्रयात्॥

मूल्येन अहीनमूल्येन। प्राग्राज्ञे विनिवेदितं क्रयात्प्रागेव प्रकाशितमित्यर्थः। उपविक्रयपदं तु स्वयमेव व्याचष्टे—

अन्तर्गृहे बहिर्ग्रामान्निशायामसतो जनात्।
हीनमूल्यं च यत्क्रीतं ज्ञेयोसावुपविक्रयः॥

असतो जनात् चण्डालादिजनादित्यर्थः । असद्ग्रहणमस्वामित्वज्ञापकदासत्वादिविक्रेतृविशेषणानामुपलक्षणार्थम् । अत एव नारदः—

अस्वाम्यनुमतादासादसतश्च जनाद्ग्रहः ।
हीनमूल्यमवेलायां क्रीणन् तद्दोषभाग्भवेत् ॥

अस्वाम्यनुमतात् अस्वामिनैवानुमतात्, स्वाम्यनुमतिशून्यादिति यावत् । दासग्रहणमस्वतन्त्रोपलक्षणार्थम् । तद्दोषभाक् तस्करदोषभागित्यर्थः । 'क्रेतुस्तेयं रहःक्रयात्' इति तेनैवोक्तत्वात् । एवं 'क्रेतुर्दोषोप्रकाशिते' इति याज्ञवल्क्यवचनेऽपि स्तेयदोष एवोक्त इत्यवगन्तव्यम् । तथाच तेनैव—

हीनाद्ग्रहो हीनमूल्ये वेलाहीने च तस्करः ।

इति तस्करशब्दं प्रयुञ्जानेन स्तेयदोष एव दोषशब्देनोक्त इति सूचितम् । हीनात् क्रेयद्रव्यागमोपायहीनादित्यर्थः ॥

इति स्मृतिचन्द्रिकायां प्रतिपन्नास्वामिविक्रयविषयाणि.

अथ विप्रतिपन्नास्वामिविक्रयविषयाणि.

तत्र कात्यायनः—

अभियोक्ता धनं कुर्यात् प्रथमं ज्ञातिभिस्स्वकम् ।

इति । अभियोक्ता नाष्टिकः, नष्टधनस्यैवात्राभियोक्तृत्वात् । सोऽन्यहस्ते धनं दृष्टं ज्ञातिभिस्साक्षिभूतैः स्वकं स्वकीयं यथा

भवति तथा तावत्साधयेदित्यर्थः । कथं नाष्टिकेन स्वकीयत्वसाधनमित्यपेक्षिते याज्ञवल्क्यः—

आगमेनोपभोगेन नष्टं भाव्यं..... ॥

इति । आगमस्तु—

लब्धं दानक्रयप्राप्तं शौर्यं वैवाहिकं तथा ।
बान्धवादप्रजाज्जातं षड्विधस्तु धनागमः ॥

इत्यादिवचनैः भुक्तिप्रकरणे निरूपितो द्रष्टव्यः । तेन चागमेनोपभोगसहितेन ज्ञातिप्रसिद्धेन नष्टधनस्य स्वकीयत्वं साध्यमित्यर्थः । तथाच कात्यायनः—

नाष्टिकस्तु प्रकुर्वीत तद्धनं ज्ञातिभिस्स्वकम् ॥

इति । तद्धनं नष्टधनम् । स्वकं स्वकीयम् । प्रकुर्वीत साधयेदित्यर्थः । स्वकीयस्य धनस्य स्वकीयत्वावगतिरपि दानाद्यभावेन साधनीयेत्याह स एव—

अदत्तत्यक्तविक्रीतं कृत्वा स्वं लभते धनम् ॥

इति । दत्तं च त्यक्तं च विक्रीतं च दत्तत्यक्तविक्रीतं, तद्विपरीतमदत्तत्यक्ताविक्रीतं तथाभूतं भवतीति प्रमाणसिद्धं कृत्वा स्वं स्वकीयं धनं नाष्टिको विक्रेत्रादिसकाशाल्लभत इत्यर्थः । क्रेतारं प्रत्याह बृहस्पतिः—

पूर्वस्वामी तु तद्द्रव्यं यदाऽऽगत्य विचारयेत् ।
तत्र मूलं दर्शनीयं क्रेतुश्शुद्धिस्ततो भवेत् ॥

मूलं विक्रेत्राशुद्धिः अभियोज्यत्वनिवृत्तिः।मूलदर्शनानन्तरं व्यासः-

मूले समाहिते क्रेता नाभियोज्यः कथञ्चन ।
मूलेन सह वादस्तु नाष्टिकस्य तदा भवेत् ॥

नाष्टिकस्य नष्टद्रव्यस्वामिनः । तस्मिन्वादे यदि मयाऽप्यन्यस्माद्विक्रेतुस्सकाशात् क्रीतमित्याभियोज्यो वदति तदा तत्राप्ययमेव मूलदर्शनादिक्रमोऽनुसरणीयः । यदि तु नष्टग्राहकत्वेनापहारकत्वेन वा अकिञ्चित्करमूलत्वेन दर्शितो ददाति तदाऽऽह बृहस्पतिः—

विक्रेता दर्शितो यत्र हीयते व्यवहारतः ।
क्रेत्रे राज्ञे मूल्यदण्डौ प्रदद्यात्स्वामिने धनम् ॥

क्रेत्रे मूल्यं राज्ञे दण्डं स्वामिने धनं प्रदद्यादित्यर्थः ।

नारदोपि—

विक्रेता स्वामिनेऽर्थं स्वं क्रेत्रे मूल्यं च तत्कृतम् ।
दद्याद्दण्डं तथा राज्ञे विधिरस्वामिविक्रये ॥

यदा तु मूलभूतो विक्रेता देशान्तरे स्थितः तदा त्वाह कात्यायनः—

मूलानयनकालस्तु देयो योजनसङ्ख्यया ।

इति । योजनसंख्यया देशविप्रकर्षापेक्षयेत्यर्थः । यदा तु कालविळम्बेनापि मूलदर्शनं न शक्यं तदाऽप्याह स एव—'प्रकाशं वा क्रयं कुर्यात्' इति प्राकृतं क्रयं साक्षिवचनाल्लोकविदितं कुर्यादित्यर्थः । तथाच स एव—

प्रकाशं च क्रयं कुर्यात्साधुभिर्ज्ञा(तृ)तिभिस्स्वकैः ।
न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी ॥

क्रये प्रकाशिते क्रेता न राज्ञा दण्ड्य इत्याह स एव—

विशोधिते क्रये राज्ञा वक्तव्यस्स न किञ्चन।

इति। मनुरपि—

अथ मूलमनाहार्यं प्रकाशक्रयशोधितम् ।
अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम् ॥

प्रकाशक्रयशोधितं धनं क्रेतुस्सकाशान्नाष्टिको लभते, क्रेता चादण्ड्यो भूत्वा राजकीयादवरोधान्मुच्यत इत्यर्थः । 'अथ मूलमनाहार्यम्' इत्यनेन सति सम्भवे मूलानयनपक्ष एव ग्राह्य इत्युक्तम्। उक्तं च कात्यायनेन—

असमाहार्यमूलस्तु क्रयमेव विशोधयेत् ।

इति। असमाहार्यमूल एव क्रयं विशोधयेदित्यर्थः । तत्र

यदा क्रिया(मूल)मुपन्यस्य पुनर्वादी क्रयं वदेत् ।
आहरेन्मूलमेवासौ न क्रयेण प्रयोजनम् ॥

वदेत् प्रकाशं क्रयं वदेदित्यर्थः । यदा मूलं न दर्शयति क्रय-प्रकाशनं वा न करोति तदाऽप्याह स एव—

अनुपस्थापयन्मूलं क्रयं वाऽप्यविशोधयन् ।
यथाऽभियोगं धनिने धनं दाप्यो दमं च सः ॥

नाष्टिकोपि यदा नष्टस्य स्वकीयत्वं न साधयेत्तदाऽप्याह स एव—

यदि स्वं नैव कुरुते ज्ञातिभिर्नाष्टिको धनम् ।
प्रसंगविनिवृत्त्यर्थं चोरवद्दण्डमर्हति ॥

प्रसंगः अतिप्रसंगः । याज्ञवल्क्योपि--

आगमेनोपभोगेन नष्टं भाव्यमतोऽन्यथा ।
पञ्चबन्धो दमस्तत्र राज्ञस्तेनाविभाविते ॥

विवादास्पदस्य धनस्य पञ्चभागसंमितो यत्र दमो बध्यते स पञ्चबन्धः । अल्पापराधविषयमेतत् । महापराधविषये त्वाह व्यासः—

वादी चेन्मार्गितं द्रव्यं साक्षिभिर्न विभावयेत् ।
दाप्यः स्याद्द्विगुणं दण्डं क्रेता तद्द्रव्यमर्हति ॥

क्रेतुः द्रव्यलाभः पञ्चबन्धविषयेऽपि भवति । यदा च नाष्टिकः स्वकीयत्वमनुवर्तमानं न विभावयति तत्रैव क्रेतुः क्रीतद्रव्यलाभो नान्यत्रेत्यनुसन्धेयम् । एवञ्च यन्मनुनोक्तं—

विक्रयाद्यो धनं किञ्चित् गृह्णीयात् कुलसन्निधौ ।
क्रयेण स विशुद्धं हि न्यायतो लभते धनम् ॥

इति, यच्च मरीचिनोक्तं—

वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
दिवा गृहीतं यत्क्रेता स शुद्धो लभते धनम् ॥

इति, तदेतन्मार्गितद्रव्याविभावनाविषयम् । मार्गितद्रव्यविभावनासद्भावविषयेऽपि मनुमरीचिवचनबलात् प्रकाशकृतक्रये क्रेतु-

र्धनलाभोस्त्विति चेन्न, न हि वचनशतेनाप्यस्वामिविक्रीतं क्रेतुस्सम्भवतीति प्रमातुं शक्यते। किञ्च सर्वत्र प्रकाशक्रयक्रेतुः धनलाभे प्रागुक्तेन 'अथ मूलमनाहार्यम्' इत्यादिवचनेन सह विरोधो दुर्वारः स्यात्। तस्मात् प्रकाशक्रयेऽपि मार्गितद्रव्यविभावनाभाव एव क्रेतुर्धनलाभ इत्यवगन्तव्यम्। शम्भुना तूक्तदोषपरिहाराय मनुमरीचिवचनाभ्यां क्रेतुर्धनयोग्यतामात्रमुच्यते, न तु वस्तुतस्तस्यैव धनं भवतीत्युच्यत इत्युक्तं, तदयुक्तं, योग्यतामात्रकथनस्योपयोगाभावात्। यदा क्रयस्यापि साक्षिभिर्विभावनाभावस्तदा त्वाह बृहस्पतिः—

प्रमाणहीनवादे तु पुरुषापेक्षया नृपः।
समन्यूनाधिकत्वेन स्वयं कुर्याद्विनिर्णयम्॥

यस्मिन् वादे नास्तिकस्यानुवर्तमानस्वत्वसाधकप्रमाणाभावः, क्रेतुश्च प्रकाशक्रयसाधकप्रमाणाभावस्तस्मिन् वादे नास्तिकक्रेतृपुरुषयोस्साधुत्वाद्यपेक्षया विवादास्पदं धनं समन्यूनाधिकत्वेन विभज्यैतावत्त्वेति स्वयमेव राजा विनिर्णयं कुर्यादित्यर्थः। ननु प्रमाणहीनवादो न कुत्रापि सम्भवति, कथञ्चिन्मानुषाभावेऽपि दिव्याभावस्य सर्वथा वक्तुमशक्यत्वात्। मैवं, अस्वामिविक्रये वादे दिव्याभावस्तावदवगम्यते—

अभियोक्ता धनं कुर्यात् प्रथमं ज्ञातिभिस्स्वकम्।
पश्चादात्मविशुद्ध्यर्थं क्रयं क्रेता स्वबन्धुभिः॥

इत्यादिवचनानां साक्षिनियामकानां तदितरप्रमाणाभावाभिधानपरत्वात् । किंच—

प्रकाशं च क्रयं कुर्यात्साधुभिर्ज्ञातिभिः स्वकैः ।
न तत्रान्या क्रिया प्रोक्ता दैविकी न च मानुषी ॥

इति साक्षीतरप्रमाणनिषेधाद्दिव्याभावस्सुव्यक्तः । एवञ्च यदुक्तं कात्यायनेन—

अलेख्येऽसाक्षिके दैवीं व्यवहारे विनिर्दिशेत् ॥

इति, तद्दिव्यनिषेधस्मृत्यभावविषयमिति मन्तव्यम् । एतेनैतन्निरस्तं, यच्छम्भुना मूलानयनक्रयप्रकाशनरूपमुभयमधिकृत्योक्तम्—अथोभयं कर्तुमसमर्थश्चौर्यं च न मन्यते तदा द्रव्यापेक्षया दिव्यं देयम् ।

अलेख्येऽसाक्षिके दैवीं व्यवहारे विनिर्दिशेत् ।

इति कात्यायनेनोक्तत्वादिति । सप्रमाणकवादेऽपि क्वचित्समेव दीयमानं भवतीति वचोभङ्ग्या स एव दर्शयति—

वणिग्वीथीपरिगतं विज्ञातं राजपूरुषैः ।
अविज्ञाताश्रयात् क्रेता विक्रेता यत्र वा मृतः ।
स्वामी दत्वाऽर्धमूल्यं तु प्रगृह्णीत स्वकं धनम् ॥

इति । अविज्ञाताश्रयादविज्ञातस्थानकाद्विक्रेतुस्सकाशादित्यर्थः । स्वोक्तप्रकारेण ग्रहणमुपपादयितुमुक्तं तेनैव—

अर्धं द्वयोरपि हृतं तत्र स्याद्व्यवहारतः ।

इति । द्वयोः क्रेतृनाष्टिकयोः व्यवहारतः स्वकृतापचारतः स्वकीयधनार्धं हृतं गतमित्यर्थः । कः पुनस्स्वकृतापचार इत्यपेक्षिते तेनैवोक्तं—

अविज्ञातक्रयो दोषः तथा चापरिपालनम् ।
एतद्द्वयं समाख्यातं द्रव्यहानिकरं बुधैः ॥

अविज्ञातस्थानकात् क्रयोऽविज्ञातक्रयः । अथवा परमार्थतोऽयं स्वामीत्यविज्ञातात् क्रयोऽविज्ञातक्रयः। स एव क्रेतुर्दोषोऽपचारः। अपरिपालनमुपेक्षा, सैव नाष्टिकस्यापचारः । एतद्द्वयमविज्ञातक्रयापरिपालनात्मकं द्वयं क्रेतृनाष्टिकयोर्द्रव्यहानिकरत्वेन समाख्यातमित्यर्थः । मरीचिरपि—

अविज्ञातनिवेशत्वाद्यत्र मूलं न लभ्यते ।
हानिस्तत्र समा कल्प्या क्रेतृनाष्टिकयोर्द्वयोः ॥

अविज्ञातनिवेशत्वादविज्ञातस्थानत्वात् । मूलं विक्रेत्रा । बार्हस्पत्यवचनादभिन्नार्थमपि असमग्रतयाऽन्यार्थमिति एतद्वचनं मा प्रतिभात्वितीह समुच्चितः ॥

इति स्मृतिचन्द्रिकायां विप्रतिपन्नास्वामिविक्रयविषयाणि.

अथ प्रसङ्गात् स्वाम्यनार्पिततदीयवस्तुभोक्तृविषयाणि कानिचिन्नारदीयानि वचनानि लिख्यन्ते—

उद्दिष्टमेव भोक्तव्यं स्त्री पशुर्वसुधाऽपि वा ।
अनर्पितं तु यो भुङ्क्ते भुक्तभोगं प्रदापयेत् ॥

अनिर्दिष्टं तु यद्द्रव्यं वासः क्षेत्रं गवादिकम् ।
स्वबलेनैव भुञ्जानश्चोरवद्दण्डमर्हति ॥
अनड्वाहं तथा धेनुं नावं दासं तथैव च ।
अनिर्दिष्टं तु भुञ्जानो दद्यात्पणचतुष्टयम् ॥
दासी नौका तथा धुर्यो बन्धकं नोपभुज्यते ।
उपभोक्ता तु तद्द्रव्यं पण्येनैव विशोधयेत् ॥
दिवसे द्विपणं दासीं धेनुमष्टपणं तथा ।
त्रयोदशमनड्वाहमश्वं भूमिं च षोडश ॥
नौकामश्वं च धेनुं च लाङ्गलं कार्षिकस्य च ।
बलात्कारेण यो भुङ्क्ते दाप्यश्चाष्टगुणं दिने ॥
उलूखले पणार्धं तु मुसलस्य पणद्वयम् ।
शूर्पस्य च पणार्धं तु जैमिनिर्मुनिरब्रवीत् ॥

इति स्मृतिचन्द्रिकायां स्वाम्यनर्पिततदीयवस्तुभोक्तृविषयाणि समाप्तश्चास्वामिविक्रयाख्यस्य पदस्य विधिवितानः.

अथ विक्रीयासम्प्रदानाख्यस्य पदस्य विधिरुच्यते.

तत्र नारदः—

विक्रीय पण्यं मूल्येन क्रेतुर्यो न प्रयच्छति ।
स्थावरं सक्षयं दाप्यो जङ्गमं साक्रियाफलम् ॥

यो गृहीततन्मूल्यो विक्रेता पण्यं जातानुशयः क्रेत्रे प्रार्थयमानाय नार्पयति, तच्च पण्यं यदि स्थावरात्मकं तदा क्षयेन

साहितमसौ दाप्यः । यदि तु जङ्गमात्मकं तदा क्रियाफलेन साहितमित्यर्थः । क्षयशब्देन गतभोग उक्तः, क्रेतृसम्बन्धित्वेन प्रलीनत्वात् । क्रियाफलं तु धेन्वादेः पण्यस्य क्षीरादिकं, तद्दोहनादिक्रियाफलत्वात् । क्रयकालापेक्षया दापनकालेऽर्घवृद्धावेतद्द्रष्टव्यम्, अर्घह्रासे त्वन्यथाऽभिधानात् । तथाच स एव—

अर्घश्चेदपहीयेत सोदयं पण्यमावहेत् ।

इति । अत्र क्रयकालगृहीतेन मूल्येन यावत्पण्यमर्पणकालेऽर्घह्रासवशात् साभ्यधिकं लभ्यते तत्सोदयम्, तदावहेत् क्रेतारं प्रापयेत्, क्रेत्रे दद्यादिति यावत् । क्रयकालेऽर्पणकाले वाऽर्घसाम्ये त्वाह याज्ञवल्क्यः—

गृहीतमूल्यं यः पण्यं क्रेतुर्नैव प्रयच्छति ।
सोदयं तस्य दाप्योसौ..... ॥

इति । अर्घस्य ह्रासवृद्धिग्रहणाभावात्तत्साम्यविषयमिदं वचनमिति गम्यते । सोदयमित्यादेयमर्थः—अदीयमानपण्यस्य यावती वृद्धिः

निक्षेपं वृद्धिशेषं च क्रयविक्रयमेव च ।
याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम् ॥

इत्यकुंतवृद्धिप्रकरणोक्तपरिमाणतः कल्प्यते, तत्साहितं पण्यं दाप्य इति । अर्घसाम्ये पण्योपचयरूपोदयासम्भवादेवं व्या-

ख्या कृता। तत्र नारदः—'स्थायिनामेष नियमः' इति। देशान्तरे हृत्वा विक्रेतुं ये क्रीणन्ति तदितरे क्रेतारस्स्थायिनः, तद्विषयोऽयं 'स्थावरं सक्षयं दाप्यः' इत्यादिवचनोक्तो नियम इत्यर्थः। कथं तर्ह्यस्थायिनां नियम इत्यपेक्षिते स एवाह—'दिग्लाभं दिग्विचारिणाम्' इति। यत्पण्यं यस्मिन् दिगन्तरे विक्रेतुं क्रीतं तत्पण्यं तस्मिन् दिगन्तरे विक्रीणानस्य यो लाभः तेन सहितं देयमित्यर्थः। विष्णुस्तु विक्रेतुर्दण्डमप्याह—'गृहीतमूल्यं यः पण्यं क्रेतुर्नैव दद्यात् तस्यासौ सोदयं दाप्यो राज्ञा च पणशतं दण्ड्यः' इति। गृहीतं मूल्यं विक्रेत्रा यस्य पण्यस्य तद्गृहीतमूल्यम्। तस्य तस्मै क्रेत्र इति यावत्। यस्तु गृहीतमूल्यस्य पण्यस्य विक्रयानुशयाभावेऽप्यनर्पकः, यश्च क्रयानुशयवशाददत्तमूल्यस्य पण्यस्याग्राहकः, तौ प्रत्याह कात्यायनः—

क्रीत्वा प्राप्तं न गृह्णीयाद्यो न दद्याददूषितम्।
स मूल्याद्दशमं भागं दत्वा स्वद्रव्यमाप्नुयात्॥
अप्राप्तेऽर्थक्रियाकाले कृते नैव प्रदापयेत्।
एवं धर्मो दशाहात्तु परतोऽनुशयो न तु॥

इति। अदूषितं जलादिनेति शेषः। अर्थक्रियाकालो दोह्यवाह्यादिपण्यस्य दोहनवाहनादिकालः। तस्मिन्नप्राप्ते सति अग्रहणेऽदाने वा कृतेऽपि नैव दशमं मूल्यभागं प्रदापयेत्, किंतु

तमदत्त्वैव स्वद्रव्यमाप्नुयात् । एवमुक्तो धर्मः दशाहात् प्रागर्थक्रियाकालादूर्ध्वं वेदितव्यः । दशाहात्परतस्त्वनुशयो न कर्तव्यः, अनुशयकालस्यातीतत्वादित्यभिप्रायः । वास्तवस्यानुशयकारणस्याभावे प्रागुक्तो धर्मः । तथाच क्रेतारमुदाहृत्य तेनैवोक्तं—

क्रीत्वाऽनुशयवान् पण्यं त्यजेदोह्यादि यो नरः ।
अदुष्टमेव काले तु समूल्यादशमं वहेत् ॥

काले अनुशयकाले परमार्थतः पण्यमदुष्टमेव दुष्टबुद्ध्या त्यजेत् न गृह्णीयादित्यर्थः । गृहीतपण्यत्यागप्रकारोपि अस्मिन्विषये तेनैव दर्शितः—

क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपागते ।
षड्भागं तत्र मूल्यस्य दत्वा क्रीतं त्यजेद्बुधः ॥

अनुशयकालादूर्ध्वमनुशये सत्येतद्वचनमित्यपरादित्यमतिः । सा त्वयुक्ता, 'परतोऽनुशयो न तु' इत्युक्तत्वात् । अनवस्थाप्रसङ्गाच्च । मनुनाऽप्यनवस्थापरिहारार्थमुक्तं—

क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत च ॥
परेण तु दशाहस्य न दद्यान्नापि दापयेत् ।
आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षट् ॥

इति । वास्तवानुशयकारणसद्भावविषयमेतदानादानं, मूल्यदश-

मांशदानानुक्तेः । क्रयविक्रयादन्यत्राप्यनुशये क्रयविक्रयानुशयोक्तमूह्यमिसाह स एव—

यस्मिन् यस्मिन् कृते कार्ये यस्येहानुशयो भवेत् ।
तमनेन विधानेन धर्म्ये पाथि निवेशयेत् ॥

विक्रीयासंप्रयच्छतो यद्विक्रीतं पण्यं स्वपार्श्व एव स्थितं तस्य दैवादिवशान्नाशे तत्तुल्यं पण्यं क्रेत्रे विक्रेत्रा देयमिति वचोभङ्ग्या नारद आह—

उपहन्येत वा पण्यं दह्येतापह्रियेत वा ।
विक्रेतुरेव सोऽनर्थो विक्रीयासंप्रयच्छतः ॥

याज्ञवल्क्योपि—

राजदैवोपघातेन पण्यदोष उपागते ।
हानिर्विक्रेतुरेवासौ याचितस्याप्रयच्छतः ॥

याचितस्येति वचनादयाचितस्य विक्रेतुरप्रयच्छतो न हानिरिति दर्शयति । एवञ्च 'स्थावरं सक्षयं दाप्यः' इत्यादिकमपि याचितविषयमिति मन्तव्यम् । पण्यादभ्यधिकदापनस्य तत्रैवोचितत्वात् । तेन कालान्तरेऽपि पण्यमात्रमेवायाचितविषये देयम् । यथा पण्यदोष उपागते याचितस्याप्रयच्छतो विक्रेतुरेव हानिः, तथा दीयमानं पण्यमगृह्णतः क्रेतुरेव हानिरित्याह नारदः—

दीयमानं न गृह्णाति क्रीतं पण्यं च यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योप्रयच्छतः ॥

अप्रयच्छतो विक्रेतुर्यो दोषः स एवास्य भवेदित्यन्वयः। क्रेतुर्दोषाभिधानस्य फलं पण्यमूल्यं क्रेत्रे विक्रेत्रा न प्रत्यर्पणीयमिति। दीयमानमिति वदन् अदीयमानमगृह्णतो न मूल्यहानिरिति दर्शयति। यत्र विक्रेत्रा न याचितं, न च क्रयी दीयमानाग्राहकः उपागतश्च पण्यदोषः, तत्र द्वयोस्समा हानिः कल्प्या, क्रयानन्तरमर्पणग्रहणशैथिल्येन द्वयोरप्यपराधसाम्यात्। यत्र पुनर्जातानुशयः क्रेता विक्रेत्रा दीयमानं न गृह्णाति तत्राप्याह स एव—

दीयमानं न गृह्णाति क्रीत्वा पण्यं च यः क्रयी।
विक्रीणानस्तदन्यत्र विक्रेता नापराध्नुयात्॥

क्रयी जातानुशय इति शेषः। याज्ञवल्क्योपि—

विक्रीतमपि विक्रेयं पूर्वक्रेतर्यगृह्णति।

इति। अगृह्णति अनुशयेनेति शेषः। गृह्णाति तु न विक्रेयमित्यर्थादेव सिद्धम्। यो विक्रीणाति, यश्च सदोषं पण्यं प्रच्छादितदोषं विक्रीणीते तयोस्समानो दण्ड इत्याह स एव—

अन्यहस्ते च विक्रीतं दृष्टं वा दुष्टवद्यदि।
विक्रीणीते दमस्तत्र मूल्यात्तु द्विगुणं भवेत्॥

नारदस्त्वस्यार्थं श्लोकद्वयेन विविच्य वदन् विशेषमप्याह—

निर्दोषं दर्शयित्वा तु सदोषं यः प्रयच्छति।
मूल्यं तद्द्विगुणं दाप्यो विनयं तावदेव तु॥

तथाऽन्यहस्ते विक्रीय योऽन्यस्मै तत्प्रयच्छति ।
सोपि तद्द्विगुणं दाप्यो विनयं तावदेव तु ॥

इति । बुद्धिपूर्वकविषयमेतत्, दण्डदाप्यद्रव्ययोरतिमहत्त्वात् । अत एव बृहस्पतिना सदोषमुदाहृत्योक्तं—

ज्ञात्वा सदोषं यः पण्यं विक्रीणीते विचक्षणः ।
तदेव द्विगुणं दाप्यः तत्समं विनयं तथा ॥

अबुद्धिपूर्वके तु क्रयपरावर्तनमेव । अन्यत्रापि क्वचित् परावर्त्यमित्याह स एव—

मत्तोन्मत्तेन विक्रीतं हीनमूल्यं भयेन वा ।
अस्वतन्त्रेण मूढेन त्याज्यं तस्य पुनर्भवेत् ॥

अत्र नारदः—

दत्तमूल्यस्य पण्यस्य विधिरेष प्रकीर्तितः ।
अदत्तेऽन्यत्र समयान्न विक्रेतुरतिक्रमः ॥

उत्तरार्धस्यायमर्थः—

अदत्तमूल्ये पण्ये च वाङ्मात्रेण क्रये कृते ।
न परावर्तितव्यं ..... ॥

इत्येवमादिसमयाभावे सति प्रवृत्तौ वा निवृत्तौ वा न कश्चिद्दोष इति । यत्र पुनः वाङ्मात्रक्रयपरिहारार्थं विक्रेतृहस्ते क्रेत्रा किंचिदत्तं तत्र विक्रेतृदोषवशेन क्रयासिद्धौ क्रेतृदत्तद्रव्यं तस्मै द्विगुणं दद्यात् । तथाच याज्ञवल्क्यः—

सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥

इति। क्रयं सत्यं कर्तुं यत् विक्रेतृहस्ते कृतं तत्सत्यंकारकृतम्। क्रेतृदोषवशेन क्रयासिद्धौ त्वाह व्यासः—

सत्यंकारं च यो दत्वा यथाकालं न दृश्यते।
पण्यं भवेन्निसृष्टं तत् दीयमानमगृह्णतः ॥

निसृष्टं भवेदुत्सृष्टं भवेदित्यर्थः। अत्र पणस्योत्सर्गः सत्यंकारद्रव्योत्सर्गान्तोऽभिमतः, अन्यथा वाङ्मात्रक्रयकर्तृतौल्ये विक्रेतुः सत्यंकारग्राहकता न स्यात्। अत्रापि विक्रीतमपि विक्रेयमित्युक्तमनुसंधेयम् ॥

इति स्मृतिचन्द्रिकायां विक्रीयासम्प्रदानाख्यस्य पदस्य विधिवितानम्.

अथ क्रीत्वाऽनुशयाख्यस्य पदस्य विधिरुच्यते.

तत्र नारदः—

क्रेता पण्यं परीक्षेत प्राक्स्वयं गुणदोषतः।

इति। क्रीत्वाऽनुशयो मा भूदिति स्वयं क्रेता प्रागेव क्रयात् पण्यं गुणाढ्यं दुष्टं वेत्यवधारणार्थं परीक्षेतेत्यर्थः। बृहस्पतिरपि—

परीक्षेत स्वयं पण्यमन्येषां च प्रदर्शयेत्।

इति। अन्येषां पण्यगुणदोषावेदामिति शेषः। एवंच तत्क्षण एव परीक्षणं चर्मादिपण्यविषयम्। यदाह व्यासः—

चर्मकाष्ठेष्टकासूत्रधान्यासवरसस्य तु ।
वसुकुप्यहिरण्यानां सद्य एव परीक्षणम् ॥

वसुशब्दो यद्यप्यर्थमात्रवाची, तथाऽप्यत्र गोबलीवर्दन्यायाच्चर्मादिव्यतिरिक्तार्थपरः । कुप्यं तु हेमरूप्यव्यतिरिक्तत्रपुसीसादिकं विज्ञेयम् । तथाच हेमरूप्ये प्रस्तुत्यामरसिंहेनोक्तं—'ताभ्यां यदन्यत्तत्कुप्यम्' इति । एवं चर्मादिकमत्यन्तास्थया परीक्ष्यम् । परीक्ष्य क्रीतस्य दोषदर्शनेऽपि त्यागायोगात् । तथाच बृहस्पतिः—

परीक्षितं बहुमतं गृहीत्वा न पुनस्त्यजेत् ।

इति । बहुमतं क्रीतमिति शेषः । तथाच नारदः—

परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनः ॥

इति । दोषदर्शनेऽपीति शेषः । अस्यापवादमाह स एव—

त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्धान्यमेव तु ।
मुक्तावज्रप्रवाळानां सप्ताहं स्यात्परीक्षणम् ॥
द्विपदानामर्धमासं तु पुंसां तद्द्विगुणं स्त्रियाः ।
दशाहं सर्वबीजानामेकाहं लोहवाससाम् ॥
अतोऽर्वाक्पण्यदोषस्तु यदि सञ्जायते क्वचित् ।
विक्रेतुः प्रतिदेयं तत् क्रेता मूल्यमवाप्नुयात् ॥

इति । त्र्यहात् क्रयदिनमारभ्येति शेषः । एवं पञ्चाहादावपि शेषो द्रष्टव्यः । अत्र विक्रेतुः प्रातिदेयमित्यादिविधिदर्श-

नात्त्रयहाद्दोह्यामित्यादिपरीक्षणं क्रीतदोह्यादिद्रव्यविषयमिति गम्यते। द्विपदां पुंसां दासानामित्यर्थः। तद्द्विगुणं मासामिति यावत्। स्त्रियाः दासीजनस्येत्यर्थः। अतोऽर्वाक् त्रयहादेरभ्यन्तर इत्यर्थः। संजायत इत्यनेन ज्ञानतः सिद्धिरुक्ता न वस्तुनि निष्पत्तिः। परीक्षाया ज्ञानतः सिद्धिहेतुत्वादित्युक्तम्। ज्ञानतः सिद्ध्यसिद्धी च कात्यायनेन स्पष्टीकृते—

अविज्ञातं तु यत्क्रीतं दुष्टं पश्चाद्विभावितम्।
क्रीतं तत्स्वामिने देयं काले चेदन्यथा न तु॥

अविज्ञातं परीक्षाशैथिल्यात्तत्त्वतोपरिज्ञातम्। काले यस्य द्रव्यस्य यावान् परीक्षाकाल उक्तस्तस्मिन्नित्यर्थः। अन्यथा तत्कालात्यये दुष्टत्वेन विभावितमपि क्रीतं न तत् स्वामिने देयं, एवं निर्गुणत्वेन विभावितमपि क्रीतं तत् स्वामिने देयम्, दुष्टग्रहणस्यानुशयहेतुमत्परत्वात्। नारदस्तु क्रयानुशयानुत्पत्त्यर्थं क्रयात् प्राक् ज्ञातव्यमाह—

क्षयं वृद्धिं च जानीयात्पण्यानामागमं तथा।

इति। अश्वादिपण्यानामत ऊर्ध्वमपचयो वृद्धिर्वा भविष्यतीति देशकालादिवशाज्जानीयात्। कुलीनत्वादिज्ञानार्थं उत्पादकं जन्मभूम्यादिकं च जानीयादित्यर्थः। यस्तु न जनाति तं प्रत्याह याज्ञवल्क्यः—

क्षयं वृद्धिं च वणिजा पण्यानामविजानता।
क्रीत्वा नानुशयः कार्यः कुर्वन् षड्भागदण्डभाक्॥

अनुशयः पश्चात्तापः । स चापचयादिकमविजानता वणिजा क्रीत्वा वृथा न कार्यः दौर्मत्यापत्तेः ।

क्रीत्वा नानुशयं कुर्यात् वणिक्पण्यविचक्षणः ।

इत्युक्तनिषेधातिक्रमापत्तेश्च । अत एवानुशयं कुर्वन्नसौ मूल्य-षड्भागदण्डभाक् भवतीत्यन्त्यपादेन दण्डाभिधानमुपपन्नम् । ननु विजानताऽप्यनुशयो न कार्यः निषेधसद्भावात्, सत्यं, किन्त्वपवादबलात् क्रियते, स चापवादोऽनुशयात्तस्य प्रतिदानस्य प्रतिपादानं कुर्वता नारदेनार्थाद्दर्शितः—

क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयं तत् तस्मिन्नेवाहृचविक्षतम् ॥
द्वितीयेऽह्नि ददत्क्रेता मूल्यात्त्रिंशांशमावहेत् ।
द्विगुणं तत्तृतीयेऽह्नि परतः क्रेतुरेव तत् ॥

इति । यो दुष्क्रीतं जातमिति क्षयादिकं जानन् दृढं मन्यते तेन दुष्क्रीतं प्रतिदेयमिति सम्बन्धः । अविक्षतं अविकृतम् । विकृतं चेद्वैकृत्यसमाधानार्थं मध्यस्थजनकल्पितद्रव्यसहितमेव क्रयदिनेऽपि प्रतिदेयम् । द्विगुणं पञ्चदशांशम् । परतः तृतीयस्याह्नः परतः । क्रेतुरेव तत् क्रीत्वाऽनुशयं क्षयादिकं जानन्नपि न कुर्यादित्यर्थः । अपशकुनतोऽनुशये कृतेऽपि यदि क्रेता शकुनाभिज्ञः तदा याज्ञवल्क्येनोक्तं द्रष्टव्यम् । यदा तु शकुनानभिज्ञस्तदा नारदोक्तं कार्यं, न्यायसाम्यात्, दुष्क्रीतं मन्यत इति सामान्येनोक्तेश्च । अपशकुनतोपि क्रेता दुष्क्रीतं

मन्यत एव। यत्र तु बहुदोषत्वेन ज्ञात्वाऽपि पण्यं स्वल्प मूल्येन क्रीणाति न तत्र दुष्क्रीतं मन्यत इति न क्रयः परावर्तते। तदेतदुदाहरणमुखेनाह स एव—

परिभुक्तं तु यद्वासः क्लिष्टरूपं मलीमसम्।
सदोषमपि तत्क्रीतं विक्रेतुर्न भवेत्पुनः॥

परावर्त्यसमयमङ्गीकृत्य क्रीतं यदि सदोषं भवति तदपि विक्रेतुर्न भवति दुष्क्रीतत्वेऽपि समयस्य बलीयस्त्वात्। एवमुक्तविशेषशास्त्राविषयक्रीत्वाऽनुशये क्रयपरावृत्तिप्रकारोपि विक्रयानुशयप्रसङ्गतः पूर्वास्मिन् पदेऽस्माभिर्दर्शितः स इहाप्यनुसंधेयः। मनुस्तु क्रीत्वाऽनुशयानुत्पत्त्यर्थं कतिपयपण्यानां विक्रयानर्हत्वमाह—

नान्यदन्येन संसृष्टरूपं विक्रयमर्हति।
न सावद्यं न च न्यूनं न दूरे न तिरोहितम्॥

दूरे स्थितमिति शेषः॥

इति स्मृतिचन्द्रिकायां क्रीत्वाऽनुशयाख्यस्य
पदस्य विधिवितानः.

अथ समयानपाकर्माख्यस्य पदस्य विधिरुच्यते.

तत्र तदुपयोगिनमर्थं तावदाह बृहस्पतिः—

वेदविद्याविदो विप्रान् श्रोत्रियानग्निहोत्रिणः।
आहूत्य स्थापयेत्तत्र तेषां वृत्तिं प्रकल्पयेत्॥

तत्र राजधान्याम्, आर्यनिवासार्हतया कृते स्थान इत्यर्थः। तथाच याज्ञवल्क्यः—

राजा कृत्वा पुरे स्थानं ब्राह्मणान् न्यस्य तत्र तु।

इति। तेषां वृत्तिं प्रकल्पयेत् इत्येतस्यार्थस्त्वेनैव विवृतः—

अनाच्छेद्यकरास्तेभ्यः प्रदद्यात् गृहभूमयः।
मुक्तभाव्याश्च नृपतिः लेखयित्वा स्वशासने॥

अनाच्छेद्यकरा अग्राह्यकराः। अग्राह्यराजभागधेयका इति यावत्। एतदुक्तं भवति—आगामिनृपतिभिरग्राह्यकराः स्वेन विसृष्टकराश्च गृहभूमीः प्रदद्यादिति। स्वशासनलेखनप्रकारो लेख्यप्रकरणोक्तोऽनुसंधेयः। एवं प्रकल्पितवृत्तिशालीनमार्यबृन्दं स्वधर्मानुष्ठाननिष्ठं कर्तुं राजा प्रार्थयेत्। तथाच याज्ञवल्क्यः—

त्रैविद्यं वृत्तिमद्ब्रूयात् स्वधर्मः पाल्यतामिति।

पौरत्रैवर्णिककृत्येष्वेतैरार्त्विज्यादिकमपि कार्यम्। तथाच बृहस्पतिः—

नित्यं नैमित्तिकं कार्यं शान्तिकं पौष्टिकं तथा।
पौराणां कर्म कुर्युस्ते संदिग्धे निर्णयं तथा॥

एवं समुदायविशेषस्य कार्यविशेष उक्तः। सर्वसमुदायानां च कार्यमाह स एव—

ग्रामश्रेणीगणानां च सङ्केतस्समयक्रिया।
बाधकाले तु सा कार्या धर्मकार्ये तथैव च॥

गणानां चेत्यत्र चशब्दः पाषण्डनैगमादीनां समुच्चयार्थः। एवंचायमर्थः—ग्रामश्रेणीगणपाषण्डनैगमादीनां क्षुद्रोपद्रवकाले जीर्णोद्धारादिधर्मके यें च यां पारिभाषिकीं समयक्रियां विनोपद्रवो दुष्परिहरः धर्मकार्ये च दुस्साधं, सा पारिभाषिकी समयाक्रिया येनयेनोपाधिना नराः ग्रामादिशब्दाभिलप्यजास्या कृताः तत्तदुपाध्युपहितैर्नरैर्बहुभिर्मिळितैः कार्येति। तथा चोक्तं तेनैव—

चाटचोरभये बाधा सर्वसाधारणी स्मृता।
तत्रोपशमनं कार्यं सर्वैर्नैकेन केनचित् ॥

चाटो वृकः। उपशमनं उपशमनादानं, समय इति यावत्। समयस्वरूपनिरूपणार्थं द्वित्रास्समयाः प्रदर्श्यन्ते—अवर्षणोपद्रवे प्रतिक्षेत्रं प्रतिगृहं वा एतावद्धनं ग्रहयज्ञादिशान्तिकसिद्धये देयमित्येकस्समयः, तथा चोरोपद्रवे प्रतिगृहमेकैको दक्षश्शस्त्रपाणिरेकत्रागन्तव्य इति, तथा राजोपद्रवे राजदर्शनार्थं प्रतिग्रहमेकैकः श्रेष्ठ आगन्तव्य इति। धर्मकार्ये तु समयस्तेनैव निरूपितः—

सभाप्रपादेवगृहतटाकारामसंस्कृतिः।
तथाऽनाथदरिद्राणां संस्कारो यजनाक्रिया ॥
कुलायनं निरोधश्च कार्यमस्माभिरंशतः।
यत्रैतल्लेखितं पत्रे धर्म्या सा समयाक्रिया ॥
पालनीया समस्तैस्तु..... ॥

इति। सभा जनाश्रयो मण्टपः। प्रपा पानीयशालिका। आरामः उपवनम्। संस्कृतिः जीर्णोद्धारः। संस्कार उपनयनादिकः, प्रेतदहनादिश्च। यजनक्रिया सोमयागादिकर्त्रे दानम्। कुलायनं दुर्भिक्षादिपीडाहतयूथागमनम्। तस्मिन् सति यत्संविधानं विधेयं तदेव तच्छब्देनोक्तम्। निरोधः निरोधनं, दुर्भिक्षाद्यपगमपर्यन्तं कुलायनधारणमिति यावत्। अस्माभिः ग्रामादिशब्दप्रवृत्तिनिमित्तभूतोपाधिशालिभिः। अंशतः गृहक्षेत्रपुरुषादिप्रयुक्तया सङ्गृहीतधनेन, मध्यकत्वेन स्थितेन धनेन वा। समस्तैः समुदायिभिरिति शेषः। एवं कृता समयक्रिया सम्प्रदायप्राप्ता च न केवलं समुदायिभिः पालनीया, किंतु राज्ञाऽपि। तथाच नारदः—

पाषण्डनैगमश्रेणीपूगव्रातगणादिषु।
संरक्षेत्समयं राजा दुर्गे जनपदे तथा॥

पाषण्डाः वेदोक्तलिङ्गधारिव्यतिरिक्ताः सर्वे लिङ्गिनः। तेषु मठादिहिताचरणाद्याः समयास्सन्ति। नैगमाः सार्थकवणिक्प्रभृतयः, तेषु सकञ्चुकसंदेशहरपुरुषातिरस्कारिणो दण्ड्या इत्येवमादयो बहवस्समया विद्यन्ते। श्रेणयः एकशिल्पोपजीविनः कुविन्दादयः, तास्विदमनयैव श्रेण्या विक्रेयमित्यादिकाः समयास्सन्ति। पूगाः हस्त्यश्वारोहकादयः। व्रातगणशब्दौ कात्यायनेन व्याख्यातौ—

नानायुधधराः व्रातास्समवेतास्तु कीर्तिताः ।
कुलानां हि समूहस्तु गणस्स परिकीर्तितः ॥

इति । तत्र पूगे व्राते चान्योन्यमुत्सृज्य समरे न गन्तव्यामित्यादयस्सन्ति समयाः । गणे तु पञ्चमेऽब्दे पञ्चमे वाऽब्दे कर्णवेधः कर्तव्य इत्येवमादिरस्ति समयः । गणादिष्वित्यत्रादिशब्देन ब्रह्मपुरी महाजनपरिगृहीता, तत्र गुरुदक्षिणार्थमागतो माननीय इत्यादिः समयोस्ति । दुर्गे तु धान्यादिकं गृहीत्वाऽन्यत्र यास्यतो न तद्विक्रेयामित्यादिरस्ति समयः । जनपदे तु क्वचिद्विक्रेतृहस्ते दशबन्धग्रहणं ग्राह्यम् । क्वचित् क्रेतृहस्त इत्यादिकोस्त्यनेकविधस्समयः । जनपदे तथेत्यत्र तथाशब्दोऽनुक्तग्रामघोषपुरादीनां प्रदर्शनार्थः । तत्र न गोप्रचारस्थाने स्थातव्यमित्यादिकोस्ति ग्रामे समयः । आभीरस्त्रीपुरुषव्याभिचारे न दण्ड इत्यादिकोस्ति घोषे समयः । पुरे तु विनैवार्थार्पणमाढ्यादीन्यथाशक्ति परिपालयद्भिः बन्दिग्राहकादयो निहन्तव्या इत्यादयस्समयास्सन्ति । तदेतत्समयजातं यथा स्वयं न भ्रश्यति न व्यतिवर्तते तथा राजा कुर्यादित्यर्थः । समुदायपुरुषानधिकृत्य बृहस्पतिः—

कोशेन लेख्यक्रियया मध्यस्थैर्वा परस्परम् ।
विश्वासं प्रथमं कृत्वा कुर्युः कार्याण्यनन्तरम् ॥

लेख्यक्रियया समयपत्रेण । मध्यस्थैः प्रतिभूभिरित्यर्थः । कार्याणि समूहकार्याणि । कात्यायनोपि—

समूहिनां तु यो धर्मस्तेन धर्मेण ते सदा ।
प्रकुर्युस्सर्वकर्माणि स्वधर्मेषु व्यवस्थिताः ॥

सामयिकनिजधर्मानतिक्रमेण समूहिकार्याणि समुदायिनः कुर्युरित्यर्थः । याज्ञवल्क्योपि—

निजधर्माविरोधेन यस्तु सामयिको भवेत् ।
सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः ॥

निजधर्मो वर्णाश्रमादिधर्मः । सामयिकः समयनिर्वर्त्यो धर्मः । यः पुनः निजधर्मविरोधी सामयिको धर्मः यथा— सन्ध्यावन्दनवेळायां सर्वैरेव स्वस्वव्यापारपरिहारेण राजभवनं प्रत्यागन्तव्यं, यो न गच्छति तस्य प्रथमसाहसो दण्ड इति । नासौ रक्ष्य इति अर्थात् गम्यते । अस्मदरातिमण्डलमश्वादयः प्रस्थापनीयाः, इत्यादिको यो निजधर्माविरोधेन राजाज्ञया कृतो धर्मस्सोपि समूहेनानुसरणीय इत्यन्त्यपादस्यार्थः । कात्यायनोपि—

अविरोधेन धर्मस्य निर्गतं राजशासनम् ।
तस्यैवाचरणं पूर्वं कर्तव्यं तु नृपाज्ञया ॥

धर्मस्य श्रौतस्मार्तादिधर्ममार्गस्य । निर्गतं निष्ठितमित्यर्थः । राजशासनं राज्ञाऽनुशिष्टो धर्मः । तस्यैव श्रौतस्मार्तमार्गाविरोधेन विहितस्यैव । यः पुनः श्रौतस्मार्तमार्गविरोधेन राजाज्ञानिर्मितो धर्मः यथा—अस्माभिर्दत्तस्य गृहक्षेत्रादेराधिविक्रयदानादिकं न कार्यमिति, तस्याचरणं न कर्तव्यमित्येवका-

रात् गम्यते। कथमत्र श्रौतस्मार्तमार्गविरोधः उच्यते—द्रव्यार्जनविधिनाऽऽर्जितस्य द्रव्यस्य यथेष्टं विनियोगः कार्य-इत्ययमपि श्रौतस्मार्तमार्ग एव, तद्विरोधस्तत्रास्त्येवेत्यलं प्रत्युदाहणसमर्थननिर्बन्धेन। यत्पुनस्तेनैवोक्तं—

राजप्रवर्तितान् धर्मान् यो नरो नानुपालयेत् ॥
गर्ह्यस्स पापो दण्ड्यश्च लोपयन्राजशासनम् ॥

इति, तत् श्रौतस्मार्तमार्गाविरुद्धराजप्रवर्तितधर्मविषयमिति मन्तव्यम्। समुदायिभिर्विचित्रमतिभिरपरिमितैश्च सम्यगसम्यक्त्वं ऐकमत्येन कार्यस्य निश्चेतुमशक्यमिति मत्वा द्वित्राः पञ्च वा कार्यचिन्तकाः कार्या इत्याह बृहस्पतिः—

द्वौ त्रयः पञ्च वा कार्यास्समूहहितवादिनः।
कर्तव्यं वचनं तेषां ग्रामश्रेणीगणादिभिः ॥

इति। कार्यचिन्तकेषु हेयाः उपादेयाश्च तेनैव दर्शिताः—

विद्वेषिणो व्यसनिनः शालीनालसभीरवः।
लुब्धातिवृद्धबालाश्च न कार्याः कार्यचिन्तकाः ॥
शुचयो वेदधर्मज्ञाः दक्षाश्शान्ताः कुलोद्भवाः।
सर्वकार्यप्रवीणाश्च कर्तव्याश्च महत्तमाः ॥

इति। शालीनाः लज्जाशीलाः। कार्यचिन्तकाः समूहकार्य-साधकबाधकविचारकाः। याज्ञवल्क्यस्त्वकार्यचिन्तकानामपि समूहहितवादिनां वचनं सर्वैस्समूहिभिः कार्यमित्याह—

कर्तव्यं वचनं सर्वैस्समूहहितवादिनाम्।

इति। यस्तु हितवादिनां प्रतिकूलस्स्यात् स समूहेन प्रथम-साहसं दण्ड्य इत्याह स एव—

यस्तत्र विपरीतस्स्यात् स दाप्यः प्रथमं दमम् ॥

इति। कात्यायनोपि—

युक्तियुक्तं च यो हन्याद्वक्तुर्योऽनवकाशदः।
अयुक्तं चैव यो ब्रूते स दाप्यः पूर्वसाहसम् ॥

बृहस्पतिः—

यस्तु साधारणं हिंस्यात् क्षिपेत्त्वैविद्यमेव वा।
सन्धिक्रियां विहन्याच्च स निर्वास्यस्ततः पुरात् ॥

साधारणं दण्डादिद्रव्यं दण्ड्यादेस्साहाय्यकरणादिना नाशयेदित्यर्थः। क्षिपेत् आक्षिपेत्। ततःपुरात् समुदायस्थानात्। अत्रैविद्याक्षेपे तु वाक्पारुष्यपदे दण्डो वक्ष्यते। समुदायिमात्रस्य मर्मोद्घाटकादौ निर्वासनमेव दण्डः। तथाच स एव—

अरुन्तुदस्सूचकश्च भेदकृत् साहसी तथा।
श्रेणिपूगनृपाद्विष्टः क्षिप्रं निर्वास्यते ततः ॥

अरुन्तुदो मर्मोद्घाटकः। सूचकः पिशुनः। भेदकृत् समूहिषु विमतिकृत्। ततः समूहस्थानात्। निर्वास्यते समूहेनेति शेषः। न च वाच्यं समूहस्य दण्डनेऽनधिकारात् समूहेनेति शेष इत्येतदयुक्तमिति। यत आह स एव—

कुलश्रेणीगणाध्यक्षाः पुरदुर्गनिवासिनः।
वाग्विग्दमं परित्यागं प्रकुर्युः पापकर्मणाम् ॥

तैः कृतं यच्च धर्मेण निग्रहानुग्रहं नृणाम् ।
तद्राज्ञाऽप्यनुमन्तव्यं निसृष्टार्था हि ते स्मृताः ॥

इति । वाग्दमः पापिष्ठोसीत्यादिभर्त्सनम् । धिग्दमो धिगिति कुत्सनम् । परित्यागः अङ्ककरणं निर्वासनं वा । एतत् अर्थदण्डादेरप्युलक्षणार्थं, निग्रहानुग्रहमिति सामान्यतः पुनर भिधानात् । निसृष्टार्थाः अनुज्ञातकार्याः । अधर्मेण तैः कृतेऽप्याह स एव—

बाधां कुर्युर्यदेकस्य सम्भूता द्वेषसंयुताः ।
राज्ञा ज्ञात्वा निवार्यास्तु शास्याश्चैवानुबन्धतः ॥

इति । अनुबन्धतः निबन्धानुसारेण शास्या दण्ड्या इत्यर्थः । नारदोपि दण्ड्यानाह—

पृथग्गणांस्तु ये भिन्द्युः ते विनेया विशेषतः ।
आवहेयुर्भयं घोरं व्याधिवत्ते ह्युपेक्षिताः ॥

गणग्रहणमत्र समूहमात्रपरं, न पुनः कुलसमूहरूपविशेषपरम् । तेन पाषण्डादावपि भेदका ये ते राज्ञा विशेषतो विनेयाः । विशेषग्रहणाच्छारीरेणापि दण्डेन विनेयाः । पाषण्ड्यादिसर्व-समूहिषु राज्ञा यथा वर्तितव्यं तथाऽप्याह स एव—

यो धर्मः कर्म यच्चैषां उपस्थानविधिश्च यः ।
यच्चैषां प्रत्युपादानमनुमन्येत तत्तथा ॥

धर्मो जटाधारित्वादिकः । कर्म व्रतं पर्युषिताभिक्षाटनादिकम् । उपस्थानविधिः समुदायिकार्यार्थं पटहादिध्वनिमाकर्ण्य मण्टपादौ

मेळनम्। प्रत्युपादानं जीवनाय तापसवेषादिपरिग्रहः। एषां पाषण्डादीनामित्यर्थः। अन्यदपि राजकृत्यमाह स एव—

प्रतिकूलं च यद्राज्ञः प्रकृत्याऽवमतं च यत्।
बाधनं च यदर्थानां तत्तेभ्यो विनिवर्तयेत्॥

प्रतिकूलं यथा—

यस्य राज्ञस्तु कुरुते शूद्रो धर्मविवेचनम्।
तस्य प्रक्षुभ्यते राष्ट्रं बलं कोशश्च नश्यति॥

इति। एवञ्च सार्थकादिशूद्रकर्तृकं त्रैवर्णिकपौरादीनां विवादे धर्मविवेचनादिकं 'प्रतिकूलं च यद्राज्ञः' इत्यस्योदाहरणमिति मन्तव्यम्। प्रकृत्या स्वभावत एवावमतं अवज्ञातं, तद्यथा—पाषण्डादिषु ताम्बूलभक्षणादिकम्। यच्चार्थानां बाधनं रसवादादिकं तत्तेभ्यस्सकाशाद्राजा विनिवर्तयेत्। अन्यान्यपि निवर्तनीयान्याह स एव—

मिथस्सङ्घातकरणमहिते शस्त्रधारणम्।
परस्परोपतापं च तेषां राजा निवर्तयेत्॥

मिथस्सङ्घातकरणं उपस्थानविधेः पूर्वं पृथक्पृथगवान्तरस्तोमकरणम्। अहिते कुलजादौ। परस्परोपतापो राजकीयाश्रयेण अन्योन्यमर्थाहरणादिकम्। अन्यदपि निवर्त्यमाह स एव—

दोषवत्कारणं यत्स्यादधुना च प्रकल्पितम्।
प्रवृत्तमपि तद्राजा श्रेयस्कामो निवर्तयेत्॥

लोभादिदोषवत्कारणकं श्रुतिस्मृतिविरुद्धं विधवादौ वेश्यात्वादिकं पाषण्डादिभिः प्रकल्पितं बहुकालं प्रवृत्तमपि राजा निवर्तयेदित्यर्थः। समूहिषु यत्समूहेन कर्तुमशक्यं मुख्यानामौद्धत्यनिवारणादिकं तदपि राजा कुर्यात्। तथाच बृहस्पतिः—

मुख्यैस्सह समूहानां विसंवादो यदा भवेत्।
तदा विचारयेद्राजा स्वमार्गे स्थापयेच्च तान्॥

यस्तु मुख्यस्स्वमार्गे राज्ञाऽपि स्थापयितुमशक्यस्तत्रोक्तं याज्ञवल्क्येन—

गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः।
सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत्॥

राजेति शेषः। एवंविधदण्डप्रयोगे तस्यैव सामर्थ्यात्। यदा समूहस्यापि कथञ्चित् सामर्थ्यमस्ति तदा प्रकृतत्वात् गणस्यैव दण्डप्रयोगकर्तृत्वमवगन्तव्यम्। कात्यायनेनाप्युक्तं—

साहसी भेदकारी च गणद्रव्यविनाशकः।
उच्छेद्यास्सर्व एवैते विख्याप्यैवं नृपैर्भृगुः॥

केचिन्नृपे भृगुरिति पठन्ति, तदा अयमर्थः—साहसिकत्वादिकं नृपे विख्याप्य गणेनोच्छेद्या इति। यस्तु मुख्यः शपथेन स्वमार्गे स्थापयितुमशक्यस्तत्रोक्तं मनुना—

यो ग्रामदेशसङ्घेषु कृत्वा सत्येन संविदम्।
विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत्॥

निगृह्य दापयेदेनं समयव्याभिचारिणम् ।
चतुस्सुवर्णं षाण्णिष्कं शतमानं च राजतम् ॥
एवं दण्डाविधिं कुर्याद्धार्मिकः पृथिवीपतिः ।
ग्रामजातिसमूहेषु समयव्याभिचारिणाम् ॥

इति । सत्येन शपथेनेत्यर्थः । सुवर्णनिष्कशतमानशब्दाः प्राग्दिव्यप्रकरणे व्याख्याताः । तत्र त्रयोऽर्थदण्डाः दण्ड्यानामर्थसत्त्वानुसारेण व्यवस्थापनीयाः । निर्वासनं तु निर्बन्धविषये व्यवस्थापनीयम् । धार्मिकग्रहणादधार्मिकस्य दण्डविधावौदासीन्यमप्यस्तीत्यवगम्यते । यदा च धार्मिको राजा दण्डविधावुदासीनस्तदा ग्रामादय एव दण्डविधिं कुर्युः । 'निसृष्टार्था हि ते स्मृताः' इत्युक्तत्वात् । अमुख्यानां तु समयव्याभिचारिणामौद्धत्यानुसारेण दण्डः कल्पनीयः । तेषामपि सामर्थ्यतो मुख्यतुल्यत्वे जाते बृहस्पतिनोक्तं—

..... यस्समर्थो विसंवदेत् ।
सर्वस्वहरणं दण्डस्तस्य निर्वासनं पुरात् ॥

इति । समर्थः समयं पालयितुं समर्थो मुख्यतुल्य इति यावत् । विसंवदेत् समयं लङ्घयेत् । अपरानपि दण्ड्यानाह स एव—

सम्भूयैकमतिं कृत्वा राजभाव्यं हरन्ति ये ॥
ते तदष्टगुणं दाप्याः वाणिजश्च पलायिनः ।

'राजभाव्यं हरन्ति ये' इति चतुर्थपादेऽनुषञ्जनीयः । समू-

हपूजार्थं यद्राज्ञा समूहकार्यार्थमागताय दत्तं तद्यदि समूहपार्श्वमागत्यासौ समूहाय स्वयं न ददाति, तदा राज्ञा दत्तमेकादशगुणं दाप्यः। तथाच याज्ञवल्क्यः—

समूहकार्य आयातान् कृतकार्यान्विसर्जयेत्।
सदानमानसत्कारैः पूजयित्वा महीपतिः॥
समूहकार्यप्रहितो यल्लभेत तदर्पयेत्।
एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयम्॥

इति। यल्लभेत समूहमान्यत्वनिमित्तेनेति शेषः, स्वकीयसेवाध्ययनादिनिमित्तेन तु लब्धस्य प्रातिस्विकत्वेन समुदायेऽर्पणविध्ययोगात्। समूहकार्यप्रहितेनार्पितं च सर्वे समूहिनः समं विभागेन विभज्य गृह्णीयुः।

ततो लभ्येत यात्किञ्चित् सर्वेषामेव तत्समम्।

इति बृहस्पतिस्मरणात्। एवं विभज्य ग्रहणमतुच्छद्रव्यविषयं, तुच्छद्रव्यं तु लब्धं निस्स्वादिभ्यस्समूहेन देयम्। यदाह स एव—

षाण्मासिकं मासिकं वा विभक्तव्यं यथांऽशतः।
देयं वा निस्स्ववृद्धार्तस्त्रीबालातुररोगिषु॥
सान्तानिकादिषु तथा धर्म एष सनातनः।

इति। एकस्य पुरुषस्य षण्मासानिर्वाहायापर्याप्तं कुटुम्बस्य वैकमासानिर्वाहायापर्याप्तं लब्धं चेन्निस्स्वादिभ्यो देयमिति तात्पर्यार्थः। यत्पुनस्तेनैवोक्तं—

यत्तैः प्राप्तं रक्षितं वा गणार्थे वा ऋणं कृतम् ।
राजप्रसादलब्धं वा सर्वेषामेव तत्समम् ॥

इति, तस्यायमर्थः—तैः समूहकार्यार्थप्रहितैर्यत्सीमाविवादादावधिकं क्षेत्रारामादिकं धर्माधिकरणे न्यायतः प्राप्तं परैरपह्रियमाणं वा रक्षितं, तथा समूहप्रयोजनार्थमुपात्तमृणं समूहकृतानुकूल्यादिजनितराजप्रसादलब्धं वा यत् तदेतत्सर्वं सर्वेषां समूहिनां समं ज्ञेयमिति । गणार्थे कृतमृणं सर्वेषां समामिसस्य क्वचिदपवादमाह कात्यायनः—

गणमुद्दिश्य यत्किञ्चित् कृत्वर्णं भक्षितं भवेत् ।
आत्मार्थं विनियुक्तं वा देयं तैरेव तद्भवेत् ॥

तैरेव समूहकार्यप्रहितैरेव प्रतिदेयं तदृणं भवतीत्यर्थः । परिभाषितपाथेयानर्पणेऽपि तैः कृतमृणं गणेन न देयं, एवकारकरणात् । किंतु पाथेयमेव देयम् । ये पुनस्समुदायं प्रसाद्य तदन्तर्भावमापन्नाः, ये च समुदायक्षोभादिना ततो बहिर्भूताः तान् प्रत्याह स एव—

गणिनां शिल्पिवर्गाणां गतास्स्युर्ये तु मध्यताम् ।
प्राक्तनस्य धनर्णस्य समांशास्सर्व एव ते ॥
तथैव भोज्यवैभाव्यदानधर्मक्रियासु च ।
समूहस्थोंशभागी स्यात् प्रगतस्त्वंशभाङ्न तु ॥ इति ॥

इति स्मृतिचन्द्रिकायां समयानपाकर्माख्यस्य
पदस्य विधिवितानः.

अथ क्षेत्रजविवादाख्यस्य पदस्य विधिरुच्यते.

तत्र बृहस्पतिः—

निवेशकाले कर्तव्यः सीमाबन्धविनिश्चयः ।
प्रकाशोपांशुचिह्नैश्च लक्षितस्संशयापहः ॥

निवेशकालः ग्रामादिप्रवेशकालः । सीमाया बन्धो निबन्धो नियामक इति यावत् । विनिश्चीयते सीमाबन्धो येन स विनिश्चयः पाषाणादिमयस्स्थूलगुडकः । सीमाबन्धश्चासौ विनिश्चयश्चेति सीमाबन्धविनिश्चयः, सीमानियामकस्थूलगुडक इत्यर्थः । एतदुक्तं भवति—ग्रामादिप्रवेशकाले तत्सीमानियामकः स्थूलगुडकः प्रकाशगुप्तलिङ्गोपेतः सीमासन्धौ स्थापनीय इति । प्रकाशगुप्तलिङ्गान्यपि तेनैव दर्शितानि—

वापीकूपतटाकानि चैत्याराममुरालयाः ।
स्थलनिम्ननदीस्रोतश्शरगुल्मनगादयः ॥
प्रकाशचिह्नान्येतानि सीमायां कारयेत्सदा ।
करीषास्थितुषाङ्गारशर्कराश्मकपालिकाः ॥
सिकतेष्टकगोवालकार्पासास्थीनि भस्म च ।
प्रक्षिप्य कुम्भेष्वेतानि सीमान्तेषु निधापयेत् ॥

इति । वापी पुष्करिणी । चैत्यं इष्टकाद्यैर्विरचितं स्थण्डिलम् । स्थलं उन्नतो भूप्रदेशः । निम्नं परिघा । शराः तृणविशेषाः । गुल्माः कन्दशून्याः करवीरप्रकाराः । नगाः वृक्षाः । ते तु मनुना विशेषिताः—

सीमावृक्षांस्तु कुर्वीत न्यग्रोधाश्वत्थकिंशुकान् ।
शल्मलीन् सालतालांश्च क्षीरिणश्चैव पादपान् ॥

न्यग्रोधो वटः । किंशुकः पलाशः । नगादय इत्यत्रादिशब्देन वेणुवल्लीवल्मीकवर्त्मपुरातनसेत्वादीनां स्मृत्यन्तरोक्तानां ग्रहणम् । करीषं शुष्कगोमयम् । अस्थीनि पश्वादीनाम् । तुषाः व्रीह्यादित्वचः । अङ्गारा दग्धकाष्ठावयवाः शान्ताग्नयः । शर्कराः पाषाणवत् कठिना मृदः । कपालिकाः पक्वघटावयवानामवयवाः । कार्पासास्थीनि कार्पासबीजानि । निधापयेत् गर्ताभ्यन्तरेषु कुम्भीः निधाय मृद्भिः प्रच्छादयेत् । तथाच मनुः—

उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत् ।
सीमाज्ञाने नृणां वीक्ष्य लोके नित्यं विपर्ययम् ॥

उपच्छन्नानि प्रच्छादितानि अन्यानि प्रकाशचिह्नेभ्योऽन्यानि तानि चाधस्तादेवोक्तानि । तत्र कार्पासास्थिवर्जानि सर्वाणि मानवेऽप्यनुकीर्तितानि । लिङ्गानामनुकीर्तनमुपलक्षणार्थमिति दर्शयितुं कार्पासास्थिकीर्तने मनोरनास्था । अत एव उपांशुलिङ्गान्यभिधायाभिहितं मनुना—

यानि चैवंप्रकाराणि कालात् भूमिर्न भक्षयेत् ।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत् ॥

तानि शुक्तिशङ्खगैरिकखदिरसारप्रभृतीनि । एवमुक्तलिङ्गानां मध्ये वृक्षालिङ्गान्विता सीमा ध्वजिनीत्युच्यते । जललिङ्गा-

न्विता मात्सिनी । तुषाङ्गारादिगुप्तलिङ्गान्विता नैधानीत्युच्यते।

तथाच व्यासः—

ग्रामयोरुभयोस्सीम्नि वृक्षा यत्र समुन्नताः ।
समुच्छ्रिता ध्वजाकारा ध्वजिनी सा प्रकीर्तिता ॥
स्वच्छन्दगा बहुजला मत्स्यकूर्मसमान्विता ।
नित्यप्रवाहिणी यत्र सीमा सा मात्सिनी मता ॥
तुषाङ्गारकपालैस्तु कुम्भैरायतनैस्तथा ।
सीमा प्रचिह्निता कार्या नैधानी सा निगद्यते ॥

इति । समुन्नताः कौटिल्यविकलाः । समुच्छ्रिताः उच्चाः । सीमालिङ्गानि यत्नसिद्धानि स्वतस्सिद्धानि वा प्रथमवयसां गळितवयस्कैर्ज्ञापनीयानि । तथाच बृहस्पतिः—

ततः पौगण्डबालानां प्रयत्नेन प्रदर्शयेत् ।
वार्धक्ये च शिशूनां ते दर्शयेयुस्तथैव च ॥
एवं परम्पराज्ञाने सीमाभ्रान्तिर्न जायते ॥

इति । पौगण्डबालाः किञ्चित्प्रबुद्धबालाः । तेऽपि च पौगण्डबालाः कालेन वार्धक्यमापन्नाः शिशूनां किञ्चित्प्रबुद्धानां स्वज्ञातिज्ञापितानि सीमालिङ्गानि प्रयत्नेन दर्शयेयुः । एवमविच्छिन्ना ज्ञातृपरम्परा बहुतरकालात्ययेऽपि सीमाभ्रान्त्यनुत्पत्त्यर्थं कार्येत्यर्थः ॥

इति स्मृतिचन्द्रिकायां सीमालिङ्गनिरूपणम्.

अथ सीमाविवादनिर्णयः.

तत्र मनुः—

एतैर्लिङ्गैर्नयेत्सीमां राजा विवदमानयोः ॥

इति। एतैः प्राङ्न्यरूपितैः सीमालिङ्गैरर्थिप्रदर्शितैः सीमां नयेत् निर्णयेदित्यर्थः। अथार्थिन्यविश्वासः तदा साक्षिप्रत्ययादेव निर्णयेत्। तदाह स एव—

यदि संशय एव स्याल्लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिश्चये ॥

लिङ्गविषयकस्सीमाविषयको वा साक्षिप्रत्ययस्सीमाविवादनिश्चयहेतुस्स्यादित्यर्थः। तत्र लिङ्गविषयकप्रत्ययशालिनां साक्षिणां साक्षिप्रकरणोक्तलक्षणमेवानुसंधेयम्। सीमाविषयकप्रत्ययशालिनां तु साक्षिणां लक्षणाधिक्यमिह बृहस्पतिना दर्शितं—

आगमं च प्रमाणं च भोगं कालं च नाम च।
भूभागलक्षणं चैव ये विदुस्तेऽत्र साक्षिणः ॥

आगमः स्वत्वापादकः क्रयादिः। प्रमाणं दण्डादिना परिकल्पितं परिमाणम्। यदा तूक्तविधसाक्ष्यभावः तदा सामन्तप्रदर्शितैर्लिङ्गैर्निर्णयेत्। एतदपि वचोभङ्ग्याऽऽह मनुः—

साक्ष्यभावे तु चत्वारो ग्रामसीमान्तवासिनः।
सीमाविनिर्णयं कुर्युः प्रयता राजसंनिधौ ॥

कात्यायनोपि—'तेषामभावे सामन्ताः' इति। तेषां द्विविधसाक्षिणाम्। के पुनस्सामन्ता इत्यपेक्षिते स एवाह—'संस-

क्तकास्तु सामन्ताः' इति । विप्रतिपन्नसीमकस्य ग्रामादेश्च-तसृषु दिक्ष्वनन्तरग्रामादिभोक्तारः संसक्तकाः, त एव सामन्ता ज्ञेया इत्यर्थः । एवमुक्तानां सामन्तानां यदा रागद्वेषादि-प्रकटदोषसद्भावस्तदाऽप्याह स एव—

स्वार्थसिद्धौ प्रदुष्टेषु सामन्तेष्वर्थगौरवात् ।
तत्संसक्तेषु कर्तव्यः उद्धारो नात्र संशयः ॥

तत्संसक्तेषु सामन्तसंसक्तेषु । उद्धारः सीमाया उद्धारः सी-मानिर्णय इति यावत् । एतदुक्तं भवति—चतसृषु दिक्षु स्थि-तसामन्तग्रामादिभ्योऽनन्तरत्वेन तत्तद्दिशि स्थितग्रामादिभो-क्तारः तत्संसक्ताः, तैः प्रदर्शितसीमालिङ्गैर्ग्रामादेस्सीमां निर्ण-येदिति । यदा तेषामपि प्रकटदोषसद्भावः तदाऽप्याह स एव—

संसक्तसक्तदोषे तु तत्संसक्ताः प्रकीर्तिताः ।

इति । तत्संसक्ताः संसक्तसक्तसंसक्ताः । एतदुक्तं भवति—चतसृषु दिक्षु स्थितसंसक्तसक्तग्रामादिभ्योऽनन्तरत्वेन तत्तद्दिशि स्थितग्रामादिभोक्तारः संसक्तसक्तसंसक्ताः, तैः प्रदर्शितसीमा-लिङ्गैः ग्रामादिसीमां निर्णयेदिति । यदा तु तेषामपि प्रकट-दोषसद्भावः तदाऽप्याह स एव—

त्यक्त्वा दुष्टांस्तु सामन्तानन्यान्मौलादिभिस्सह ।
संमन्त्र्य कारयेत् सीमामेवं धर्मविदो विदुः ॥

संसक्तसक्तसंसक्ता अपि सामन्तकोटिनिविष्टाः, तेन एतेषां सामन्तशब्देन निर्देशो नानुपपन्नः । ततश्चायमर्थः—दुष्टान् संसक्तसक्तसंसक्तान् त्यक्त्वा साक्षिसामन्ततत्कोटिभ्योऽन्यान् सीमालिङ्गाभिज्ञान्मौलवृद्धोद्धृतसहितान् सीमान्तप्रतिनिर्णायकान् कारयेदिति । के पुनस्साक्षिसामन्ततत्कोटिभ्योऽन्य इत्यपेक्षिते नारदः—

नगरग्रामगणिनो ये च वृद्धतमा नराः ।

इति । सीमालिङ्गज्ञा इति शेषः । मौलवृद्धोद्धृतास्तु कात्यायनेन दर्शिताः—

ये तत्र पूर्वसामन्ताः पश्चाद्देशान्तरं गताः ।
तन्मूलत्वात्तु ते मौला ऋषिभिस्सम्प्रकीर्तिताः ॥
निष्पाद्यमानं यैर्दृष्टं तत्कार्यं नृगुणान्वितैः ।
वृद्धा वा यदि वाऽवृद्धास्ते वृद्धाः परिकीर्तिताः ॥
उपश्रवणसम्भोगकार्याख्यानोपचिह्नितः ।
उद्धरन्ति ततो यस्मादुद्धृतास्ते ततः स्मृताः ॥

इति । नृगुणान्वितैः पुरुषगुणान्वितैः । वयोवृद्धत्वं न तन्त्रमिति विकल्पोक्त्या दर्शितम् । कार्यज्ञातृत्वं येषां पारम्पर्येण ते उद्धृता इति तृतीयश्लोकस्य तात्पर्यार्थः । एवंच प्रकटदोषेण संसक्तसक्तसंसक्तेषु दुष्टेषु पूर्वसामन्ताद्युपेतनागरग्राम्यजनश्रेणीवयोवृद्धदर्शितैः सीमालिङ्गैस्सीमानिर्णयः कार्य

इत्यवभोद्धव्यम्। गुप्तदोषेषु सामन्तेषु विशेषमाह स एव—

सामन्तास्साधनं पूर्वमनिष्टोक्तौ गुणान्विताः।
द्विगुणास्तूत्तरा ज्ञेयास्ततोऽन्ये त्रिगुणा मताः॥

अनिष्टोक्तौ प्रतिवादिना गुप्तदोषोद्भावने कृते इत्यर्थः। उत्तराः तत्संसक्तादयोऽन्तरङ्गास्सामन्तकोटयो द्विगुणा ज्ञेयाः। ततस्सामन्ततत्कोटिभ्योऽन्ये बहिरङ्गा नागरादयो मौलवृद्धोद्धृतसहितास्त्रिगुणा मताः। एवं तत्संसक्तकादिष्वपि गुप्तदोषोद्भावने सत्युत्तरेषां द्वैगुण्यादिकमूह्यम्। साक्षिप्रभृत्युद्धृतपर्यन्तानामभावे तु मनुराह—

सामन्तानामभावे तु मौलानां सीमसाक्षिणाम्।
इमानप्यनुयुञ्जीत पुरुषान्वनगोचरान्॥

सामन्तादीनामनुग्राहकमौलादीनां सीमासाक्षिणां चाभावे इमानसभ्यानपि वक्ष्यमाणान् पुरुषाननुयुञ्जीत सीमालिङ्गानि पृच्छेदित्यर्थः। तानेव दर्शयति—

व्याधान् शाकुनिकान् गोपान् कैवर्तान्मूलखानकान्।
व्याळग्राहानुञ्छवृत्तीनन्यांश्च वनगोचरान्॥

व्याधादीनां द्वितीयान्ततया निर्देशः पूर्वश्लोकस्थेनानुयुञ्जीतेतिपदेनान्वयार्थः। कैवर्ताः तटाकादिखननोपजीविनः। अन्यान् काष्ठादिवाहनवृत्तीन् वनगोचरान् काननोपजीविनः। नारदस्तु मौलादिसहितान्येषामभावे सीमान्तिकप्रदेशकर्षकाः

तेषामभावे वनगोचरा इति दर्शयितुं वनगोचरेभ्यः प्राक्सीमाकर्षकान् दर्शयति—

ग्रामसीमासु च बहिः ये स्युस्तत्कृषिजीविनः ।
गोपाश्शाकुनिका व्याधा ये चान्ये वनगोचराः ॥

इति । एवं सामन्ताद्युद्धृतपर्यन्तेष्वप्युत्कृष्टानामभावे निकृष्टानामनुयोजनमूह्यम् । अनुयोजनं सत्यानृतजन्यपुण्यपापप्रतिपादकमन्वादिवचनैर्यथार्थकथनपरान् कृत्वा प्रस्तुतार्थप्रश्नकरणम्। तानि च वचनानि साक्ष्यनुयोजनविधिप्रकरणोक्तान्यनुसन्धेयानि। साक्षिप्रश्नविधिप्रकरणोक्तशपथैः शापिता एव सामन्तादयो विनिर्णयं ब्रूयुः । तथाच बृहस्पतिः—

शपथैश्शापितास्स्वैरस्वैः ब्रूयुस्सीमाविनिर्णयम् ।
दर्शयेयुश्च लिङ्गानि तत्प्रमाणमिति स्थितम् ॥

शपथैस्स्वैः स्वैः—

सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः ।

इत्यादिनोक्तव्यवस्थानातिक्रमेणेत्यर्थः । मनुनाऽपि—

ग्रामेयककुलानां तु समक्षं सीमसाक्षिणः ।
प्रष्टव्यास्सीमलिङ्गानि तयोश्चैव विवादिनोः ॥

इत्युक्त्वोक्तं—

ते पृष्टास्तु यथा ब्रूयुः सीमासन्धिषु लक्षणम् ।
तत्तथा स्थापयेद्राजा धर्मेण ग्रामयोर्द्वयोः ॥

इति । ग्रामीणपुरुषसमूहस्य विवादिनोश्च समक्षं सीमालिङ्गानि तत्साक्षिप्रभृतयः प्रष्टव्या इति प्रथमश्लोकस्यार्थः । द्वितीयश्लोकार्थस्तु सुव्यक्तः । सीमाया एव ये साक्षिणस्ते सीमार्थमेव प्रष्टव्याः, पृष्टाश्च यथा सीमां ब्रूयुः तथा ज्ञापयेदित्यूह्यम् । यदा तु सीमालिङ्गसाक्षिणो लक्षणानि कथञ्चित् प्रदर्शयितुं न शक्नुवन्ति केवलं सीमां वदन्ति तदा तान् प्रत्याह स एव—

शिरोभिः स्वैः गृहीत्वोर्वीं स्रग्विणो रक्तवाससः ।
सुकृतैश्शापिताः स्वैः स्वैः नयेयुस्तान् समञ्जसम् ॥

यावन्तस्सीमालिङ्गसाक्षिणः ते सर्वे लोहितकुसुमस्रग्विणो लोहितवसनाः लोष्टं शिरासि धारयन्तः सीमानुयायिना चङ्क्रमेण सीमान्तं प्रदर्शयन्तस्तां सीमां समञ्जसं सम्यक् निर्णयेयुरित्यर्थः । याज्ञवल्क्यस्तु सामन्तादीन् प्रत्याह—

सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा ।
रक्तस्रग्वसनास्सीमां नयेयुः क्षितिधारिणः ॥

वाशब्दात्तत्संसक्तकादयोप्येवमेव लिङ्गप्रदर्शनासम्भवे सीमां नयेयुरिति गम्यते, लिङ्गप्रदर्शकेषु विकल्पार्थत्वात् । समग्रामाः समसङ्ख्याताः समुदायभावमापन्नाश्चत्वार इत्यादिविशेषोपादानमन्यसमसङ्ख्यानिरासार्थम् । समग्रामा इत्यत्र समग्रहणं विषमसङ्ख्यानिवृत्त्यर्थम् । तत्राप्यत्यर्थमेकसङ्ख्यानिवृत्त्यर्थमाह नारदः—

नैकस्समुन्नयेत्सीमां नरः प्रत्ययवानपि।
गुरुत्वादस्य कार्यस्य क्रियैषा बहुषु स्थिता ॥

अस्य प्रतिषेधस्य क्वचित्प्रतिप्रसवमाह बृहस्पतिः—

ज्ञातृचिह्नैर्विना साधुरेकोप्युभयसम्मतः ।
रक्तमाल्याम्बरधरो मृदमादाय मूर्धनि ॥
सप्तव्रतस्सोपवासस्सीमान्तं दर्शयेन्नरः ।

इति । ज्ञातृचिह्नैर्विना ज्ञातृणां चिह्नानां चाभाव इत्यर्थः । एतदुक्तं भवति—साक्ष्यादिवनगोचरान्तानां सीमाज्ञातृणां प्रप्रकाशोपांशुलिङ्गानामभावे यःकश्चिदुक्तविशेषणविशिष्टो नरः सीमावित्सीमान्तमुक्तविधिना चङ्क्रममाणो दर्शयेदिति । यद्यप्यत्र मन्वादिवचनाच्चङ्क्रमणानन्तरमेव निर्णयः सम्पद्यत इति प्रतिभाति, तथाऽपि चङ्क्रमणदिनमारभ्य सार्धमासान्ते निर्णयो न ततोऽर्वागित्यवगन्तव्यम् । यदाह कात्यायनः—

सीमाचङ्क्रमणे क्रोशे पादस्पर्शे तथैव च ।
त्रिपक्षपक्षसप्ताहं दैवराजकमिष्यते ॥

इति । यथासङ्ख्यमिति शेषः । यदाऽप्युक्तलक्षणस्य (नरस्या) प्रमाणस्याभावः तदाऽपि न दिव्येन निर्णयः,

वाक्पारुष्ये महीवादे दिव्यानि परिवर्जयेत् ।

इत्याद्यनेकवचनेन भूविवादे दिव्यनिषेधात् । सीमाविवादश्च भूविवाद एव । यदाह कात्यायनः—

आधिक्यं न्यूनता चांशे अस्तिनास्तित्वमेव च ।
अभोगभुक्तिस्सीमा च षट् भूवादस्य हेतवः ॥

इति । कथं तर्ह्यत्र निर्णय इत्यपेक्षिते नारदः—

यदा तु न स्युर्ज्ञातारः सीमाया न च लक्षणम् ।
तदा राजा द्वयोस्सीमामुन्नयेदिष्टतस्स्वयम् ॥

इष्टतः इच्छात इत्यर्थः । इष्टत इत्यस्य क्वचिदपवादमाह मनुः—

सीमायामविषह्यायां स्वयं राजैव धर्मवित् ।
प्रविशेद्भूमिमेकेषामुपकारादिति स्थितिः ॥

अविषह्या ज्ञातृज्ञापकशून्या । एतदुक्तं भवति—यत्र विवाद-विषयो भूरेकस्य निरवकाशस्य ग्रामक्षेत्रादेरत्यन्तोपकारिका अन्यस्य तु सावकाशस्य न तथा तत्र महोपकारार्थं निरव काशग्रामादिशेषतया तां भूमिं प्रवेशयेदिति । एवमुक्तविधिना सीमानिर्णयो नावेदनानन्तरमेव ऋणादिनिर्णयवत् कर्तुं सर्वदा सुकरः, प्रावृडादिकाले सस्यादिभिस्तिरोहितेषु सेत्वादिसी-मालिङ्गेषु दुष्करत्वात् । तेन यदा सेत्वादिसीमालिङ्गानां ति-रोधायकसस्याद्यभावः तदा निर्णयः कार्यः । तथाच मनुः—

सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः ।
ज्येष्ठमासि नयेत्सीमां सुप्रकाशेषु सेतुषु ॥

द्वयोर्ग्रामाधिपयोर्विवादे सीमां प्रति समुत्पन्ने ज्येष्ठमासि मा-सान्तरे वा सेतुप्रभृतिषु सीमालिङ्गेषु सुव्यक्तेषु विवादाध्यासितां

सीमां निर्णयेदित्यर्थः। ग्रामग्रहणं क्षेत्रादीनामुपलक्षणार्थम्। अत एव बृहस्पतिना—

ग्रामक्षेत्रगृहादीनां सीमावादं निबोधत।

इत्युपक्रान्तम्। गृहादीनामित्यादिशब्देन नगरदेशौ स्वीक्रियेते, तत्रापि सीमावादसद्भावात्। अत एव कात्यायनेन—

सामन्तभावे सामन्तैः कुर्यात् क्षेत्रादिनिर्णयम्।
ग्रामे सीमासु च तथा तद्वन्नगरदेशयोः॥

इत्युक्तम्। क्षेत्रादिनिर्णयं क्षेत्रगृहयोः सीमानिर्णयमित्यर्थः। न चैवं ग्रामक्षेत्रगृहादिष्वन्योन्यसामन्तैरन्योन्यनिर्णयः कार्यः, ग्रामसामन्तानां क्षेत्रगृहसीमास्वपरिचितत्वात्, एवं क्षेत्रसामन्तानां ग्रामगृहसीमासु अपरिचितत्वात्। अत एवाह स एव—

ग्रामो ग्रामस्य सामन्तः क्षेत्रं क्षेत्रस्य कीर्तितम्।
गृहं गृहस्य निर्दिष्टं सामन्तान् परिभावयेत्॥

अत्र ग्रामादिशब्देन प्रथमान्तेन लक्षणया ग्रामादिभोक्ता कथितः। ततश्चायमर्थः—विवादविषयस्य ग्रामादेस्समन्ततः पूर्वदक्षिणपश्चिमोत्तरादिक्षु स्थितग्रामादिभोक्तृजनस्तस्य सामन्तः ततस्सकाशाद्विवादविषयग्रामादिसीमालिङ्गानि परिभावयेत् निश्चिनुयात् निर्णेता राजादिरिति। एवं नगरदेशयोरपि तत्तत्सामन्तात्परिभावयेदिति विधिरुदाहरणमुखेनास्मिन्वचने सू-

चित इत्यवगन्तव्यम् । एवमेव केदारारामोद्यानदेवालयकूप-तटाकप्रवर्षणोद्भूतजलप्रवाहस्थानादिसीमाविवादे साक्षितत्तत्सामन्तादितो निर्णेता निर्णयेत् । तथाच बृहस्पतिः—

सर्वास्मिन् स्थावरे वादे विधिरेष प्रकीर्तितः ॥ इति ॥

इति स्मृतिचन्द्रिकायां सीमाविवादनिर्णयः.

अथ सीमासाक्ष्याद्यपराधविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र कात्यायनः—

बहूनां तु गृहीतानां न सर्वे निर्णयं यदि ।
कुर्युर्भयाद्वा लोभाद्वा दाप्यास्तूत्तमसाहसम् ॥

सीमासाक्षित्वेन प्रकीर्तितानां अशेषाणां साक्ष्यवादार्थं मेळने कृते ते सर्वे यदि भयादिना साक्ष्यवादं न ब्रूयुः तदा ते प्रत्येकमुत्तमसाहसं दाप्या इत्यर्थः । प्रत्येकमिमनुक्तावपि एकैकस्यैव साक्षित्वात्तदत्र लभ्यते । यदा तु ते भयादिना सर्वे संशयमुत्पादयित्वाऽनैकमत्येन ब्रूयुस्तदाऽप्येवमेव दाप्या इत्याह स एव—

कीर्तिते यदि भेदः स्यात् दाप्यास्तूत्तमसाहसम् ।

इति । यदा त्वनृतं ब्रूयुस्तदा त्वाह विष्णुः—'कूटसाक्षिणां सर्वस्वापहारः कार्यः' इति । सामान्येनाभिधानेऽपि दण्ड

गौरवात् भूवादविषयमेतदवसेयम् । सामन्तानामनृतवादित्वे त्वाह नारदः—

अथ चेदनृतं ब्रूयुः सामन्तास्सीमानिर्णये ।
सर्वे पृथक् पृथक् दण्ड्या राज्ञा मध्यमसाहसम् ॥

अनृतं ब्रूयुः साक्ष्यवादे सीमालिङ्गानि वञ्चयित्वा ब्रूयुरित्यर्थः । अज्ञानोक्तौ त्वाह कात्यायनः—

नाज्ञानेन हि मुच्यन्ते सामन्ता निर्णयं प्रति ।
अज्ञानोक्तौ दण्डयित्वा पुनस्सीमां विचारयेत् ॥

अज्ञानोक्ताविति निर्णयाभावोपलक्षणार्थं, तेन भेदेनोक्तावपि निर्णयाभावात् पुनस्सीमां विचारयेत् । कस्तत्र निर्णायक इत्यपेक्षिते शङ्खलिखितौ—'सामन्तविरोधे लेख्यप्रत्ययो लेख्यविरोधे ग्रामनगरवृद्धश्रेणीप्रत्ययो ग्रामनगरवृद्धश्रेणीविरोधे दशवर्षा भुक्तिरन्यत्र राजविप्लवात्' इति । लेख्यप्रत्ययो निर्णायक इति शेषः । एवमुत्तरत्रापि शेषो द्रष्टव्यः । तत्संसक्तादिवनगोचरान्तानामनृतवादित्वे तु नारद आह—

शेषाश्चेदनृतं ब्रूयुः नियुक्ता भूमिकर्मणि ।
प्रत्येकं तु जघन्यास्ते विनेयाः पूर्वसाहसम् ॥
गणवृद्धादयस्त्वन्ये दण्डनीयाः पृथक् पृथक् ।
विनेयाः प्रथमेनैव साहसेनानृते स्थिताः ॥

इति । शेषास्सामन्तेभ्योऽवशिष्टाः तत्संसक्ताः । तेभ्यो जघन्याः

संसक्तसंसक्ताः । गणवृद्धादय इत्यत्रादिशब्देन ग्रामनगर-मौलवृद्धोद्धृतसीमाकर्षकवनगोचरास्सङ्गृहीताः । मनुस्तु सीमाचङ्क्रमणकर्तृणामनृते स्थितानां दण्डमाह—

यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः ।
विपरीतं नयन्तस्तु दाप्यास्तु द्विशतं दमम् ॥

यथोक्तेन 'शिरोभिस्ते गृहीत्वोर्वीम्' इत्यादिनोक्तमार्गानतिक्रमेण नयन्तस्सीमाचङ्क्रमणं कुर्वाणास्सत्यसाक्षिणः सत्यभूतसीमानुभवशालिनः पूयन्ते पापेन न सम्बध्यन्ते । विपरीतं नयन्तः पूर्वसीमातिक्रमेण चङ्क्रमणं कुर्वाणाः कार्षापणानां द्विशतं दाप्या इत्यर्थः । विपरीतनयनं तु चङ्क्रमणानन्तरक्षणमारभ्य सार्धमासाभ्यन्तरे दैवराजकृतव्यसनदर्शने वेदितव्यम् ॥

इति स्मृतिचन्द्रिकायां सीमासाक्ष्याद्यपराधविषयाणि.

अथ नद्यादिवशात् प्राप्तभूविषयाणि.

तत्र बृहस्पतिः—

अन्यग्रामात्समाहृत्य दत्ताऽन्यस्य यदा मही ।
महानद्याऽथवा राज्ञा कथं तत्र विचारणा ॥
नद्योत्सृष्टा राजदत्ता यस्य तस्यैव सा मही ।
अन्यथा न भवेल्लाभो नराणां राजदैविकः ॥

क्षयोदयौ जीवनं च दैवराजवशान्नृणाम् ।
तस्मात्सर्वेषु कार्येषु तत्कृतं न विचालयेत् ॥

इति । तत्कृतं दैवराजकृतम् । यद्यपि दैवशब्दो भाग्यमाचष्टे तथाऽपि नदीकृते दैवकृतमित्युच्यते, भाग्यस्यैव मूलकारणत्वात् । तथाच स एव—

ग्रामयोरुभयोर्यत्र मर्यादा कल्पिता नदी ।
कुरुते दानहरणं भाग्याभाग्यवशान्नृणाम् ॥
एकत्र कूलपातं तु भूमेरन्यत्र संस्थितिम् ।
नदी तीरे प्रकुरुते तस्य तां न विचालयेत् ॥

इति । तीरे नदी प्रकुरुते इत्यन्वयः । तस्य नदीवशाल्लब्धभूमिकस्य तां नदीकृतभूमिसंस्थितिं पूर्वस्वामी न विचालयेदित्यर्थः । एतदनुप्तसस्यतीरविषयम् । उप्तसस्यतीरविषयेऽप्याह स एव—

क्षेत्रं ससस्यमुल्लङ्घ्य भूमिश्छिन्ना यदा भवेत् ।
नदीस्रोतःप्रवाहेण पूर्वस्वामी लभेत ताम् ॥

तां ससस्यां भूमिम् । छेदनादूर्ध्वमपि पूर्वस्वामी यावदुप्तसस्यफलप्राप्तिस्तावल्लभत इत्यर्थः । फललाभादूर्ध्वं तु प्राचीनवचनविषयतुल्यतैव । राजदत्तभूमिविषयेऽपि क्वचित्पूर्वस्वामी विचालयेत् क्वचिन्न विचालयेदित्याह स एव—

या राज्ञा क्रोधलोभेन छलन्यायेन वा कृता ।
प्रदत्ताऽन्यस्य तुष्टेन न सा सिद्धिमवाप्नुयात् ॥

प्रमाणरहितां भूमिं भुञ्जतो यस्य या हृता ।
गुणाधिकाय वा दत्ता तस्य तां न विचालयेत् ॥

इति । प्रमाणरहितां भूमिं भुञ्जतः स्वत्वे लिखितादिप्रमाण-रहितां भूमिं भुञ्जत इत्यर्थः ।

इति स्मृतिचन्द्रिकायां नद्यादिवशात् प्राप्तभूविषयाणि.

अथ गृहादिविषयाणि.

तत्र बृहस्पतिः—

निवेशकालादारभ्य गृहवार्यापणादिकम् ।
येन यावद्यथाभुक्तं तस्य तन्न विचालयेत् ॥

ग्रामादिप्रवेशकालादारभ्य गृहादिकं तत्स्वामिना येन यावत्प्रचारभूम्याद्युपेतं तथा यस्यां दिशि द्वारादिमद्भुक्तं तस्य तन्न विचालयेत् प्रातिवेश्यादिर्जन इत्यर्थः । 'निवेशकालादारभ्य' इति वदन् कालान्तरादारभ्य भुक्तं विप्रतिपन्नं चेत् विचालयेदिति दर्शयति । एवं निवेशकाले कल्पितं गवाक्षादिकं प्रातिवेश्याद्यनिष्टकार्यपि न केनचिच्चालनीयमित्याह स एव—

वातायनं प्रणाळीं च तथा निर्यूहवेदिकाः ।
चतुश्शालस्यन्दनिकाः प्राङ्निविष्टा न चालयेत् ॥

वातायनं गवाक्षः । प्रणाळी काष्ठादिमयो जलनिर्गमोपायः । निर्यूहः गृहघोणा । वेदिका दारुपरिष्कृता चतुरश्रा विश्रा-

न्तिभूमिः । चतसृणां शालानां समाहारश्चतुश्शालम् । एतच्च तृणमयगृहोपलक्षणार्थमुक्तम् । तस्माद्वृष्टयुदकनिपातस्यन्दनिकाः। अत्रापि मध्ये निविष्टानां विचालनं पूर्ववदर्थादुक्तम् । अत एव गवाक्षादिकं परानिष्टकारितया न कार्यमित्याह कात्यायनः—

निवेशसमयादूर्ध्वं नैते योज्याः कदाचन ।

इति । परानिष्टकारितयेति शेषः । तथाच स एव—

दृष्टिप्रासं प्रणाळीं च न कुर्यात्परवेश्मसु ॥

इति । दृष्टिप्रासो गवाक्षः । परवेश्मसु परवेश्माभिमुख्येनेत्यर्थः । एवं कृते परानिष्टं भवतीत्यभिप्रायः । अनेनैवाभिप्रायेण बृहस्पतिनाऽप्युक्तं—

वर्चस्स्थानं वह्निचयं गर्तोच्छिष्टाम्बुसेचनम् ।

अत्यारात्परकुड्यस्य न कर्तव्यं कदाचन ॥

वर्चस्स्थानं विष्ठास्थानम् । अत्यारात् अरत्निद्वयमविविहायेत्यर्थः । अत एव कात्यायनः—

विण्मूत्रोदकवप्रं च वह्निश्वभ्रनिवेशनम् ।

अरत्निद्वयमुत्सृज्य परकुड्यान्निवेशयेत् ॥

बृहस्पतिस्तु शकटादिकं संकटहेतुभूतं संसरणे न चिरं धार्यमित्याह—

यान्त्यायान्ति जना येन पशवश्चानिवारिताः ।

तदुच्यते संसरणं न रोद्धव्यं तु केनचित् ॥

एवं चतुष्पथादावप्यवरोधनं न कार्यम्। अत एव नारदः—

चतुष्पथसुरस्थानराजमार्गान् न रोधयेत्।

इति। सुरस्थानं देवकुलादिकम्। चतुष्पथराजमार्गयोस्स्वरूपमाह कात्यायनः—

सर्वे जनास्सदा येन प्रयान्ति स चतुष्पथः।
अनिरुद्धा यथाकालं राजमार्गस्स उच्यते॥

अवेळायां यत्र मार्गे राजकीयैश्चङ्क्रमणं निषिध्यते स राजमार्ग इत्यर्थः। यस्य क्षेत्रस्यान्तिके मध्ये वा मार्गोस्ति तं प्रत्याहतुः शङ्खलिखितौ—'मार्गक्षेत्रे पथिविसर्गः' इति। कार्य इति शेषः। यस्तु संसरणादाववरोधं करोति तस्य दण्डमाह बृहस्पतिः—

यस्तत्र सङ्करं श्वभ्रं वृक्षारोपणमेव च॥
कामात्पुरीषं कुर्याद्यस्तस्य दण्डस्तु माषकः॥

सङ्करः सङ्कीर्णता अवरोध इति यावत्। वृक्षग्रहणं सस्यादेरुपलक्षणार्थम्। यद्यपि पञ्चकृष्णलको माषोऽत्रापि ग्राह्यतया प्रतिभाति, तथाऽप्यपराधानुरूपत्वाय कार्षापणस्य विंशो भागो ग्राह्यः। तत्रापि माषव्यवहारात्। राजमार्गे पुरीषकर्तुर्दण्डाधिक्यमाह मनुः—

समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि।
स द्वौ कार्षापणौ दद्यादमेध्यं चाशु शोधयेत्॥

मार्गवैशिष्ट्यादत्रापराधाधिक्यमभिसन्धाय दण्डाधिक्याभिधानं मनोरिति मन्तव्यम्। आपदि तु नार्थदण्डः किंतु वाग्दण्ड इत्याह स एव—

आपद्गतस्तथा वृद्धः गर्भिणी बाल एव वा।
परिभाषणमर्हन्ति तच्च शोध्यमिति स्थितिः॥

तटाकादावमेध्यकर्तुरत्यन्तापराधित्वाद्दण्डेऽप्यत्यन्ताधिक्यमाह कात्यायनः—

तटाकोद्यानतीर्थानि योऽमेध्येन विनाशयेत्।
अमेध्यं शोधयित्वा तु दण्डयेत्पूर्वसाहसम्॥

कश्मलचेलनिर्णेजनादिना तीर्थदूषकस्याप्ययमेव दण्ड इत्याह स एव—

दूषयेत्सिद्धतीर्थानि स्थापितानि महात्मभिः।
पुण्यानि पावनीयानि प्राप्नुयात्पूर्वसाहसम्॥

अपराधान्तरेषु दण्डानाह याज्ञवल्क्यः—

मर्यादायाः प्रभेदे तु सीमातिक्रमणे तथा।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः॥

सीमालिङ्गविनाशकस्य प्रथमसाहसो दण्डः, क्षेत्रस्यापहरणेऽपहर्तुर्मध्यमसाहसो दण्ड इत्यर्थः। यत्तु विष्णुनोक्तं—'सीमाभेत्तारमुत्तमसाहसं दण्डयित्वा पुनस्सीमां कारयेत्' इति, तत्र सीमाभेत्तारमित्यस्य सीमामुल्लङ्घ्य कर्षकमित्यर्थोऽध्यवसे-

यः। सीमाप्रदेशे पुनःकर्षणाद्यकरणमेव पुनस्सीमाकरणं, तद्यथा भवति तथा राजा यतेतेति पुनस्सीमां कारयेदित्यस्यार्थः। उत्तमसाहसाभिधानमर्धसीमातिक्रमविषयम्। समग्रसीमातिक्रमविषये त्वाहतुः शङ्खलिखितौ—'सीमातिक्रमेष्वष्टसहस्रम्' इति। दण्ड इति शेषः। दण्डाधिक्यात्समग्रसीमातिक्रमविषयत्वमस्य वचनस्य न्याय्यम्। स्वल्पसीमातिक्रमविषये त्वाह वृद्धमनुः—

स्थापितां चैव मर्यादामुभयोर्ग्रामयोस्तथा।
अतिक्रामन्ति ये दर्पात्ते दण्ड्याः द्विशतं दमम्॥

दण्डाल्पत्वादल्पातिक्रमविषयमेतदिति न्याय्यम्। यस्तु याज्ञवल्कीये सीमालिङ्गविनाशे प्रथमसाहस उक्तः स गृहसीमालिङ्गविनाशविषयः दण्डस्याल्पत्वात्। क्षेत्रसीमालिङ्गविनाशविषये त्वपराधाधिक्याद्दण्डाधिक्यमाहतुः शङ्खलिखितौ—'क्षेत्रमर्यादाभेदे त्वष्टशतम्' इति। दण्ड इति शेषः। एवं ग्रामादिसीमालिङ्गविनाशे दण्डाधिक्यमूह्यम्। उक्तविधिना दण्डयित्वा पुनर्गृहादीनां सीमालिङ्गानि कारयेदिति चोह्यम्। यस्तु याज्ञवल्कीये क्षेत्रापहरणे मध्यमसाहस उक्तः स तु बलादपहारविषयः। चत्वारिंशदधिकपञ्चशतकार्षापणात्मकस्य मध्यमसाहसस्य गुरुदण्डत्वात्। भयप्रदर्शनेनाज्ञानेन वाऽपहरणे कृते तु मनुराह—

गृहं तटाकमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यस्स्यादज्ञानाद्द्विशतो दमः॥

यत्तु शङ्खलिखिताभ्यामुक्तं 'क्षेत्रोदकापहरणे अष्टशतम्' इति, दण्ड इति शेषः। तदेतत् बलात्कारेण सोदकशाल्यादिक्षेत्रापहरणे द्रष्टव्यम्। एवमपह्रियमाणक्षेत्रादिभूयस्त्वापेक्षया दण्डाधिक्यमूह्यम्। सीमोत्पन्नवृक्षादिफलपुष्पापहारदण्डप्राप्तिपरिहारोपयोगिनमर्थमाह कात्यायनः—

सीमामध्ये तु जातानां वृक्षाणां क्षेत्रयोर्द्वयोः।
फलं पुष्पं च सामान्यं क्षेत्रस्वामिषु निर्दिशेत्॥

सामान्यं साधारणम्। क्षेत्रस्वामिषु सवृक्षसीमकक्षेत्रयोः स्वामिषु। यद्येकक्षेत्रस्वाम्येव सर्वफलमाहरेत् तदा तस्मिन्नर्धफलापहारदण्डप्राप्तिः। येषां तु वृक्षादीनामेकस्य क्षेत्रे मूलप्रदेशा वर्तन्ते अन्यक्षेत्रस्योपरि शाखास्तद्विषयेऽप्याह स एव—

अन्यक्षेत्रे तु जातानां शाखा यत्रान्यसंश्रिताः।
स्वामिनं तं विजानीयाद्यस्य क्षेत्रेषु संश्रिताः॥

संश्रिता आश्रिताः जाता इति यावत्।

इति स्मृतिचन्द्रिकायां गृहादिविषयाणि.

अथ सेत्वादिविषयाणि.

तत्र नारदः—

सेतुस्तु द्विविधो ज्ञेयः खन्यो बन्ध्यस्तथैव च।
तोयप्रवर्तने खन्यो बन्ध्यः स्याद्विनिवर्तने॥

क्षेत्रस्थताधिकोदकनिर्गमनार्थं खात्वा यः क्रियते सेतुः स खन्यः,

आगतोदकधारणार्थं मृदादिभिः यत्र जलप्रवाहो बध्यते स सेतुः बन्ध्य इत्यर्थः । तत्र नातिनिम्नतया खन्यः कार्यः, नात्युच्चतया बन्ध्य इति दर्शयितुमनुदकात्युदकानिन्दामाह स एव—

नान्तरेणोदकं सस्यं नाशश्चात्युदके सति ।
य एवात्युदके दोषः स एवानुदके भवेत् ॥

अतो यथा न सर्वोदकहानिस्तथा खन्यः कार्यः, यथाच नातिबहूदकस्थितिः तथा बन्ध्यः कार्यः इत्यभिप्रायः । सेतुबन्धप्रतिबन्धकमपि प्रयाह स एव—

परक्षेत्रस्य मध्ये तु सेतुर्न प्रतिषिध्यते ।
महागुणोऽल्पदोषश्चेद्वृद्धिरिष्टा क्षये सति ॥

अस्यार्थः— स्वक्षेत्रे परेण क्रियमाणः सेतुस्स्वक्षेत्रेऽप्यपेक्षितोदकस्थापकत्वादिमहागुणवान्, स्वक्षेत्रलवनाशकरतयाऽल्पदोषवान् क्षेत्रस्वामिना न प्रतिषेध्यो यस्मात् अल्पक्षेत्रक्षये सत्यपि सस्यसमृद्धिरिष्टेति । चेच्छब्दात्कुत्रचित् उक्तवैपरीत्ये प्रतिषेध्य इति दर्शयति । याज्ञवल्क्योपि—

न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः ।
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः ॥

न निषेध्य इत्यनुषङ्गात् कूपपदेनापि सम्बध्यते । स्वल्पक्षेत्रः स्वल्पक्षेत्रवर्ती । एवञ्चायमर्थः—परभूमिं स्वल्पां हरन् बहूदकः

कूपः परेण भूस्वामिना न प्रतिषेध्य इति । विपरीतस्त्वत्रापि निषेध्य एव । यत् पुनस्तेनोक्तम्—

स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत् ।
उत्पन्ने सवामिनो भोगः तदभावे महीपतेः ॥

इति, तस्य सति सम्भवे क्षेत्रस्वामिनं तदभावे राजानं वाऽनुज्ञाप्यैव परेण परक्षेत्रे सेत्वादिकः प्रवर्तनीय इत्यत्र तात्पर्यं, न पुनरनिवेदने सेत्वादिवशादुत्पन्नपरक्षेत्रफलभोक्तृनिरूपणे, वचनवैयर्थ्यप्रसङ्गात् । न हि सेत्वादिप्रवर्तनमात्रेण परः परक्षेत्रोत्पन्नफलभोक्तृतां प्रतिपद्यते, येन तन्निवारणार्थं वचनमर्थवत् भवेत् । केचित्तु सेत्वादिनिर्माणोत्पन्नदृष्टादृष्टफलभोक्तृनिरूपणार्थं वचनमेतदिति वदन्ति । यदत्र युक्तं तद्ग्राह्यम् । एवमेवानिवेद्य जीर्णोद्धारे कृतेऽपि बोद्धव्यम् । तथाच नारदः—

पूर्वप्रवृत्तमुत्पन्नमपृष्ट्वा स्वामिनं तु यः ।
सेतुं प्रवर्तयेत्काश्चिन्न स तत्फलभाग्भवेत् ॥
मृते तु स्वामिनि पुनः तद्वंश्ये वाऽपि मानवे ।
राजानमामन्त्र्य ततः कुर्यात्सेतुप्रवर्तनम् ॥
अतोऽन्यथा क्लेशभाक्स्यात् मृगव्याधावमर्शनात् ।
इषवस्तस्य नश्यन्ति यो विद्धमनुविध्यति ॥

इति । अवमर्शनं निदर्शनम् । तस्य मृगव्याधस्य । कात्यायनोपि—

अस्वाम्यनुमतेनैव संस्कारं कुरुते तु यः ।
गृहोद्यानतटाकानां संस्कर्ता लभते न तु ॥
व्ययं स्वामिनि चायाते न निवेद्य नृपे यदि ।
अथावेद्य प्रयुक्तस्तु तद्व्ययं लभते व्ययम् ॥

इति । आवेद्य नृपे तत्प्रयुक्तः संस्कर्ता संस्कारकृतं व्ययं लभते॥

इति स्मृतिचन्द्रिकायां सेत्वादिविषयाणि.

अथ क्षेत्रकर्तृविषयाणि.

तत्र बृहस्पतिः—'गृहीत्वा वाहयेत्काले' इति । क्षेत्रादिविषये क्षेत्रादिस्वामिपार्श्वे अहमिदं करिष्यामीति कृषीवलः क्षेत्रं गृहीत्वा ग्रीष्मादिकाले लाङ्गलादिकं बलीवर्दादिभिर्वाहयेदित्यर्थः। वाहनग्रहणं तदादिफलसङ्ग्रहणान्तव्यापारस्योपलक्षणार्थम् । अत एव कृषिमात्रं कुर्वन् कृषीवलो व्यापारैकदेशकरतया दुष्टत्वात् क्षेत्रफलमूल्यतया कल्पितं क्षेत्रस्वामिने राज्ञा दाप्य इत्याह स एव—'वापगोपनसंग्रहान् । अकुर्वन् स्वामिने दाप्यः' इति । वापो बीजानामावापः । गोपनं सस्यादिरक्षणम् । सङ्ग्रहः फलसङ्ग्रहणम् । वाक्यार्थस्तु याज्ञवल्क्येन विवृतः—

फालाहतमपि क्षेत्रं यो न कुर्यान्न कारयेत् ।
तं प्रदाप्याकृष्टशदं क्षेत्रमन्येन कारयेत् ॥

फालाहतं फालेन विदारितं कृष्टमिति यावत्। न बीजावापयोग्यं मार्दवादिकं कुर्यात्। अकृष्टशदं अकृष्टत्वेन स्थितक्षेत्राद्यत् तृणादि फलं लभ्यते तत् अकृष्टशदम्। अन्येन कृषीवलान्तरेण। यस्तु क्षेत्रं गृहीत्वा क्षेत्रकरणकालार्धं गते कर्षणं कुरुते स कालान्ययापराधानुरूपं दमं दाप्य इत्याह बृहस्पतिः—'मध्ये कृष्टे दमं तु सः' इति। दाप्य इत्यनुषज्यते। यस्तु क्षेत्रं गृहीत्वा तत्करणकालान्तपर्यन्तं न किञ्चित्करोति कारयति च, तमपि प्रत्याह स एव—

क्षेत्रं गृहीत्वा यः काश्चित् न कुर्यान्न च कारयेत्।
स्वामिने स शदं दाप्यो राज्ञा दण्डं च तत्समम्॥

शदं क्षेत्रफलं, तत्समं स्वामिग्राह्यशदसमम्। स्वामिग्राह्यशदोपि कियानित्यपेक्षिते स एवाह—

चिरावसन्ने दशमं कृष्यमाणे तथाऽष्टमम्।
स्वसंस्कृते तु षष्ठं स्यात् परिकल्प्य यथास्थितम्॥

चिरावसन्ने चिरकालमकृष्टक्षेत्रं करिष्यामीति स्वीकृत्य उपेक्षिते, यावत्फलमनुपेक्षिते लभ्यते तस्य दशमं भागं मूल्यद्वारेण दाप्यः। कृष्यमाणे अचिरावसन्ने क्षेत्रे स्वीकृत्योपेक्षिते त्वष्टमं भागं दाप्यः। स्वसंस्कृते तु क्षेत्रे स्वीकृत्योपेक्षिते षष्ठं भागं दाप्य इत्यर्थः। यत्तु क्षेत्रं स्वामिनः सामर्थ्यवैकल्यादिना खिलत्वाद्यवस्थया स्थितं गृहीत्वा तद्येन कृषीवलेन स्वाम्यनिवारितेन कृतं तत्प्रत्याह नारदः—

अशक्तप्रेतनष्टेषु क्षेत्रिकेष्वनिवारितः ।
क्षेत्रं चेद्विकृषेत्कश्चिदश्नुवीत स तत्फलम् ॥

अशक्ताः क्षेत्रकरणसामर्थ्यविकलाः । प्रेताः स्वर्याताः । नष्टाः कुत्र गता इति चिरकालमविज्ञाताः । क्षेत्रिकाः क्षेत्रस्वामिनः । एतदुक्तं भवति—परक्षेत्रत्वेऽपि खिलभूतभूविषये कर्तुः फलभोगो न जातु फलदण्डदापनमिति । प्रसङ्गात् क्षेत्रस्वामिनमागतमपि प्रत्याह स एव—

विकृष्यमाणे क्षेत्रे तु क्षेत्रिकः पुनरावजेत् ।
खिलोपचारं तत्सर्वं दत्वा स्वं क्षेत्रमाप्नुयात् ॥

खिलोपचारः खिलभञ्जनार्थो व्ययः । तस्यैयत्तावधारणं खिलभूतक्षेत्रकाठिन्यतारतम्यायत्तामिति तत्तारतम्यमाह स एव—

संवत्सरेणार्धखिलं खिलं स्याद्वत्सरैस्त्रिभिः ।
पञ्चवर्षावसन्नं तु क्षेत्रं स्यादटवीसमम् ॥

संवत्सरोपेक्षितं क्षेत्रमर्धखिलमीषदुष्कर्षं भवति, त्रिवत्सरोपेक्षितं तु खिलं स्यादुष्कर्षं भवेत् । पञ्चवर्षोपेक्षितं पुनरटवीसमं स्यात् अत्यन्तदुष्कर्षं भवेदित्यर्थः । यदा खिलभञ्जनार्थं व्ययं स्वामी न दातुमुत्सहते तदा त्वाह कात्यायनः—

अशक्तितो न दद्याच्चेत् खिलार्थे यत्कृतो व्ययः ।
तदष्टभागहीनं तु कर्षकः फलमाप्नुयात् ॥
वर्षाण्यष्टौ स भोक्ता स्यात्परतस्स्वामिने तु तत् ।

इति। खिलार्थे यः कृतो व्ययः तत्प्रतिदानासमर्थः स्वामी कर्षकाय यदि खिलव्ययं न दद्यात् तदा कर्षकः क्षेत्रफलस्याष्टमं भागमष्टौवर्षाणियावत् स्वामिने दत्वा अवशिष्टं गृह्णीयात् तदूर्ध्वं स्वामिने तत् क्षेत्रं समर्पयेदित्यर्थः। यदेतत् 'विकृष्यमाणे क्षेत्रे' इत्यादिना 'परतः स्वामिने तु तत्' इत्यन्तेनोक्तं तत्सर्वं प्रेतक्षेत्रविषये तत्पुत्राद्यागमनेऽपि कार्यं, अशक्तनष्टक्षेत्रविषये तु तेषामागमने तत्पुत्रादीनामागने वा कार्यमिति मन्तव्यम्॥

इति स्मृतिचन्द्रिकायां क्षेत्रकर्तृविषयाणि.

समाप्तश्च क्षेत्रजविवादाख्यस्य पदस्य विधिवितानः.

अथ स्त्रीपुंसंबन्धाख्यस्य पदस्य विधिरुच्यते.

तत्र मनुः—

पुरुषस्य स्त्रियाश्चैव धर्म्ये वर्त्मनि तिष्ठतोः।
संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान्॥

धर्म्ये वर्त्मनि शास्त्रीये मार्गे। संयोगे अन्योन्यसंनिधाने। विप्रयोगे देशतः कालतो वा व्यवधाने। शाश्वतान् नित्यानवश्यानुष्ठेयानिति यावत्। एतदुक्तं भवति—अनुच्छृङ्खलयोः

जायापत्योः अन्योन्यमविप्रतिपत्तिसिद्ध्यर्थमवश्यं ये धर्माः परस्परसंनिधावसंनिधौ चानुष्ठेयाः तान्वक्ष्यामीति। के पुनस्ते धर्मा इत्यपेक्षिते स एवाह—

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैस्स्वैः दिवानिशम्।
विषये सज्जमानाश्च संस्थाप्या ह्यात्मनो वशे॥

स्वैः पुरुषैः भर्त्रादिपुरुषैः। विषये विनाशहेतुभूतशीतादिविषये। नारदोपि—

स्वातन्त्र्याद्विप्रणश्यन्ति कुले जाता अपि स्त्रियः।
अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत्॥

अतोऽन्यैरपि स्वस्त्रीणां यथा भवत्यस्वातन्त्र्यं तथैव कल्पयितव्यमिति शेषः। दुष्प्रसङ्गादपि रक्षणं कर्तव्यम्। तथाच हारीतः—'जायानाशे कुलनाशः कुलनाशे तन्तुनाशः तन्तुनाशे देवपितृनाशो यज्ञनाशो धर्मनाशो धर्मनाशे आत्मनाशः आत्मनाशे सर्वनाशः तस्मादेनां धर्मशीलां सुगुप्तां पत्नीं रक्षेत्' इति। मनुरपि—

सूक्ष्मेभ्योपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः।
द्वयोर्हि कुलयोश्शोकमावहेयुररक्षिताः॥
इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम्।
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि॥
स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च।

स्वं च धर्मं प्रयत्नेन जायां रक्षन् स रक्षति ॥

इति। अरक्षिताः स्त्रियो दुश्चरितेन द्वयोः कुलयोः भर्तृपितृकुलयोः शोकमावहेयुः कुर्युरित्यर्थः। अनेन कुलद्वयवृद्धैरापि रक्ष्या इति तत्क्लेशकथनमुपदर्शितम्। दर्शितं चासां रक्षणं बृहस्पतिना—

सूक्ष्मेभ्योपि प्रसङ्गेभ्यो निवार्या स्त्री स्वबन्धुभिः।
स्वस्रादिभिः गुरुस्त्रीभिः पालनीया दिवानिशम् ॥

मनुस्त्वात्मनैव पुरुषवत् स्त्रियोपि गुप्ता भविष्यन्तीति बुद्ध्या स्त्रीरक्षणे पुरुषेणानास्था न कार्येति प्रतिपादनार्थमाह—

नैता रूपं प्रतीक्षन्ते नासां वयसि संस्थितिः।
सुरूपं वा विरूपं वा पुमानित्येव भुञ्जते ॥
पौंश्चल्याच्चलचित्तत्वान्नैस्स्नेह्याच्च स्वभावतः।
रक्षिता यत्नतोपीह भर्तृष्वेता विकुर्वते ॥
शय्यासनमलङ्कारं कामं क्रोधमनार्यताम्।
द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुरकल्पयत् ॥
एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम्।
परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥

इति। द्रोहभावो दक्षेण प्रपञ्चितः—

जलूकावत् स्त्रियस्सर्वा भूषणाच्छादनाशनैः।
संभृताऽपि कृता नित्यं पुरुषं ह्यपकर्षति ॥

जलूका रक्तमादत्ते केवलं सा तपस्विनी ।
इतरा तु धनं वित्तं मांसं वीर्यं बलं सुखम् ॥
साशङ्का बालभावे तु यौवने विमुखी भवेत् ।
तृणवन्मन्यते नारी वृद्धभावे पुनः पतिम् ॥

इति । भूषणाभिस्संभृता कृताऽपि पुरुषं नित्यमपकर्षति सततमवज्ञापात्रं करोतीत्यर्थः । इतरा स्त्रीत्यर्थः । धनमित्यादौ प्रतिपदमादत्त इत्यनुषज्यते । एवं द्रोहभावमतिशयेन वदतो दक्षस्यायमभिप्रायः—भार्यायां बहुधा बहुविधदौष्टचदर्शनेऽपि जातिस्वभावनिबन्धने किमत्र चित्रमित्युद्वेगमुत्सृज्य पालने यत्नानुवृत्तिः कार्येति । भार्याया भरणेऽपि च पुरुषेण यौवने यतितव्यम् । तथाच मनुः—

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
रक्षन्ति स्थाविरे पुत्रा न स्त्री स्वातन्त्र्यमर्हति ॥

पतिपुत्रविहीनायास्तूभयविधरक्षणं पतिपक्षान्तर्गतेन प्रत्यासन्नेन कार्यम् । तथाच नारदः—

मृते भर्तर्यपुत्रायाः पतिपक्षः प्रभुः स्त्रियाः ।
विनियोगात्मरक्षासु भरणे च स ईश्वरः ॥

विनियोगः कर्मणि नियोजनम् । पतिपक्षस्याप्यभावे स एवाह—

परिक्षीणे पतिकुले निर्मनुष्ये निराश्रये ।
तत्सापिण्डेषु चासत्सु पितृपक्षः प्रभुः स्त्रियाः ॥

विनियोगादिष्विति शेषः। पितृपक्षस्याप्यभावे स एवाह—

पक्षद्वयावसाने तु राजा भर्ता स्मृतः स्त्रियाः।
स तस्या भरणं कुर्यान्निगृह्णीयात्पतिच्युताम् ॥
भर्ता भरणकर्ता ॥

इति स्मृतिचन्द्रिकायां स्त्रीरक्षणविधिः.

अथ स्त्रीरक्षणप्रकारः.

तत्र मनुः—

न कश्चिद्योषितश्शक्तः प्रसह्य परिरक्षितुम्।
एतैरुपाययोगैस्तु शक्तास्ताः परिरक्षितुम् ॥

प्रसह्य आक्रम्य अवरुध्येति यावत्। यद्यप्यवरोधेन शारीरव्यभिचाराद्रक्षणं शक्यं, तथाऽपि मानसव्यभिचाराद्रक्षणमशक्यमिति मन्वानेन मनना—

न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम्।

इत्याद्युक्तम्। न च माऽस्तु मानसव्यभिचाराद्रक्षणं, अन्यजात्यसम्भवेन प्रजाशुद्धिविघाताभावादिति वाच्यम्। यत आह स एव—

यादृशं भजते हि स्त्री सुतं सूते तथाविधम्।
तस्मात् प्रजाविशुद्ध्यर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥

यादृशं पुरुषं ऋतुकाले स्त्री मनसा भजते तत्समानशीलं पुत्रं जनयतीति पूर्वार्धस्यार्थः । तथाच शङ्खलिखितौ—'यस्मिन् भावोऽर्पितस्त्रीणामार्तवे तच्छीलं पुत्रं जनयति' इति । अतो मानसव्यभिचारादपि स्त्रियः रक्षेदिति शेषः । तथाच मनुना तस्मादित्यादिना उत्तरार्धेन अयमेव विधिर्दर्शितः । परिरक्षणोपाया अपि मनुना दर्शिताः—

अर्थस्य सङ्ग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्मेऽन्नपक्त्यां च पारीणह्यस्य चेक्षणे ॥

सङ्ग्रहे स्वेन समानीतार्थसंविधाने । व्यये स्वेनोक्तव्यये । शौचे गृहादिशुद्धिकरसंमार्जनानुलेपनादौ । धर्मे अग्निहोत्राद्यनुकूललौकिकव्यापारे । अन्नपक्त्यां चुल्लीसंमार्जनादिपाकव्यापारे । पारीणह्यस्येक्षणे पिठरादिगृहोपकरणप्रतीक्षणे । एतदुक्तं भवति—अकुत्सितावश्यकव्यापारवैयग्र्यवशेन पुरुषान्तरचिन्तनाद्यवसरराहित्यं भार्याया यथा भवति तथा कुर्यादिति । बृहस्पतिनाऽपि पूर्वोक्ता एवोपाया उक्ताः—

आयव्ययेऽन्नसंस्कारे गृहोपस्काररक्षणे ।
शौचेऽग्निकार्ये संयोज्याः स्त्रीणां शुद्धिरियं स्मृता ॥

इयमुक्तोपायप्रभवा स्त्रीणां शुद्धिः साध्वी स्मृतेत्यर्थः । तथाच मनुना स्मर्यते—

आत्मानमात्मना यास्तु रक्षेयुस्तास्सुरक्षिताः ।

इति। आत्मना अर्थसङ्ग्रहाद्यासक्तचित्तेनेत्यर्थः। आप्तपुरुषैस्तु रक्षिताः स्त्रियो न सम्यग्रक्षिता इत्याह स एव—

अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः।

इति। आप्तकारिभिः पुरुषैर्गृहे रुद्धा इत्यन्वयः। अरक्षिताः सम्यग्रक्षाविहीना इत्यर्थः। सम्यग्रक्षाविहीनत्वं च प्रागेवाभिहितम्। पानादिनिवारणमपि नारीरक्षणप्रकार इति दर्शयितुमाह स एव—

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगेहे वासश्च नारीणां दूषणानि षट्॥

इति। तेनैतान्यवहितेन पतिप्रभृतिना नारीषु प्रतिषेद्धव्यानीति शेषः। पानं मद्यादीनाम्। पत्या च विरहो देशान्तरे पतिमुत्सृज्यावस्थानम्। अटनं विना पत्या तीर्थयात्रादिकरणम्। स्वप्नो यत्रकुत्र वा शयनम्। अन्यगेहे वासः परगृहे वसनम्। पत्युः शैष्ट्यमपि स्त्रीरक्षणप्रकार इति दर्शयितुमाह स एव—

यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥

अव्यभिचारव्यभिचारयोः शुभाशुभफलज्ञापनमपि स्त्रीरक्षणप्रकार इति दर्शयितुं तयोः फलमाह स एव—

पतिं या नातिचरति मनोवाक्कायसंयता।
सा भर्तृलोकानाप्नोति सद्भिस्साध्वीति चोच्यते॥

व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ।
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ॥

इति । भरणरूपरक्षणस्यापि प्रकारं दर्शयितुमाह स एव—

देवदत्तां पतिर्भार्यां विन्दते नेच्छयाऽऽत्मनः ।
तां साध्वीं बिभृयान्नित्यं देवानां प्रियमाचरन् ॥

देवैर्दत्ता देवदत्ता देववशायातेति यावत् । तां भार्यां स्वयंवरे पतिर्विन्दते न पुमरात्मेच्छया आत्मव्यापारेण विन्दते। तत्र स्वव्यापाराभावात्तां देववशायातां साध्वीं शोभनां नित्यं बिभृयात् पोषयेदित्यर्थः। न चैवं मानुषवशादायातायां भार्यायां भरणमनावश्यकमिति वाच्यम् । दण्डापूपन्यायेन तत्रापि नित्यं बिभृयादिति विधिर्गम्यते यतः । तथाहि—वरेणावृताऽप्यवश्यं भर्तव्येत्युक्ते वरवृता तु सुतरामिति गम्यते। न च साध्वीमित्यस्य पतिव्रतामित्यर्थान्तरपरत्वेन न व्यभिचारिणीं बिभृयादित्यर्थोऽर्थाद्गम्यत इति व्यभिचारिण्याः भरणमनावश्यकमिति वाच्यं, तस्या अप्यवश्यभरणीयत्वात्। तत्रानुत्कटव्यभिचारिणी सतीव भरणीया, असंव्यवहार्यैव परमाप्रायश्चित्तकरणात् । उत्कटव्यभिचारिण्यपि पश्चात्तापाख्यप्रायश्चित्ताधिकारविशेषेण सिद्धिपर्यन्तमवश्यं भर्तव्या, किंतु कदन्नादिना। तथाच नारदः—

व्यभिचारे स्त्रिया मौण्ड्यमधश्शयनमेव च।
कदन्नं च कुवासश्च कर्म चावस्करोऽन्वहम् ॥

स्त्रिया अत्यन्तव्यभिचारे जाते मौण्ड्यमधश्शयनं च साधयेत्, कदन्नं कुवासश्च भरणार्थं दद्यात् । अमेध्यशोधनरूपं च कर्म कारयेदित्यर्थः । एवञ्च मनुवृत्तौ साध्वीमित्यस्य यदर्थान्तरमुक्तं 'यद्वा साध्वीं पतिव्रतां बिभृयात् न व्यभिचारिणीम्' इति तत्तु हेयम् । हारीतोपि अत्यन्तव्यभिचारिण्याः भरणमावश्यकमित्याह—

भार्याया व्यभिचारिण्याः परित्यागो न विद्यते ।
दद्यात्पिण्डं कुचेलं चाप्यधश्शय्यां च शोधयेत् ॥

पिण्डं क्षुन्निवारणमात्रकृत् कदन्नमित्यर्थः । अधः शय्या यस्यास्सा अधश्शय्या ताम् । याज्ञवल्क्योपि—

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधश्शय्यां वासयेद्व्यभिचारिणीम् ॥

हृताधिकारां श्रौतस्मार्तादिकर्मणि निवृत्ताधिकाराम् । परिभूतां अनधिकृताम् । वासयेत् स्वगृहैकदेश इति शेषः ।

विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्यादेकवेश्यनि ।

इति मनुस्मरणात् । विप्रदुष्टां कायिकव्यभिचारेणात्यन्तदुष्टामित्यर्थः । तथाच शङ्खलिखितौ—'कामचारिणीं मलिनां कुचेलां पिण्डमात्रोपजीविनीं निवृत्ताधिकारामधश्शय्यां निरुद्धां निवासयेदसत्यव्यभिचारिणीम्' इति । कामचारिणीं परपुरुषकामनया चरन्तीमित्यर्थः । स्वच्छन्दचारिण्यास्तयाज्यत्वादेवं व्याख्या कृता । तस्यास्त्याज्यत्वमाह यमः—

स्वच्छन्दगा च या नारी तस्यास्त्यागो विधीयते ।

इति । संव्यवहार्यत्वापादकप्रायश्चित्ताभावो यद्गमने भवति तमपि या गच्छति सा स्वच्छन्दगा । अत्यर्थव्यभिचारीणी तु न त्याज्या, प्रायश्चित्तेन संव्यवहार्यत्वसम्भवात् । यत्तु याज्ञवल्क्येनोक्तं—

सोमश्शौचं ददौ स्त्रीणां गन्धर्वश्च शुभां गिरम् ।
पावकस्सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः ॥

इति, सर्वमेध्यत्वं सर्वयज्ञार्हत्वमित्यर्थः । तदेतत्प्रशंसामात्रं, तेन विप्रदुष्टत्वं हृताधिकारत्वं च व्यभिचारिण्या उक्तमविरुद्धम् । यत्पुनर्मनुनोक्तं—

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियश्श्रियश्च गेहेषु न विशेषोस्ति कश्चन ॥

इति, पूजार्हाः पूजास्पदीभूता इत्यर्थः । तदेतदविप्रदुष्टस्त्रीविषयम् । तेन परिभावास्पदत्वं व्यभिचारिण्या उक्तमविरुद्धम् । मङ्गळार्थमप्यविप्रदुष्टाः स्त्रियः पित्रादिभिः पूज्या इत्याह स एव—

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥

देवराः पत्युः भ्रातरः । याज्ञवल्क्योपि—

भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ।
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥

अत्र भर्तृव्यतिरिक्तैः पूजनमुत्सवविषये द्रष्टव्यम् । तथाच बृहस्पतिः—

भर्त्रा पत्नी समभ्यर्च्या वस्त्रालङ्कारभोजनैः ।
उत्सवे तु पितृभ्रातृश्वशुराद्यैश्च बन्धुभिः ॥

तत्र मनुः—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।
यत्र तास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥
शोचन्ति योषितो यत्र विनश्यत्याशु तत्कुलम् ।
न शोचन्ति तु यत्रैता वर्धते तत्र सर्वदा ॥

इति । शोचन्ति भरणपूजनयोरभावेनेति शेषः । यत्र कुल इत्यर्थः । प्रवत्स्यता तु प्रत्यागमनपर्यन्तं भरणार्थमर्थसंविधानं विधातव्यम् । अन्यथा सन्मार्गे स्थिताऽपि वर्धनराहित्याद्धैर्यच्युता वृत्त्यर्थं व्यभिचेरादित्याह स एव—

विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः ।
अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि ॥

द्वेषानुवृत्तिमत्यास्तु भार्यायाः द्वेषानुवृत्तेः प्राक् पूजनाय दत्तं वस्त्राभरणादिकं संवत्सरादूर्ध्वं हृत्वा तामृतुकालेऽपि न सेवेतेत्याह स एव—

संवत्सरमुदीक्षेत द्विषन्तीं योषितं पतिः ।
ऊर्ध्वं संवत्सरात्त्वेनां दायं हृत्वा न संवसेत् ॥

उदीक्षेत द्वेषानुवृत्तिं प्रतीक्षेत । ऊर्ध्वं संवत्सरात् द्वेषानुवृत्तौ

सत्यामिति शेषः। दायं पूजनाय दत्तम्। वृत्त्यर्थं तु कल्पितमनाहार्यं, भार्याया द्वेषानुवृत्तिशालिन्या अपि भरणस्यावश्यकत्वात्। उक्तार्थस्य क्वचिदपवादमाह स एव—

उन्मत्तं पतितं क्लीबमबीजं वाऽपि रोगिणम्।
न प्रद्विषन्त्यास्त्यागोस्ति न च दायापवर्तनम्॥

क्लीबं निरुत्साहम्। अबीजं निर्वीर्यम्। एतदुक्तं भवति—दृष्टादृष्टवैकल्यनिबन्धनद्वेषानुवृत्तावप्ययुक्तकारित्वाभावादतुगमनत्यागादिरत्र नास्तीति। याज्ञवल्क्यस्त्वधिविन्नाया भरणमेवावश्यकं न पूजनादिकामित्याह—

अधिविन्ना च भर्तव्या महदेनोऽन्यथा भवेत्।
भर्तव्या पूर्ववदेवेति शेषः॥

इति स्मृतिचन्द्रिकायां स्त्रीरक्षणप्रकारः.

अथाधिवेदनविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र मनुः—

मद्यपाऽसभ्यवृत्ता च प्रतिकूला च या भवेत्।
व्याधिता चाधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा॥

अधिवेदनमात्रयोग्यपातित्यरहिता मद्यपाऽत्र विवक्षिता, न पुनर्महापातकवशात्त्यागेऽपि योग्या सुरापी। असभ्यवृत्ता व्यभिचाररता दुराचारा वा। प्रतिकूला नित्यमिष्टविपरी

तकारिणी। व्याधिता दीर्घरोगा। हिंस्रा अतिक्रूरा। अर्थघ्नी स्वातन्त्र्यैणार्थव्ययशीला। अधिवेत्तव्येति पञ्चस्वनुषज्यते। अधिवेदनं पूर्वस्थितभार्योपरि परिणयनम्। अर्थघ्नी चेति चशब्दोऽनुक्तसमुच्चयार्थः। काः पुनश्चशब्दसमुच्चिता इत्यपेक्षिते शङ्खलिखितौ—'धूर्तां वैनासिकीं स्त्रीजननीं वन्ध्यामप्रियवादिनीमप्रियशीलां पुरुषद्वेषिणीमननुकूलां चाधिविन्देत्' इति। धूर्ता प्रतारिका। वैनासिकी विगतनासा। स्त्रीजननी स्त्र्यपत्यमात्रजननी। एतदुक्तं भवति—धर्मकार्यपुत्रलाभयोः सिद्धिर्यया सह न सम्भवति तामतीत्य भार्यान्तरं विन्देदिति। कामसिद्धिस्तु यया सह न सम्भवति परिपूर्णा वा न भवति तामर्थैस्तोषयित्वा भार्यान्तरमुद्वहेदित्याह देवलः—

एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति।
समर्थस्तोषयित्वाऽर्थैः पूर्वोढामपरां वहेत्॥

क्वचित्पूर्वभार्यातः विवाहन्तरेऽनुज्ञां प्राप्यान्यामुद्वहेदित्याह मनुः—

या रोगिणी स्यात्तु हिता सम्पन्ना चैव शीलतः।
साऽनुज्ञाप्याधिवेत्तव्या नावमान्या च कर्हिचित्॥

रोगिणी दीर्घरोगा। हिता भर्तुरभ्युदयार्थिनी। क्वचित्कालक्षेपेण क्वचित्तं विनैवाऽधिवेदनं कार्यमित्याह स एव—

पन्ध्याऽष्टमेऽधिवेद्याऽब्दे दशमे तु मृतप्रजा।

एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥

अष्टमेऽब्दे गते इति शेषः । 'अप्रजां नवमे वर्षे' इति हारीतस्मरणात् । एवमेकादशे इत्यत्रापि शेषोऽवगन्तव्यः ।

आकाङ्क्षेताष्टवर्षाणि भर्ताऽतिप्रसवां स्त्रियम् ।
दश वन्ध्यां च निन्द्यां च द्वादशे स्त्रीप्रसविनीम् ॥

इति देवलस्मरणात् । अतिप्रसवा अतिक्रान्तप्रसवा प्रतिगर्भं गर्भस्रावव्रतीति यावत् । वन्ध्या अनपत्या । निन्द्या मद्यपाऽसभ्यवृत्तेत्येवमादिका । दश वन्ध्यामिति प्रियतरवन्ध्याविषयम् । अत्र मनुः—

अधिविन्ना तु या नारी निर्गच्छेत् रुषिता गृहात् ।
सा सद्यस्सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥

उपरि यस्या अभूत् परिणयनं साऽधिविन्नोच्यते । कुलसंनिधौ अधिविन्नायाः पित्रादिकुलसंनिधावित्यर्थः । तत्कुलसंनिधौ त्यक्तायाऽपि भरणं पतिरेव संनिधानकरणेन कुर्यात् ।

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।

इत्युक्तत्वात् ।

अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत् ।

इत्युक्तत्वाच्च । या त्वभ्यूढा नारी पत्युरौचित्याज्ञानदोषात् कुपिता तद्गृहान्निर्गता बन्धुभ्योऽन्यमनाश्रिता सा प-

तिगृहे बन्धुभिराश्रयभूतैः प्रवेशनीया । बन्धुरहिता चेत् स्वयमेव विमृश्य पतिगृहमाश्रयेदित्याह नारदः—

अज्ञानदोषादूढा या निर्गता नान्यमाश्रिता ।
बन्धुभिस्सा नियोक्तव्या निर्बन्धुस्स्वयमाश्रयेत् ॥

याज्ञवल्क्यस्तु अधिविन्नस्त्रीभ्योऽधिवेदननिमित्तकं भर्तुर्देयमाह—

अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्तं त्वर्धं प्रकीर्तितम् ॥

अधिविन्नायै स्त्रियै स्त्रीधनरहितायै यावदधिवेदनार्थं व्ययीकृतं यावद्वाऽधुना परिणीतायै दत्तं तत्समं अधिवेदननिमित्तकधनं भर्त्रा देयम् । तदर्धं तु स्त्रीधनसहितायै देयत्वेन भर्तुः प्रकीर्तितमित्यर्थः ॥

इति स्मृतिचन्द्रिकायामधिवेदनविषयाणि.

अथात्याज्यस्त्रीविषयाणि.

तत्र देवलः—

स्वदारान् त्यजतो मोहान्नरस्यान्यायमोचिनः ।
धर्मवंशपरिक्षुर्निष्कृतिर्न विधीयते ॥

शास्त्रोक्तत्यागहेतून् विनैव यो मोहादिना स्वस्त्रियं त्यजति तस्यान्यायेन स्वदारमोचिनः तन्मोचनद्वारेण तया सह विहितश्रौतस्मर्तादिधर्मस्य तस्यामुत्पाद्यमानसन्तानस्य च त्य-

कुर्निष्कृतिर्नास्तीत्यर्थः । इह लोकेऽपि तस्य राज्ञा चोरवद्दण्डनं कार्यम् । तथाच 'चोरवच्छास्यः' इत्यनुवृत्तौ विष्णुः—'निर्दोषां परित्यजन् पत्नीं च' इति । त्यागहेतुभूतदोषरहितां भार्यां परित्यजन्नपि चोरवद्दण्ड्य इत्यर्थः । गुणवतीं पुनः परित्यजन् महता दण्डेन वशीकृत्य तस्यामेव भर्यायामवस्थाप्यः । तथाच नारदः—

अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम् ।
त्यजन् भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा ॥

यदा पुनर्दण्डेन महता तस्यामवस्थापयितुमशक्यस्तदा त्वाह याज्ञवल्क्यः—

आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् ।
त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः ॥

गुणवतीमपि भार्यां यो दुराग्रहेण उत्सृजति तद्धनतृतीयांशं त्यक्ष्यमाणभार्यायै राज्ञाऽसौ दाप्यः । अल्पधनश्चेद्भरणमात्रपर्याप्तं धनं दाप्य इत्यर्थः ।

इति स्मृतिचन्द्रिकायां अत्याज्यस्त्रीविषयाणि.

अथ त्याज्यस्त्रीविषयाणि.

तत्र नारदः—

अन्योन्यं त्यजतोर्धर्मः स्यादन्योन्यं विकुर्वतोः ।
स्त्रीपुंसयोर्न चोढाया व्यवचारादृते क्रियाः ॥

विवाहसंस्कारविहीनयोः हीनजातीयस्त्रीपुंसयोरन्योन्याविरोधेनान्योन्यं त्यजतोः धर्मः स्याद्दोषो न स्यादित्यर्थः । ऊढा विवाहसंस्कृता । तस्यास्तु व्यभिचाररूपनिमित्तमन्तरेण नास्ति त्यागः । अनेन व्यभिचारे सत्यूढाया अप्यस्त्येव त्यागइत्यर्थादुक्तम् । तच्च स्वच्छन्दव्यभिचारिणीविषयम् ।

स्वच्छन्दगा च या नारी तस्यास्त्यागो विधीयते ।

इति यमस्मरणात् । त्यागोत्र वधप्रतिनिधित्वेन कार्यः । तथाच स एव—

स्वच्छन्दव्यभिचारिण्या विवस्वांस्त्यागमब्रवीत् ।
न वधं न च वैकृत्यं वधः स्त्रीणां विसर्जनम् ॥

स्त्रीणां महापराधे वधं कुर्वन् विसर्जनमेव तासां कुर्यादित्यर्थः । वैकृत्यं कर्णनासाद्यङ्गविकर्तनम् । तदापि भर्त्रा न कदाचित् कार्यमित्यर्थः ।

न चैव स्त्रीवधं कुर्यान्न चैवाङ्गविकर्तनम् ।

इति तेनैवोक्तत्वात् । एवमेव शिष्यगाऽपि नारी परित्याज्यैव । तथाच वसिष्ठः—

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

शिष्यो भर्तृशिष्यः । गुरुः पिता । जुङ्गितः पतितः, प्रतिलोमजो वा । पतिघ्नी तु ज्ञातिभिः परित्याज्या । ज्ञातिपरित्यक्ता-

याः कदन्नप्रदानादिकमपि न कर्तव्यं, विशेषेणेत्युक्तत्वात्। चतस्र इत्युक्तिः न ततोऽधिकपरित्याज्ययोषिदभावबोधनार्था, जुङ्गितोपगतपदेन पतितोपगतप्रतिलोमजोपगतयोरभिधानात् पूर्वापरविरोधापत्तेः। कथं तर्हि चतस्र इत्युक्तम्? उच्यते—पतितप्रतिलोमजोपगतयोर्जुङ्गितोपगतपदार्थतयैक्यमुपेत्य चतस्र इति संकलीकृता। यत एव चतस्र इत्युक्तिः परित्याज्यान्तराभावं न बोधयति अत एव परित्याज्यान्तराण्याह याज्ञवल्क्यः—

.....गर्भे त्यागो विधीयते।
गर्भभर्तृवधे तासां तथा महति पातके॥

इति। यत्र द्विजस्त्रीणां शूद्रात् गर्भे सति प्रायश्चित्तेन संव्यवहार्यत्वाभावात्तत्रैव विषये गर्भे सति त्यागो विधीयत इति मन्तव्यम्। तथाच वसिष्ठेनोक्तं—

ब्राह्मणक्षत्रियविशां स्त्रियश्शूद्रेण संगताः।
अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः॥

इति। हारीतोपि—'गर्भघ्नीमधोवर्णशिष्यगुरुगामिनीं पानव्यासक्तां धनधान्यविक्रयकारिणीं च वर्जयेत्' इति अत्रापि यत्राधोवर्णगमने पानव्यसने धनधान्यविक्रये च प्रायश्चित्तेन शुद्धिर्नास्तीति शास्त्राद्गम्यते तत्रैव विसर्जनविधानमिति मन्तव्यम्। विसर्जनं व्यवहारपरित्यागः। तथाच वसिष्ठः—

व्यवाये तीर्थगमने धर्मेभ्यश्च निवर्तते।

इति। व्यवायः सम्भोगः । तीर्थगमनशब्देनात्र स्मार्तकर्म प्रदार्शितम् । धर्मशब्देन श्रौतम् । चशब्देन स्पर्शनादि लौकिकम् । ततश्चायमर्थः—भोगसहायकारिसंस्पर्शसम्भाषणादिभ्यो वार्जिता स्त्री निवर्तत इति । अनेन वचोभङ्ग्या सम्भोगादेरात्यन्तिकवर्जनं विसर्जनमित्युक्तम् । एवं सम्भोगादौ निवृत्ताया अपि स्त्रियाः कदन्नादिं कल्पयितव्यम्। गृहसमीपे गृहान्तरं चेत्याह मनुः—

एवमेव विधिं कुर्याद्योषित्सु पतितास्वपि ।
वस्त्रान्नमासां देयं तु वसेयुश्च गृहान्तिके ॥

देवलस्तु व्याध्यादिना त्याज्यासु संभोगमात्रस्य त्यागो न सहाधिकारादीनामित्याह—

व्याधितां स्त्रीप्रजां वन्ध्यां उन्मत्तां विगतार्तवाम् ।
अदुष्टां लभते त्यक्तुं तीर्थान्न त्वेव कर्मणः ॥

तीर्थात् सम्भोगादित्यर्थः । तथाच नारदः—

वन्ध्यां स्त्रीजननीं निन्द्यां प्रतिकूलां च सर्वदा ।
कामतो नाभिनन्देत कुर्वन्नेतन्न दोषभाक् ॥

निन्द्यां मरणशीलापत्यप्रसवेनेति शेषः । सर्वदा प्रतिकूलां नित्यमिष्टविपरीतकारिणीम् । कामतः सम्भोगकरणेनेत्यर्थः। न दोषभागिति वदन् प्रतिषेधविधेरानित्यतां दर्शयति अत्र बोधायनः—

अप्रजां नवमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ।
मृतप्रजां पञ्चदशे सद्यस्त्वाप्रियवादिनीम् ॥

त्यजेत् सम्भोगत इति शेषः । अप्रियवादिनीं तु सहवासतोपि त्यजेत् । तथाच नारदः—

अनर्थशीला सततं तथैवाप्रियवादिनी ।
पूर्वाशना च या भर्तुः तां स्त्रीं निर्वासयेद्गृहात् ॥

अपरा अपि गृहान्निर्वासनीयाः स्त्रियस्तेनैव दर्शिताः—

स्त्रीधनभ्रष्टसर्वस्वां गर्भविस्रंसिनीं तथा ।
भर्तुश्च वधमिच्छन्तीं स्त्रियं निर्वासयेद्गृहात् ॥

स्त्रीधनेन सह भ्रष्टं सर्वस्वं यस्याः सा तथोक्ता । गर्भविस्रंसिनी औषधादिसेवनया संपादितगर्भस्रावा । भर्तुर्वधमिच्छन्ती विषप्रदानादिनेति शेषः । बोधायनेनापि निर्वासनीयाः स्त्रियो दर्शिताः—

भर्तुः प्रतिनिवेशेन या भार्या स्कन्दयेद्दृतुम् ।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु नयेद्गृहात् ॥
अशुश्रूषाकरीं नारीं बन्धकीं पारिहिंसिकाम् ।
त्यजन्ति पुरुषाः प्राज्ञाः क्षिप्रमप्रियवादिनीम् ॥

इति । बन्धकी पुंश्चली ॥

इति स्मृतिचान्द्रिकायां त्याज्यस्त्रीविषयाणि.

एवं संयोगे विप्रयोगे च पुरुषस्य धर्मा उक्ताः । अधुना संयोगे एव द्वयोर्जायापत्योर्धर्मा उच्यन्ते ।

तत्र मनुः—

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यस्मिन्नेतत्कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥

तथैव भर्तृवदेव भार्या भर्त्रा सन्तुष्टेति विपरिणम्य पूरणीयं, यथास्थितस्य पुंलिङ्गत्वेनात्रान्वयासम्भवात् । यस्मिन् कुले नित्यमेतदन्योन्यसंतुष्टत्वं तत्र कल्याणं, सुपुत्रजन्मलक्षणं भार्याबन्धुवर्गे प्रीतिमत्त्वलक्षणं परस्पराव्यभिचारित्वादिलक्षणं चावश्यं भवतीत्यर्थः । तथाच स्वयमेव व्यतिरेकमुखेनान्वयमुखेन च कल्याणशब्दस्य विवक्षितार्थं विवृणोति—

यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ॥
स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ।
तस्यामरोचमानायां सर्वमेव न रोचते ॥
अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः ।

इति । पुंसः प्रजनं पुत्रजननमित्यर्थः । तत्कुलं स्त्रीकुलम् । दम्पत्योर्धर्मान्तरमाह स एव—

तथा नित्यं यतेयातां स्त्रीपुंसौ च कृतक्रियौ ।
यथा नातिचरेयातां वियुक्ताविवरेतरम् ॥

नातिचरेयातां धर्मार्थकामेष्विति शेषः। दक्षोऽपि--

स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम्।
रक्तमेकं विरक्तं वा ततः कष्टतरं नु किम्॥

दम्पत्योः परस्परमनुराग इत्येतत् स्वर्गेऽपि दुर्लभम्। तथा तयोरेकतरत्स्वरूपमनुरक्तं विरक्तं वा स्यात्ततः कष्टतरं नु किं न किमपि, तदेव परमं कष्टमित्यर्थः। तेन मिथोऽनुरागो यथा भवति तथा स्त्रीपुंसौ यतेयातामिति शेषः। याज्ञवल्क्योऽपि-

यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते।

इति। तेन मिथोऽनुकूलत्वं यथा भवति तथा स्त्रीपुंसौ यतेयातामिति शेषः। त्रिवर्गो धर्मार्थकामाः। तथाच दक्षः—

गृहाश्रमात्परं नास्ति यदि भार्या वशानुगा।
तया धर्मार्थकामात्मत्रिवर्गफलमश्नुते॥

तया वशवर्तिन्या धर्मार्थकामात्मकं त्रिवर्गाख्यफलमश्नुते गृहीत्यर्थः। वशानुगेति गुणान्तराणामुपलक्षणार्थम्। तथाच स एव—

गृहे वासस्सुखार्थो हि पत्नीमूलं च तत्सुखम्।
सा पत्नी या विनीता च चित्तज्ञा वशवर्तिनी
अनुकूला त्ववाग्दुष्टा दक्षा साध्वी प्रजावती।

इति। पत्नी यज्ञाधिकारसंपद्युक्ता भार्या, तद्विकला तु स्त्रीत्वेव न पत्नी। साऽपि भार्या प्रागुक्तविनीतत्वादिगुणान्वितेत्याह स एव—

एभिरेव गुणैर्युक्ता भार्यैव स्त्री न संशयः।

इति। एभिरेवेत्येवकारोऽत्रायोगव्यवच्छेदार्थो न पुनरन्ययोगव्यवच्छेदार्थः, गुणान्तरयोगस्यापीष्टत्वात्। या पुनर्निर्गुणा सा जरेत्याह स एव—

अदुष्टमानसा नित्यं स्थानमानविचक्षणा।
भर्तुः प्रियकरी या तु सा भार्या त्वितरा जरा॥

इतरा गुणरहिता जरा क्लेशकारिणीत्यर्थः। पत्न्यादावेव पत्न्यादिशब्दप्रयोगो विनीतत्वादिगुणान्वितायामेव समग्रं पत्न्यादिनिर्वर्त्यकार्यं भवति नान्यस्यामिति प्रशंसार्थः। यथा 'पशवो गौअश्वाः' इति श्रुतौ गवाश्वपशुष्वेव पशुशब्दप्रयोगो गोऽश्वेष्वेव समग्रं पशुनिर्वर्त्यं कार्यं, न पुनरजादिष्विति प्रशंसार्थः तद्वदत्रापीति सर्वमनवद्यम्। सुशिक्षिता भार्या तु बाह्याभ्यन्तरशुद्धिमद्भात्रादिसमेत्याह स एव—

शिष्टा भार्या शुचिभ्रातृमित्रदाससमा स्मृता।
यस्यैतानि विनीतानि तस्य लोकेषु गौरवम्॥

मित्रदामोऽनुकूलदासः। एतानि पूर्वोक्तोपसर्जनानि। व्यासस्तु स्त्रीधर्मैः पूर्वोक्तगुणैश्च युक्ता स्त्री पुण्यकर्मणः कस्यचिदेव सम्पद्यत इत्याह—

पूर्वोत्थानपरा दक्षा जघन्यासनशायिनी।
अवाग्दुष्टाऽनुकूला स्त्री भवेद्यै पुण्यकर्मणः॥

उक्तलक्षणस्त्रीकस्य स्वर्गसंनिभं सुखं तया लभ्यत इत्याह दक्षः—

अनुकूलकळत्रस्य स्वर्गस्तेन न संशयः ।

इति । तेन कळत्रेणेत्यर्थः । विपरीतकळत्रस्य नरकसंनिभं दुःखमित्याह स एव—

प्रतिकूलकळत्रस्य नरको नात्र संशयः ।

इति । प्रतिकूलकळत्रद्वयशालिनो दुःखविशेषमाह स एव—

दुःखासिका कलिर्भेदश्छिद्रपीडा परस्परम् ।
प्रतिकूलकळत्रस्य द्विदारस्य न संशयः ॥

इति । दुःखासिका दुःखेन वसनम् । कलिः कलहः । भेदो विमतिः । छिद्रपीडा छिद्रान्वेषणनिबन्धनपीडा । परस्परं कळत्रयोर्मिथ इत्यर्थः । कथं तर्हि प्रतिकूलद्विकळत्रस्य कलहादिजन्यदुःखविशेषकथनं ? उच्यते—मिथः कळत्रयोरुत्पन्नः कलहादिः तद्भर्तृपर्यन्ततामायातीत्याभिसन्धायोक्तं 'प्रतिकूलकळत्रस्य द्विदारस्य' इति ।

इति स्मृतिचन्द्रिकायां जायापत्योर्धर्माः.

अथ स्त्रीधर्माः.

तत्र मनुः—

बालया वा युवत्या वा वृद्धया वाऽपि योषिता ।
न स्वातन्त्र्येण कर्तव्यं कार्यं किञ्चिद्गृहेष्वपि ॥
बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्रस्य भर्तरि प्रेते न भजेत स्वतन्त्रताम् ॥

पित्रा भ्रात्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः ।
एषां हि विरहेण स्त्री गर्ह्यं कुर्यादुभे कुले ॥

इति । उभे कुले पितृभर्तृकुले । स्वयं च गर्ह्या भवतीति दण्डापूपन्यायेन गम्यते, या कुलस्यापि गर्ह्यतामावहति सा सुतरामात्मन इति । उक्तं च बृहस्पतिना—

भर्त्रा पित्रा सुतैर्न स्त्री वियुक्ताऽन्यगृहे वसेत् ।
असत्सङ्गे विशेषेण गर्ह्यतामेति सा ध्रुवम् ॥

याज्ञवल्क्येनाप्युक्तं—

पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः ।
हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत् ॥

व्यासस्तु वेश्यावदाचरणप्रतिषेधार्थमाह—

द्वारोपवेशनं नित्यं गवाक्षावेक्षणं तथा ।
असत्प्रलापो हास्यं च दूषणं कुलयोषिताम् ॥

नित्यमित्यवेक्षणादावनुषज्यते । बृहस्पतिस्तु स्वैरणीवदाचरणप्रतिषेधार्थमाह—

पानाटनदिवास्वापमक्रिया दूषणं स्त्रियाः ।

इति । अक्रिया अकरणं निर्व्यापारतया स्थानमिति यावत् । शङ्खलिखितौ वेश्यावदाचरणप्रतिषेधार्थमाहतुः—"स्त्री नानुक्त्वा बहिर्निष्क्रामेन्नानुत्सवे गन्धमाल्याभरणानि विकृतानि वासांसि बिभृयान्न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धेभ्यो न नाभिं दर्शयेदा गुल्फाभ्यां वासः परिदध्यान्न स्तनौ

विवृतौ कुर्यान्न हसेदनपावृतं न महाजने" इति । विकृतानीति पुरस्तात् परस्ताच्च सम्बध्यते । प्रव्रजितश्चतुर्थाश्रमी । अनपावृतं असंवृतं, क्रियाविशेषणं चैतत् । महाजनसमीपे तु संवृतस्यापि हसनस्य प्रतिषेधार्थं पुनर्निषेधः कृतः । वेश्यादिस्त्रीभिस्सहैकत्रावस्थानप्रतिषेधोपि ताभ्यां दर्शितः—'न गणिकाधूर्ताचारिणीमायाविनीकुहकशीलाविप्लुताभिस्सहैकतास्तिष्ठेत् संसर्गेण हि चारित्रं दुष्यति' इति । कुहकशीला शठस्वभावा । विप्लुता जारादिभिर्नष्टा । एकतस्स्थितिनिषेधोऽयं पुनःपुनः क्रियमाणविषय इति हेत्वभिधानादवगम्यते । न हि सकृदेकत्र स्थित्या कुलवधूनां चारित्रं दुष्यति । एवं कायशुद्ध्युपहतिहेतुभूतपरशयनादिसंसर्गं वर्जयेत् । तथाच हारीतः—'परशयनासनवस्त्राभरणानि मनसाऽपि नाध्यवस्येत् आ पुनस्संस्कारात् । तथैकपात्रे मद्यमांसादीन्युच्छिष्टनिर्माल्ये चान्यत्र गुरुभर्तृसुतेभ्यः' इति । आ पुनस्संस्कारात् आ पुर्निर्णेजनसंस्कारात् । एकपात्रग्रहणमन्येन सह भोजनोपलक्षणार्थम् । मद्यमांसग्रहणमपेयाभक्ष्याणामुपलक्षणार्थम् । अत एव सुराप्याऽत्यर्थोपहतकायया संस्पृष्टं दुष्टं भवतीत्याह स एव—

दैवे वा यदि वा पित्र्ये सुराप्यायतनं स्पृशेत् ।
रजस्वला पुंश्चली वा रक्षसां गच्छतीह तत् ॥

अत एव मद्यमांसादीनित्यादिग्रहणं कृतम् । उच्छिष्टं च निर्माल्यं चोच्छिष्टनिर्माल्ये । गुरुः पिता अन्यत्र गुरुभर्तृसु-

तेभ्य इति वदन् गुर्वादीनामुच्छिष्टनिर्माल्यवर्जनेऽपि न दोष इति दर्शयति । अपेयादिवर्जनमवश्यं कार्यम्, गर्भस्यापि दोषहेतुत्वात् । न हि दुष्टकारणजन्यमदुष्टं भवितुमर्हति । मात्रा यत्सेवितं दुष्टमदुष्टं वा तदपि गर्भकारणम् । तदेतदाहतुः शङ्खलिखितौ— 'सुरालशुनपलाण्डुगृञ्जनकळञ्जमांसादीन्यभक्ष्याणि वर्जयेन्मातुराशितपीताद्धि गर्भस्सम्भवति इति । लशुनादीनामवान्तरजातिभेदस्सुश्रुते निरूपितः । तेन भेदेन त्रयाणां ग्रहणमर्थवत् । सुरा तु स्त्रिया विशेषतो वर्जनीया, भर्तुरपि दोषावहत्वात् । तथाच हारीतः—

पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।
पतितार्धशरीरस्य निष्कृतिर्न विधीयते ॥

यमोपि—

वारुणीं यस्य विप्रस्य भार्या सेवेत संनिधौ ।
स शूद्रवद्बहिष्कार्यः सर्वस्माद्द्विजकर्मणः ॥

संनिधाविति वदन् संसर्गिण्येव भर्तरि बहिष्कारविधिरिति दर्शयति । तेन सुरापीपरित्यागिनो नोक्तदोष इत्यवगन्तव्यम् । याज्ञवल्क्योपि सुरा विशेषतो वर्ज्या ब्राह्मण्या इति दर्शयितुं तत्पानजन्यप्रत्यवायस्य फलमाह—

पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत् ।
इहैव सा शुनी गृध्री सूकरी वोपजायते ॥

तेन सुरा प्रयत्नतो वर्ज्येत्यभिप्रायः । विष्णुस्तु धर्मान्तराण्याह--'अथ स्त्रीधर्माः—क्वचित् समानवृत्तचरित्रत्वं सुसंस्कृतोपस्करता अमुक्तहस्तता सुगुप्तता मूलक्रियास्वनाभिरतिर्मङ्गळाचारतत्परता' इति । सुसंस्कृतोपस्करता प्रक्षाळनादिभिस्संस्कृतपीठादिगृहोपकरणता । अमुक्तहस्तता असद्व्ययपराङ्मुखता । मूलक्रिया मूलकर्म, मन्त्रतन्त्रादिना भर्तुर्वशीकरणमिति यावत् ।

इति स्मृतिचन्द्रिकायां स्त्रीधर्माः.

अथ स्त्रीकर्माणि.

तत्र बृहस्पतिः—

पूर्वोत्थानं गुरुष्वर्वाक् भोजनव्यञ्जनक्रिया ।
जघन्यासनशायित्वं कर्म स्त्रीणामुदाहृतम् ॥

पूर्वोत्थानं भर्तुरुत्थानापेक्षया । एवं जघन्यासनादिविधावपि भर्त्रासनाद्यपेक्षया जघन्यत्वम् । मान्येष्वादौ भोजनप्रदानादिव्यापारः । देवलोपि—'पतिशुश्रूषा सहधर्मचर्या तत्पूज्यमानपूजनं तद्वेष्यद्वेषणम्' इति । शङ्खलिखितावपि—'श्वःपचनभाण्डानामुपलेपनं सुसंमृष्टगृहद्वारोपलेपनं दध्यक्षतदूर्वाप्रवाळपुष्पकृतबलिकर्म श्वशुरयोरभिवादनं महावश्यकानि कुर्यात्' इति । श्वःपचनभाण्डानामुपलेपनं पूर्वेद्युरिति शेषः । ऋष्यशृङ्गोपि—

गृहमेधी भवेन्नित्यं भूषणानि च भूषयेत् ।
नित्यं स्नानकृतां वेणीमञ्चयेत्पुष्पमालया ॥
पूर्वमेव रहो गच्छेत् यावन्नार्यः प्रबुध्यते ।
देवताराधनं कुर्यात् धूपपुष्पाक्षतादिभिः ॥

इति । गृहमेधी गृहदेवतापूजापरा । स्नानकृतां स्नानेन संस्कृताम् । रहो गच्छेत् रहसि भर्तुः सकाशात् गच्छेत् । कात्यायनोपि—

पत्या चाप्यवियोगिन्या शुश्रूष्योऽग्निर्विनीतया ।
सौभाग्यवदवैधव्यकाम्यया भर्तृभक्तया ॥

अग्निर्गार्हपत्यादिः; औपासनाख्यो वा । सौभाग्यवदवैधव्यकाम्यया । सौभाग्योपेतमवैधव्यं कामयमानया अनेन सौभाग्यमवैधव्यं चाग्निपरिचर्याफलमित्युक्तम् । श्लोकादावन्ते च उक्तविशेषणवशाद्विनीतया पतिरपि सततं शुश्रूष्य इति गम्यते । न केवलं शुश्रूष्यः अपितु दुर्दशायामप्यलङ्घ्यः पतिरित्याह मनुः—

यस्मै दद्यात्पिता त्वेनां भ्राता वाऽनुमते पितुः ।
तं शुश्रूषेत जीवन्तं दुःस्थितं च न लङ्घयेत् ॥

इति । न च तं द्विष्यादिति चशब्दार्थः । तथाच शङ्खलिखितौ—'न भर्तारं द्विष्यादष्टीवलस्स्यात् पतितोऽङ्गहीनो व्याधितो वा पतिर्हि दैवतं स्त्रीणाम्' इति । अष्टीवलस्स्यात् अष्टीवलाख्यरोगी स्यादित्यर्थः । पतितस्य तु पातित्यापगमपर्यन्तं भार्ययाऽसौ पतिः शुश्रूषार्थं प्रतीक्ष्य इत्याह याज्ञवल्क्यः—

आशुद्धेस्सम्प्रतीक्ष्यो हि महापातकदूषितः ।

इति । पतितावस्थायां पतिः न शुश्रूष्य इत्यार्थिकोऽर्थः प्रत्येतव्यः । दुश्शीलादिस्तु पतिर्नैव दौश्शील्याद्यपगमपर्यन्तं प्रतीक्ष्यः । यदाह मनुः—

विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः ।
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः ॥

कामवृत्तः स्वच्छन्दचारी । देववदुपचर्यः देवो यथा ऐहिकामुष्मिकसुखसंपादकत्वादुपचर्यः तद्वत्पतिरपीत्यर्थः । तथाच स एव—

अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः ।
सुखं नित्यं ददातीह परलोके च योषितः ॥

मन्त्रसंस्कारकृत् मन्त्रापाद्यसंस्कारकृत्, विवाहादिसंस्कारकृदिति यावत् । याज्ञवल्क्यस्तु पतिशुश्रूषणात्मकधर्मानुरोधेनैव अन्यो धर्मः कार्य इति प्रतिपादनार्थमाह—

स्त्रीभिः भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः ।

इति । परः उत्कृष्ट इत्यर्थः । एवञ्चोत्कृष्टानुरोधेनापकृष्टानुष्ठानमित्यर्थात् प्रतिपादितम् । मनुरप्यर्थादेतदेव वक्तुमाह—

नास्ति स्त्रीणां पृथग्यज्ञः न व्रतं नाप्युपोषणम् ।
पतिः शुश्रूष्यते येन तेन स्वर्गे महीयते ॥

शङ्खोपि—

न व्रतेनोपवासेन धर्मेण विविधेन च ।

नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ॥

विष्णुस्तु—पतिशुश्रूषणमकृत्वा उपवासव्रतं न कार्यमिति प्रतिपादयितुमाह—

पत्यौ जीवति या योषित् उपवासव्रतं चरेत् ।
आयुर्हरति सा भर्तुः नरकं चैव गच्छति ॥

इति । यत्तु शङ्खलिखिताभ्यामुक्तं—'भर्तुरनुज्ञया व्रतोपवासनियमेज्यादीनामारम्भः स्त्रीधर्मः' इति, तत् पतिशुश्रूषणानुपमर्देन संपादितव्रतादिविषयम् । यत्तु पैठीनसिनोक्तं— 'स्त्रियो गृहदेवतास्तासां नाशौचं न व्रतं नोपवासः पतिशुश्रूषयैव गच्छन्ति परमां गतिम्' इति, तत् पतिशुश्रूषायाः प्राशस्त्यमात्रपरं न पुनरशौचादिनिवारणपरामिति मन्तव्यम् । एवं कुर्वन्याः फलमाह मनुः—

अनेन नारी वृत्तेन मनोवाग्देहसंयता ।
इहाग्र्यां कीर्तिमाप्नोति पतिलोकं परत्र च ॥

याज्ञवल्क्योपि—

पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥

इति । कात्यायनोपि—

पतिशुश्रूषयैव स्त्री सर्वान् कामान् समश्नुते ।
दिवः पुनरिहायाता सुखानां शेवधिर्भवेत् ॥

दिवः सकाशात् पुनरिहागता सुखानां निधिर्भवेदित्यर्थः । पृथिवीं प्रति लक्ष्मीवाक्यमपि—

नारीषु नित्यं सुविभूषितासु
पतिव्रतासु प्रियवादिनीषु ।
अमुक्तहस्तासु शुभान्वितासु
सुगुप्तभाण्डासु बलिप्रियासु ॥
संमृष्टगेहासु जितेन्द्रियासु
कलिव्यपेतासु विलोलुपासु ।
धर्मव्यपेक्षासु दयान्वितासु
स्थिता सदाऽहं मुदितासु धात्रि ॥

इति । कलिव्यपेतासु कलहरहितासु । हारीतस्तु अपतिव्रताया दोषमाह—

असाध्वी या पतिं त्यक्त्वा वर्तते कामकारतः ।
न सा सुखमवाप्नोति कल्पते नरकाय च ॥

इति स्मृतिचन्द्रिकायां स्त्रीकर्माणि.

अथ प्रोषितभर्तृकायाः स्त्रिया धर्माः.

तत्र मनुः—

विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता ।
प्रोषिते त्ववियायैव जीवेच्छिल्पैरगर्हितैः ॥

जीवनार्थं व्ययं परिकल्प्य प्रोषिते भर्तरि तद्भार्या वक्ष्यमाणनियमस्था पुनरागमनपर्यन्तं परिकल्पितं व्ययार्थं द्रव्यमुपजीवेत् ।

तत्क्षये तदकल्पने वा कर्तनादिशिल्पैः परगृहप्रवेशनदुस्सङ्गत्यादिहेतुत्वादिराहित्येनागार्हैतैर्जीवेदित्यर्थः । के पुनर्वक्ष्यमाणा नियमा इत्यपेक्षिते विष्णुः—'भर्तरि प्रोषिते प्रतिकर्माक्रिया परगृहेष्वनभिगमनं द्वारदेशगवाक्षेष्वनवस्थानम्' इति । प्रतिकर्माक्रिया अलङ्कृतेरकरणम् । तथाच हारीतः—'न प्रोषितेऽलं कुर्यान्न वेणीं मुञ्चेत्' इति । शङ्खलिखितावपि नियमानाहतुः— 'प्रेङ्खाताण्डवविहारचित्रदर्शनाङ्गरागोद्यानयानविवृतशयनोत्कृष्टपानभोजन कन्तुकक्रीडाधूपगन्धमाल्यालङ्कारदन्तधावनाञ्जनादर्शनप्रसाधनादीनामस्वतन्त्राणां प्रोषितभर्तृकाणां कुलस्त्रीणामनारम्भः' इति । प्रेङ्खा डोलाविहारो रथ्यादौ, न पुनर्गृहेऽपि । विवृतशयनं निष्प्रावरणतया शयनम् । प्रेङ्खादिप्रसाधनान्तानामनारम्भोऽस्वतन्त्राणां प्रोषितभर्तृकाणां कुलस्त्रीणामित्यन्वयः । प्रसाधनादीनामित्यादिग्रहणलब्धानाह बृहस्पतिः—

प्रसाधनं नृत्तगीतसमाजोत्सवदर्शनम् ।
मांसमद्याभियोगं च न कुर्यात्प्रोषिते प्रभौ ॥

प्रोषितभर्तृकाणां दुष्प्रसङ्गेभ्यो रक्षकजने व्यवस्थामाहतुः शङ्खलिखितौ—'सर्वासां प्रोषिते भर्तरि ब्राह्मणी चारित्रं रक्षेत् । इतरासां मातापितरौ अनन्तरो वा राजन्यो वा' इति । सर्वासां क्षत्रियादिस्त्रीणाम् । इतरासां विप्रास्त्रीणाम् । अनन्तरः प्रत्यासन्नबन्धुः ॥

इति स्मृतिचन्द्रिकायां प्रोषितभर्तृकायाः स्त्रियो धर्माः

अथ मृतभर्तृकाया स्त्रिया धर्माः.

तत्राहिताग्नेर्भार्यां प्रत्याह हारीतः—'आहिताग्निश्चेत्प्रमीयेत औपासनावक्षाणाग्निं परिगृह्य सर्पराज्ञीभिरनुसवनमिन्धाना वसेत्' इति । अर्धाधानपक्षेमृतस्याहिताग्नेस्त्रेताग्निना दहनम् । औपासनाग्निस्तु पत्यर्थमिन्धने ध्रियते । उल्मुकावस्थेन्धनान्यवक्षाणान्युच्यन्ते । एवञ्चायमर्थः—उल्मुकावस्थमौपासनाग्निं परिगृह्य 'भूमिर्भूम्ना' इति चतसृभिरनुसवनमिन्धाना श्वशुरादिगृहे वसेदिति । एव मेवानाहिताग्नेर्मृतस्य भार्या वसेत् । इयांस्तु विशेषः—औपासनाग्नेस्स्वगृह्योक्तविधिना पुनस्सन्धानं लौकिकाग्नेर्वा परिग्रहं कुर्यात् । तथाच स एव—'अनाहिताग्निश्चेदन्यमादध्याज्जनाग्निं वा परिगृह्य' इति । अनाहिताग्निश्चेत् प्रमीयीतेत्यनुषज्यते । परिगृह्य पूर्ववत् समिन्धनमाचरेदिति शेषः । अनाहिताग्नेर्दहनकर्मणि पूर्वस्थितस्यौपासनस्य प्रतिपत्तिर्जातेति पुनरुत्पत्त्यर्थमन्यमादध्यादित्युक्तम् । कथं पुनः सर्वाधानपक्षे मृतभर्तृकाया अग्निपरिचर्या, न चानाहिताग्नेर्भार्यायामुक्तमत्राप्यूह्यं, वचनबलेनैव मृतभर्तृकाया अलौकिकाग्निनिष्पत्तेः । उच्यते—निर्मथिताग्निं परिगृह्य पूर्ववत्समिन्धनमाचरेत् । 'निर्मन्थ्येन पत्नीम्' इत्यापस्तम्बेनैतस्मिन् पक्षे निर्मन्थ्येन पत्न्याः पितृमेधविधानात् । एवं स्त्रीविशेषेऽग्निविशेषसमिन्धनमुक्त्वा सर्वप्रमीतभर्तृकायास्साधारणधर्ममप्याह स एव—'भर्तुः पितुः

स्वजनस्य वा गृहमाश्रित्य संयताजिह्वाहस्तपादेन्द्रिया स्वाचारवती दिवारात्रं भर्तारमनुशोचन्ती व्रतोपवासैः कृशात्मा आयुषोऽन्ते पतिलोकं जयति न भूयः पतिवियोगमाप्नोति' इति। स्मृत्यन्तरेऽपि फलमुक्तम्—

पतिव्रता तु या नारी निष्ठां याति प्रभौ मृते।
सा हित्वा सर्वपापानि पतिलोकमवाप्नुयात् ॥

बृहस्पतिनाऽप्युक्तम्—

व्रतोपवासनिरता ब्रह्मचर्ये व्यवस्थिता।
धर्मदानपरा नित्यमपुत्राऽपि दिवं व्रजेत् ॥

यत्तु श्रुताबुक्तं 'नापुत्रस्य लोकोस्ति' इति, तत् यः पुत्रोत्पत्तौ धर्म्यमार्गेणाधिकारे जातेऽपि किं पुत्रेणेत्यनास्थया पुत्रोत्पत्तिं न करोति तद्विषयम्। अयमेव विषयोऽस्याः श्रुतेः इति दर्शयितुं मनुना दृष्टान्तोपि दर्शितः—

अनेकानि सहस्राणि कौमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता।
स्वर्गं गच्छत्यपुत्राऽपि यथा ते ब्रह्मचारिणः ॥

इति। पुत्रपौत्रादिसन्ततिमकृत्वा कौमारब्रह्मचारिणां विप्राणामनेकानि सहस्राणि स्वर्गं गतानीत्याद्यश्लोकान्वयः। या

तु पुत्रोत्पत्त्यर्थं ब्रह्मचर्येऽवस्थितिं न करोति, तस्याः दोषमाह स एव—

अपत्यलोभाद्या तु स्त्री भर्तारमतिवर्तते ।
सेह निन्दामवाप्नोति पतिलोकाच्च हीयते ॥

यत्तु यमेनोक्तम्—

स्त्रियाः श्रुतौ वा शास्त्रे वा प्रव्रज्या न विधीयते ।
प्रजा हि तस्याः स्वो धर्मः सवर्णादिति धारणा ॥

इति, । शास्त्रे धर्मशास्त्रे । प्रव्रज्या ब्रह्मचर्यमित्यर्थः । यद्यपि स्त्रिया ब्रह्मचर्यं श्रुत्यादौ विहितं, तथाऽपि सवर्णतः पुत्रप्राप्तिलक्षणधर्मप्रशंसार्थं ब्रह्मचर्यविधिरविद्यमानप्राय इति निन्दाऽनेन क्रियत इत्यविरोधः । तदेतत्कलियुगाद्युगान्तरधर्मत्वेनोक्तमिति मन्तव्यम् । तथा च संस्कारकाण्डे विधवाया नियोजनप्रकरणे प्रतिपादितमस्माभिः । तेन कलियुगे ब्रह्मचर्ये व्यवस्थितत्वमेव धर्मः । युगान्तरे तु यमोक्तोपि धर्मो भवतीत्यवगन्तव्यम् । तत्रापि ब्रह्मचर्ये व्यवस्थानमुत्तमो धर्मो ब्रह्मलोकप्राप्तिकरत्वात् । तथाच कात्यायनः—

मृते भर्तरि या साध्वी ब्रह्मचर्ये व्यवस्थिता ।
साऽरुन्धतीसमाचारा ब्रह्मलोके महीयते ॥

यत्तु विष्णुना धर्मान्तरमुक्तम्—'मृते भर्तरि ब्रह्मचर्यं तदन्वारोहणं वा' इति, तदन्वारोहणं भर्तारमनु आरोहणं,

अग्न्यारोहणम् । तथाचाङ्गिराः—

मृते भर्तरि या नारी समारोहेद्धुताशनम् ।
साऽरुन्धतीसमाचारा स्वर्गलोके महीयते ॥

तदेतद्धर्मान्तरमपि ब्रह्मचर्यधर्मात् जघन्यं, निकृष्टफलत्वात् ॥

इति स्मृतिचन्द्रिकायां मृतभर्तृका धर्माः

अथ दायविभागाख्यस्य पदस्य विधिरुच्यते.

तत्र मनुः—

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिश्च दायधर्मं निबोधत ॥

दायाख्यद्रव्याविषयधर्मं मयोच्यमानं यूयं निबोधतेत्यर्थः । किं पुनर्दायाख्यद्रव्यमित्यपेक्षिते निघण्टुकारेणोक्तं—

विभक्तव्यं पितुर्द्रव्यं दायमाहुर्मनीषिणः ।

इति । विभागार्हपित्रादिद्वाराऽऽगते द्रव्ये वृद्धा दायशब्दमाहुरित्यर्थः । अत एव धारेश्वरेणैवमेवोक्तं—'दायशब्देन पितृद्वारा मातृद्वाराऽऽगतं च द्रव्यमेवोच्यते' इति । चशब्दः सम्बन्ध्यन्तरद्वाराऽऽगतद्रव्यमपि दायशब्देनोच्यत इति सूचनार्थः । एवशब्दस्त्वनापन्नस्वत्वरूपमिति ज्ञापनार्थः । स च अयुक्तः, आपन्नस्वत्वरूपस्यैव द्रव्यस्य पितृद्वारा पुत्रपौत्रेष्वागमनात् । एवञ्चान्यसम्बन्धिनि धने विभागार्हदायशब्दो

वर्तत इति निघण्टुकारेणोक्तमिति मन्तव्यम् । दायविषयधर्मश्चात्र विभागलक्षणोऽभिप्रेतः 'स्त्रीपुंधर्मौ विभागश्च' इति पदोद्देशावसरे तस्यैव पूर्वमुक्तत्वात् । अत एव सङ्ग्रहकारः—

पितृद्वाराऽऽगतं द्रव्यं मातृद्वाराऽऽगतं च यत् ।
कथितं दायशब्देन तद्विभागोऽधुनोच्यते ॥

पितृद्वाराऽऽगतमिति यद्द्रव्यं दायशब्देन दायधर्ममिति समासान्तर्गतेन कथितं तस्य विभागोऽधुना स्त्रीपुंधर्माख्यपदप्रतिपाद्यजातस्य सर्वस्य प्रतिपादनानन्तरं मनुनोच्यत इति सङ्ग्रहश्लोकस्यार्थः । कथमुच्यत इत्यपेक्षिते मनुः—

ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरस्समम् ।
भजेरन् पैतृकं रिक्थमनीशास्ते हि जीवतोः ॥

अस्यापि तात्पर्यमाह संग्रहकारः—

यस्मिन् काले यया भङ्ग्या यैरेव क्रियतेऽपिच ।
यादृशस्य च दायस्य यथाशास्त्रं प्रदर्श्यते ॥

अस्यार्थः—यादृशस्य दायस्य पैतृकमातृकादेर्यस्मिन् काले यया समविषमादिभङ्ग्या प्रकारेण यैः पितृभ्रातृभगिन्यादिभिः कर्तृभिर्विभागः कर्तव्यः, तदेतत्सर्वं वृद्धमन्वादिशास्त्रानतिक्रमेण 'ऊर्ध्वं पितुश्च' इत्यादिना प्रदर्श्यत इति । 'ऊर्ध्वं पितुश्च' इति पितृधनविभागकाल उक्तः । मातुश्चेति मातृधनविभागकालः । तेन मातरि जीवन्त्यामपि पितृधन

विभागः कार्यः। तथा मातुरूर्ध्वं पितरि जीवत्यपि मातृधनविभागः कार्य एव। अन्यतरधनविभागे उभयोरूर्ध्वकालप्रतीक्षणानुपयोगात्। तथाच सङ्ग्रहकारः—

पितृद्रव्यविभागः स्याज्जीवन्त्यामपि मातरि।
न स्वतन्त्रतया स्वाम्यं यस्मान्मातुः पतिं विना॥
मातृद्रव्यविभागोपि तथा पितरि जीवति।
सत्स्वपत्येषु यस्मान्न स्त्रीधनस्य पतिः पतिः॥

इति। भार्यायाः पतिं विना पतिमरणेऽपि यस्मात्पत्युर्धने स्वतन्त्रत्वेन न स्वामित्वं, यस्माच्चापत्येषु विद्यमानेषु स्त्रीधनस्य भार्याधनस्य भार्यामरणेऽपि पतिः भर्ता न पतिः न स्वामी। तस्मात्तयोर्मध्ये जीवत्यप्यन्यतरस्मिन् अन्यतरधनविभागो युक्त इत्यर्थः। अनेन पितरि जीवति तद्द्रव्यविभागो मातरि च जीवन्त्यां तद्द्रव्यविभागः पुत्राद्यैर्न कार्य इत्यर्थादुक्तम्। उक्तं चान्त्यपादेन मानवे—'अनीशास्ते हि जीवतोः' इति। अनीशाः अस्वतन्त्राः। तथाच शङ्खलिखितौ—'न जीवति पितरि पुत्रा रिक्थं भजेरन् यद्यपि स्यात् पश्चादधिगतं तैरनर्हा एव पुत्रा अर्थधर्मयोरस्वातन्त्र्यात्' इति। यद्यपि तैः स्वकीयजन्मनः पश्चादनन्तरमेव पितृधने स्वाम्यमधिगतं प्राप्तं तथाऽपि जीवति पितरि पितृधनं न विभजेरन्। यतोऽर्थधर्मयोरस्वातन्त्र्यात् विभागं कर्तुमनर्हाः पुत्रा इत्यर्थः। अर्थास्वातन्त्र्यं अर्थादानप्रदानयोरस्वातन्त्र्यम्, तथाच हा-

रीतः—'जीवति पितरि पुत्राणामर्थादानविसर्गाक्षेपेष्वस्वातन्त्र्यम्' इति। अर्थादानं अर्थोपभोगः। विसर्गो व्ययः। आक्षेपः दासादिपरिजनस्यापराधेषु शिक्षार्थमाक्षेपः। अस्वातन्त्र्यं पितुरनुज्ञामन्तरेण स्वेच्छयाऽर्थादानादावप्रवृत्तिः। धर्मास्वातन्त्र्यमपि एवं पृथगिष्टापूर्तादावप्रवृत्तिः। एवंच पित्राऽनुज्ञातेन पुत्रेण स्वकर्माग्निहोत्रादि कार्यं नाननुज्ञातेनेति मन्तव्यम्। यत्तु देवलेनोक्तं—

पितर्युपरते पुत्रा विभजेरन् पितुर्धनम्।
अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते॥

इति, तत्रास्वाम्यवचनं अस्वातन्त्र्यप्रतिपादनार्थमिति मन्तव्यम्। निर्दोषे पितरि स्थितेऽपि पितृधने पुत्राणां जन्मना स्वाम्यस्य लोकसिद्धत्वात्। नन्वलौकिकं स्वाम्यं न पुत्राणां लोकसिद्धमिति वृथैव 'अस्वाम्यं हि भवेत्' इति वचनस्वारस्यभङ्गः क्रियते। न च वाच्यं प्रतिज्ञामात्रमलौकिकं स्वाम्यमिति, यतो न्यायमाह सङ्ग्रहकारः—

वर्तते यस्य यद्धस्ते तस्य स्वामी स एव न।
अन्यस्वमन्यहस्तेषु चौर्याद्यैः किं न वर्तते॥
तस्माच्छास्त्रत एव स्यात्स्वाम्यं नानुभवादपि॥

इति। यस्माद्यस्यान्तिके यद्धनं वर्तमानं दृष्टं तस्य स एव स्वामीत्यवधारयितुं न शक्यते। परकीयस्यापि चौर्यादिनाऽ-

न्यान्तिकस्थस्य दर्शने तस्यैव स्वामित्वापत्तेः । तस्माच्छास्त्रैकसमधिगम्यं स्वाम्यं न पुनर्मानान्तरगम्यमपीत्यर्थः । किंच यदि यद्यस्यान्तिके दृष्टं तस्य स एव स्वामी तर्ह्यस्य स्वमेतेनापहृतमिति न ब्रूयात्, यस्यैवान्तिके दृष्टं तस्यैव स्वामित्वात् । अपिच प्रमाणान्तरगम्ये स्वाम्ये 'ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विजितं, निर्विष्टं वैश्यशूद्रयोः' इति गौतमप्रणीते धर्मशास्त्रे यथाक्रमं वर्णानतिक्रमेण पृथक् पृथक् विभिन्नप्रकारेण विहितोऽर्थागमो व्यर्थः स्यात्, मानान्तरस्यैव नियामकत्वात्, एतद्बाधकं चाह स एव—

अस्यापहृतमेतेन न युक्तं वक्तुमन्यथा ।
विहितोऽर्थागमश्शास्त्रे यथावर्णं पृथक्पृथक् ॥
प्रतिग्रहास्त्रवाणिज्यशुश्रूषाद्यैर्यथाक्रमम् ॥

इति । अस्येत्यादिना वक्तुमित्यन्तेनात्र प्रथमं बाधकमुक्तं, अवशिष्टेन व्यर्थः स्यादित्यध्याहारसापेक्षेण द्वितीयमिति मन्तव्यम् । एवंच स्वत्वमपि स्वाम्यवदेव शास्त्रैकसमधिगम्यं विज्ञेयम् । यस्मात् स्वाम्यस्वत्वयोस्तुल्ययोगक्षेमयोरेकतरमधिकृत्य साधितेऽपि शास्त्रैकसमधिगम्यत्वे द्वयोरेव साधितं भवति। अत एव संप्रति स्वत्वमधिकृत्यापि शास्त्रैकसमधिगम्यत्वं द्वयोस्साधयितुमाह स एव—

न च स्वमुच्यते तद्वत् स्वेच्छया विनियुज्यते ।
विनियोगोपि सर्वस्य शास्त्रेणैव नियम्यते ॥

अस्यायमर्थः—न च न ब्रूमोऽन्तिके वर्तमानतया परिदृष्टं स्वमिति, किंतु यद्वस्तु येन यथेष्टं विनियुज्यते तत् तस्य स्वमित्युच्यते। ततश्च नातिप्रसङ्गादिदूषणं, अपहृतादेरयथेष्टविनियोज्यस्य स्वव्यवहाराप्रसङ्गादिति वाच्यं, यतस्सर्वस्य स्वव्यवहारविषयस्यापि धनस्य विनियोगः शास्त्रेणैव गुरुभृत्यादेः भरणादौ नियम्यत इति यथेष्टविनियोज्यं किमपि नास्तीति। प्रपञ्चितं चैतत् सर्वं धारेश्वरसूरिणा। तस्मात् 'अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते' इति धर्मशास्त्रादस्वाम्ये सिद्धे 'यद्यपि स्यात् पश्चादधिगतं तैः' इति शङ्खवचनस्यैवान्यथा व्याख्या न्याय्या।

अत्रोच्यते—न ब्रूमो यथेष्टं विनियोज्यं स्वमिति, किंतु यथेष्टविनियोगार्हं स्वमिति ब्रूमहे। ननु शास्त्रेण गुरुभृत्यादेर्भरणादौ विनियोगनियमात् यथा यथेष्टविनियोज्यं दुर्निरूपं तथा यथेष्टविनियोगार्हत्वमपि यथेष्टविनियोगाभावादेव दुर्निरूपम्। मैवं, यथेष्टविनियोगाभावेऽपि यद्येनार्जितं तत्तस्य यथेष्टविनियोगार्हमित्येवं निरूप्यते। तथा च नयविवेके भवनाथेनैवं निरूपितं 'तच्च तस्य तदर्हं यद्येनार्जितम्' इति ग्रन्थेन। तस्यायमर्थः—यद्वस्तु येन पुरुषेणार्जितं तद्वस्तु तस्य पुरुषस्य तदर्हं यथेष्टविनियोगार्हमिति। स्वत्वनिरूपणवद्यथेष्टविनियोगार्हत्वनिरूपणं चास्मिन् मते सुशकमिति चशब्दार्थः। नन्वेवं चोरस्य चौर्यार्जितं यथेष्टविनियोगार्हं स्यात् इत्याशङ्क्याह

स एव—'लोकसिद्धं चार्जनं जन्मादि' इति । जन्मक्रय-संविभागपरिग्रहाधिगमाद्येवानिदंप्रथमलोकसिद्धं धनार्जनं न पुनश्चौर्यादिकमित्यर्थः । अतिप्रसङ्गपरिहरणमपि सुशकमिति चशब्दार्थः ।

नन्विदमार्जनमनिदंप्रथमलोकसिद्धमिदं नेत्यत्र किं नियामकमित्याशङ्क्याह स एव—'अत एवानिदंप्रथमलोकधीविषयव्यवस्थितनिबन्धनार्था स्मृतिः व्याकरणादिस्मृतिवत्' इति । यत एवानिदंप्रथमलोकसिद्धार्जनमेव स्वत्वापादकं ततश्च तदेव लौकिकवैदिकव्यवहारसिद्ध्यर्थमवश्यं ज्ञेयम् । अत एवानिदंप्रथमलोकधीविषयतया व्यवस्थितार्जनानां स्वग्रन्थे निबन्धनार्था 'स्वामी रिक्थक्रयसंविभाग-परिग्रहाधिगमेषु ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोः' इत्यादिका गौतमादिप्रणीता धर्मस्मृतिः साधुशब्दनिबन्धनार्थव्याकरणादिस्मृतिवत् कृतेत्यर्थः । रिक्थं रिक्थार्जनं पित्रादिधने स्वामित्वापादकं पुत्रादिजन्मेति यावत् । तथाच पैतृकधनलाभहेतुत्वेनोक्तं गौतमेनैव —'उत्पत्तयैवार्थस्वामित्वं लभेतेत्याचार्यः' इति । 'उत्पत्त्यैव मातुर्गर्भे शरीरोत्पत्त्यैवेत्यर्थः । संविभागः पित्रादिधने विशेषनिष्ठस्वामित्वसंपादको विभागः । परिग्रहः काननादिगतजलतृणकाष्ठादेरन्येनास्वीकृतस्य स्वीकारः । अधिगमो निध्यादेरुपलब्धिः । एतेषु निमित्तेषु सत्सु पुत्रादिः क्रेता संविभक्ता

परिग्रहीताऽधिगन्ता च यथाक्रमेण पित्रादिधनस्य क्रीतस्य संविभक्तांशस्य परिगृहीतस्याधिगतस्य च स्वामी भवति।

तथाच लब्धं परिगृहीतं ब्राह्मणस्याधिकं प्रातिस्विकमार्जितं, एवं क्षत्रियस्य विजितं विजयलब्धं, एवं वैश्यस्य निर्विष्टं कृष्यादौ भृतिरूपेण लब्धम्, शूद्रस्यापि निर्विष्टं द्विजशुश्रूषादौ भृतिरूपेण लब्धम्, प्रातिस्विकमार्जितमित्येवमार्जननिबन्धनार्थाया गौतमस्मृतेरर्थो विज्ञेयः। एवञ्च यत्संग्रहकारेणोक्तं—'वर्तते यस्य यद्धस्ते' इत्यादिना, यच्च धारेश्वरसूरिणा प्रपञ्चितं, तत्सर्वमपास्तं वेदितव्यम्। ततश्च 'अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थिते' इति वचनानाञ्जस्येन शङ्खवचनाविरोधपरिहारो युक्त एवेत्यलमतिबहुना।

प्रकृतमुच्यते—निर्दोषग्रहणात् पितरि स्थितेऽपि दोषे सति न पुत्राणां तत्पारतन्त्र्यमिति दर्शयति। तेन पितरि स्थितेऽप्यक्षमत्वादिदोषे सति अर्थादानविसर्गादौ ज्येष्ठस्य स्वातन्त्र्यं, अनुजानां तु ज्येष्ठाधीनत्वमवगन्तव्यम्। अत एव शङ्खलिखिताभ्यामुक्तं—'पितर्यशक्ते कुटुम्बस्य व्यवहारान् ज्येष्ठः प्रकुर्यादनन्तरो वा कार्यज्ञस्तदनुमतेन' इति। तदनुमतेन ज्येष्ठानुमतेन, तदानीं तस्यैव स्वातन्त्र्यात्। तदनन्तरग्रहणमनुजोपलक्षणार्थं, कार्यज्ञस्यैवात्र विवक्षितत्वात्। अशक्तग्रहणं च दीनादेरुपलक्षणार्थम्। अत एव हारीतः—'कामं दीने प्रोषिते आर्तिं गते वा ज्येष्ठोऽर्थांश्चिन्तयेत्'। इति दीने इत्या-

दौ जीवति पितरीति पदद्वयमनुषज्यते । तस्य पूर्ववाक्ये श्रवणादिहाकाङ्क्षितत्वाच्च । कामामिति वदन् पितृपरतन्त्रत्वं तदानीं गतमिति दर्शयति । गते च पितृपरतन्त्रत्वे पुत्राणां पितृधनविभागकर्तृत्वार्हता जातेति पितृधनविभागोपि तदानीं पुत्राणामेवेच्छया भवितुमर्हति । अत एव शङ्खलिखितौ— 'अकामे पितरि रिक्थविभागो वृद्धे विपरीतचेतसि दीर्घरोगिणि च' इति । अकामे पितरि विभागेच्छाशून्ये पितरीत्यर्थः । वृद्धे अतिवृद्धे । विपरीतचेतसि अप्रकृतिस्थे । एतदुक्तं भवति—वार्धकादिना पितर्यस्वतन्त्रत्वमापन्ने तदनिच्छयाऽपि तद्धनविभागः पुत्राणामिच्छयैव भवतीति । दीर्घरोगिग्रहणं दीर्घकोपादेरप्युपलक्षणार्थम् । अत एव नारदः—

व्याधितः कुपितश्चैव विषयासक्तमानसः ।
अन्यथाशास्त्रकारी च न विभागे पिता प्रभुः ॥

अपितु तत्पुत्र एव प्रभवति इति शेषः । अन्यथाशास्त्रकारी स्मृत्याचारव्यपेतमार्गवर्ती । निर्दोषे पितरि स्थितेऽपि क्वचिद्विषये पुत्रकर्तृकमेव विभागमाह स एव—

अत ऊर्ध्वं पितुः पुत्रा विभजेरन् धनं समम् ।
मातुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च ।
निवृत्ते चापि रमणे पितर्युपरतस्पृहे ॥

इति । अत ऊर्ध्वमित्यादि समामित्यन्तमाद्यं वाक्यं जीवद्विभागकालबोधकं, तथाऽप्युत्तरवाक्यपूरणोपयोगार्थं पठितम् ।

पित्रोरपत्योत्पत्तिसामग्र्यभावनिश्चये स्वयपत्यविवाहे च कृते पितुर्धनस्पृहायां च गतायां तद्धनं पुत्रा एव विभजेरन्निति द्वितीयवाक्यस्यार्थः। बोधायनस्त्वत्र पितुरपि कर्तृत्वमनुमतिद्वारेणाह—'पितुरनुमत्या दायविभागः' इति। क्व तर्हि पितृकर्तृको विभाग इत्यपेक्षिते नारदः—

पितैव वा स्वयं पुत्रान्विभजेद्वयसि स्थितः।

इति। वयसि स्थित इति वदन्नप्रतिहतस्वातन्त्र्ययुक्तपितृविषय एवायं नियम इति दर्शयति। एवकारेण पितृकर्तृकनियमलाभेऽपि स्वयंग्रहणादस्मिन् विषये पुत्राणामनुमतिकर्तृत्वमपि निरस्तम्। वाशब्दः सहवासेन विकल्पार्थः, न पुनः पित्रादिकर्त्रन्तरेण, सहवासस्यैवात्र पक्षान्तरत्वात्। तथाच व्यासः—

भ्रातॄणां जीवतोः पित्रोस्सहवासो विधीयते।

इति। पितुरूर्ध्वमपि भ्रातॄणामन्योन्यमर्थोपचयार्थं सहवासोस्त्येव। तथाच शङ्खलिखितौ—'कामं सहवसेयुरेकतः संहता वृद्धिमापद्येरन्' इति। पृथक् पृथक् व्ययाभावादिति भावः। विभागे तु धर्मवृद्धिमापद्येरन्नित्याह गौतमः—'विभागे तु धर्मवृद्धिः' इति। कथमित्यपेक्षिते नारदः—

भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते।
विभागे सति धर्मोपि भवेत्तेषां पृथक् पृथक्॥

धर्मः पितृदेवद्विजार्चनजन्यः। तथाच बृहस्पतिः—

एकपाकेन वसतां पितृदेवद्विजार्चनम् ।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे ॥

नन्वग्निहोत्रादिजन्योपि धर्मो विभक्तानां वर्धते नाविभक्तानां स्वत्वाभावेनाविभक्तानां स्वस्याग्निहोत्रादिजन्यधर्मार्जनासम्भवात् । तेनाग्निहोत्रादिधर्मो विभागपक्षोत्कृष्टत्वे हेतुतया वक्तव्यः । उक्तं च तथैव सङ्ग्रहकारेण—

क्रियते स्वं विभागेन पुत्राणां पैतृकं धनम् ।
स्वत्वे सति प्रवर्तन्ते तस्माद्धर्म्या पृथक्क्रिया ॥

प्रवर्तन्ते स्वसाध्याग्निहोत्रादीनीति शेषः । अत्रोच्यते—पैतृकधनविभागेन पुत्राणां स्वं क्रियत इत्येतदयुक्तम्, जन्मनैव स्वं क्रियत इति प्रागेव प्रतिपादितत्वात् । ततश्चाविभक्तानामपि स्वत्वमस्तीति स्वसाध्याग्निहोत्रादिजन्यो धर्मः सम्पद्यत एवेति न कश्चिद्विभागपक्षस्याविभागपक्षाद्विशेष इति पूर्वोक्तप्रकारेणैव विभागपक्षे धर्मवृद्धिः गौतमादिभिरुक्तेति दिक् ॥

इति स्मृतिचन्द्रिकायां विभागकालकर्तृप्रदर्शनम.

अथ जीवद्विभागप्रकारः.

तत्र शङ्खलिखितौ–'जीवति पितरि रिक्थविभागोऽनुमतः प्रकाशं वा मिथो वा धर्मतः' इति । यो जीवद्विभागपक्षोऽनुमतः स तावत्प्रकाशं बन्ध्वादिजनसमक्षं यथा भवति तथा मिथो वा रहसि वा धर्मतो धर्मानपेतेन प्रकारेण कार्य इत्यर्थः । तमेवं प्रकारमाह कात्यायनः—

सकलं द्रव्यजातं यद्भागैः गृह्णन्ति तत्समैः ।
पितरो भ्रातरश्चैव विभागो धर्म्य उच्यते ॥

यन्मध्यगं द्रव्यजातं तत्सर्वं पित्रादयो यत्र विभागैस्समैरेव भागैर्गृह्णन्ति स विभागश्शास्त्रावगतत्वात् धर्मादनपेत इत्युच्यत इत्यर्थः । ज्येष्ठभ्रातृभागाधिक्येन विधान्तरतो धर्म्यं विभागं वक्तुं बोधायनेनोक्तं—'मनुः पुत्रेभ्यो दायं व्यभजत्, इति समोंशः सर्वेषामविशेषात्' इति । मनुः पुत्रेभ्यो दायं व्यभजदिति जीवद्विभागाभिधायके ब्राह्मणे विशेषानभिधानात् 'समं स्यादश्रुतत्वात्' इति न्यायबलादस्मादेव शास्त्रात्सर्वेषां पितृपुत्राणां सम एवांशोऽवगम्यत इत्यर्थः । ज्येष्ठस्य त्वाधिक्यं श्रुत्यन्तरासिद्धमित्याह स एव—'धनमेकं चारु समुद्धरेज्ज्येष्ठस्तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्ति' इति श्रुतिः । धनमेकामिति वदन् धनेनेत्येकवचनं श्रुतिवाक्यगतं विवक्षितमिति दर्शयति । निरवसाययन्ति तोषयन्तीत्यर्थः । तथाचापस्तम्बः—'एकधनेन ज्येष्ठं तोषयित्वा जीवन् पुत्रेभ्यो दायं विभजेत् समम्' इति । जीवन् पिता श्रेष्ठेनैकधनेन मध्यकद्रव्यादुद्धृतेन ज्येष्ठं प्रथमपुत्रं तोषयित्वाऽवशिष्टमात्मसहितज्येष्ठादिपुत्रेभ्यः समत्वेनैव विभजेदित्यर्थः । एवंच प्रथमोत्पन्नतया तदर्थमेवोद्धारः । स चैकस्यैव सर्वधनश्रेष्ठस्य, उद्धृतावशिष्टस्य समत्वेनैव विभाग इति विधान्तरमुक्तमित्यवगन्तव्यम् । एवं कात्यायनबोधायनोक्तपक्षयोर्मध्ये यं पक्षं

पिता कर्तुमिच्छति तमेव पक्षं कुर्यात्। पितृकर्तृके विभागे तस्यैव प्रभुत्वेन तादिच्छाया एव पक्षविशेषपरिग्रहकारणत्वात्। तदेतत्सर्वं संक्षिप्य याज्ञवल्क्येनोक्तं—

विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान्।
ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा स्युस्समांशिनः॥

अत्रोत्तरार्धेन प्राङ्निरूपितपक्षद्वयं पूर्वोक्तक्रमव्यत्यासेनोक्तम्। तयोरन्यतरपक्षपरिग्रहे पितुरिच्छैव कारणं न पुनः पुत्राणामपीच्छा कारणमिति पूर्वार्धेनोक्तमिति मन्तव्यम्। एवञ्चात्मेच्छया यः पक्षः पित्रा परिगृहीतः स सुतैरनपेक्षितोपि अनुमन्तव्यः। तथाच स एव—

न्यूनाधिकविभक्तानां धर्म्यः पितृकृतस्स्मृतः।

इति। न्यूनतया विभक्तानां ज्येष्ठतरेषां श्रेष्ठभागाभावेन तत्सद्भावात्, अधिकतया विभक्तो ज्येष्ठस्तेषां पितुरिच्छया स्वीकृतो यद्यद्धारपूर्वको विभागः तदा सोपि शास्त्रमूलत्वेन धर्म्यतया प्राक् स्मृत इति तैरप्यनुमन्तव्य इत्यर्थः। नारदोप्यमुमेवार्थमाह—

पित्रैव तु विभक्ता ये समन्यूनाधिकैर्धनैः।
तेषां स एव धर्म्यस्स्यात् सर्वस्य हि पिता प्रभुः॥

समधनैः कृतो यो धनाविभागव्यवहारस्तत्र पित्रा मध्येमेकमधिकं श्रेष्ठं धनं न दत्तमिति ज्येष्ठेनानुशयो न कार्यः। तथा यः पित्रा कृतो न्यूनाधिकधनैर्विभागस्तत्र पित्राऽस्मभ्यं न्यूनं दत्तं

ज्येष्ठायाधिकमिति अनुजैरनुशयो न कार्यः, पितुरिच्छया प्राप्तस्यैव अत्र धर्म्यत्वात्। कुतस्तस्यैव धर्म्यत्वमित्यपेक्षितेऽप्युक्तं—'सर्वस्य हि पिता प्रभुः' इति। सर्वविधस्य पितृकर्तृकविभागस्य यतः पितैव प्रभुरित्यर्थः। ये पुनर्धर्म्यं विभागमतिक्रामन्ति ते दण्ड्याः। यदाह बृहस्पतिः—

समन्यूनाधिका भागाः पित्रा येषां प्रकल्पिताः।
तथैव ते पालनीया विनेयास्ते स्युरन्यथा॥

पित्रा शास्त्रावगतप्रकारानुसारेणेति शेषः, प्रकारान्तरेण कल्पितानामधर्म्यत्वेनापालनीयत्वात्। न हि स्वेच्छयैव स्वार्जितधनेऽपि कस्यचित्पुत्रस्य निष्कसहस्रेण कस्यचित्पुत्रस्य कपर्दिकामात्रेण विभागः कृतो धर्म्यो भवितुमर्हति। अनिदंप्रथमसंविभागस्यैव स्वत्वव्यवस्थापकत्वात्। न चैच्छिको विषमविभागोऽनिदंप्रथम एव 'इच्छया विभजेत् सुतान्' इति स्मृतिनिबद्धत्वादिति वाच्यम्। अस्यास्स्मृतेस्तथाविधविभागानिबन्धकत्वात्। तथाहि—स्वतस्तावदयुक्तत्वेऽप्यपरार्केणास्याः स्मृतेः पारिशेष्यात्तथाविधविभागप्रतिपादनपरत्वमापादितम्। तत् प्राक्प्रतिपादितसम्यगर्थसद्भावे सत्यपास्तमिति। स्वेच्छामात्रेण पित्रा स्वार्जितधनेऽपि कृतो विषमविभागः पुत्रैरनुशये सत्यपालनीय इति सिद्धम्। यत्पुनरपरार्केणोक्तं "श्रेष्ठभागेनेत्यतदुद्धारप्रदर्शनार्थम्, तेन 'ज्येष्ठस्य विंश उद्धारः' इत्यादिभिर्मन्वादिशास्त्रैर्यावन्त उद्धारप्रकारा अभि-

हिताः ते सर्वेऽत्रोपलक्षिताः" इति, तदप्यपास्तम् 'धनमेकं चारु समुद्धरेज्ज्येष्ठः' इति जीवद्विभागोक्तोद्धारविशेषपरत्वस्यैव न्याय्यत्वात् । बृहस्पतिस्तु पितुर्भागाधिक्येन प्रकारान्तरमाह—

जीवद्विभागे तु पिता गृहीतांशद्वयं स्वकम् ।

इति । पिता विभजन्निति शेषः । तथाच नारदः—

द्वावंशौ प्रतिपद्येत विभजन्नात्मनः पिता ।

इति । विभजन्निति वदन् पितृकर्तृके जीवद्विभागे भागद्वयमात्मनो न पुनः पुत्रकर्तृके जीवद्विभाग इति दर्शयति। पितृकर्तृकविभागेऽप्यात्मनो भागद्वयग्रहणे विशेषमाहतुश्शङ्खलिखितौ—'स यद्येकपुत्रस्स्यात् द्वौ भागावात्मनः कुर्यात्' इति । स इति प्रकृतः पिता प्रत्यवमृश्यते । एकपुत्रः स्यात् अतिक्रान्तपुत्रान्तरलाभकालः स्यात्, गळितवयस्कस्स्यादिति यावत् । अत एव बहुपुत्रसद्भावविषयेऽपि गळितवयस्कस्य भूयिष्ठभागग्रहणे पितृपुत्राणां भागवैषम्यमाह हारीतः—'जीवन्नेव वा विभज्य वनमाश्रयेद्वृद्धाश्रमं वा गच्छेत् स्वल्पेन वा संविभज्य भूयिष्ठमादाय वसेत् स यद्युपदस्येत् पुनस्तेभ्यो गृह्णीयात् क्षीणांश्च विभजेत्' इति । स्वल्पेन भागेनात्मीयभागार्धप्रमाणकेन भागेन पिता पुत्रान् विभज्य द्वैगुण्येन भूयिष्ठं भागं स्वयमादाय गृह एव वा वसेत् । एवं वसन्यदि कथञ्चिदुपदस्येदशनाद्यभावेन क्षीणस्स्यात् पिता तदा तेभ्यः पुत्रेभ्यः स्वदत्तभागवशादुपचितद्रव्येभ्यः सका-

शात् स्वकुटुम्बभरणपर्याप्तं धनं पुनर्गृह्णीयात् । अथ पुत्रा एवाशनाद्यभावेन क्षीणाः तदा तान् पुनः पूर्ववद्विभजेदित्यर्थः । वनमाश्रयेत् वानप्रस्थः स्यात् । वृद्धाश्रमः चतुर्थाश्रमः । वृद्धाश्रमामिति वदन् गलितवयस्कविषयमिति दर्शयति। एवञ्चापरवयसि पुत्राश्रयार्थित्वात् 'यथा पिता पुत्रं क्षित उपधावति तादृगेव तत्' इति श्रुतिविषयत्वं पितुर्युक्तम् । स्वल्पभागग्रहणाद्यथा पुत्रः पितरं क्षित उपधावति तादृगेव तदिति श्रुतिविषयत्वं पुत्रस्य युक्तामित्यभिसंधाय 'यद्युपदस्येत्' इत्यादिना 'यथा पिता पुत्रं, यथा पुत्रः पितरम्' इत्यादितच्छ्रुतिद्वयार्थः उक्त इति मन्तव्यम् । अत एव 'पुनस्तेभ्यो गृह्णीयात् क्षीणांश्च विभजेत्' इति स्वकीयस्मृत्योरेवंविधश्रुतिमूलतां दर्शयितुमेतत्समानार्थश्रुतिद्वयं प्रतीकेन तेनैव दर्शितम्—'अथाप्यत्र ग्रहोपदासोपदायिकीं श्रुतिमुदाहरन्ति—पिताऽऽग्रयणः पुत्रा इतरे ग्रहा यद्याग्रयणः स्कन्देदुप वा दस्येदितरेभ्यो ग्रहेभ्यो गृह्णीयादितरे ग्रहाः स्कन्देयुरिति व्याख्याताम्' इति । ग्रहोपदासोपदायिकीं सोमग्रहशेषसमाधात्रीम् । आग्रयणः सोमग्रहविशेषः । इतरे आग्रयणव्यतिरिक्ता ग्राहा ऐन्द्रवायवादयः । उप वा दस्येत् उपदस्येद्वा शुष्येद्वेति यावत् । स्कन्देयुरितीतिकारोऽत्रावशिष्टश्रुतिभागप्रतीकार्थः । व्याख्याताभिति प्रतीकोपदर्शितश्रुतिभाग स्य व्याख्याऽस्माभिः 'यद्युपदस्येत् पुनस्तेभ्यो गृह्णीयात्

क्षीणांश्च विभजेत्' इति वाक्यद्वयेन कृतेत्यर्थः । अत्रापि पितुरिच्छया समविभागपक्षोपि पक्षे कार्यः,

सकलं द्रव्यजातं यद्भागैर्गृह्णन्ति तत्समैः ।
पितरो भ्रातरश्चैव बिभागो धर्म्य उच्यते ॥

इति जीवद्विभागं वदता कात्यायनेन समविभागपक्षस्य सार्वत्रिकत्वेनाभिधानात् । तेनात्र विषये यदि स्वकीयेच्छया पिता समभागपक्षं कुर्यात् तदा त्वाह याज्ञवल्क्यः—

यदि कुर्यात्समानंशान् पुत्रयः कार्यास्समांशिकाः ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥

यदि वार्धकेऽप्यात्मना सह समविभागपक्षमिच्छया पिता कुर्यात् तदा त्वात्मभागेन सह तत्समानं भागं प्रतिपत्नि गृह्णीयादित्यर्थः । एवञ्च 'जायापत्योर्न विभागो विद्यते' इति हारीतवचनविरोधशङ्का परिहृतेति सर्वमनवद्यम् । यत्र पुत्रः पितृधने धनार्जनसमर्थतया स्वांशं ग्रहीतुं नेच्छति तदा यावत् स्वीकरोति तावत्तस्मै दत्वा पृथक्क्रिया कार्येत्याह स एव—

शक्तस्यानीहमानस्य किञ्चिदत्वा पृथक्क्रिया ।

इति । यदा पुनर्जीवति पितरि पुत्रकर्तृको विभागः क्रियते तदा 'सकलं द्रव्यजातम्' इति कात्यायनेनोक्तसमभागप्रकारेण कार्यः, पुत्रकर्तृकजीवद्विभागे प्रमाणान्तरप्रतिपादकशास्त्रान्तराभावात्, 'पितुः पुत्रा बिभजेरन् धनं समम्'

इत्यनुवृत्तौ 'मातुर्निवृत्ते रजसि' इत्यादिना समविभागनियमस्य नारदोक्तस्य पूर्वप्रकरणे पुत्रकर्तृकजीवद्विभागावसरे दर्शितत्वाच्च ॥

इति स्मृतिचन्द्रिकायां जीवद्विभागप्रकरणम्.

अथाजीवद्विभागे समविभागप्रकारः.

तत्र पितरीत्यनुवृत्तौ हारीतः—'समेनैव मृते रिक्थविभागः' इति। मृते पितरि भ्रातृभिः क्रियमाणो रिक्थविभागः समांशेनैव कार्य इत्यर्थः। पैठीनसिरपि—'पैतृके विभाज्यमाने दायाद्ये भ्रातृणां समो विभागः' इति। दायाद्ये दायधन इत्यर्थः। न च भ्रातृणामिति बहुवचनबलात् द्वयोर्भ्रात्रोरविभाग एवेति वाच्यं, मध्यकद्रव्यस्वामिसमर्पणमात्रार्थत्वात्तस्य। अत एव मध्यकद्रव्यस्वामिन एकस्यैव दायविभागः देवलेन प्रतिषिध्यते—

एक एव सवर्णस्स्याद्दायोऽत्र न विभज्यते।

इति। सवर्णासवर्णानेकभ्रातृविषये तु क्वचिद्देशे दायो न विभज्यत इति दर्शयितुं सवर्णस्स्यादित्युक्तम्। उक्तं च मनुना—

ब्राह्मणक्षत्रियाविशां शूद्रापुत्रो न रिक्थभाक्।

इति। एतदुक्तं भवति—शूद्राशूद्रभ्रात्रोरनेकत्वेऽपि विवाहशून्यशूद्रापुत्रो रिक्थानर्ह इत्यशूद्र एव सर्वं गृह्णीयादिति। एवं

विभागानधिकारिसवर्णसाहित्यादनेकत्वेऽपि एक एव गृह्णीयात्। तथाच सङ्ग्रहकारः—

सर्वमेव हरेज्ज्येष्ठोऽनुजेष्वनधिकारिषु।
मध्यमो वा कनिष्ठो वा ज्यायस्यनधिकारिणि॥

इति। न त्वधिकारिसवर्णानेकभ्रातृविषयेऽपि दायो न विभज्यते। तत्र मनुः—

ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः।
शेषास्तमुपजीवेयुः यथैव पितरं तथा॥

न चैतद्वचनं सहवासपक्षशिक्षार्थमिति वाच्यम्। यतस्तदर्थमन्यदेव वचनं 'एवं सहवसेयुर्वा' इति तेनैव प्रणीतमास्ते। सत्यमास्ते, तथाऽपि प्रगल्भभ्रातृषु सहवासपक्षशिक्षार्थमेव सहवसेयुरित्यतिदेशः। अप्रगल्भानुजेषु तु तत्प्रागल्भ्यपर्यन्तं सहवास एव कार्योऽनेन प्रकारेणेति दर्शयितुं 'ज्येष्ठ एव तु गृह्णीयात्' इत्युपदेश इति नानेन वचनेन वचोभङ्ग्या सवर्णानेकभ्रातृषु दायविभागः प्रतिषिध्यत इति न कश्चिद्विरोधः। यत्तु नारदेनोक्तं—

बिभृयाद्वेच्छतस्सर्वान् ज्येष्ठो भ्राता यथा पिता।
भ्राता शक्तः कनिष्ठो वा शक्त्यपेक्षा कुले स्थितिः॥

इति, तदशक्ताखिलानुजविषयम्। यत्तु गौतमेनोक्तं—'सर्वं वा पूर्वजस्य इतरान् बिभृयात् पितृवत्' इति। न चैतन्मा-

नवेन समानार्थमिति वाच्यम्, वाशब्देन प्रगल्भभ्रातृष्वनुजानां दायहरत्वस्य पाक्षिकत्वप्रतिपादनार्थत्वावगतेः। सत्यं—न मानवेन समानार्थं, किंतु प्रत्यक्षश्रुतिविरुद्धत्वादनादर्तव्यम्। तथा चापस्तम्बः—'ज्येष्ठो दायाद इत्येके तच्छास्त्रैर्विप्रतिषिद्धं मनुः पुत्रेभ्यो दायं व्यभजदित्यविशेषेण श्रूयते' इति। ज्येष्ठ एव भ्रातृणां मध्ये पैतृकधनभागित्येके पुनराचार्या मन्यन्ते तन्मतं प्रत्यक्षश्रुतिविरुद्धं, यतस्तैत्तिरीयकब्राह्मणे—'मनुः पुत्रेभ्यो दायं व्यभजत्' इत्यविशेषेण श्रूयत इत्यर्थः। स्वमतं चानन्तरं तेनैवोक्तं 'सर्वे हि धर्मयुक्ता भागिनः' इति। सर्वे पुत्रा इति शेषः। तथाच बृहस्पतिः—

पितृरिक्थहराः पुत्राः सर्व एव समांशिनः।

इति। रिक्थे ऋणे च समांशिन इत्यर्थः। तथाच याज्ञवल्क्यः—

विभजेरन् सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्॥

इति। ऋणमत्र पैतृकं विवक्षितम्। अपैतृकस्य तदैवापाकरणनियमात्। तथाच कात्यायनः—

भ्रात्रा पितृव्यमातृभ्यां कुटुम्बार्थमृणं कृतम्।
विभागकाले देयं तत् रिक्थिभिस्सर्वमेव तु॥

नारदस्तु विभागकाले पैतृकमृणमपि देयमित्याह—

यच्छिष्टं पितृदायेभ्यो दत्वर्णं पैतृकं च यत्।
भ्रातृभिस्तद्विभक्तव्यं ऋणी स्यादन्यथा पिता॥

'पितृदायात् नव श्राद्धानि, नवश्राद्धं सह दद्युः' इति गौतमब्राह्मणात्,

पितुरूर्ध्वं विभागो य एकोद्दिष्टादनन्तरम् ।

इति संग्रहकारवचनाच्च । एवंच पैतृकं धनं नवश्राद्धपैतृकादिऋणापाकरणार्थधनादभ्यधिकं चेन्नारदोक्तमेव कार्यं, नो चेद्याज्ञवल्क्येनोक्तमेवेत्यवगन्तव्यम् । पैतृकमपि किंचिद्दृणं विभागकाले पैतृकधनादनपाकरणीयं, किंतु विभजनीयमेवेत्याह कात्यायनः—

धर्मार्थं प्रीतिदत्तं च यद्दृणं स्यान्नियोजितम् ।
तद्दृश्यमानं विभजेन्न दानं पैतृकाद्धनात् ॥

यत् धर्मार्थं संकल्पितं, यच्च पित्रा प्रीतेन वाचा दत्तं, यच्च स्वेनैव पित्रा पुत्रैरपाकरणीयमिति नियोजितं तदेतत्त्रिविधमृणं दृश्यमानं ज्ञायमानं विभजेदेवेत्यर्थः । यः पुनः पुत्रः स्वकर्तृकधनार्जनकर्मणा धनं प्राप्तुं शक्तस्सन् पितृद्वाराऽऽगतं धनं नेच्छति तस्य सन्तानतस्तदंशनिमित्तकविवादपरिहारार्थमसावितरैः पुत्रैर्विभाज्यधनात् किञ्चिद्धनं मूलधनार्थं दत्वा अवश्यं विभाज्य इत्याह—

भ्रातॄणां यस्तु नेहेत धनं शक्तस्स्वकर्मणा ।
स निर्भाज्यस्स्वकादंशात् किञ्चिदत्त्वोपजीवनम् ॥

भ्रातृविशेषस्य 'कर्मभूयस्त्वात् फलभूयस्त्वम्' इति न्यायेन सम-

भागादभ्यधिकेन धान्यादिना विवर्धनमितरैर्भ्रातृभिः कार्य-मित्याह नारदः—

कुटुम्बार्थेषु चोद्युक्त तत्कार्यं कुरुते तु यः ।
स भ्रातृभिर्बृहणीयो ग्रासाच्छादनवाहनैः ॥

इति स्मृतिचन्द्रिकायां अजोवाद्विभागे समविभागप्रकारः.

अथ विषमविभागप्रकार.

तत्र बृहस्पतिः—

पितृरिक्थहराः पुत्राः सर्व एव समांशिनः ।
विद्याकर्मरतस्तेषामधिकं लब्धुमर्हति ॥

ये पतितादिव्यतिरिक्ताः पितृरिक्थहराः पुत्राः विद्यादेरसत्तया सत्तया वा सदृशास्ते सर्वे समांशिन एव स्युः । ये पुनर्विद्यादेरसत्तया सत्तया वा विसदृशास्तेषां मध्ये यो विद्याद्युपेतः स एवोद्धारेण वा विषमविभागेन वाऽधिकं धनं लब्धुमर्हतीत्यर्थः । तत्रापि कर्मानुष्ठातृत्वतारतम्ये लभ्यधनपरिमाणश्रैष्ठ्ययोस्तारतम्यं भवति । न पुनर्विद्वत्तातारतम्येनेत्याह कात्यायनः—

यथा यथा विभागाप्तं धनं यागार्थतामियात् ।
तथा तथा विधातव्यं विद्वद्भिर्भागगौरवम् ॥

इति । द्रव्यबाहुल्ये सतीति शेषः । अत एव मनुः—

उद्धारो न दशस्वस्ति सम्पन्नानां स्वकर्मसु ।
यत्किञ्चिदेव देयं स्याज्ज्यायसे मानवर्धनम् ॥

इति । ज्येष्ठादेरर्पणार्थं विभाज्यद्रव्यराशेस्सकाशाद्योऽर्थ उद्ध्रियते स उद्धारः । दशसु कतिपयेषु जीवनपर्याप्तधनेष्विति यावत् । स्वकर्मसु स्वाधिकारतोऽनुष्ठेयकर्मसु सम्पन्नानां कर्तृत्वमापन्नानामशेषभ्रातृणां द्रव्यबाहुळ्ये सत्यपि कर्मनिष्ठत्वसाम्यादुद्धारो मानवर्धनार्थदानं च नास्ति । किंतु स्वल्पधनशालिषु विद्यादितो विसदृशेषु जीवनमात्रपर्याप्तधनत्वेनानुद्धारेऽपि सन्मानार्थं ज्यायसे किञ्चिदस्वमात्रं देयमित्यर्थः । एवञ्च येषां भ्रातृणां प्रभूतं धनं विद्यते, विद्यादौ च तारतम्यमस्ति तेषां विभागे उद्धार इति मन्तव्यम् । उद्धारप्रकारमप्याह मनुः—

ज्येष्ठस्य विंश उद्धारस्सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः ॥

ज्येष्ठस्य अग्रजस्य विद्यादिवशादुत्तमस्य विभाज्यद्रव्यराशेर्विंशतितमो भागः, तस्मिन्नेव राशौ श्रेष्ठमेकं च द्रव्यमुद्धारः। ततोऽर्धं तस्मिन्नेव राशौ चत्वारिंशत्तमो भागो मध्यममेकं द्रव्यं जन्मतो विद्यादिवशतश्च मध्यमस्योद्धारः । तुरीयं तस्मिन्नेव राशौ अशीतितमो भागः कानिष्ठमेकं द्रव्यं जन्मतो विद्यावशाच्च यवीयस उद्धारः स्यादित्यर्थः । अवशिष्टस्य च राशेर्विभागप्रकारमाह स एव—

एवं समुद्धृतोद्धारे समानंशान् प्रकल्पयेत् ।

इति । उद्धृतावशिष्टं समं विभजेदित्यर्थः । अथवा तस्मि-न्नेव विषये विषमविभाग एव स्यान्नोद्धार इत्याह स एव—

उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ।
एकाधिकं हरेज्ज्यैष्ठः पुत्रोऽध्यर्धं ततोऽनुजः ॥
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः ॥

एकाधिकमंशं द्व्यंशमिति यावत् । 'द्व्यंशी वा पूर्वजस्स्यात्' इति गौतमस्मरणात् । पूर्वजो विद्यादिनाऽपि ज्येष्ठ इत्यर्थः । अत एव बृहस्पतिः—

जन्मविद्यागुणज्येष्ठो द्व्यंशं दायमवाप्नुयात् ।

इति । एवञ्च न जन्मतः प्राथम्यादिमात्रमुद्धारे विषमविभागे वा कारणं, किंतु विद्यादिनिबन्धनश्रेष्ठत्वाद्युपेतं प्राथम्यादि-कमिति मन्तव्यम् । अयं च विषमविभागप्रकारः कलियुगे तु न वर्तत इत्याह संग्रहकारः—

यथा नियोगधर्मोऽद्य नानूबन्ध्यावधोपि वा ।
तथोद्धारविभागोपि नैव संप्रति वर्तते ॥

अद्यसंप्रतीत्येतौ शब्दौ कलियुगमभिसन्धायोक्तौ । अत एव पुराणं—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम् ॥

ज्येष्ठांशं जन्मविद्यादिनिबन्धनश्रेष्ठांशम्। गोवधं अनूबन्ध्यादिकर्माङ्गम्। कमण्डलुं गृहिणः कमण्डलुधारणम्। एतदेव धारेश्वरेणोक्तं—'ज्येष्ठस्य विंश उद्धारः इत्येवमादीनि वाक्यानि न विचार्यन्ते लोकेन अत्यन्तं परिसक्तत्वात्' इति। कलाविति शेषः, द्वापरादावनुष्ठेयत्वेनासन्तं परित्यागाभावात्। यत्पुनर्विश्वरूपेणोक्तं, यथा—

'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्।

इत्यस्य शिष्टाचारेण बाधितत्वादकरणं, एवमेवोद्धारस्यापि' इति। तदयुक्तं, स्मृतिशिष्टाचारयोर्विरोधे शिष्टाचारस्यैव दुर्बलस्य बाध्यत्वात्। दुर्बलत्वं च 'श्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टाचारः प्रमाणम्' इति वसिष्ठस्मरणादवगम्यते। किंच महोक्षादेरनुपकल्पनं शिष्टाचाराभाव एव न पुनरशिष्टाचार इति शिष्टाचारेण बाधितत्वादित्ययुक्तमुक्तं—'शिष्टाचाराभावादकरणम्' इति श्रीकरोक्तिवद्वक्तव्यम्, न च तथोक्तम्। यत्पुनर्विज्ञानेश्वरेणोक्तं—'सत्यमयं विषमो विभागश्शास्त्रदृष्टः, तथाऽपि लोकविद्विष्टत्वान्नानुष्ठेयः' इति, एतदपि नाद्रियामहे। न ह्युद्धारविभागादौ लोकविद्वेषोस्ति, प्रत्युत विद्यागुणपुण्यकर्मसम्पन्नज्येष्ठादौ भागाधिक्ये लोकानुरागो दृश्यत इति यत्किञ्चिदेतत्। ये पुनः स्मृतिसमुच्चयकाराः शम्भुश्रीकरदेवस्वाम्यादयः उद्धारविषमविभागयोरशिष्टाचारं क्वापि मन्यमाना उद्धारादिविषयाणि बहूनि

स्मृतिवाक्यानि विचारयितुं ग्रन्थविस्तरं चक्रिरे' तेषां धर्मज्ञसमयपुराणवचनाभ्यां कलौ सर्वत्र शिष्टाचाराभावस्य निश्चितत्वाद्वृथैव प्रयासो ग्रन्थविस्तरश्च जात इत्यस्माभिरुद्धारादिविषये दिङ्मात्रमेव प्रदर्शितम् ॥

इति स्मृतिचन्द्रिकायां विषमविभागप्रकारः

अथान्यान्यप्यजीवद्विभागविषयाणि कानिचिद्वचनानि लिख्यन्ते

तत्र वसिष्ठः—

'अथ भ्रातृणां दायविभागो याश्चानपत्यास्त्रियस्तासां चा पुत्रलाभात्' इति । याः पितृस्त्रियोऽनपत्या गर्भावस्थापत्यास्तासामा पुत्रलाभादा प्रसवात्सहवासेन स्थितानां भ्रातॄणां प्रसूतापत्यलिङ्गज्ञानानन्तरं दायविभागो न पुनरेवंविधविषये नवश्राद्धानन्तरं दायविभाग इत्यर्थः । नन्वस्य वचनस्य नवश्राद्धानन्तरं भ्रातृणामनपत्यपितृस्त्रीणां च दायविभागो भवतीति ऋज्वर्थः किमिति परित्यज्यते? उच्यते— अनपत्यस्त्रीणामा पुत्रलाभादिति विरुद्धार्थावगतेस्तत्परिहाराय परित्यज्यते । स्त्रीणामदायानां दायविभागासंभवाच्च परित्यज्यते । तथाच अर्हति स्त्रीत्यनुवृत्तौ बोधायनः—'न दायं निरिन्द्रिया ह्यदायाश्च स्त्रियो मता इति श्रुतिः'

इति। हिशब्दोऽत्र यस्मादर्थे । एवञ्चायमर्थः—यस्मान्निरिन्द्रिया व्याध्यादिनाऽपगतेन्द्रियाः स्त्रियश्चादाया मता इति श्रुतिस्तस्मान्न स्त्री दायं विभक्तव्या, अन्यद्वाराऽऽगत तद्द्रव्यमर्हतीति । 'निरिन्द्रिया अदायाश्च स्त्रियो मताः' इत्यनेन 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति तैत्तिरीयक श्रुतिरर्थतः प्रदर्शितेति मन्तव्यम्। यद्यदायाः स्त्रियः कथं तर्हि याज्ञवल्क्येनोक्तं—

पितुरूर्ध्वं विभजतां माताऽप्यंशं समं हरेत् ।

इति, कथितं च व्यासेन—

असुतास्तु पितुः पत्न्यः समानांशाः प्रकीर्तिताः ।
पितामह्यश्च सर्वास्ता मातृतुल्याः प्रकीर्तिताः ॥

इति। कथितं च विष्णुना—'मातरः पुत्रभागानुसारिभागहारिण्य अनूढाश्च दुहितरः' इति। न हि स्त्रीणां दायानर्हत्वे मात्रादीनां दुहित्रन्तानामंशभागित्वोक्तिर्युज्यते । बाढं युज्यते, दायानर्हाणां तु दायहारित्वोक्तिर्विरुध्यते, न पुनरंशहारित्वोक्तिः। अंशशब्दो हि भागवचनो न दायवचनः, गणद्रव्यादावप्यंशो देय इति प्रयोगदर्शनात्। तेन मात्रादीनां दायद्रव्याभावेऽपि विभाज्यराशौ स्वाम्यस्य पत्न्यधिकरणसिद्धस्य विद्यमानत्वात्तत्र यावदर्थमर्थहरणं स्वकीयस्वाम्यव्यवस्थापकं मात्रादिभिरपि कार्यमिति 'याज्ञवल्क्यादिभिरुक्तमिति मन्तव्यम्। न च दायशब्दो 'यद्धनं स्वामिसम्बन्धादेव

निमित्तादन्यस्य स्वं भवति तदुच्यते' इति दायशब्दार्थनिरूपणार्थं मिताक्षरायामुक्तं युक्तम्। एवं हि नित्यं विभागार्हमेव त्वन्मते पत्नीस्वं भवेत् दायशब्दार्थत्वात्। लोके दंपत्योर्धने विभागार्हद्रव्यमेव हि दायशब्देन प्रयुज्यते। त्वन्मते पत्नीस्वं पतिसंबन्धादेव भवतीति तस्यापि दायत्वापत्तिः। ततश्च 'अदायाः स्त्रियः' इति श्रुतिविरोधो दुर्वारः स्यात्। अस्मन्मते तु विभागार्हं स्वस्वामिसंबन्धादेव निमित्तादन्यस्य स्वं जातं दायशब्दार्थ इति विभागनर्हं पत्नीस्वं न दायः। तथाहि—पतिद्वाराऽऽगतं जायाधनं नित्यं विभागानर्हमेव, लोके दंपत्योर्धने विभागादर्शनात्। 'जायापत्योर्न विभागो विद्यते, इति हारीतस्मरणाच्च। तेनात्र न मातुः स्वाम्यव्यवस्थापको दायविभागः, किंतु यावदर्थमेवार्थग्रहणमिति मन्तव्यम्। अत एव स्मृत्यन्तरे निर्धनमातृविषयमेवांशहरणं न मातृमात्रविषयमेव ज्ञायते।

जनन्यस्वधना पुत्रैर्विभागेंऽशं समं हरेत्।

इति स्मरणात्। अस्वधना प्रातिस्विकस्त्रीधनशून्या जननी पुत्रैरजीवद्विभागे क्रियमाणे पुत्रांशसममंशं हरेदित्यर्थः। जननीग्रहणं तत्सपत्न्यादेरुपलक्षणार्थं, अस्वधनेतिविशेषणोपादानात्। स्वधनादेव स्वकीयजीवनस्य स्वानुष्ठेयस्य च धनसाध्यकर्मणः सिद्धिसंभवे जनन्यादीनां न भागग्रहणमिति गम्यते। तथा स्वधनमात्रात्तयोस्सिद्ध्यसम्भवे जनन्यादीनां

सधनानामपि न समभागहरणं, किंतु यथोपयोगं न्यूनभागस्यैव ग्रहणमिति च गम्यते, तथा विभाज्यराशेरतिबहुत्वे निर्धनानामपि जनन्यादीनां न समांशग्रहणं, किंतु यथास्वोपयोगं न्यूनस्यैव हरणमित्यपि गम्यते, अस्वधनेति विशेषणस्योपयोगवशादंशहरणं जनन्याः न पुनः भ्रातृवदायभागित्ववशादिति ज्ञापनार्थत्वात् । समामिति विशेषणस्य तूपयोगवशादसमांशस्य हरणेऽप्यवैयर्थ्यम्, अल्पविभाज्यराशावुपयोगवशादधिकहरणस्य प्राप्तस्य निवृत्त्यर्थत्वात् । यत्पुनर्विष्णुना दुहितृणां पुत्रभागानुसारिभागहारित्वमुक्तं, तत्रापि जन्मना लब्धस्वाम्यस्य पितृमरणेऽप्यस्वतन्त्रावस्थस्याप्यविभाज्यस्यादायत्वात्, अनूढा इति विशेषणोपादानाच्च विवाहार्थं पुत्रभागानुसारिभागहरणं न पुनः भ्रातृणामिव दुहितृणां दायविभागार्थमिति गम्यते । यत एव न दायविभागार्थमंशहरणं किंतु विवाहसंस्कारार्थं अत एव विभाज्यधनबाहुळ्याभावविषयमेतदिति वक्ष्यते । अत एव च देवलेनोक्तं—

कन्याभ्यश्च पितृद्रव्ये देयं वैवाहिकं वसु ।

विवाहप्रयोजकं धनमित्यर्थः । अत एव च संस्कार्या इत्यनुवृत्तौ याज्ञवल्क्येनोक्तं—

भगिन्यश्च निजादंशाद्दत्वाऽंशं तु तुरीयकम् ।

इति । एकस्य पुत्रस्य यावान्निजांशस्तच्चतुर्थांशं प्रतिभगिनि

प्रदाय भ्रातृभिर्भगिन्यः संस्कार्या विवाहयितव्या इत्यर्थः। स्मृत्यन्तरेऽपि—

भ्रातृभ्योंऽशचतुर्भागं तत्र कन्या हरेद्धनम्।

इति। भ्रातृभ्यस्सकाशादंशं चतुर्थांशं धनं तत्र अजीवद्विभागे एकैका कन्या हरेदित्यर्थः। अनल्पविभाज्यविषयमेतत्। तथाच कात्यायनः—

कन्यकानां त्वदत्तानां चतुर्थो भाग इष्यते।
पुत्राणां तु त्रयो भागाः साम्यं त्वल्पधने स्मृतम्॥

कन्यकानां प्रत्येकमिति शेषः। एवं पुत्राणामित्यत्रापि शेषो द्रष्टव्यः। अल्पे विभाज्यधने पुत्रभागसाम्यं त्वेकैककन्यकाभागस्य विष्ण्वादिना स्मृतमिति तुरीयपादार्थः। एवञ्चानल्पे विभाज्यधने चतुर्थो भाग इति पारिशेष्यादवगम्यते। 'पुत्राणां तु त्रयो भागाः' इत्येतत् समसङ्ख्याकभ्रातृभागिनीविषयम्। यत्र तु भगिन्यो न्यूनसङ्ख्याकास्तत्र पुत्राणां न त्रयो भागाः किंतु किञ्चिदभ्यधिकाः। यत्पुनः मनुनोक्तं—

स्वेभ्योंऽशेभ्यस्तु कन्याभ्यः प्रदद्युर्भ्रातरः पृथक्।
स्वात् स्वादंशाच्चतुर्भागं पतितास्स्युरदित्सवः॥

इति। यद्यप्यत्र स्वात् स्वात् इति वीप्सया यावन्तो भ्रातृणामंशास्तावन्त एव चतुर्थांशाः कन्याभ्यो भ्रातृभिः प्रदेया इति ऋज्वर्थः प्रतिभाति। तथाऽप्यधिकसङ्ख्याककन्याविषय

त्वान्न प्राचीनस्मृतिविरोधः । न चात्रैकैकस्याः स्वात् स्वात् अंशाच्चतुर्थांशदानं, येन प्राचीनस्मृतिविरोधः । किंतु समुदायस्येति सुतरामविरोधः । दत्तं च कन्याभिस्समत्वेन विभज्य ग्राह्यम् । यत्पुनर्विष्णुनोक्तं— 'अनूढानां च कन्यानामंशवान् स्ववित्तानुसारेण संस्कारं कुर्यात्' इति, तदेकपुत्रतया दायविभागाभावविषयम् । यद्वा भ्रातृणां सहवासविषयम् । कन्याग्रहणं असंस्कृतानां पितुरपत्यानामुपलक्षणार्थम् । अत एव व्यासः—

असंस्कृतास्तु ये तत्र पैतृकादेव ते धनात् ।
संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यकाश्च यथाविधि ॥

बृहस्पतिः—

असंस्कृता भ्रातरस्तु ये स्युस्तत्र यवीयसः ।
संस्कार्याः पूर्वजैस्ते वै पैकृतान्मध्यकाद्धनात् ॥

तत्र अजीवत्पितृकेषु भ्रातृष्वित्यर्थः । असंस्कृताः पित्रेति शेषः । अत एव नारदः—

येषां वै न कृताः पित्रा संस्कारविधयः क्रमात् ।
कर्तव्या भ्रातृभिस्तेषां पैतृकादेव ते धनात् ॥

पैतृकधनाभावेऽप्याह स एव—

अविद्यमाने पित्र्येऽर्थे स्वांशादुद्धृत्य वा पुनः ।
अवश्यकार्याः संस्कारा भ्रातृणां पूर्वसंस्कृतैः ॥

संस्कारा जातकर्माद्या उपनयनान्ता विवक्षिताः, अवश्यका र्या इत्यभिधानात् । विवाहादिसंस्कारस्य तु नैष्ठिकत्वादिपक्षान्तरदर्शनादवश्यकार्यताऽभावात् संस्कारशब्दस्य संकोचोऽत्र विवक्षित इत्यनवद्यम् । कन्यकानां तु विवाहान्तास्संस्कारा उपनयनरहिताः पित्र्यार्थाभावे स्वार्थादुद्धृत्य कार्याः । विवाहस्योपनयनस्थानत्वेनावश्यकार्यत्वात् । विभागकालेऽन्यदपि धनं कन्यका स्वधृतालङ्कारादिकं लभत इत्याह शङ्खः—'विभज्यमाने दायाद्ये कन्यालङ्कारं वैवाहिकं स्त्रीधनं च कन्या लभेत्' इति । दायाद्ये दायधने भ्रातृभिर्विभज्यमाने कन्या स्वधृतालङ्कारं वैवाहिकं तुरीयांशादिधनं स्त्रीधनं च पित्रादिना दत्तं लभेदित्यर्थः । बोधायनोऽपि—'मातुरलङ्कारं दुहितरस्सांप्रदायिकं लभेरन् अन्यद्वा' इति । साम्प्रदायिकं मातृपरम्परायातम् । अन्यत् तादितरद्वा मात्रा धृतमलङ्कारं मातृकं तत्र विभज्यमाने दुहितरः कुमार्यो लभेरन्नित्यर्थः ॥

इति स्मृतिचन्द्रिकायां अजीवद्विभागविषयाणि.

अथ अन्यान्यपि दायांशानर्हविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र देवलः—

मृते न पितरि क्लीबकुष्ठ्युन्मत्तजडान्धकाः ।
पतितः पतितापत्यं लिङ्गी दायांशभागिनः ॥

मृते पितरि क्लीबादयो धनांशभागिनो न भवन्तीत्यर्थः। लिङ्गी नैष्ठिकवनस्थादिः। क्षपणकपाशुपतादिश्चात्र विवक्षितः। मृते पितरीति विभागकालप्रदर्शनार्थमुक्तम्। तेन पितरि जीवत्यपि जीवद्विभागे क्लीबादयो दायभागिनो न भवन्ति। अत एव जीवद्विभागेऽप्यभागित्वमेतेषां वक्तुमुक्तमापस्तम्बेन—'जीवन् पुत्रेभ्यो दायं विभजेत् समं क्लीबमुन्मत्तं पतितं च परिहाप्य' इति। चशब्दः कुष्ठिजडान्धादीनां सङ्ग्रहार्थः। परिहाप्य वर्जयित्वेत्यर्थः। मनुरप्यनंशभागिन आह—

अनंशौ क्लीबपतितौ जात्यन्धबधिरौ तथा।
उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥

निरिन्द्रियाः व्याध्यादिना विनष्टघ्राणादीन्द्रियाः। नारदोऽपि—

पितृद्विट् पतितषण्डो यश्च स्यादपपात्रितः।
औरसा अपि नैतेऽंशं लभेरन् क्षेत्रजाः कुतः॥

अपपात्रितः अपपात्रीकृतः। 'अपपात्रितस्य रिक्थपिण्डोदकानि व्यावर्तन्ते' इति शङ्खलिखितस्मरणात्। अपपात्रितस्य महापराधेन बन्धुभिर्बहिष्कृतस्येत्यर्थः। वसिष्ठोऽपि—'अनंशास्त्वाश्रमान्तरगताः' इति। गृहस्थाश्रममपेक्ष्येति शेषः। न चैवमुपकुर्वाणस्य ब्रह्मचारिविशेषस्याप्यंशशून्यत्वमायातमिति वाच्यं, गृहस्थाश्रमानर्हत्वकार्याश्रमान्तरस्यात्र विवक्षितत्वात्। विष्णुरपि—'पतितक्लीबाचिकित्स्यरोगविकलास्त्वभागहराः' इति।

विकलः इन्द्रियविकलः। अचिकित्स्यरोग इति वदन् अचिकित्स्यक्लैब्यवैकल्यादिशालिनोऽप्यभागहरा इति दर्शयति। तेन विभागकालस्थितक्लैब्यादिशालिनामभागहरत्वं न पुनस्सहजबाधिर्यक्लैब्यादिशालिनामेवेति मन्तव्यम्। कात्यायनः—

अक्रमोढासुतश्चैव सगोत्राद्यस्तु जायते।
प्रव्रज्यावसितश्चैव न रिक्थं तेषु चार्हति॥

अक्रमोढासुतो वर्णक्रमजन्मक्रमातिक्रमेण परिणीतायाः सुतो यः। तथा सगोत्रात् सगोत्रस्त्रीपरिणेतुस्सकाशाद्यस्सुतस्सगोत्रस्त्रियां जायते। तथा प्रव्रज्यावसितः स्वीकृतचतुर्थाश्रमत्यागी यो भवेत्। तेष्वक्रमोढासुतादिषु रिक्थं प्राप्तुं नार्हति, ते रिक्थानर्हा इत्यर्थः। मनुरपि—

अनियुक्तासुतश्चैव पुत्रिण्याऽऽप्तश्च देवरात्।
उभौ तौ नार्हतो भागं जारजातककामजौ॥

अनियुक्तायां परस्त्रियामपरिणेतुस्सकाशादुत्पन्नः सुतो जारजातकः, स्वार्थे कप्रत्ययः। परिणेत्रोत्पन्नपुत्रवसां देवरात् उत्पन्नः कामजः। तावुभौ भागं नार्हत इत्यर्थः। एतदुक्तं भवति—जारजातः नियोगविध्यतिक्रमेण जातश्च क्षेत्रिणो धनभागं नार्हतीति। बृहस्पतिरपि—

सवर्णजोऽप्यगुणवान् नार्हस्स्यात्पैतृके धने।

इति। अगुणवान् पितृदृष्टादृष्टकार्योपयोगिगुणरहितः। तथा चानन्तरमुक्तं तेनैव—

उत्तमर्णाधमर्णाभ्यां पितरं त्रायते सुतः ।
अतस्तु विपरीतेन नास्ति तेन प्रयोजनम् ॥
तया गवा किं क्रियते या न दोग्ध्री न गार्भिणी ।
कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ॥
शास्त्रशौर्यार्थरहितस्तपोविज्ञानवर्जितः ।
आचारहीनः पुत्रस्तु मूत्रोच्चारसमस्स्मृतः ॥

इति । उत्तममृणं ऋषिदेवपितॄणाम् । अधममृणं धनिकहस्तात् गृहीतम् । यथा मूत्रपुरीषे स्वकीयोदरान्निर्गते अप्ययन्तहेयभूते तथैव विद्यादिरहितः सूनुरौरसोपि हेयभूत इति मूत्रोच्चारसम इत्युक्तम् । मनुरपि—

सर्व एव विकर्मस्था नार्हन्ति भ्रातरो धनम् ॥

इति । विकर्मस्थाः निषिद्धकर्मैकनिरताः । धनं विभाज्यधनम् । एवं निरूपितनिरंशकास्सर्वे पोषणीयाः । तथाच याज्ञवल्क्यः—

क्लीबोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः ।
अन्धोऽचिकित्स्यरोगाद्या भर्तव्यास्तु निरंशकाः ॥

तज्जः पतितोत्पन्नः । आद्यशब्देनान्येषां प्राक्प्रतिपादितानां ग्रहणम् । भर्तव्याः दायहरैरिति शेषः । 'रिक्थग्राहिभिस्ते भर्तव्याः' इति विष्णुस्मरणात् । कथं भर्तव्या इत्यपेक्षिते मनुः—

सर्वेषामपि तु न्याय्यं दातुं शक्यं मनीषिणा ।
ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ॥

अयन्तं यावज्जीवमित्यर्थः । कात्यायनः—

ग्रासाच्छादनमयन्तं देयं तद्बन्धुभिर्मतम् ।
बन्धूनामप्यभावे तु पितृद्रव्यं तदाऽऽप्नुयात् ॥
अपित्र्यं द्रविणं प्राप्तं दापनीया न बान्धवाः ।

इति । तद्बन्धुभिः निरंशकबन्धुभिः । तत्पितृद्रव्यग्राहिभिर्ग्रासाच्छादनं देयमिति मन्वादीनां मतमित्यर्थः । अपित्र्यमित्यादेरयमर्थः—निरंशकपितृद्रविणं तद्बन्धुभिरप्राप्तं, राज्ञा तद्बन्धवो भरणाय न दापनीया इति । एतदुक्तं भवति । निरंशकपितृधनाग्राहकबान्धवानामनावश्यकं निरंशकभरणमिति । एवमशेषनिरंशकानां भरणं प्राप्तं कस्यचित्पर्युदासं कुर्वन्नाह देवलः—

तेषां पतितवर्ज्येभ्यो भक्तवस्त्रं प्रदीयते ।

इति । पतितोत्पन्नस्यापि पतितत्वात् सोपि वर्ज्यः । अत एव बोधायनः—'अतीतव्यवहारान् ग्रासाच्छादनैः बिभृयुः अन्धजडक्लीबव्यसनिव्याधितादींश्चाकर्मिणः पतिततज्जातवर्ज्यम्' इति । अतीतव्यवहाराः मूकादयः । अकर्मिणः धर्मार्थवृत्त्यर्थकर्मस्वक्षमाः । वसिष्ठस्तु तन्त्रोक्तचैव चतुर्णां भरणप्रतिषेधमाह—'अनंशास्त्वाश्रमान्तरगताः क्लीबोन्मत्तपतिताश्च भरणं क्लीबोन्मत्तानाम्' इति । अत्र विशेषग्रहणं शेषप्रतिषेधार्थमिति न्यायेन पतिताश्रमान्तरगतविषयस्य भरणस्य प्रतिषे-

धो गम्यते। आश्रमान्तरगतिमन्तरेण प्रव्रज्यावसितत्वासंभवात् प्रव्रज्यावसितविषयभरणस्यापि प्रतिषेधोऽत्रावगम्यते। एवञ्च पतिततज्जाताश्रमान्तरगतप्रव्रज्यावसिततज्जानां निरंशकानां भरणमनावश्यकमिति मन्तव्यम्। निरंशकपुत्राणामंशग्रहणविरोधिक्लैब्याद्यभावेऽपि निरंशकपुत्रत्वेन पैतामहधनानर्हत्वे प्राप्ते तदपवादमाह देवलः—

तत्पुत्राः पितृदायांशं लभेरन् दोषवर्जिताः।

इति। तत्पुत्राः निरंशकपुत्राः। अंशग्रहणविरोधिक्लैब्यादिदोषवर्जिताः पितृदायांशं पैतामहधनांशं लभेरन्नित्यर्थः। न चेदं वचनं पतितापत्यस्यापि पैतामहधनभागित्वं प्रापयति तत्पुत्रा इति सामान्येनाभिधानादिति शङ्कनीयं, दोषवर्जिता इत्यनेन व्युदस्तत्वात्। पतितस्यापि पुमपत्यं पतितमेव भवति। तथाच वसिष्ठः—'पतितोत्पन्नः पतितो भवतीत्याहुरन्यत्र स्त्रियाः सा हि परगामिनी' इति। पतितस्य पुत्रवत् प्रतिलोमायाः स्त्रियाः पुत्रस्य पुत्रोपि पैतामहधनानर्हः अंशग्रहणविरोधिदोषसद्भावात्। अत एव विष्णुः—'तेषामेवौरसाः पुत्रा भागहारिणो न तु पतितस्य पतनीये कृते कर्मण्यनन्तरोत्पन्नाः प्रतिलोमासु स्त्रीषूत्पन्नाश्चाभागिनस्तत्पुत्राः पैतामहेऽप्यर्थे' इति। अनन्तरोत्पन्नाः पश्चादुत्पन्नाः, आनन्तर्यस्याविवक्षितत्वात्। ते तु न भागहारिणः। एवं प्रव्रज्यावसितादिपुत्रेषु यत्रयत्र अंशग्रहणविरोधिदोषोऽस्ति

तत्रतत्र पैतामहधनाभागित्वं विज्ञेयम् । क्षेत्रजपुत्रविषयेऽप्युक्तं याज्ञवल्क्येन—

औरसक्षेत्रजास्तेषां निर्दोषा भागहारिणः ।

इति, तत् द्वापरादिविषयमिति मन्तव्यं, कलौ क्षेत्रजपुत्रनिषेधात् । सदोषास्त्वौरसादयो भर्तव्या इत्येतत्

अन्धोचिकित्स्यरोगाद्या भर्तव्यास्तु निरंशकाः ।

इत्यनेनैवोक्तमितीह नोक्तं, किंतु पूर्वं यन्नोक्तं तदाह स एव—

सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः ।
अपुत्रा योषितश्चैषां भर्तव्यास्साधुवृत्तयः ॥
निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च ।

इति । सुताः कन्यकाः एषां निरंशकानाम् । भर्तव्याः निरंशकपितृद्रव्यग्राहिभिर्निरंशकभरणप्रकारेणैव । यावज्जीवमित्यस्यापवादो 'यावद्वै भर्तृसात्कृताः' इति, यावद्विवाहसंस्कृता भवन्ति तावदेवेत्यपवादभागस्यार्थः । एषां निरंशकानामपुत्रा योषितः परिणीताः स्त्रियः सदाचारा निरंशकपितृद्रव्यग्राहिभिरेव निरंशकभरणप्रकारेणैव भर्तव्याः । व्यभिचारिण्यः भरणकर्तुः प्रतिकूलाश्च गृहाद्बहिः कार्याः । तत्रासाधुवृत्तयो निर्वासिता न भर्तव्याः । प्रतिकूलास्तु निर्वासिता न भर्तव्याः ।

इति स्मृतिचन्द्रिकायां अंशानर्हविषयाणि.

अथ विभाज्यनिरूपणम् ।

तत्र कात्यायनः—

पैतामहं च पित्र्यं च यच्चान्यत्स्वयमार्जितम् ।
दायादानां विभागे तु सर्वमेतद्विभज्यते ॥

स्वयमार्जितं पित्र्याद्यविभक्तद्रव्योपयोगेन स्वयमार्जितं, तदनुपयोगेन स्वयमार्जितस्याविभाज्यत्वात् । एवं त्रिविधं धनं सर्वं विभज्यते । यदि नास्ति पितामहादिकृतमृणादिकमिति शेषः । अस्ति चेन्न सर्वं, अपि तु ऋणादिकं दत्वाऽवशिष्टं विभज्यते । तथाच स एव—

ऋणं प्रीतिप्रदानं तु दत्वा शेषं विभाजयेत् ।

इति । प्रीतिप्रदानं प्रीत्या प्रदत्तं शेषं विभाजयेदिति वदन् विभाज्यबाहुळ्यविषयमेतादिति दर्शयति । तदबाहुळ्यविषये तु रिक्थवदृणमपि विभाज्यमित्यजीवद्विभागप्रकरणे प्रदर्शितम् । विभागकाले यदृणं प्रीतिदेयं तस्याकूटत्वनिश्चयार्थं बन्धुभिस्सह रिक्थग्राहिभिस्तद्विचार्यमित्याह स एव—

ऋणमेवंविधं शोध्य विभागे बन्धुभिस्सह ।

इति । वञ्चनार्हं रिक्थमपि विशोध्यमित्याह स एव—

गृहोपस्करवाह्याश्च दोह्याभरणकर्मिणः ।
दृश्यमाना विभज्यन्ते कोशं गूढेऽब्रवीद्गुः ॥

कर्मिणः कर्मकरा दासादयः । गूढे द्रव्ये वञ्चनाशङ्कायां

कोशाख्यं दिव्यं भृगुरब्रवीदित्यर्थः । तथाच स एव—

गूढद्रव्याभिशङ्कायां प्रत्ययस्तत्र कीर्तितः ।

इति । प्रत्ययो दिव्यम्, तदपि कोशाख्यमेवेत्युक्तं प्राक् । बृहस्पतिरप्यत्र तदेव दिव्यं भवतीत्याह—

गृहोपस्करवाह्यादिदोह्यभरणकर्मणः ।
दृश्यमाना विभज्यन्ते गूढे कोशो विधीयते ॥

न च कोशग्रहणं यथाप्राप्तदिव्योपलक्षणार्थमिति वाच्यं,

शङ्काविश्वाससंधाने विभागे रिक्थिनां सदा ।
क्रियासमूहकर्तृत्वे कोशमेव प्रदापयेत् ॥

इति कात्यायनीये विभागविषयेऽभिहितेऽपि कोशे पुनरिह विषयाभिधानस्य नियमार्थत्वात् । तेन बार्हस्पत्येऽपि कोशग्रहणं नियमार्थमेव ॥

इति स्मृतिचान्द्रिकायां विभाज्यनिरूपणम्.

अथ अविभाज्यनिरूपणम् .

तत्र व्यासः—

विद्याप्राप्तं शौर्यधनं यच्च सौदायिकं भवेत् ।
विभागकाले तत्तस्य नान्वेष्टव्यं स्वरिक्थिभिः ॥

विद्याप्राप्तशब्देनात्र न विद्यामात्रप्राप्तं धनमुच्यते, किंतु विद्याविशेषप्राप्तम् । तथाच कात्यायनः—

परभक्तोपयोगेन विद्या प्राप्ताऽन्यतस्तु या ।
तया प्राप्तं धनं यत्तु विद्याप्राप्तं तदुच्यते ॥

परान्यशब्दावत्राविभक्तापेक्षया यद्वयक्तयन्तरं तत्र प्रयुक्तौ । भक्तशब्दोत्र द्रव्यमात्रोपलक्षकतया प्रयुक्तः । उक्तलक्षणया विद्यया धनप्राप्तौ निमित्तत्वमनेकविधमिति निमित्तभावभेदेन तत्प्राप्तं धनमप्यनेकविधं, तत्सर्वमविभाज्यमिति संक्षेपतो विद्याप्राप्तशब्देनैव व्यासेनाभिहितम् । तत्स्वग्रन्थे प्रपञ्चयितुमप्याह कात्यायनः—

उपन्यस्ते तु यल्लब्धं विद्यया पणपूर्वकम् ।
विद्याधनं तु तद्विद्याद्विभागे न विभज्यते ॥
शिष्यादार्त्विज्यतः प्रश्नात् सन्दिग्धप्रश्ननिर्णयात् ।
स्वज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत् ।
विद्याधनं तु तत्प्राहुर्विभागे न विभज्यते ।
परं निरस्य यल्लब्धं विद्यातो द्यूतपूर्वकम् ॥
विद्याधनं तु तद्विद्यान्न विभाज्यं बृहस्पतिः ।
विद्याप्रतिज्ञया लब्धं शिष्यादाप्तं च यद्भवेत् ॥
ऋत्विङ्न्यायेन यल्लब्धमेतद्विद्याधनं भृगुः ।
शिल्पिष्वपि हि धर्मोऽयं मूल्याद्यच्चाधिकं भवेत् ॥
विद्याबलकृतं चैव याज्यतश्शिष्यतस्तथा ।
एतद्विद्याधनं प्राहुः सामान्यं यदतोऽन्यथा ॥

इति । उपन्यस्ते वर्गत्यागादिवैचित्र्येणोपन्यस्ते । शिष्यात्

अध्यापनात् । आर्त्विज्यतः आर्त्विज्यकरणात् । प्रश्नात् उपपातक्यादिकृतप्रायश्चित्तार्थप्रश्नात् । संदिग्धप्रश्ननिर्णयात् अर्थ्यादिकृतप्रश्नप्रतिप्रश्नयोर्निर्णयात् । स्वज्ञानशंसनात् अग्रपूजादौ स्वज्ञानप्रख्यापनात् । वादात् जल्पवितण्डादिभेदात् । प्राध्ययनात् घटिकाध्ययनात् । विद्यातः अक्षहृदयज्ञानादिना । विद्याप्रतिज्ञया बहुविद्याढ्यत्वप्रतिज्ञया । शिष्यादाप्तं गुरुपूजनार्थम् । ऋत्विङ्न्यायेन लब्धं उपद्रष्टृत्वादिना लब्धम् । शिल्पिष्वापि शिल्पिविद्योपजीविष्वापि । अयं विद्याधनविभागरूपो धर्मोस्ति । मूल्यात् भृतेः यद्धनमधिकं भृतकाध्ययनादौ भवेत् । तथा विद्याबलकृतं विद्याधिक्यकृतं यद्विशिष्टपूजादौ भवेत् । तथा याज्यतः शिष्यतः सत्कारादौ भवेत् । तदेतद्विद्याधनं प्रातिस्विकं प्राहुः । अतो विद्याधनाद्यदन्यथाभूतं विभक्तपित्रादिद्रव्योपयोगेन प्राप्तं तदविभक्तानां सामान्यं साधारणं विभाज्यमिति यावत् । शेषं व्यक्तार्थम् । नारदोपि सामान्यं विद्याधनमाह—

कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।
भागं विद्याधनात्तस्मात्स लभेताश्रितोपि सन् ॥

अविभक्तधनोपयोगेन प्राप्तविद्याधनस्य विभाज्यत्वप्रदर्शनार्थमेतत् । आश्रितोपि अविद्योपीत्यर्थः । एवमविभक्तपित्रादिग्राहितविद्यालब्धमपि धनं विभाज्यम् । तथाच कात्यायनः—

कुले विनीतविद्यानां भ्रातृणां पितृतोपि वा ।

शौर्यप्राप्तं तु यद्वित्तं विभाज्यं तद्बृहस्पतिः ॥

इति । अविभक्तस्वकुले पितृद्रव्यादेः पितृतोपि वा शिक्षितविद्यानां यद्वित्तं शौर्यादिप्राप्तं विद्ययैव प्राप्तं तत् विद्याधनं विभाज्यं बृहस्पतिरब्रवीदित्यर्थः । विभाज्यविद्याधने भागाधिक्यमार्जकस्यास्ति, 'येन चैषां स्वयमार्जितं स्यात् स द्व्यंशमेव हरेत्' इति वासिष्ठस्मरणात् । गौतमस्त्वविभाज्यविद्याधनेऽपि अंशदानमार्जकेच्छयाऽपि क्वचिदाह—'स्वयमार्जितं वैद्येभ्यो वैद्यः कामं दद्यात्' इति । वैद्येभ्यः विद्यावद्भ्यः । नारदस्तु इच्छाशून्यो न दद्यादित्याह—

वैद्यो वैद्याय नाकामो दद्यादंशं स्वतो धनात् ।
पितृद्रव्यं समाश्रित्य न चेत्तेन तदाहृतम् ॥

पूर्वार्धे यद्धनादिति सामान्येनोक्तं तदविभाज्यविद्याधनविषयमित्युत्तरार्धेनावगन्तव्यम् । अवैद्याय सकामोपि न दद्यात् । तथा च कात्यायनः—

नाविद्यानां तु वैद्येन देयं विद्याधनात्क्वचित् ।
समविद्याधिकानां तु देयं वैद्येन तद्धनम् ॥

अवैद्यानां न क्वचिद्देयं, सकामेनापि न देयमित्यर्थः । शौर्यधनं च तेनैव निरूपितं—

आरुह्य संशयं यत्र प्रसभं कर्म कुर्वते ।
तस्मिन् कर्मणि तुष्टेन प्रसादः स्वामिना कृतः ॥

तत्र लब्धं तु यत्किञ्चित् धनं शौर्येण तद्भवेत् ।

इति । प्रसभो बलात्कारः । अन्यदप्यविभाज्यमाह स एव—

ध्वजाहृतं भवेद्यत्तु विभाज्यं नैव तत्स्मृतम् ॥

इति । ध्वजाहृतपदप्रतिपाद्यमप्युक्तं तेनैव—

सङ्ग्रामादाहृतं यत्तु विद्राव्य द्विषतां बलम् ।

स्वाम्यर्थे जीवितं सक्त्वा तद्ध्वजाहृतमुच्यते ॥

एतदपि शौर्यधनशब्देनैव व्यासेनाभिहितं, तद्विशेषत्वात् । कात्यायनेन भेदेन ध्वजाहृतस्याभिधानं प्रपञ्चनार्थमिति मन्तव्यम् । अत्रापि विद्याप्राप्तवदविभाज्यत्वे पित्राद्यविभक्तधनानुपयोगेनार्जनं प्रयोजकमित्यवगन्तव्यम् । अत एव तदुपयोगेनार्जितं विषमविभागेन विभाज्यं भवतीत्याह व्यासः—

साधारणं समाश्रित्य यत्किञ्चिद्ग्राहनायुधम् ।

शौर्यादिनाऽऽप्नोति धनं भ्रातरस्तत्र भागिनः ॥

तस्य भागद्वयं देयं शेषास्तु समभागिनः ।

इति । साधारणं विभक्तानां धनम् । भ्रातृग्रहणमविभक्तोपलक्षणार्थम् । तस्य साधारणधनाश्रयादार्जितस्येत्यर्थः । शौर्यादिनेति वदन् अन्यत्रापि धने कन्यागतवैवाहिकादौ साधारणं समाश्रित्य विवाहेन प्राप्ते विभाज्यत्वं दर्शयति । कन्यागतवैवाहिकयोस्स्वरूपमाह कात्यायनः—

यल्लब्धं दानकाले तु सजात्या कन्यया सह ।

कन्यागतं तु तद्वित्तं शुद्धं वृद्धिकरं स्मृतम् ॥

वैवाहिकं तु तद्विद्यात् भार्यया यत्सहागतम् ।
धनमेवंविधं सर्वं विज्ञेयं धर्मसाधकम् ॥

इति । कन्यागतं कन्यया सहागतम् । स्त्रीधनस्य तु सर्वविधस्यापि अविभाज्यत्वमाह स एव—

विवाहकाले यत्किंचिद्वरायोद्दिश्य दीयते ।
कन्यायास्तद्धनं सर्वमविभाज्यं च बन्धुभिः ॥
शौर्यप्राप्तं विद्यया च स्त्रीधनं चैव यत्स्मृतम् ।
एतत्सर्वं विभागे तु न च वैभाज्यमर्थिभिः ॥

बृहस्पतिरप्यविभाज्यधनमाह—

पितामहपितृभ्यां च दत्तं मात्रा च यद्भवेत् ।
तस्य तन्नापहर्तव्यं शौर्यभार्याधनं तथा ॥

मातृदत्ते तु विशेषमाह नारदः—

मात्रा च यद्धनं दत्तं यस्मै स्यात् प्रीतिपूर्वकम् ।
तस्याप्येष विधिर्दृष्टो माताऽपीष्टे यथा पिता ॥

स्वधन इति शेषः । एष विधिः पितृदत्तविषयोक्तो विधिः । एवं मित्रदत्तादिकमप्यविभाज्यम् । तथाच याज्ञवल्क्यः—

पितृद्रव्याविरोधेन यदन्यत्स्वयमार्जितम् ।
मैत्रमौद्वाहिकं चैव माधुपर्किकमेव च ॥

इति । मनुनाऽत्र माधुपर्किकस्याप्यविभाज्यत्वमुक्तम् । पितृद्रव्याविरोधेन यदन्यत्स्वयमार्जितमित्यस्यार्थो मनुना स्पष्टीकृतः—

अनुपघ्नन् पितृद्रव्यं श्रमेण यदुपार्जयेत् ।

इति । उभयत्र पितृग्रहणमविभक्तोपलक्षणार्थम् । श्रमेण श्रमजनकेन कृष्यादिनेति यावत् । अनुपघ्नन् अपीडयन् । व्यासोपि—

अनाश्रित्य पितृद्रव्यं स्वशक्त्याऽऽप्नोति यद्धनम् ।
दायादेभ्यो न तद्दद्यात्..... ॥

अनाश्रित्य आर्जनसिद्ध्यर्थमिति शेषः । पितृग्रहणमविभक्तोपलक्षणार्थमत्रापि । प्रजापतिरपि—

विद्याशौर्यश्रमैर्लब्धं स्त्रीधनं माधुपर्किकम् ।
मैत्रमौद्वाहिकं भ्रातुः भ्रातृभिर्न विभज्यते ॥

श्रमः कृष्यादिः । एवं पूर्वपुरुषक्रमायातं परापहृतं स्वशक्त्याऽभ्युद्धृतं द्रव्यं दायादेभ्यो न दद्यात् ।

क्रमादभ्यागतद्रव्यं हृतमभ्युद्धरेत्तु यः ।
दायादेभ्यो न तद्दद्यात्..... ॥

इति याज्ञवल्क्यस्मरणात् । द्रव्यं भूव्यतिरिक्तम् । भूद्रव्येऽप्याह शङ्खः—

पूर्वनष्टां तु यो भूमिमेकश्चाभ्युद्धरेत्क्रमात् ।
यथाभागं लभन्तेऽन्ये दत्वाऽंशं तु तुरीयकम् ॥

क्रमादभ्यागतां पुत्रपौत्रादीनां मध्ये यः पूर्वं नष्टां परापहृतां भूमिं स्वशक्त्याऽभ्युद्धरेत्तस्मै तच्चतुर्थांशं दत्वा शेष-

मुद्धारकेण सहान्ये विभजेरन्नित्यर्थः । केचित्—अभ्युद्धृतं त्वमेव गृहाणेत्यन्यानुमतिमन्तरेणाभ्युद्धृतभूम्यादिसर्वद्रव्यविषयमेतद्वचनं, याज्ञवल्क्यवचनं त्वन्यानुमत्याऽभ्युद्धृतभूम्यादिसर्वद्रव्यविषयम्, इति वदन्ति । यदत्र युक्तं तद्ग्राह्यम् । परेणापह्नुतस्य तु भूम्यादिद्रव्यस्योद्धारे व्यासेनोक्तं—

कृतेऽकृते वा विभागे रिक्थी यत्र प्रवर्तते ।
सामान्यं चेद्धावयति तत्र भागहरस्तु सः ॥

परापह्नुतं विभाज्यधनं यो रिक्थी साधयति स तत्र साधिते धने द्व्यंशी स्यादित्यर्थः । अन्यदप्यविभाज्यमाह मनुः—

वस्त्रं पत्रमलंकारं कृतान्नमुदकं स्त्रियः ।
योगक्षेमप्रचारं च न विभाज्यं प्रचक्षते ॥

वस्त्रं अविभक्तप्रावृतं वस्त्रं, 'यच्चाङ्गयोजितम्' इति कात्यायनस्मरणात् । पत्रं पत्रारूढमृणं 'धनं पत्रनिविष्टम्' इति तेनैवोक्तत्वात् । स्त्रियो दास्यः । उदकं स्वनिवेशनस्थकूपवाप्याद्यम्भः । योगक्षेमशब्दौ लोकाक्षिणा व्याख्यातौ—

क्षेमं पूर्तं योगमिष्टमित्याहुस्तत्त्वदर्शिनः ।
अविभाज्ये तु ते प्रोक्ते..... ॥

इति । अथवा योगक्षेमार्थमुपासितेश्वरसकाशाद्यो रिक्थिनां लाभः स एवात्र योगक्षेमशब्देनोच्यते । प्रचारशब्देन गो-

प्रचार उच्यते, कात्यायनेन 'गोप्रचारश्च' इति विशेषितत्वात्। अथवा प्रचारशब्देनाङ्कणादिकमुच्यते । अविभाज्यं प्रचक्षते विचारहीनाः केचन स्मृतिकारा इति शेषः। अत एव बृहस्पतिः—

वस्त्रादयो विभाज्या यैरुक्तास्तैर्न विचारितम् ।
धनं भवेत्समृद्धानां पत्रालङ्कारसंश्रितम् ॥
युक्त्या विभजनीयं तदन्यथाऽनर्थकं भवेत् ।

इति । यद्यपि वस्त्रादावेकस्मिन्वस्त्रे धारणाय विभागे क्रियमाणे वस्तुनाशः। ऋणलेख्ये तु तत्प्रामाण्यनाशः। कृतान्ने प्रभूते विभज्यमाने स्वल्पाशनभोक्तृविषये तन्नाशः। कूपादौ तु दुष्करो विभाग इति अविभाज्यत्वमेव भाति, तथाऽपि यथा वस्तुनाशाद्यनवतारः तथा युक्त्या विभजनीयं, अन्यथा साधारणतयाऽवस्थिते सत्यसूयया परस्परोपभोगप्रतिबन्धे कस्यचिदप्युपकाराभावादनर्थकं भवेदित्यर्थः। युक्त्या विभजनप्रकारोपि तेनैव दर्शितः—

विक्रीय वस्त्राभरणमृणमुद्ग्राह्य लेखितम् ।
कृतान्नं चाकृतान्नेन परिवर्त्य विभज्यते ॥
उद्धृत्य कूपवाप्यम्भस्त्वनुसारेण गृह्यते ।
एकां स्त्रीं कारयेत्कर्म यथांशेन गृहेगृहे ॥
बह्वयस्समांशतो देया दासानामप्ययं विधिः ।
योगक्षेमवतो लाभः समत्वेन विभज्यते ॥

प्रचारश्च यथांशेन कर्तव्यो रिक्थिभिस्सदा ।

इति । ऋणमुद्ग्राह्य अधमर्णसकाशादादाय । अनुसारेण स्वभागानुसारेणेत्यर्थः । एवञ्च यदुक्तमुशनसा—

अविभाज्यं सगोत्राणामा सहस्रकुलादपि ।
याज्यं क्षेत्रं च पत्रं च कृतान्नमुदकं स्त्रियः ॥

इति । एतदपि अनादृत्य युक्त्या याज्यं च क्षेत्रं च विभजनीयम् । तथाहि—याज्यसकाशादुत्पन्नो लाभो विभजनीयः । क्षेत्रं तु अखिलदायादानुमत्या विभजनीयम्—

दायादैर्नाभ्यनुज्ञातं यत्किञ्चित् स्थावरे कृतम् ।
तत्सर्वमकृतं ज्ञेयं यद्येकोपि न मन्यते ॥

इति प्रजापतिस्मरणात् । यत्पुनस्तेनैवोक्तं—

गृहक्षेत्राणि याज्याश्च प्रसादो यश्च पैतृकः ।
मातृकश्च प्रसादो यः तद्विभागो न विद्यते ॥

इति । तत्र तावत् विभागनिषेधमनादृत्यैव युक्त्या पूर्वोक्तप्रकारेण गृहादिकं विभजनीयम् । तथाच कात्यायनः—

दृश्यमानं विभज्येत गृहं क्षेत्रं चतुष्पदम् ।

इति गृहादेरपि विभागमाह । पितृप्रसादलब्धस्य निषेधोपि स्थावरेऽनादृत्य एव,

पितृप्रसादात्सिध्यन्ति वस्त्राण्याभरणानि च ।
स्थावराणि न सिध्यन्ति प्रसादे पैतृके सति ॥

इति याज्ञवल्क्यस्मरणात् । यत्पुनस्तेनैव स्मृतं—

लोके रिक्थविभागेऽपि न कश्चित्प्रभुतामियात् ।
भोग एव तु कर्तव्यो न दानं न च विक्रयः ॥

इति । लोके कुलक्रमायाते स्थावरादौ न कश्चित्पित्रादिरपि रिक्थविभागे, अपिशब्दात् विक्रयादावपि न प्रभुतामियात् । तेन तत्र दायादानुमतिमन्तरेण न विभागविक्रयदानानि कुर्यादिति तस्यार्थः ।

इति स्मृतिचन्द्रिकायां अविभाज्यनिरूपणम्.

अथ पुत्रपौत्रादिविभागविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र याज्ञवल्क्यः—

प्रमीतपितृकाणां तु पितृतो भागकल्पना ।

इति । प्रमीता अविभक्ताः पितरो येषां भ्रातृणांते प्रमीतपितृकाः । तेषां पितृतो भागकल्पना । पितृद्वारेणैव पितृपितामहप्रपितामहद्रव्यविभागकल्पना, न पुनस्स्वरूपेणेत्यर्थः । पितृतो भागकल्पनायां को विशेष इत्यपेक्षिते बृहस्पतिः—

तत्पुत्रा विषमसमाः पितृभागहराः स्मृताः ।

इति । तत्पुत्राः प्रमीतपितृकाणामेकैकस्य पुत्रा विषमसमाः न्यूनाधिकसङ्ख्याकाः स्वं स्वं पैतृकं भागमेव लभन्त इत्यर्थः । एतदुक्तं भवति—कस्यचित् प्रमीतस्य पितुरेक एव

पुत्रः, कस्यचित् द्वौ पुत्रौ, कस्यचिद्बहवः तत्र यथैकस्स्व पितृभागहरः तथैव द्वावपि स्वपितृभागमात्रहर्तौ । तथैव बहवोपि स्वपितृभागमात्रहराः स्मृता इति । यद्यपि पितृभागमात्रहरत्वे-नैकपितृकाणां पितृतो भागकल्पना स्वाम्यानुरूपा, तथाऽपि वाचनिकत्वादनुमन्तव्या । यदा ससुतयोरविभक्तयोर्भ्रात्रोः मध्ये कश्चिद्भ्राता मृतः तत्सुतस्तु पितामहादप्यप्राप्तांशकः, पितामहोपि नासीत्, तदा कात्यायन आह—

अविभक्तेऽनुजे प्रेते तत्सुतं रिक्थभागिनम् ।
कुर्वीत जीवनं येन लब्धं नैव पितामहात् ॥
लभेतांशं स पित्र्यं तु पितृव्यात्तस्य वा सुतात् ।

इति । जीवनं दायधनम् । अनुजग्रहणं मृतभ्रातुरुपलक्षणार्थ-म् । अस्मिन्नेव विषये यदा प्रमीतस्य सुता बहवः तदाऽ-प्याह स एव—

स एवांशस्तु सर्वेषां भ्रातॄणां न्यायतो भवेत् ।

इति । न्यायतो भवेत् 'समं स्यादश्रुतत्वात्' इति न्या-येन मिथः समभागतया भवेदित्यर्थः । यदपरं स एवाह—

लभेत तत्सुतो वाऽपि निवृत्तिः परतो भवेत् ।

इति । तस्यायमर्थः—तस्य विभाज्यधनस्वामिपौत्रस्य सुतोपि वा स्वपितुरभावे तद्भागं लभेत, अथ तस्याप्यभावः किंतु तत्सुतादेरेव विद्यमानत्वं तदा तु मृतभ्रातृसन्ततौ वृद्धप्र पितामहधनभागग्रहणनिवृत्तिरिति । ननु प्रपौत्रस्य प्रपितामः

हधनग्रहणमपि न घटते, जन्मना पितृपितामहयोरेव धने पुत्रपौत्रयोरेव स्वत्वसिद्धिनियमात् । सत्यं, यथा पुत्रादेर्मातृधने पिण्डं दत्वा तदैव मातुरूर्ध्वं स्वत्वसिद्धिः जीवनक्रियया भवतीति वक्ष्यते तथा प्रपितामहधने प्रपौत्रस्यापि स्वत्वसिद्धिरिति युक्तमुक्तं 'लभेत तत्सुतो वाऽपि' इति । एवञ्च यो यस्य धनस्वामिनः प्रमीतस्य पितृत्वेन पितामत्वेन वा पिण्डदाता तस्य तद्धनभागित्वं धनस्वामिनस्संतत्यन्तरे सत्यपि विद्यत इत्यवगन्तव्यम् । अत एव देवलः—

समामिच्छन्ति पिण्डानां दायार्थस्य विभाजनम् ।

इति । आचतुर्थाद्दायार्थस्य विभागं पिण्डदातृत्वं च मन्वादय इच्छन्तीत्यर्थः । तथाच स एव—

अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागस्स्यादा चतुर्थादिति स्थितिः ॥
तावत्कुल्यास्सपिण्डास्स्युः पिण्डभेदस्ततःपरम् ।

इति । अविभक्तविभक्तानां अविभक्तधनानां विभिन्नसन्ततिजातानां कूटस्थकुल्यानां भूयश्चिरं सहवसतामा चतुर्थात् कूटस्थप्रपौत्रपर्यन्तं दायधनविभागस्स्यादित्यनेकसन्ततिकदायविभागमर्यादेयमित्यर्थः । जीवत्पितृकस्य पुनः पित्रा सह कथं पैतामहधनविभाग इत्यपेक्षिते कात्यायनः—

पैतामहं समानं स्यात्पितुः पुत्रस्य चोभयोः ।

इति । व्यासोपि—

ऋमायाते गृहक्षेत्रे पुत्रपौत्रास्समांशिनः ॥

इति । बृहस्पतिरपि—

द्रव्ये पितामहोपात्ते जङ्गमे स्थावरेऽपि वा ।
सममंशित्वमाख्यातं पितुः पुत्रस्य चैव हि ॥

याज्ञवल्क्यः—

भूर्या पितामहोपात्ता निबन्धो द्रव्यमेव वा ।
तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः ॥

निबन्धः करतया पाचकादिभिः पण्यादिषु गृह्यमाणोऽंशः । सदृशं स्वाम्यं स्यादित्यनयैव वचोभङ्ग्या समांशत्वमेवोक्तमिति मन्तव्यम् । अन्यथा पूर्वोक्तवचनसमानार्थता स्वरसतो युक्ता न स्यात् । एवञ्च जीवद्विभागे पितामहादिधनविषये विषमविभागो न कदाचिदपीति मन्तव्यम् । स्वार्जितधनविषये तु विषमविभागोपि युगान्तरे कदाचिदस्तीति जीवद्विभागप्रकरणेऽभिहितम् । केचित्—यथाश्रुतार्थतामेव चास्य वचनस्याङ्गीकुर्वन्ति । तथाच पौत्रमात्रेच्छयाऽपि पितामहधनविभागो भवति ; पितुरिच्छामात्रेण च ऋमायातधनदानादिकं न भवति, तत्र पौत्रस्यापि स्वाम्याभिधानादित्याहुः । तदत्रापि ग्राह्यं, आञ्जसत्वात् । 'अर्थे पैतामहे पितृपुत्रयोस्तुल्यं स्वाम्यम्' इति विष्णुनाऽप्युक्तत्वाच्च । अत्रार्थादतुल्यं स्वाम्यं पितृपुत्रयोः पितृधन इति गम्यते । ननु पैतामहे पैतृके च

जन्मनैव स्वाम्यमिति का तत्र तुल्यातुल्यता? उच्यते— पैतामहे धने पितृपुत्रयोस्स्वाम्ये स्वातन्त्र्यमेव तुल्यता। पैतृके तु जीवति पितरि निर्दोषे तस्यैव स्वातन्त्र्यमित्यतुल्यता। अनेनैव भेदेन स्वाम्ये तुल्यातुल्योक्तिः। यत्तु कायायनेनोक्तं—

स्वयं चोपार्जिते पित्रा न पुत्रः स्वाम्यमर्हति।

इति, एतत् पुत्रमात्रेच्छया पैतृकधनविभानर्हतां वचोभङ्ग्या वक्ति, न पुनर्यथाश्रुतार्थपरमित्यनवद्यम्। व्यासेन तु स्पष्टमेवोक्तं—

पैतृके न विभागार्हाः पुत्राः पितुरनिच्छतः।

इति। यत्पुनर्बृहस्पतिनोक्तं—

पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितम्।
विद्याशौर्यादिनाऽवाप्तं तत्र स्वाम्यं पितुः स्मृतम्॥

इति, तत्रापि स्वाम्यमित्यनेन वचोभङ्ग्या पितुस्स्वातन्त्र्यमुक्तमिति मन्तव्यम्। स्वातन्त्र्याभिधानस्य प्रयोजनमप्याह स एव—

प्रदानं स्वेच्छया कुर्याद्भोगं कुर्यात्ततो धनात्।
तदभावे तु तनयास्समांशाः परिकीर्तिताः॥

इति। सुतानुमतिमन्तरेणापि पितुस्स्वातन्त्र्यबलाद्दानादिकं जीवद्विभागोक्तविषयविशेषे विषमविभागकल्पनं च युज्यत इति तात्पर्यार्थः। स्वार्जितप्रायं यत्क्रमायातं, यच्च स्वार्जितं पि-

तृधनं तद्विभागे पुत्रैर्बलात्कारो न कार्य इति वचोभङ्ग्याऽऽह कात्यायनः—

स्वशक्त्याऽपहृतं नष्टं स्वयमाप्तं च यद्भवेत् ।
एतत्सर्वं पिता पुत्रैर्विभागे नैव दाप्यते ॥

यत्परैरपहृतं क्रमायातं स्वशक्त्यैवोद्धृतं, यद्विनष्टं वा क्रमायातं स्वेनैव लब्धं, यच्च विद्याशौर्यादिना स्वयमेवार्जितं एतत्सर्वं पिता विभागे पुत्रैर्न दाप्य इत्यर्थः ॥

इति स्मृतिचन्द्रिकायां पुत्रपौत्रादिविभागकल्पनाविषयाणि.

अथ स्त्रीधनविभागविषयाणि.

तत्रादौ तावत् स्त्रीधनभेदानाह मनुः—

अध्यग्न्यध्यावहनिकं दत्तं च प्रीतिकर्मणि ।
भ्रातृमातृपितृप्राप्तं षाड्विधं स्त्रीधनं स्मृतम् ॥

अत्र पूर्वार्धस्यार्थः कात्यायनेन विवृतः—

विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ ।
तदध्यग्निकृतं साद्भिः स्त्रीधनं परिकीर्तितम् ॥
यत्पुनर्लभते नारी नीयमाना पितुर्गृहात् ।
अध्यावहनिकं चैव स्त्रीधनं तदुदाहृतम् ॥
प्रीत्या दत्तं तु यत्किञ्चित् श्वश्त्रा वा श्वशुरेण वा ।
पादवन्दनिकं चैव प्रीतिदत्तं तदुच्यते ॥

इति । पादवन्दनिकं पादवन्दनावसरे दत्तम् । भ्रातृमातृपितृप्राप्तं यदाकदा वा जीवनार्थमिति शेषः । षड्विधग्रहणं उत्तरार्धोक्तमेव स्त्रीधनमिति भ्रमापनुत्त्यर्थं कृतं, न पुनरवधारणार्थम् । अत एव—

मातापितृपतिभ्रातृदत्तमध्यग्न्युपागतम् ।
आधिवेदनिकाद्यं च ..... ॥

इति याज्ञवल्क्येनाद्यग्रहणं कृतम्। विष्णुना तु षड्विधादधिकमुक्तं—'पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतं आधिवेदनिकं बन्धुदत्तं शुल्कं अन्वाधेयिकं स्त्रीधनम्' इति । आधिवेदनिकं अधिवेदनानिमित्तम् । बन्धुदत्तमित्यत्र बन्धुशब्दः पूर्वोक्तपित्रादिव्यतिरिक्तबन्धुषु गोबलीवर्दन्यायाद्वर्तते । शुल्कान्वाधेयिकयोः स्वरूपं कात्यायनेनोक्तं—

गृहोपस्कारवाह्यानां दोह्याभरणकर्मिणाम् ।
मूल्यं लब्धं तु यत्किंचिच्छुल्कं तत्परिकीर्तितम् ॥
विवाहात्परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया ।
भर्तुः पित्रोस्सकाशाद्वा अन्वाधेयं तु तद्गुणः ॥

इति । मूल्यं गृहोपस्करादिमूल्यम् लब्धं कन्याधनत्वेन वरादिसकाशात् कन्यार्हणोपाधितयेति शेषः । पितृमात्रादिभिः स्त्रियै जीवनार्थदानविषये विशेषमाह स एव—

पितृमातृपतिभ्रातृज्ञातिभिः स्त्रीधनं स्त्रियै ॥
यथाशक्त्या द्विसाहस्राद्दातव्यं स्थावरादृते ।

यथाशक्ति स्थावरव्यतिरिक्तद्विसाहस्रकार्षापणपर्यन्तं दातव्यमित्यर्थः। व्यासोपि—

द्विसाहस्रः पणो दायः स्त्रियै देयो धनस्य च।

इति। दीयत इति दायः। परः परमः। एवञ्च द्विसहस्रकार्षापणाधिकमूल्यो धनस्य भागो जीवनार्थमृद्धेनापि न देय इति गम्यते। स्त्रियै देय इत्यत्र प्रसब्दामिति विधेयसङ्ख्या योग्यताबलाद्गम्यते। प्रत्यब्दमसकृदर्पणे नियमोऽयम्। अनेकाब्देषूपजीवनार्थं सकृदेव दाने तु नायमवधिनियमो नापि स्थावरपर्युदासः। यत्तूत्सवादावेव धार्यमित्येवमाद्युपाधिनाऽलङ्कारादिकं दत्तं, यच्च दायादादिवञ्चनार्थं दत्तं, तत् स्त्रीधनं न भवतीत्याह कात्यायनः—

यत्तु सोपाधिकं दत्तं यच्च योगवशेन वा।
पित्रा भ्रात्राऽथ वा पत्या न तत् स्त्रीधनमिष्यते॥

योगवशेन वञ्चनाद्युपायत एवेत्यर्थः। ननूपाधियोगयोरभावेऽपि पित्रादिना दत्तं न स्त्रीधनं भवितुमर्हति,

भार्या पुत्रश्च दासश्च निर्धनास्सर्व एव ते।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्॥

इति स्मरणात्। मैवं—पुत्रादिसाहचर्यान्नानेन परमार्थतो निर्धनत्वं भार्याया गम्यते, किंतु धनव्ययादावस्वातन्त्र्यमात्रम्। तेन यस्य एते तस्यानुज्ञया स्वधनस्यापि विनियोगं

भार्यादयः कुर्युरिति स्मृतिवाक्यतात्पर्यमवसेयम् । अत एव चोक्तं मनुना—

न निर्हारं स्त्रियः कुर्युः कुटुम्बाद्बहुमध्यगात् ।
स्वकादपि च वित्ताद्धि स्वस्या भर्तुरनाज्ञया ॥

स्वतन्त्राननुज्ञया परतन्त्राः स्त्रियः स्त्रीपुंससाधारणवित्तादात्मीयवित्ताद्वा त्यागभोगादिकं न कुर्युरित्यर्थः । अथवा—निर्धनत्वाभिधायकस्मृतिवाक्यस्य शिल्पादिप्राप्तधनविषयत्वं विज्ञेयम् । तदाह कात्यायनः—

प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः ।
भर्तुस्स्वाम्यं तदा तत्र शेषं तु स्त्रीधनं स्मृतम् ॥

अन्यतः सख्यादितः, पित्रादितः प्राप्तस्य स्त्रीधनत्वेन शेषकोटित्वात् ॥

इति स्मृतिचन्द्रिकायां स्त्रीधनभेदाः.

अथ स्त्रीधनकृत्यम्.

तत्र व्यासः—

यच्च भर्त्रा धनं दत्तं सा यथाकाममश्नुयात् ।

इति । चशब्दात् 'सौदायिकं यथाकामं' इति वदन् भर्तृदायादौ स्वातन्त्र्यं दर्शयति । कात्यायनोपि—

सौदायिकं धनं यत्तु स्त्रीणां स्वातन्त्र्यमिष्यते ।
तस्मात्तदानृशंस्यार्थं तैर्दत्तमुपजीवनम् ॥

सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितम् ।
विक्रये चैव दाने च यथेष्टं स्थावरेष्वपि ॥
भर्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः ।
विद्यमाने तु संरक्षेत्..... ॥

इति । द्वितीयश्लोकेन सौदायिकाख्यस्त्रीधने पत्यौ विद्यमानेऽप्यविद्यामानेऽपि स्वातन्त्र्यमुक्तं, सदेत्यभिधानात् । भर्तृदायो भर्तृदत्तं, तस्मिन् धने तु तदनन्तरोक्तपादत्रयेणाविद्यमाने पत्यौ स्वातन्त्र्यमुक्तम् । विद्यमाने तु संरक्षेत् भर्तृदत्तं भर्त्राज्ञया विन्यसेदित्यर्थः । सौदायिकपदं तेनैव निरूपितं—

ऊढया कन्यया वाऽपि पत्युः पितृगृहेऽपि वा ।
भ्रातुस्सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम् ॥

लब्ध धनमिति शेषः । तथाच व्यासः—

यत्कन्यया विवाहे च विवाहात्परतश्च यत् ।
पितृभर्तृगृहात्प्राप्तं धनं सौदायिकं स्मृतम् ॥

इति । एतद्वचनद्वयेनैतदुक्तं भवति—वाग्दानप्रभृति पतिगृहप्रवेशरूपोत्सवसमाप्तिपर्यन्तं पितृगृहे पतिगृहे वा पितृमातृपक्षत एव स्त्रिया लब्धं यौतकादि धनं सौदायिकशब्दाभिधेयमिति । ननु 'यौतकादि तु यद्देयं सुदायः' इति निघण्टुपाठात् कथं सौदायिकशब्दोऽत्र प्रयुक्त ? स्वार्थतद्धितान्ततयेत्यनवद्यम् । भर्तृदाये तु मृते भर्तरि न स्थावरे स्वातन्त्र्यम् । तथाच नारदः—

भर्त्रा प्रीतेन यद्दत्तं स्त्रियै तस्मिन्मृतेऽपि तत् ।
सा यथाकाममश्नीयाद्दद्याद्वा स्थावराद्ऋते ॥

भर्तरि मृतेऽपि न तद्दत्तस्थावरे स्वातन्त्र्यमित्यर्थः । यथाकाममित्यनेन स्वातन्त्र्यमुक्तम् । एवञ्च सौदायिके स्थावरेतरप्रीतिदत्ते च स्त्रीणां स्वातन्त्र्यमन्यत्र तु स्त्रीधनेऽप्यस्वातन्त्र्यमिति मन्तव्यम् । पुरुषाणां तु स्त्रीधने सर्वत्रास्वातन्त्र्यमेव । यदाह कात्यायनः—

न भर्ता नैव च सुतो न पिता भ्रातरो न च ।
आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णवः ॥

स्वामित्वाभावादित्यभिप्रायः । अत एवानन्तरमुक्तं तेनैव—

यदि ह्येकतरोप्येषां स्त्रीधनं भक्षयेद्बलात् ।
सवृद्धिकं प्रदाप्यः स्याद्दण्डं चैव समाप्नुयात् ॥
तदेव यद्यनुज्ञाप्य भक्षयेत्प्रीतिपूर्वकम् ।
मूल्यमेव प्रदाप्यः स्यात् यद्यसौ धनवान् भवेत् ॥

इति । धनवान्यदि भवेदित्यभिधानात् मूल्यमात्रमपि निर्धनो न दाप्य इत्यर्थात् गम्यते । अनुज्ञाप्य भक्षणेऽपि मूल्यप्रदानाभिधानात् भर्त्रादीनामस्वातन्त्र्यमवगम्यते, न पुनः पारतन्त्र्यमात्रम् । एवञ्च विवाहेन भार्याया भर्तृधने नित्यपारतन्त्र्यं स्वामित्वं संपद्यते, न पुनर्भर्तुः भार्याधने तादृशमपीत्यवगन्तव्यम् । अत एव भर्तुः स्त्रीधनभोगेऽप्यनर्हतामाह देवलः—

वृत्तिराभरणं शुल्कं लाभश्च स्त्रीधनं भवेत् ।
भोक्त्री तत्स्वयमेवेदं पतिर्नार्हत्यनापदि ॥
वृथा मोक्षे च भोगे च स्त्रियै दद्यात्सवृद्धिकम् ।

इति । वृत्तिः वर्तनार्थं पित्रादिना दत्तम् । लभ्यत इति लाभः । एतदुक्तं भवति—पार्वत्यादिप्रीत्यर्थं व्रतादौ स्त्रिया यल्लभ्यते तदपि स्त्रीधनमिति । स्वयमेवेत्येवकारः स्वापत्यानां व्युदासार्थः । भर्तृव्युदासस्य पतिर्नार्हतीत्यनेन सिद्धत्वात् । भर्तुर्व्युदासे ततो बहिरङ्गभ्रात्रादिव्युदासस्य दण्डापूपन्यायसिद्धत्वात् । वृथा आपदं विनेत्यर्थः । मोक्षस्त्यागः । स्त्रियाऽननुज्ञातबलात्काररहितत्यागभोगविषयमेतत्, सवृद्धिकप्रदानस्य दण्डासहितस्याभिधानात् । पतिर्नार्हतीत्यनापदीति वदन् आपदि तु पतिरेवार्हति स्त्रीधनं भोक्तुं नान्य इति दर्शयति । अत एव—

पुत्रार्तिहरणे वाऽपि स्त्रीधनं भोक्तुमर्हति ।

इत्यनन्तरवचने भोक्तुमर्हतीत्यत्र पतिरिति शेषो द्रष्टव्यः । पुत्रग्रहणं स्वकुटुम्बोपलक्षणार्थम् । आर्तिः धनालाभनिमित्ततो दुरपनोदाऽत्र विवक्षिता । तस्याः हरणे परिहरणे । वाशब्दादन्यत्रापि धनालाभनिमित्ततो दुष्परिहरे महासङ्कटे स्त्रीधनमननुज्ञातमपि पतिर्भोक्तुं त्यक्तुं वाऽर्हतीत्युक्तम् । ननु परधनत्यागभोगे परस्य स्वाम्यनुज्ञया विना कथमर्हता? उच्यते—स्वाम्यनुज्ञाभावेऽपि पूर्वोक्तविषये स्वाधीनजनस्वाम्यके

तु स्त्रीधने यथेष्टविनियोगानर्हेऽप्यापदपनोदकत्यागभोगादावर्हताऽस्तीत्यस्मादेव वचनात् कल्प्यत इत्यदोषः। अत्र याज्ञवल्क्यः—

दुर्भिक्षे धर्मकार्ये च व्याधौ संप्रतिरोधके ।
गृहीतं स्त्रीधनं भर्ता न स्त्रियै दातुमर्हति ॥

धर्मकार्ये नित्ये नैमित्तिके च काम्येऽपि । क्वचिच्छान्तिके ग्रहयज्ञादौ । संप्रतिरोधके धनदानं विना निवारयितुमशक्ये धनिकासेधादौ । गृहीतं स्त्रीधनं, गत्यन्तराभावेनेति शेषः । भर्ता प्रतिदानसमर्थधनाभावेन दरिद्रः इति शेषः । सति संभवे प्रतिदानस्यात्रावश्यकत्वात् । अत एव प्रतिदानस्य क्वचिदेवावश्यकत्वमुक्तं कात्यायनेन—

व्याधितं व्यसनस्थं च धनिकैर्वोपपीडितम् ।
ज्ञात्वा निसृष्टं यत्प्रीत्या दद्यादात्मेच्छया तु सः ॥

ज्ञात्वा स्त्रियेति शेषः । निसृष्टं अनुज्ञातम् । यद्यपीदं वचनं 'न भर्ता नैव च सुतः' इत्यादिवचनत्रयानन्तर्यतो भर्त्रादिविषयमिति प्रतिभाति, तथाऽपि—

अथ चेत् स द्विभार्यस्यान्न च तां भजते पुनः ।
प्रीत्या निसृष्टमपि चेत् प्रतिदाप्यः स तद्बलात् ॥
ग्रासाच्छादनवासानामाच्छेदो यत्र योषितः ।
तत्र स्वमाददीत स्त्री..... ॥

इत्युपरितनवचनपर्यालोचनया भर्त्रेकविषयमिति मन्तव्यम् । या

पुनरतिदुष्टा स्त्री सा स्वधनमपि विनियोक्तुं नार्हतीत्याह स एव—

अपकारक्रियायुक्ता निर्मर्यादाऽर्थनाशिका ।
व्यभिचाररता या च स्त्रीधनं न च साऽर्हति ॥

स्वेच्छया विनियोक्तुमिति शेषः । भर्त्राऽऽश्रुतं स्त्रीधनं त्वगृहीतमपि देयम्,

भर्त्रा प्रतिश्रुतं देयमृणवत् स्त्रीधनं सुतैः ।

इति तेनैवोक्तत्वात् । सुतग्रहणं पौत्रस्याप्युपलक्षणमृणवदित्यभिधानात् । अनेनापि स्त्रीधने सुतादीनां नास्ति स्वाम्यमिति गम्यते । ततश्च स्त्रीधने जीवद्विभागो नास्त्येव स्त्र्येकस्वामिकत्वात् । अत एव मनुः—

जीवन्तीनां तु तासां ये तद्धरेयुस्स्वबान्धवाः ।
तान् शिष्याच्चोरदण्डेन धार्मिकः पृथिवीपतिः ॥
पत्यौ जीवति यः स्त्रीभिरलङ्कारो धृतो भवेत् ।
न तं भजेरन् दायादाः भजमानाः पतन्त्यधः ॥

इति । धृतः सातत्येनेति शेषः । सातत्येन धृते योगोपाधिराहित्येन स्त्रीधननिश्चयो भवति । पूर्वार्धस्य च निश्चितस्त्रीधनकथनार्थत्वात् सातत्येनेति शेषेण भाव्यमिति गम्यते । दायादा दुहित्रादयः ।

इति स्मृतिचन्द्रिकायां स्त्रीधनकृत्यम्.

अथ स्त्रीद्वाराऽऽगतधनविभागः.

तत्र तावदागमनप्रकारमाह मनुः—

अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ।
पत्यौ जीवति वृत्तायां प्रजायास्तद्धनं भवेत् ॥

अन्वाधेयं विवाहादूर्ध्वं स्त्रिया भर्तृकुलात् पितृकुलाच्च लब्धम्।

विवाहात्परतो यत्तु लब्धं भर्तृकुलात् स्त्रिया ।
अन्वाधेयं तु तद्द्रव्यं लब्धं पितृकुलात्तथा ॥

इति कात्यायनस्मरणात् । विवाहात्परत इत्यनेनान्वाधेयपदस्थानुशब्दार्थो विवृतः । लब्धमित्यनेन तत्रस्थाधेयशब्दार्थ इति मन्तव्यम् । यदन्वाधेयं, यच्च प्रीतेन पत्यैव दत्तं तद्द्विविधं स्त्रीधनं धनस्वामिन्यां मृतायामनन्तरक्षणवर्तिन्याः स्त्रीपुंसप्रजायास्स्वं भवेदित्यर्थः । एतदुक्तं भवति—सप्रजस्त्रीधनं धनस्वामिमरणानन्तरक्षणजीवनशालित्वेऽपि न पत्युर्भवति, किंतु तच्छालिन्याः प्रजाया इति । एवञ्चास्मादिदमवगम्यते—धनस्वामिन ऊर्ध्वं धनागमने धनस्वामिमरणानन्तरक्षणजीवनक्रियैव धनग्रहणाधिकारितया धर्मशास्त्रप्रतिपादितजनस्य स्वत्वापत्तिकारणमिति । तेन यत्रयत्र धनस्वामिन ऊर्ध्वमेव धनागमनमपुत्रस्वर्यातधनादौ तत्रतत्र रिक्थग्राहिणस्स्वत्वापत्ताविदमेव कारणं कल्प्यम् । प्रजाया इति सामान्येनाभिधानादत्र स्त्रीपुंसप्रजाया उक्तद्विविधरिक्थग्रहणाधिकारः समसमय एव ज्ञायत इति । स्वत्वापत्तिरपि तथैव, न पुनः पूर्वं

भगिनीनां तदभावे भ्रातॄणां भवतीति मन्तव्यम् । विभागोप्यत्र भ्रातृभगिनीकर्तृको विज्ञेयः । एवञ्च यदुक्तं—

जनन्यां संस्थितायां तु सर्वे सर्वे सहोदराः ।
भजेरन्मातृकं रिक्थं भगिन्यश्च सनाभयः ॥

इति, तत् स्वोक्तान्वाधेयादिद्विविधरिक्थविषयमिति मन्तव्यम् । अस्मिन्नेव विषये विशेषमाह बृहस्पतिः—

स्त्रीधनं स्यादपत्यानां दुहिता च तदंशिनी ।
अप्रत्ता चेत्समूढा तु लभते सा न मातृकम् ॥

अपत्यानां पुत्रापत्यानाम् । वचनद्वयेऽपीतरेतरयोगे चशब्दः, तेनाऽन्योन्यं दुहितृणामितरेतरयुक्तानां विभागकर्तृत्वं विज्ञेयम् । अत एव कात्यायनः—

भगिन्यो बान्धवैस्सार्धं विभजेरत् सभर्तृकाः ।

इति । बान्धवैस्सहोदरैर्भ्रातृभिरित्यर्थः । सभर्तृका इति विशेषणं विधवानिवृत्त्यर्थम् । न पुनः कन्यानिवृत्त्यर्थं, पूर्वोक्तवचनविरोधात् । सहोदरभ्रातृभिस्सार्धं भागहरा भगिन्यो यास्ताः प्रकृत्याह मनुः—

यास्तासां स्युर्दुहितरस्तासामपि यथार्हतः ।
मातामह्या धनात्किञ्चित्प्रदेयं प्रीतिपूर्वकम् ॥

यथार्हतः शीलोपयोगदारिद्र्याद्यपेक्षयेत्यर्थः । ननु दुहितृदुहितॄणां भ्रातृभगिनीसद्भावे मातामहीधने स्वामित्वाभावात् किमिति किञ्चित् प्रदीयते? उच्यते—यथा पैतृके धने कन्यानां दाया-

र्हत्वाभावेऽपि वचनात् ताभ्यस्तुरीयांशो भ्रातृभिर्दीयते, तथाऽत्र स्वामित्वाभावेऽपि भ्रातृभगिनीभिर्वचनबलात् किञ्चिद्दीयते। इयांस्तु भेदः—तत्र दायानर्हत्वेऽपि जन्मना स्वाम्यमस्तीत्यभिसन्धाय 'पतितास्स्युरदित्सवः' इति दोषकीर्तनादवश्यं दातव्यं, इह तु स्वामित्वमपि नास्तीत्यभिसन्धाय प्रीतिपूर्वकमिति स्ववचनात् प्रीतौ सत्यां देयं—नो चेन्न देयमिति। अन्यत् किञ्चिन्मातृकं रिक्थमप्रत्तानामेव न पुनस्सर्वासां दुहितृसोदरप्रजानां भवतीत्याह स एव—

मातुस्तु यौतकं यत्स्यात् कुमारीभाग एव सः।

इति। यौतकं समानासनोपवेशनप्रत्यासन्नयोर्वधूवरयोर्विवाहादौ येनकेनचित्समर्पितं धनम्,

तद्वधूवरयोर्देयं युतयोर्यौतकं मतम्।

इति निघण्टुकारोक्तत्वात्। अन्योन्यान्वितयोर्वधूवरयोर्यद्देयं तद्धनं युतयोरिदमिति व्युत्पत्त्या यौतकं मतमित्यर्थः। देवस्वामी तु—पितृगृहाल्लब्धं भर्तृगृहाल्लब्धापेक्षया पृथक्धनतया मातुर्यौतकं मातृधनं मातुरेवेत्याह, तच्चिन्त्यं पक्षद्वयस्यापि कल्पनामात्रत्वात्। कुमारीणामनेकत्वे 'समं स्यादश्रुतत्वात्' इति न्यायेन यौतकविभागः कार्यः, भागविशेषास्मृतेः। एवमुक्तं त्रिविधव्यतिरिक्तं मातृकं रिक्थं कुमारीणां अकुमारीणामप्यप्रतिष्ठितानामेव, न पुनस्सर्वासां दुहितृणामित्याह गौतमः—

'स्त्रीधनं दुहितृणामप्रत्तानामप्रतिष्ठितानां च'

इति। अध्यग्न्याद्यादि स्त्रीधनं कुमारीणामप्रतिष्ठितानामनूढानां च दुहितॄणामेवेत्यर्थः। ततश्च तद्धनं ता एव दुहितरो विभजेरन्नित्यभिप्रायः। अप्रतिष्ठिता अनपत्याः निर्धनाः दुर्भगाः विधवा वा। एवमपरार्कानुसारेण गौतमवचनं व्याख्यातम्। अस्य विज्ञानेश्वरकृता व्याख्या हेया, स्वबुद्धिमात्रेणाध्याहारादिकरणात्। अस्मिन्नेव विषये विशेषमाह याज्ञवल्क्यः—'मातुर्दुहितरश्शेषमृणात्' इति। मातृऋणापाकरणावशिष्टं मातृकं रिक्थं मातुरूर्ध्वं समं अप्रत्ताप्रतिष्ठितदुहितरो विभजेरन्नित्यर्थः। एवम्भूतदुहित्रभावेऽप्याह स एव—'ताभ्य ऋतेऽन्वयः' इति। एतदेव नारदस्पृष्टयति—'अभावे दुहितॄणां तदन्वयः' इति। अप्रत्तदुहितृष्वन्वयासंभवात् प्रत्तदुहित्रन्वय इति पारिशेष्यादवगम्यते। स्त्रीगामिधनत्वात् स्त्रीरूपान्वय इति च गम्यते। प्रत्तदुहितॄणां स्त्रीरूपान्वयाभावे दौहित्राणां यथा स्यादिति सामान्येन तदन्वय इत्युक्तम्। दौहित्राणामप्यभावे तु—

विभजेरन् सुताः पित्रोरूर्ध्वं रिक्थमृणं समम्।

इति याज्ञवल्क्यवचनतः मातुरूर्ध्वं मातृकं रिक्थं मातृकृतं च ऋणं समं सुता विभजेरन्नित्यवगमात् सुतानां मातृऋणधनविभागकर्तृत्वं सिद्धं, अन्यथा 'विभजेरन् सुताः पित्रोः' इत्येकशेषोक्तिरपार्थिका स्यात्। सुतानामप्यभावे पौत्राणां पितामहीऋणधनभोक्तृत्वं 'पुत्रपौत्रै ऋणं देयं' इति पौत्राणामपि पितामहीकृतऋणापाकरणाधिकारात्, 'रिक्थभाजः

ऋणं प्रकुर्युः' इति स्मरणाच्च । भिन्नपितृकाणां विषमसङ्ख्यानां पौत्राणां समवाये पितामहीऋणधनविभागः पितामहधनविभागवत् पितृतो भागकल्पना, एवमेव भिन्नमातृकाणां दौहित्राणां दौहित्रीणां च विषमसंख्यानां समवाये मातृतो भागकल्पना । अत्र 'प्रतिमातृ स्ववर्गे भागविशेषः' इति गौतमस्मरणात् । यत्तु कात्यायनेनोक्तं—

दुहितृणामभावे तु रिक्थं पुत्रेषु तद्भवेत् ।

इति, तदप्रत्तदुहितृविषयम् । तत्र ऋतुकालभर्तृरसम्भवेनान्वयासम्भवात् । एवञ्च कात्यायनेनोक्तं यौतकविषयामिति मन्तव्यम् । भार्याया ऊर्ध्वमन्वयाभावे भर्तरि भार्यारिक्थं भवेत् ।

अप्रजस्त्रीधनं भर्तुः ब्राह्मादिषु चतुर्ष्वपि ।

इति याज्ञवल्क्यस्मरणात् । अपिशब्दात् गान्धर्वेऽपि । अत एव मनुः—

ब्राह्मदैवार्षगान्धर्वप्राजापत्येषु यद्धनम् ।
अतीतायामप्रजसि भर्तुरेव तदिष्यते ॥

उक्तपञ्चविवाहेषु संस्कृतायाः भार्याया यद्धनं तत्स्त्र्याः दुहित्रादिपौत्रान्तधनहारिसन्ततेरभावे सत्यतीतायाः भर्तुरेवेष्यते, न पुनर्मात्रादीनां बन्धूनामित्यर्थः । यत्तु कात्यायनेनोक्तं—

बन्धुदत्तं तु बन्धूनामभावे भर्तृगामि तत् ।

इति, तत् उक्तपञ्चविधेतरविवाहसंस्कृतस्त्रीधनविषयम् ।

तथाच स एव—

आसुरादिषु यल्लब्धं स्त्रीधनं पैतृकं स्त्रियाः ।
अभावे तदपत्यानां मातापित्रोस्तदिष्यते ॥

पैतृकं मातापितृसकाशादानेनागतम् । तदपत्यानामभावे आसुरादिषु संस्कृतस्त्रियामुत्पन्नापत्यानामभावे । अपत्यग्रहणं पूर्वोक्तदौहित्रादिपौत्रान्तानां स्त्रीधनहारिणामुपलक्षणार्थम् । यत्तु यमेनोक्तं—

आसुरादिषु यद्द्रव्यं विवाहेषु प्रदीयते ।
अप्रजायामतीतायां पितैव तु धनं हरेत् ॥

इति, तत्र प्रदीयते पित्रेति शेषो द्रष्टव्यः । ततश्च न पूर्वोक्तवचनविरोधः । एवं पितृव्यभ्रातृमातुलादिबन्धुदत्तं स्त्रीधनं सति सम्भवे पितृव्यादिबन्धूनां, अन्यथा भर्तुरेवेत्यासुरादिष्ववगन्तव्यम् । किञ्चिद्बन्धुदत्तं न दातुर्भवतीत्याह गौतमः—'भगिनीशुल्कः सोदर्याणामूर्ध्वं मातुः' इति, शुल्काख्यं स्त्रीधनं पूर्वतरप्रकरणे निरूपितम्, तद्दातारो वरादयः, तेषां दातृत्वेऽपि तद्धनं न भवति, किंतु धनस्वामित्वं सोदरभ्रातृणां, तेषामभावे तन्मातुर्भवतीत्यर्थः । यत्पुनरर्हतीत्यनुवृत्तौ शङ्खेनोक्तं—'स्वं च शुल्कं वोढा' इति तत् अपरिसमाप्ते विवाहे सति मृतायां वध्वां द्रष्टव्यम् । 'मृतायां दत्तमादद्यात्' इति याज्ञवल्क्यस्मरणात् । दत्तं शुल्कमलङ्कारादिकं वा आ-

दद्यात् वोढेति शेषः । कन्याधनं प्रत्याह बोधायनः—

रिक्थं मृतायाः कन्यायाः गृह्णीयुस्सोदरास्स्वयम् ।
तदभावे भवेन्मातुस्तदभावे पितुर्भवेत् ॥

गौणमातृपरिगणनपूर्वकं धनहर्तॄनाह बृहस्पतिः—

मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ।
श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः ॥
यद्यासामौरसो न स्यात्सुतो दौहित्र एव वा ।
तत्सुता वा धनं तासां स्वस्रीयाद्यास्समाप्नुयुः ॥

इति । स्वस्रीयो धनस्वामिन्या भागिनेयः स्वमातृष्वसुर्धनमवाप्नुयात् । एवमाद्यशब्दपरिगृहीताः यथाक्रमेण स्वकीयमातृतुल्यायाः धनं समाप्नुयुः । एवमेव सपत्नीसन्तानोप्युपमातृधनं तत्सन्तानतद्भर्त्राद्यभावे सत्यवाप्नुयात् । क्वचिद्भर्त्रादिसद्भावेऽपि सपत्नीनां सन्तानविशेषस्योपमातृधनभाक्त्वमाह मनुः—

स्त्रियास्तु यद्भवेद्दत्तं पित्रा दत्तं कथंचन ।
ब्राह्मणी तद्धरेत्कन्या तदपत्यस्य वा भवेत् ॥

पित्रा दत्तमिति वदन् पूर्वोक्तधनहर्तृभर्तृपितृप्रभृतिषु सत्स्वपीति दर्शयति । भर्तृविजातीयस्त्रीधनं तत्सन्तानाभावे सति भर्तृसजातीयस्त्र्यन्तरकन्या तत्सन्ततिर्वा हरेदित्यर्थः । एवञ्च भर्तृसजातीयानेकस्त्रीषु सन्तानशून्याया मृताया धनं स्त्र्यन्तरकन्या तत्सन्ततिर्वा न हरेत् । किंतु ब्राह्मादिषु भर्तै-

व, शेषेषु धनदातैवेत्यनुसन्धेयम्। उक्तार्थोपसंहारस्तु कात्यायनेन कृतः—

स्त्रीधनस्येति धर्मोऽयं विभागश्च प्रकल्पितः।

इत्येवं निरूपितो धर्मोऽयं प्रकल्पितश्च विभागः स्त्रीधनस्याध्यवसेय इत्यर्थः॥

इति स्मृतिचन्द्रिकायां स्त्रीद्वाराऽऽगतधनविभागः.

अथ गौणपितृद्वाराऽऽगतधनविभागः.

तत्र मनुः—

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः।

इति। ननु—

एक एवौरसः पुत्रः पित्र्यस्य वसुनः प्रभुः।

इति तेनैवोक्तत्वात् पितृरिक्थे भ्रात्रादीनां न प्रसक्तिरिति कथं तत्प्रतिषेधोऽवकल्पते। न च प्रनष्टपुत्रविषयेऽवकल्पत इति वाच्यं, पुत्रा रिक्थहरा इति विधानानवकल्पनात्। उच्यते—'पुत्रा रिक्थहराः पितुः' इत्यत्र पितृपुत्रशब्दौ गौणौ। एवञ्चायमर्थः—क्षेत्रजादिपुत्राः क्षेत्रस्वाम्यादिपितृरिक्थहरा न तद्भ्रात्रादय इति। क्षेत्रजादिपुत्रा अपि तेन दर्शिताः—

यस्तल्पजः प्रमीतस्य क्लीबस्य पतितस्य वा।

स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः॥

माता पिता वा दद्यातां यमाद्भिः पुत्रमापदि।

सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमस्सुतः ॥
सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥
उत्पद्यते गृहे यस्तु न विज्ञायेत कस्यचित् ।
स गृहे गूढ उत्पन्नस्तस्य स्याद्यस्य तल्पजः ॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धस्तु स स्मृतः ॥
पितृवेश्मनि यं पुत्रं जनयेत् कन्यका रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥
या गर्भिणी संस्क्रियते ज्ञाताऽज्ञाताऽपि वा सती ।
वोढुस्स गर्भो भवति सहोढ इति चोच्यते ॥
क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोसदृशोपि वा ॥
या पत्या वा परित्यक्ता विधवा वेच्छयाऽऽत्मनः ।
उत्पादयेत्पुनर्भूत्वा स पौनर्भव उच्यते ॥
मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयं दत्तस्तु स स्मृतः ॥
यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतम् ।
स पारयन्नेव शवस्तस्मात् पारशवस्स्मृतः ॥
क्षेत्रजादीन् सुतानेतानेकादश यथोदितान् ।
पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः ॥

इति। अद्विरिति पुत्रदानविधानस्योपलक्षणार्थम्। तद्विधानं चास्माभिर्दत्तापदानिकपदे दर्शितम्। आपदि दुर्भिक्षादौ, अथवा ग्रहीतुरापदि पुत्राभावे। सदृशं दातुः प्रतिग्रहीतुश्च सवर्णम्। प्रीतिसंयुक्तं न लोभादिसंयुतम्। प्रकुर्यात् अनाथं पुत्रत्वेन स्वीकुर्यात्। सदृशोसदृशोपि वेत्यत्र गुणापेक्षयेति शेषः। गृहे भार्यया उत्सृष्टं दुष्टमुहूर्तजत्वादिहेतुतो न पाति-त्यतः। पारयन्नेव शवः जीवन्नेव शवः। पुत्रप्रतिनिधीन् गौणपुत्रान्। क्रियालोपात् औरसाभावे तत्कर्तृकश्राद्धादि-क्रियालोपात् बिभ्यतो मनीषिण आहुरिति सम्बन्धः। एवं निरूपितगौणपुत्राणां सर्वेषां युगान्तरे पुत्रत्वेन परिग्रहः, कलौ तु दत्तस्यैव—

दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः।

इति कलेरादौ धर्मगुप्त्यर्थं महात्मभिः दत्तकौरसेतरेषां पुत्र-त्वेन परिग्रहनिवारणात्। पुत्रिकाकरणमप्यस्मादेव वाक्यात् कलौ निवारितं, दत्तौरसेतरत्वात् पुत्रिकायाः। एवञ्च क-लावौरसपुत्रपौत्रयोरभावे दत्तक एव पुत्रो गौणो भवति नान्य इत्यनुसन्धेयम्। मुख्योपि पुत्रः कलावसवर्णभार्याभवो नास्ति, असवर्णकन्याविवाहनिषेधात्। तथाच धर्मवाक्यं—

कन्यानामसवर्णानां विवाहश्च द्विजन्मभिः॥

इति। अत्रापि कलेरादौ धर्मगुप्त्यर्थं महात्मभिः निवारित इति वाक्यशेषो द्रष्टव्यः। अत एवास्माभिरसवर्णापुत्राणां

दत्तकेतरगौणपुत्राणां पुत्रिकायास्तत्पुत्रस्य च विभागविधयो न निबध्यन्ते, सम्प्रत्यननुष्ठेयतया वृथा ग्रन्थविस्तरापत्तेः। यत् पुनर्मनुनोक्तं—

भ्रातॄणामेकजातानामेकश्चेत् पुत्रवान् भवेत्।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्॥

इति, तन्न परमार्थतो भ्रात्रन्तरस्यापि तेनैव पुत्रेण पुत्रवत्त्वमाचष्टे, भ्रातृपुत्रसद्भावेऽपि भ्रात्रन्तरस्यापुत्रत्वावगमात्। अत एव याज्ञवल्क्येन 'पत्नी दुहितरः' इत्यादिना भ्रातृपुत्रसद्भावेऽपि 'स्वयंजातस्य ह्यपुत्रस्य' इत्युक्तम्। भ्रातृपुत्रस्य च पत्नीदुहितृपितृभावे सत्यपुत्रधनभागित्वं च अत एव तत्रोक्तम्। एवं तर्हि मनुवचनस्य का गतिः? उक्तमस्माभिश्श्राद्धाधिकारनिरूपणप्रकरणे भ्रात्रन्तराणां पुत्रवत्त्वोक्तिः ग्रामस्य तात इतिवदौरसप्रशंसार्थेति। यत्तु सङ्ग्रहकारेणोक्तं—

यद्येकजाता बहवो भ्रातरस्तु सहोदराः।
एकस्यापि सुते जाते सर्वे ते पुत्रिणः स्मृताः॥
बह्वीनामेकपत्नीनामेष एव विधिस्स्मृतः।
एका चेत्पुत्रिणी तासां सर्वासां पिण्डदस्तु सः॥

इति, तस्य पूर्वोक्तेन सहाविरोधाय देवस्वामिना तात्पर्यार्थ उक्तः, 'उभयत्र नान्यः प्रतिनिधिः कार्यः' इत्यन्तेन ग्रन्थेन। उभयत्रापि 'यद्येकजाताः' इत्यादिवचनद्वयेऽपि

भ्रातृसुते सपत्नीसुते पुत्रप्रतिनिधितया कथञ्चित्कर्तुं शक्ये सति तदन्यो न प्रतिनिधिः कार्य इति तात्पर्यार्थो बोद्धव्य इत्यर्थः। एवञ्च गौणपितृद्वारा धनागमनं कलौ दत्तकाख्यं पुत्रं प्रत्येव। अत्र मनु—

उपपन्नो गुणैस्सर्वैः पुत्रो यस्य तु दत्त्रिमः।
स हरेतैव तद्रिक्थं संप्राप्तोप्यन्यगोत्रतः॥

अपिशब्दात्सगोत्रतः संप्राप्तोपि। अत्र तृतीयपादार्थो देवस्वामिना विवृतः—'तदीयं सर्वं रिक्थं गोत्रं च हरेतैव' इति। एवञ्च पुत्रत्वापादकक्रिययैव दत्त्रिमस्य प्रतिग्रहीतुर्धने स्वत्वं तत्सगोत्रत्वं च भवतीति मन्तव्यम्। दातुर्धने तु दानादेव पुत्रत्वनिवृत्तिद्वारा दत्त्रिमस्य स्वत्वनिवृत्तिर्दातुर्गोत्रनिवृत्तिश्च भवतीति चावगन्तव्यम्। अनेनैवाभिप्रायेणोक्तं—

गोत्ररिक्थे जनयितुर्न हरेद्दत्त्रिमस्सुतः।

इति। प्रतिग्रहीतृरिक्थग्रहणेऽपि सर्वं क्वचिद्विषये न हरेत्। तथाच वसिष्ठः—'तस्मिंश्चेत्प्रतिगृहीत औरसपुत्र उत्पद्येत चतुर्थभागी स्यात्' इति। विष्णुः—

अनेकपितृकाणां तु पितृतोंऽशस्य कल्पना।
यद्यस्य पैतृकं रिक्थं स तद्गृह्णीत नेतरः॥

यत्र भ्रातृणामेकस्यौरसः पुत्र इतरेषां क्षेत्रजादयः यदा ते अविभक्तधना मृताः तदा तेषामौरसादीनां मुख्यगौणपितृ-

द्वारा पैतामहद्रव्यविभागकल्पना कर्तव्या । तत्राप्यौरसोत्पत्तौ चतुर्थांशभागित्वमेव, इतरेषां पूर्वन्यायानपायात् । यत्र भ्रातरः केचिज्जीवन्ति केचिन्नष्टाः तत्राप्ययमेव न्याय इति ॥

इति स्मृतिचन्द्रिकायां गौणपितृद्वाराऽऽगतधनविभागः.

अथ पुत्रद्वाराऽऽगतधनविभागः.

तत्र मनुः—

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा ।

इति । अक्षरार्थो व्यक्तस्तात्पर्यार्थस्त्वव्यक्तः सङ्ग्रहकारेण दर्शितः—

अशेषात्मजहीनस्य मृतस्य धनिनो धनम् ।
केनेदानीं ग्रहीतव्यमित्येतदधुनोच्यते ॥

अस्यायमर्थः—मुख्यगौणपुत्रविहीनस्य धनवतो मृतस्य धनमिदानीं तन्मरणानन्तरं केन जनेन हर्तव्यमित्याकाङ्क्षायां पित्रादिना हर्तव्यमित्येतत् अधुना पित्राद्यपेक्षयेह बहुविधोपकारकासन्नजनाभावे मनुनोच्यत इति । अत एव पित्रादिभ्यो गौणपुत्राणामासन्नतरत्वं ज्ञात्वा सङ्ग्रहकारेण 'पिता हरेदपुत्रस्य' इत्यस्य अशेषात्मजहीनस्येति तात्पर्यमुक्तं, तदनवद्यमेव । किंतु यथा गौणपुत्राणां दृष्टादृष्टोपकारकत्वेन पित्राद्यपेक्षयाऽग्रेसरत्वात्तदपेक्षयाऽऽसन्नतरत्वं, तथा पत्न्या अपि दृष्टादृष्टोपकारकरणे श्रुतिस्मृत्यादिपर्यालोचनया पित्राद्यपेक्ष-

याऽग्रेसरत्वात्तदपेक्षयाऽऽसन्नतरत्वमस्तीति पत्न्या अप्यभावे 'पिता हरेदपुत्रस्य' इत्येतन्मनुनोच्यत इत्येवं तात्पर्यमूह्यते । अत एव दृष्टादृष्टोपकारकत्वलक्षणसम्बन्धेनान्यापेक्षया पत्न्याः प्रत्यासन्नत्वमभिधाय बृहस्पतिना गौणपुत्राभावे तिष्ठत्स्वपि पित्रादिषु सकुल्यान्तेषु पत्न्या एव पतिधनभागित्वं दर्शितम्—

आम्नाये स्मृतितन्त्रे च लोकाचारे च सूरिभिः ।
शरीरार्धं स्मृता भार्या पुण्यापुण्यफले समा ॥
यस्य नोपरता भार्या देहार्धं तस्य जीवति ।
जीवत्यर्धशरीरेऽर्थं कथमन्यस्समाप्नुयात् ॥
कुल्येषु विद्यमानेषु पितृभ्रातृसनाभिषु ।
असुतस्य प्रमीतस्य पत्नी तद्भागहारिणी ॥

अत्र द्वितीयार्धेन दृष्टादृष्टोपकारसंपादने पुत्रादिभ्यः पत्न्याः प्रत्यासन्नत्वमुक्तम् । अवयवार्थस्तु—आम्नाये वेदे 'अर्धो वा एष आत्मनः । यत्पत्नी' इत्येवमादौ । आत्मनो देहस्येत्यर्थः । एतदुक्तं भवति—देहार्धं यथा अर्थात् अर्धं दृष्टादृष्टोपकारि तथा जायाऽपीति । स्मृतितन्त्रे धर्मशास्त्रे—

पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत् ।
पतितार्धशरीरस्य निष्कृतिर्न विधीयते ॥

इत्येवमादौ । लोकाचारे लोकानुसार्यर्थशास्त्रे

शरीरार्धमयीं भार्यां को विहास्यति पण्डितः ।

इत्येवमादौ। पुण्यापुण्यफले स्मार्तकर्माणि सहाधिकारात्। असुतस्य मुख्यगौणसुतहीनस्य। पत्नी यज्ञाधिकारापादकप्रशस्त-ब्राह्मादिविवाहसंस्कृता 'पत्युर्नो यज्ञसंयोगे' इति पाणिनिस्मरणात्। नेतरा, पत्नीपदेन व्यावर्तितायाः तस्याः पत्नीत्वायोगात्। तथाच स्मृत्यनन्तरं—

क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः॥

पत्नीत्वाभावे केवलदृष्टोपकारत्वं स्त्रिया इति दर्शयितुं दासीं विदुरित्युक्तम्। एवञ्च पित्र्यादिकर्मण्यर्हताऽपि पतिभागहारित्वे प्रयोजिकेति पत्नीग्रहणेन ज्ञापितम्। अत एव श्रौत-स्मार्तादिकर्मणि पातिव्रत्येन परिरक्षितायाः अधिकारार्हायाः एव पत्न्याः पतिधनलाभ इत्याह प्रजापतिः—

पूर्वं प्रमीताग्निहोत्रं मृते भर्तरि तद्धनम्।
लभेत्पतिव्रता नारी धर्म एष सनातनः॥

अग्निहोत्रशब्देन तत्साधनाग्निर्लक्ष्यते। पतिव्रता सुसंयता, स्वतः प्रायश्चित्तेन वा श्रौतस्मार्तकर्माधिकारार्हतया वा भर्त्रा सहवासेन स्थितेति यावत्। नारी पत्नी, अग्निहोत्रलाभोक्तेः पत्नीत्वावगमार्थत्वात्। कर्मार्हायाः पित्र्ये कर्मणि भ्रात्राद्यपेक्षयाऽग्रेसरत्वं बृहस्पतिना दर्शितं—

पुत्राभावे तु पत्नी स्यात् पत्न्यभावे तु सोदरः।

इति । अत्र वृद्धमनुः—

अपुत्रा शयनं भर्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात्तत्पिण्डं कृत्स्नमंशं लभेत च ॥

उत्तरार्धे त्वर्थक्रमेण पाठक्रमबाधो द्रष्टव्यः । ततश्चायमर्थः— उक्तलक्षणा पत्न्येव कृत्स्नं भर्त्रंशं पूर्वं लभेत पश्चात् पतिपिण्डं दद्यात् । न पुनस्तस्यां सत्यां भ्रात्रादिरिति । भर्तुश्शयनं पालयन्ती सुसंयतेत्यर्थः । व्रते स्थिता पत्यौ जीवत्यपि भर्तुरनुज्ञया व्रतादिपरा 'कामं भर्तुरनुज्ञया व्रतोपवासनियमेज्यादीनामारम्भः स्त्रीधर्मः' इति शङ्खलिखितस्मरणात् । अनेनास्तिकताऽपि पत्यंशलाभे प्रयोजिकेति वचोभङ्ग्या ज्ञापितमिति मन्तव्यम् । यद्यपि विवाहादेव पतिधने कृत्स्ने पत्न्या अपि स्वाम्यमाजीवनात् परतन्त्रतया सिद्धं, तथाऽपि स्वतन्त्रतया स्वामित्वान्तरं लभ्यत इत्येवमर्थं लभेत चेत्युक्तम् । तत्पिण्डकृत्स्नपदयोरर्थः प्रजापतिना प्रपञ्चितः—

जङ्गमं स्थावरं हेम कुप्यं धान्यरसाम्बरम् ।
आदाय दापयेच्छ्राद्धं मासषाण्मासिकादिकम् ॥
पितृव्यगुरुदौहित्रान् भर्तुस्स्वस्रीयमातुलान् ।
पूजयेत्कव्यपूर्ताभ्यां वृद्धानाथातिथींस्तथा ॥

इति । कुप्यं त्रपुसीसादि । कव्यं पित्रर्थं सङ्कल्पितमन्नम् । पूर्तं पूर्ताख्यखाताद्यकर्माङ्गभूतं दक्षिणादिकम् । एतदुक्तं भवति—स्थावरेणापि सहितं कृत्स्नमंशमादाय धनसाध्यं स्वय-

धिकारश्राद्धपूर्तादिकं दानादिकं च पत्युरात्मनश्च श्रेयस्साधनं कर्मजातं पतिपक्षीयऋत्विगाचार्यादिपुरस्सरं पत्न्या गृहीतधनानुसारेण कार्यमिति । एवञ्च यत्कैश्चिदुक्तं—पत्नीगृहीतं धनं योग्यपतिपक्षाभोग्यं धनिकानुपकारकं वृथा यास्यतीति न पत्नी पतिधनभागिनीति, तत् असिद्धहेतुकत्वाद्धेयम् । एतच्च पत्नीस्वामित्वं विभक्ते पत्यौ द्रष्टव्यम् । यदाह बृहस्पतिः—

यद्विभक्ते धनं किञ्चिदाध्यादि विविधं स्मृतम् ।
तज्जाया स्थावरं मुक्त्वा लभेत मृतभर्तृका ॥

यत्किञ्चिदाध्यादि विविधं धनं स्थावरजङ्गमात्मकं भर्तृस्वामिकात्मकं स्मृतं, तत्सर्वं विभक्तविषये लभेतेत्यर्थः । विभक्तग्रहणादविभक्तविषये तु सहवासिन एव पितृभ्रात्रादया मृतापुत्रधनं लभेरन्निति गम्यते । जाया पत्नी । स्थावरं मुक्त्वेत्येतद्दुहितृरहितपत्नीविषयम् । पत्नीमात्रविषयत्वे तु—

जङ्गमं स्थावरं हेम कुप्यं धान्यरसास्बरम् ।
आदाय..... ॥

इति पूर्वोक्तवचनविरोधस्स्यात् । न च तद्विरोधपरिहारायाविभक्तपत्यंशविषयं वृत्तहीनपत्नीविषयं वेदं वचनमस्त्विति वाच्यम् । यत एवंप्रकारां व्यवस्थां निराकर्तुमाह स एव—

वृत्तस्थाऽपि कृतेऽप्यंशे न स्त्री स्थावरमर्हति ।

इति । सन्तानवृत्तिभूतस्थावरलब्ध्यर्हता तु सन्तानशालितायत्ते

ति तच्छून्या स्त्री वृत्तस्थाऽपि विभक्तविषयेऽपि स्थावरं नार्हती-त्यर्थः। यदपरमुक्तं तेनैव—

मृते भर्तरि भर्त्रंशं लभेत कुलपालिका।
यावज्जीवं हीनस्वाम्यं दानाधमनविक्रये॥

इति, कुलपालिका वंशपालिका वृत्तस्थेति यावत्। तत् वृद्धानाथाद्युपजीवनायादृष्टार्थदानविधानात् तदितरदृष्टार्थनर्तका-दीनां दानादावस्वातन्त्र्यप्रतिपादनार्थमिति मन्तव्यम्। एवञ्च धर्मार्थदाने स्वातन्त्र्यमस्त्येव। अत एव धर्मार्थदानमनिशमाव-र्तनीयमित्याह स एव—

व्रतोपवासनिरता ब्रह्मचर्ये व्यवस्थिता।
धर्मदानरता नित्यमपुत्राऽपि दिवं व्रजेत्॥

न हि पारतन्त्र्ये नित्यदानक्रिया युज्यते। एवञ्चादृष्टसाधक-द्रव्यसम्पादनार्थयोराधिविक्रययोरापि स्वातन्त्र्यमप्रतिषिद्धमिति मन्तव्यम्। यदपरमुक्तं कात्यायनेन—

अपुत्रा शयनं भर्तुः पालयन्ती गुरौ स्थिता।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्ध्वमाप्नुयुः॥

इति, क्षान्ता दायादकारितधनाविनियोगप्रतिबन्धं सहमाने-त्यर्थः। तत् अविभक्तदशायां रक्षणभरणासमर्थेषु कार्यान्तर-व्यग्रेषु वा श्वशुरादिषु पत्न्या स्वयमेव जीवनार्थमुपात्ताव-भक्तद्रव्यविषयम्। विभक्तद्रव्यविषयत्वे वृद्धमन्वादिवचनपरि-निश्चितार्थविरोधापत्तेः। रक्षणादिसमर्थेषु श्वशुरादिष्वविभक्त-

मृतधनग्राहिषु सत्सु तैरेव गृहीतधनैर्भरणं कार्यम्। तथाच नारदः—

यावत्यो विधवास्साध्व्यो ज्येष्ठेन श्वशुरेण वा।
गोत्रजेनापि वाऽन्येन भर्तव्याश्छादनाशनैः॥

धनग्राहिणेति सर्वत्र ज्येष्ठादौ शेषो द्रष्टव्यः। धनग्रहणनिमित्तत्वात् भरणस्य। अत्र विशेषमाह कात्यायनः—

स्वर्याते स्वामिनि स्त्री तु ग्रासाच्छादनभागिनी।
अविभक्ते धनांशं तु प्राप्नोत्यामरणान्तिकम्॥

धनांशं यावता धनेनाक्लिष्टजीवनं धनसाध्यं च नित्यनैमित्तिकं कर्म स्वयधिकारकं काम्यव्रतादिकं च सिध्यति तावन्तमित्यर्थः। तुशब्दो वाशब्दार्थे, धनांशं वा प्राप्नोतीत्यर्थः। एतावद्धनसंपादकं क्षेत्रांशं वा प्राप्नोति, धनग्रहणस्य वर्तनाद्युपायोपलक्षणार्थत्वात्। अत्राद्यपक्षः पत्नीव्यतिरिक्तभार्याविषयः, जीवनमात्रसाधनस्वल्पार्थभागित्वाभिधानात्। जीवनमात्रसाधनस्य स्वल्पामियत्तामाह नारदः—

आढकांस्तु चतुर्विंशत् चत्वारिंशत्पणांस्तथा।
प्रतिसंवत्सरं साध्वी लभेत मृतभर्तृका॥

आढकोऽष्टोनद्विशतप्रस्तिपरिमितो धान्यचयः। पणः कार्षापणः। स च व्यावहारिकनिष्काशीतितमभागस्य स्थाने क्वचिद्देशे प्रवर्तते। तेन यत्र देशे पणो न प्रवर्तते तत्र त-

त्स्थाने व्यावहारिकनिष्काशीतितमभागः लभ्यते । कृतेऽप्यंश इत्यनुवृत्तौ बृहस्पतिः—

प्रदद्यात्त्वेव पिण्डं वा क्षेत्रांशं वा यदृच्छया ।

इति । पिण्डग्रहणं अशनाच्छादनोपलक्षणार्थम् । एवञ्चायमर्थः—अशनाच्छादनं पूर्वोक्तपरिमाणकं पूर्वोक्तधनांशसंपादकक्षेत्रांशं वा । स च रुच्या भर्त्रंशार्हपत्नीव्यतिरिक्तविधवायै अविभक्तविषये जीवनार्थं प्रदद्यादिति । एवकारः प्रदानस्यावश्यकत्वज्ञापनार्थः । श्वश्वाद्यशुश्रूषकस्त्रीविषयोत्राद्यः पक्षः । तत्र ज्ञापकमुपरिष्टात् भविष्यति । दत्तं च दायकैतरैरपि पालनीयमित्याह स एव—

स्थावराज्जीवनं स्त्रीभ्यो यद्दत्तं श्वशुरेण तु ।
न तच्छक्यमपाहर्तुमितरैः श्वशुरे मृते ॥

श्वशुरग्रहणं भरणकारिण उपलक्षणार्थम् । स्थावरग्रहणं च धनस्योपलक्षणार्थम् । तेन धनाद्यपि जीवनार्थं स्त्रीभ्यो दत्तमपाहर्तुमशक्यमितरैरित्यवगन्तव्यम् । क्वचिदपहर्तव्यमित्याह कात्यायनः—

भोक्तुमर्हति क्लृप्तांशं गुरुशुश्रूषणे रता ।
न कुर्याद्यदि शुश्रूषां चेलपिण्डे नियोजयेत् ॥

क्लृप्तांशं अपहृत्येति शेषः । एवमकार्यकारिण्यादावपि क्लृप्तांशापहरणं कार्यमित्याह स एव—

अपचारक्रियायुक्ता निर्लज्जा चार्थनाशिका ।
व्यभिचाररता या च स्त्री धनं न च साऽर्हति ॥

इति । धनं जीवनार्थमुपकल्पितधनांशं, क्षेत्रांशं वा जीवनाद्यर्थमुपकल्पितं उक्ता चतुर्विधा स्त्री नार्हतीत्यर्थः । धनग्रहणमशनाच्छादनाद्युपलक्षणार्थम् । अत एव नारदः—

भरणं चापि कुर्वीरन् स्त्रीणामा जीवनक्षयात् ।
रक्षन्ति शय्यां भर्तुश्चेत् आच्छिन्द्युरितरासु तत् ॥

इतरासु व्यभिचाररतासु । भरणमशनाच्छादनाय कल्पितं धान्यवस्त्रमूल्यद्रव्यमाच्छिन्द्युः अपहरेयुरित्यर्थः । यदत्र मनुनोक्तं—

एवमेव विधिं कुर्याद्योषित्सु पतितास्वपि ।
वस्त्रान्नमासां देयं तु वसेयुश्च गृहान्तिके ॥

इति, तत् भर्तृकर्तृकभरणविषयमिति पूर्वार्धत एवावगम्यत इत्यविरोधः । या पुनरशङ्कितव्यभिचारा तस्यास्तु विभक्तविषये पत्नीत्वेऽपि हारीतोक्तं कार्यं—

विधवा यौवनस्था चेत् नारी भवति कर्कशा ।
आयुषः क्षपणार्थं तु दातव्यं जीवनं तदा ॥

इति । कर्कशा क्रूरा साहसार्हा संभावितव्यभिचारेति यावत् । यत्पुनर्मनुना 'पत्न्येव कृत्स्नमंशं लभेत च' इति वृद्धमनूक्तविरुद्धमुक्तं—

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः ।
म्रियेतान्यतरो वाऽपि तस्य भागो न लुप्यते ॥
सोदर्या विभजेरंस्तं समेत्य सहितास्समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥

इति, हीयते पातित्यादिनिमित्तेनेति शेषः । यदपि नारदेन—

संसृष्टानां तु यो भागस्तेषामेव स इष्यते । इत्युक्त्वोक्तं—
भ्रातॄणामप्रजाः प्रेयात् काश्चिच्चेत् प्रव्रजेत वा ।
विभजेयुर्धनं तस्य शेषास्ते स्त्रीधनं विना ॥

इति, तदेतद्वयमपि संसृष्टद्रव्यविषयमिति स्पष्टमेव, तेन नास्ति विरोधः । एवञ्च 'पत्न्येव समस्तमंशं लभेत' इति विभक्तासंसृष्टविषयमिति मन्तव्यम् । तथाच सङ्ग्रहकारः—

भ्रातृषु प्रविभक्तेषु संसृष्टेष्वप्यसत्सु च ।
गुर्वादेशान्नियोगस्था पत्नी धनमवाप्नुयात् ॥

गुर्वादेशान्नियोगस्थेति धारेश्वरमतं विश्वरूपादिभिस्सम्यक् दूषितत्वादुपेक्षणीयम् । ततश्च सङ्ग्रहकारोक्तविषये वृद्धमनूक्तगुणविशिष्टा पत्नी भर्तृधनमखिलमवाप्नुयादित्येतदेव मतमादर्तव्यम् । यत्तु श्रुतावुक्तं 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति, तदपि न वृद्धमन्वादिवचनबाधकं, निरिन्द्रियपुत्रसाहचर्यादपत्यभूतस्त्रीविषयत्वावगतेः । भवतु वा सर्वस्त्रीविषयत्वावगतिः, तथाऽपि दायादतया शृङ्गग्राहिकोक्तपत्न्यादिस्त्रीव्यतिरिक्तविषयार्थवादश्रुतिरिति सर्वं सुस्थम् । पत्नी-

बहुत्वे समं विभज्य अपुत्रभर्तृधनग्रहणं सर्वासां युक्तम्। एवं सर्वस्मृत्येकवाक्यतया निश्चितं पत्नीधनं ये प्रतिबध्नन्ति ते राज्ञा नियन्तव्या इत्याह प्रजापतिः—

तत्सपिण्डा बान्धवाश्च ये तस्याः परिपान्थिनः।
हिंस्युर्धनानि तान् राजा चोरदण्डेन शासयेत् ॥

इति स्मृतिचन्द्रिकायां पुत्रद्वाराऽऽगतधनविभागे पत्नीविषयाणि.

अथ दुहित्रादिविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र बृहस्पतिः—

भर्तुर्धनहरी पत्नी तां विना दुहिता स्मृता ॥

इति। तां विना तस्या अभाव इत्यर्थः। अत एव विष्णुः—'अपुत्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि' इति। अस्मिन् क्रमे न्यायमाह बृहस्पतिः—

अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता नृणाम्।
तस्मात्पितृधनं त्वन्यः कथं गृह्णीत मानवः ॥

शरीरावयवसम्बन्धेन दुहिता पुत्रसमा, पुत्रे हि पित्रवयवानां बाहुळ्येन सङ्क्रान्तिः, दुहितरि त्वल्पतया—

पुमान् पुंसोऽधिके शुक्ले स्त्री भवत्यधिके स्त्रियाः।

इति स्मरणात्। तेन किंचित्सामान्यात् पुत्रवदित्युक्तम्। अन्यः पुत्रपत्नीव्यतिरिक्तः पित्रादिर्मानवः तिष्ठन्त्यां दुहितरि पुत्रधनं कथं गृह्णीतेत्यर्थः। तथाच मनुः—

यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।
तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत् ॥

आत्मनि आत्मतुल्यपुत्रसमायामित्यर्थः। नन्वेवमपि गौणपुत्रपत्नयोरभावे दुहितेतिक्रमे न्यायो नोक्तः, औरसाभावमात्रे दुहितेत्येतावन्मात्रसाधकत्वादुक्तन्यायस्य । सत्यं,— किंत्विदमेव गौणपुत्रपत्नयोरभावे दुहितेत्यत्रापि क्रमे न्याय ऊहनीय इत्यभिप्रायेणोक्तम् । अत एव नारदेन तयोरप्यभावे दुहितेति क्रमानुसारी न्यायः स्वयमूहितो मन्दानुग्रहाय प्रदर्शितः—

पुत्राभावे तु दुहिता तुल्यसन्तानदर्शनात्।

इति। स्वयमेव न्यायं विवृणोति—

पुत्रश्च दुहिता चोभौ तुल्यसन्तानकारकौ।

इति। उभौ स्वापितृश्रेयस्करसन्तानकारकावित्यर्थः । तथाहि पौत्रदौहित्रयोः पुत्रदुहितृसन्तानयोस्स्वरूपतस्तुल्यत्वाभावात् कार्यतोत्र तुल्यत्वमभिप्रेतम्। न च ऋणापाकरणकार्यतस्तुल्यत्वं सम्भवति 'पुत्रपौत्रैः ऋणं देयम्' इति स्मरणात् । तथा पितामहद्रव्यमाधिकृत्य—

तत्र स्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोः।

इति स्मरणतश्च पौत्रस्याधिक्यप्रतीतेः, तेनात्रादृष्टकार्यतस्तुल्यत्वमभिप्रेतम्। तच्च—श्राद्धदातृत्वं

पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः।

इति विष्णुस्मरणात्। एवञ्च दुहितुः स्वसन्तानमुखेनादृष्टोपका-

रकसंबन्धेनासन्नता च। एतावता निमित्तेन 'पुत्राभावे तु दुहिता' इत्यत्र पुत्रग्रहणं पत्न्या अपि प्रदर्शनार्थमिति मन्तव्यम्। ननु पिता श्राद्धदाने स्वयमेवादृष्टोपकारक इति दुहितुरपेक्षयाऽऽसन्नत्वात् पत्न्यभावे 'पिता हरेदपुत्रस्य' इत्यस्यायमवसर इति कथं दुहितुरर्थग्रहणं? मैवं,

तस्यामात्मनि तिष्ठन्त्यां कथमन्यो धनं हरेत्।

इत्यनेनैवोक्तत्वात्। तथाहि—यद्यप्यदृष्टोपकारसम्बन्धेन व्यवहिता, तथाऽपि शारीरसम्बन्धेनाव्यवहितेत्युभयथासम्बन्धा दुहितैवाग्रेसरी। एवं तर्हि दुहित्रभावे पिता हरेदित्यस्यावसरस्यात्। नाधुनाऽपि तस्यावसरः, दुहित्रभावेऽपि दौहित्रस्य तत्कोटित्वेन पित्राद्यपेक्षयाऽऽसन्नत्वात्—

अपुत्रपौत्रसन्ताने दौहित्रा धनमाप्नुयुः।
पूर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः॥

इति विष्णुस्मरणाच्च। एवं सोपपत्तिकां पत्न्यभावे दुहितृगामितां ब्रुवता बृहस्पत्यादिनैव दौहित्रगामि धनमिति विधायकं यद्वचनजातं तत्पुत्रिकाविषयमेव, न पुनरपुत्रिकादुहितृविषयमिति धारेश्वरदेवस्वामिदेवरातमतं स्मृतितन्त्राभिज्ञत्वाभिमानोन्मादकल्पितं निरस्तं वेदितव्यम्। तथाहि—'तृतीयः पुत्रः पुत्रिका विज्ञायते' इति वसिष्ठस्मृत्या गौणपुत्रकोटिनिविष्टायाः पुत्रिकायाः पत्न्यां सत्यामपि क्षेत्रजादेरिव,

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः ।

इत्यादिवचनान्तरैरेव औरसाभावे रिक्थग्राहिण्याः पत्न्याः प्रागेव दण्डापूपन्यायेनैव धनभागित्वे सिद्धे पुनः किं सोपपत्तिकं धनभागित्वं स्मर्तुं बृहस्पत्यादीनां वचनान्तरारम्भेण । तेन तैरेव तन्मतं निरस्तमित्यलं धारेश्वरादिमतान्तरनिराकरणयत्नेनास्मदीयेन । यत्तु नारदेन पुत्रहीनपत्नीमधिकृत्योक्तं—

स्यात्तु चेद्दुहिता तस्याः पित्र्योऽंशो भरणे मतः ।
आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः ॥

इति, तस्यार्थः—तस्याः पत्न्याः पुत्ररहितायाः यदि दुहिता विद्यते तदा दुहितुर्भरणे भरणाय पित्र्योऽंशोऽभिमतः । तस्मादा विवाहसंस्कारात् भरणार्थमेव दुहिता पितृभागं हरेत् । न पुनर्यथेष्टविनियोगार्थमिति । एवञ्च सर्वासामेव कन्यानां पितृधनप्राप्तिरुत्सर्ग इति गम्यते । ततश्चास्यापवादकानि दुहितुः पितृधनप्राप्तिप्रतिपादकानि वचनानि सर्वाणि पुत्रिकाविषयाण्येवेति वाच्यं, दुहितृमात्रविषयत्वे तूत्सर्गवत्सामान्यतया तदपवादाक्षमत्वादनर्थकानि भवेयुः । तस्माद्धारेश्वरादीनामेव मतमनुसर्तव्यस्यादेवं यदि नारदवचनं विभक्तविषयं स्यात् संसृष्टिविषयं तु तदितितस्यैव पूर्वापरपर्यालोचनया स्फुटमवगम्यते । ततश्च विभक्तविषये यानि दुहितृदायप्रतिपादकवचनानि तेषां तत्प्रापकत्वमेव नापवादकत्वमिति न पुत्रिकाविषयत्वकल्पने किञ्चिन्मूलमुपलभामह इत्यलमतिबहुना । एवमपि

न दुहितृमात्रविषयाणि तानि वचनानि, यत आह कात्यायनः—

पत्नी भर्तुर्धनहरी या स्यादव्यभिचारिणी ।
तदभावे तु दुहिता यद्यनूढाऽप्रतिष्ठिता ॥

इति । एवञ्च कात्यायनवचनान्यनूढादुहितृविषयाणि, अथवा निर्धनोढादुहितृविषयाणीति मन्तव्यम् । निर्धनत्वेनैवाप्रतिष्ठिताऽत्र विवक्षिता, न पुनर्वन्ध्यात्वादिना सन्तानराहित्येनाप्रतिष्ठिता, तस्यास्सन्तानमुखेनादृष्टोपकारकसम्बन्धाभावेन धनहारित्वायोगात् । तदभावे इत्यनेन पूर्वोक्तायाः अव्यभिचारिण्याः पत्न्या अभावः प्रत्यवमृश्यते, न पत्नीस्वरूपमात्रस्य, न केवलं पत्न्याः स्वरूपाभावे दुहिता धनहारिणी किंत्वव्यभिचारित्वलक्षणविशेषणाभावेऽपीति मन्तव्यम् । अत एव सङ्ग्रहकारेण—

तादृक्पत्न्या अभावेऽपि पुत्रिका धनमर्हति ।

इत्युक्तम् । न परं पत्नीस्वरूपाभावे, किंतु धनभागिनीति निरूपणार्थमुक्तविशेषणविशिष्टपत्न्यभावेऽपि पुत्रिका धनमर्हतीत्यर्थः । पुत्रिका धनमर्हतीति तु प्रागेव निरस्तत्वादुपेक्षणीयम् । तेन पत्न्याः स्वरूपाभावे दुहितृगामि द्रव्यं, विशेषणाभावे तु पिता हरेदित्यादिवचनोक्तपित्रादिगामीति कैश्चित् कृता विषयव्यवस्थाऽप्युपेक्षणीया । बृहस्पतिस्तु पत्न्या ऊर्ध्वमर्थग्राहिणीनां मुख्यपुत्रादूर्ध्वमर्थग्राहिणीनां च दुहितॄणां विशेषणान्याह—

सदृशी सदृशेनोढा साध्वी शुश्रूषणे रता ।
कृताऽकृता वाऽपुत्रस्य पितुर्धनहरी तु सा ॥

सदृशी पितृसवर्णा । अत्राद्यानि चत्वारि विशेषणानि पत्न्या ऊर्ध्वं धनग्राहिदुहितृविषयाणि । प्राग्धनग्राहिण्याः दुहितुर्विशेषणे त्वविशिष्टे । कृताकृतेत्यत्र पुत्रिकेति विशेष्यस्याध्याहारः कर्तव्यः । इतरत्र दुहितेति विशेष्यस्याध्याहारः कार्यः । वाशब्दो व्यवस्थितविकल्पाभिधानार्थः । एवंचायमर्थः— औरसपुत्राविहीनस्य पितुर्धनं द्विविधाऽपि पुत्रिका पत्न्याः पूर्वं गृह्णीयात्, सवर्णादिविशेषणोपेता दुहिता तूर्ध्वमिति । एवञ्च पत्न्या ऊर्ध्वं सवर्णादिविशेषणोपेताप्रतिष्ठितानूढानां दुहितृणां समवायेऽनूढैव गृह्णाति, पित्रा भर्तव्यत्वात् । तदभावेऽप्रतिष्ठिता, भर्त्रा भर्तव्यत्वेऽपि भर्तुर्भरणसामर्थ्याभावेनाप्रतिष्ठितत्वात् । तदभावे सवर्णादिविशेषणोपेता प्रतिष्ठिता, प्रतिष्ठितत्वेऽपि धनग्रहणयोग्यत्वात् । तदभावे दौहित्रः,तत्कोटित्वादित्यनुसन्धेयम् । दौहित्रस्याभावे तु पित्रपेक्षयाऽन्यस्यासन्नतरस्याभावात् । 'पिता हरेदपुत्रस्य रिक्थं' इत्युक्तस्यावसरत्वात् पितृगामि धनं भवति । अस्मिन्नेवावसरे मात्रपेक्षयाऽप्यन्यस्यासन्नतरस्याभावात्—

अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ।

इत्युक्तस्यावसरत्वान्मातृगामि धनं भवति । अत एव याज्ञवल्क्येन 'पत्नी दुहितरश्चैव पितरौ' इत्युक्तम् । चशब्देन सू-

चितस्य दौहित्रस्यानन्तरमेव मातापितरौ समसमये धनभाजौ । तयोरवान्तरक्रमे न्यायाभावादित्यभिप्रायो याज्ञवल्क्यस्यावगन्तव्यः । अभिप्रायमबुध्वाऽत्रापि कैश्चित्पण्डितंमन्यैः कश्चिन्न्याय उत्प्रेक्षितः, मातुर्गर्भधारणपोषणद्वारेणात्यन्तोपकारित्वात्,

सहस्रं तु पितुर्माता गौरवेणातिरिच्यते ।

इति स्मरणाच्च, पितरि विद्यमानेऽपि मातुरेव धनग्रहणेऽधिकार इति । नायं न्यायो मातुरादौ अंशग्रहणाधिकारापादनायालं, पितुरपि बहुधा संविधातृत्वात् विद्याप्रदत्वात्

तयोरपि पिता श्रेयान् बीजप्राधान्यदर्शनात् ।

इति स्मरणाच्च । अन्यैः पुनरन्यथा उत्प्रेक्षितः—पिता सप्तद्वीपुत्रेष्वपि साधारणः माता तु न साधारणीति प्रत्यासत्त्यतिशयोस्तीति । विप्रलम्भसदृक्षमिदं, न हि जननीजनकयोर्जन्यं प्रति संनिकर्षे तारतम्यमस्ति । न च बहुसम्बन्धतः साक्षात्सम्बन्धनिबन्धनायाः प्रत्यासत्तेरतिशयोप्यपैति । यदापि तैरेवोक्तं—'एकशेषश्रवणेऽपि कथञ्चिन्मातुः प्राथम्यमवगम्यते' इति, तदापि मन्दं, 'सारस्वतौ भवतः' इत्युत्पत्तिवाक्ये क्रमावगत्यभावेन याज्याक्रमेण प्रधानयोः क्रमः पञ्चमे दर्शितो न पुनस्सारस्वतावित्येकशेषत एव कथञ्चित्क्रमावगतिरुपपादितेति निर्निबन्धनमेव मातुः प्राथम्यसमर्थनम् । अत एव श्रीकरेण पित्रोर्विभज्यधनग्रहणमुक्तम् । तदप्ययुक्तं, 'पिता हरेद-

पुत्रस्य रिक्थं, स्वर्यातस्य ह्यपुत्रस्य माता दायमवाप्नुयात्' इत्येताभ्यां व्रीहियवयोर्निरपेक्षसाधनत्ववन्निरपेक्षस्वाम्यप्रतीतेः। अपरे पुनरन्यथा मातुः प्रत्यासत्तिमुन्नयन्ति—'सोदरस्य तु सोदरः' इत्रत्र मातृद्वारेण सोदरे दायवचनान्मातुः प्रत्यासत्तिर्गम्यत इति, तदेतत् काशकुशावलम्बनमात्रं, तथाहि भ्रातुर्भिन्नोदरादेकोदरयोरेकमातृकत्वेन प्रत्यासत्तौ विशेषोस्ति जनकात् पुनर्जनन्याः पुत्रं प्रति प्रत्यासत्तौ विशेषः किंनिबन्धनो भविष्यतीति न विद्मः। तस्मादत्र पित्रोस्सद्भावे कः क्रम इत्यपेक्षायां वक्तव्यो विशेषः। यत्तूक्तं शम्भुना—'मध्यकधनत्वात् दम्पत्योर्येनकेनचित् गृह्यमाणमुभयार्थमिति न विशेषो वक्तव्यः' इति, तदयुक्तम्। मात्रा गृह्यमाणं मात्रर्थमेवाध्यग्न्यादिस्त्रीधनवन्नोभयार्थमिति विशेषो वक्तव्य एव। सोभिधीयते—न्यायाभावादत्र क्रमे वचनमेव शरणं, वचने च पितुरेव प्रथमं धनग्रहणेऽधिकारः प्रतिपाद्यते। तथाच 'अपुत्रस्य धनं पत्न्यभिगामि, तदभावे दुहितृगामि' इत्यनुवृत्तौ बृहद्विष्णुः—'तदभावे पितृगामि तदभावे मातृगामि' इति। यद्यप्यपुत्रधनस्य दुहित्रभावे पितृगामित्वमुक्तम्। तथाऽपि दुहित्रभावे दौहित्रगामित्वस्य न्यायवचनाभ्यामुक्तत्वात्। दौहित्रस्याभावे तु पितृगामित्वमवगन्तव्यं, दौहित्रस्यापि दुहितृकोटित्वात् पृथक् दौहित्रगामित्वानभिधानं बृहद्विष्णोरिति च मन्तव्यम्। मात्रभावे तु सोदरभ्रातृगामित्वमेकमातृकत्वेन मृत-

भ्रातृप्रत्यासत्त्यतिशयलक्षणन्यायात् प्राप्तं, तदभावे भिन्नोद रभ्रातृगामित्वं च, तत् याज्ञवल्क्येन न्यायमूलक्रममेवाभिदधताऽभिहितं—'पितरौ भ्रातरस्तथा' इति । भ्रातरस्सोदरा एवात्र भिन्नोदरापेक्षया धनिनं प्रति पत्यासन्नत्वादभिप्रेताः । ततश्च मात्रभावे सोदरभ्रातृगाम्यपुत्रधनमित्युत्सर्गो याज्ञवल्क्येन दर्शितः । तथा सोदरत्वरूपविशेषविवक्षायामपि भ्रातर इति सामान्यशब्दप्रयोगेण सोदराभावे भिन्नोदरा इति चोत्सर्गस्तेनैव दर्शितः । उत्सर्गस्य वक्ष्यमाणविषयद्वयेऽपवादमाह कात्यायनः—

विभक्ते संस्थिते द्रव्यं पुत्राभावे पिता हरेत् ।
भ्राता वा जननी वाऽथ माता वा तत्पितुः क्रमात् ॥

तत्पितुर्माता विभक्तमृतापुत्रस्य पितुर्माता, पितामहीति यावत् । पुत्रग्रहणमासन्नतरोपलक्षणार्थम् । तेन पुत्रादिदौहित्रान्तानां पित्रपेक्षया दृष्टादृष्टोपकारकादिसम्बन्धेनासन्नतराणामभावे प्रथमं पिता हरेदित्यर्थः । वाशब्दाश्चयोप्यत्राभावविकल्पार्थाः । स्वाम्याख्ये सिद्धरूपे वस्तुनि 'न हि वस्तु विकल्प्यते' इति न्यायेन तुल्यवद्विकल्पासंभवात् । एवञ्चैतदुक्तं भवति—पित्रभावे भ्राता हरेत्तदभावे जननी तदभावे पितामहीति । क्रमात् उक्तपाठक्रमेणेत्यर्थः । अनेनैव च क्रमेण विभक्तसंस्थितविषये मनुरपि पुत्रपत्नीदुहितृदौहित्राणामासन्नतराणामभावम-

पुत्रस्येत्युपलक्षकशब्देन अपुत्रस्येत्युक्त्वा पितृभ्रातृमातृपितामहीनां धनग्रहणं सार्धश्लोकेनाह—

पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा ।
अनपत्यस्य पुत्रस्य माता दायमवाप्नुयात् ॥
मातर्यपि च वृत्तायां पितुर्माता धनं हरेत् ।

इति । अपुत्रस्य पुत्रपत्नीदुहितृदौहित्रशून्यस्येत्यर्थः । एवञ्च कात्यायनमनुप्रतिपादितः पित्रादिपितामह्यन्तानां धनग्रहणक्रमो वचनैकनिबन्धनः स्वविरुद्धनैयायिकक्रमबाधक इति न्यायविरोधशङ्काऽत्र न कार्या । याज्ञवल्कीयमेव वचनं क्रमपरं, तत्परत्वस्य तत्र 'पूर्वाभावे परःपरः' इति कण्ठोक्त्या व्यक्तत्वात् । तेन तद्विरुद्धानि वचनानि 'पिता हरेदपुत्रस्य' इत्येवमादीनि त्वधिकारमात्रपराण्येवेति व्याख्याऽप्युपेक्षणीया। 'माता वा तत्पितुः क्रमात्' इति, 'मातर्यपि च वृत्तायाम्' इति कात्यायनवचनयोरपि कण्ठोक्त्या क्रमस्मृतेः । मातुः पूर्वं भ्राता धनहारीत्यत्र विशेषमाह बृहस्पतिः—

भार्यासुतविहीनस्य विभक्तस्य मृतस्य तु ।
माता रिक्थहरी ज्ञेया भ्राता वा तदनुज्ञया ॥

इति । तस्य मृतस्य । भार्याग्रहणं न्यायतो बद्धक्रमाणां दुहितृदौहित्रपितॄणामुपलक्षणार्थम् । तेन सुतभार्यादुहितृदौहित्रापितृविहीनस्येत्यर्थो विज्ञेयः । एवञ्च 'पितरौ भ्रातरस्तथा' इत्युक्तक्रमस्य मातुरनुज्ञाविषये विद्यमानापितामहीविषये च का-

त्यायनाद्युक्तक्रमेणापवादोऽनुसन्धेयः । एतेनेदं निरस्तं—यत् कैश्चिदुक्तं "मातृपितृभ्रातृसुतानां 'पितरौ भ्रातरस्तथा तत्सुताः' इति वचनेन बद्धक्रमत्वान्मध्येऽनुप्रवेशाभावात् भ्रातृसन्तानानन्तरं पितामही गृह्णाति, तस्याः क्रमविशेषोक्त्यभावेनाविरोधात्" इति । न हि पितामह्याः क्रमविशेषोक्त्यभावः, कात्यायनवचने पाठतस्तद्वताथशब्देन, मानवीये मातरि वृत्तायामिति पदद्वयेन च पितामह्याः क्रमविशेषोक्तेः प्राक्प्रदर्शितत्वात् । बद्धक्रमस्यापि तस्य न्यायमूलस्य मध्ये वचनमूलक्रमविशेषसम्भवाच्च । यत्तु शङ्खलिखितोक्तं—'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं, तदभावे पितरौ हरेयाताम्' इति, तत् सामान्यविशेषन्यायेन विभक्तसंस्थितविषयादन्यत्र संसृष्टस्वर्यातविषयेऽवतिष्ठत इत्यविरोधः । यत्तु बृहस्पतिनोक्तं—

पुत्राभावे तु पत्नी स्यात् पत्न्यभावे तु सोदरः ।
तदभावे तु दायादः पश्चाद्दौहित्रकं धनम् ॥

इति, तत् पत्न्याः पूर्वं सोदरानिवृत्त्यर्थं, न पुनर्दायादशब्दनिर्दिष्टदुहितृभ्यः पूर्वं सोदरप्राप्त्यर्थम् । तथात्वे 'अङ्गादङ्गात्सम्भवति पुत्रवद्दुहिता' इत्यादिस्ववचनविरोधापत्तेः । यत्तु देवलेनोक्तं—

ततो दायमपुत्रस्य विभजेरन् सहोदराः ।
तुल्या दुहितरो वाऽथ म्रियमाणः पिताऽथवा ॥
सवर्णा भ्रातरो माता भार्या वेति यथाक्रमम् ।

इति। यद्यप्यत्र व्यवहितान्वयो वचनरचनाज्ञस्येनावगम्यते, तथाऽपि पूर्वोक्तसर्ववचनन्यायाविरोधाय व्यवहितान्वयेनैवार्थोऽवगन्तव्यः। तथाहि—अपुत्रस्य दायं भार्या पत्नी वाऽऽप्नुयात् अथवा तुल्यास्सवर्णाः दुहितरो विभजेरन् अपिवा ध्रियमाणो विद्यमानः पिता हरेत्, अनर्थकाध्रियमाणशब्दाद ध्रियमाणे पितरि मातेत्यन्वयावगमात् पितुरभावे माताऽवाप्नुयात्, ततस्सहोदरास्सवर्णाश्च भ्रातरो यथाक्रमं पूर्वं सहोदरास्तत्तदभावे सवर्णा इति क्रमानतिक्रमेण विभजेरन्निति। मात्रनुज्ञायाः पितामह्याश्चाभावविषय एतद्दृष्टव्यम्। अस्मिन्नपि विषये कात्यायनेन सुबोधाय क्रमो दर्शितः—

अपुत्रस्याथ कुलजा पत्नी दुहितरोपि वा।
तदभावे पिता माता भ्रातॄ पुत्राश्च कीर्तिताः॥

पुत्रशब्दः संबन्धिशब्दत्वात् पदन्यायेन भ्रातृपुत्रेष्वेव वर्तते। अत एव याज्ञवल्क्येन 'भ्रातरस्तथा तत्सुताः' इत्युक्तम्। यत्तु सङ्ग्रहकारेणोक्तं—

तादृग्दुहित्रभावेऽपि माता धनमवाप्नुयात्।
विद्यमानेऽपि पितरि सपत्नीसुतसन्ततौ॥
तादृङ्मातुरभावेऽपि पितुर्माता हरेद्धनम्।
विद्यमानेऽपि पितरि क्षत्रियासुतसन्ततौ॥
पितामह्या अभावेऽपि पिता धनमवाप्नुयात्।

इति । सुतसन्ततावित्यत्र विद्यमानायामित्यध्याहारे कृते सत्यस्यार्थः सुगमः । तदेतद्धारेश्वरोत्प्रेक्षितन्यायमूलत्वाद्विश्वरूपादिभिस्तन्न्यायनिराकरणान्मूलभूतन्याये असत्यनादृत्यमेव । यत्पुनस्तेनैवोक्तं—

सोदर्यास्सन्त्यसोदर्या भ्रातरो द्विविधा यदि ।
विद्यमानेऽप्यसोदर्ये सोदर्या एव भागिनः ॥

इति, तत् सम्यङ्न्यायमूलत्वादादरणीयम् । भ्रातृसुतेष्वप्ययं विशेषः सोदरासोदरभ्रातृसुतसमवाये ग्राह्यः । ततश्च सोदरभ्रातृसुताभावे सपत्नीभ्रातृसुता धनभाजः । तेषामभावे के धनभाज इत्यपेक्षिते याज्ञवल्क्यः 'गोत्रजाः' इति । धनभाज इति शेषः । गोत्रजशब्दोत्र गोबलीवर्दन्यायात् पूर्वोक्तपितृभ्रातृतत्सुतव्यतिरिक्तपितामहतत्सुतादिगोत्रजेषु वर्तते । तत्रापि सरूपैकशेषस्य स्वतोऽवगतेः पितामहदुहित्रादिस्त्रीव्यतिरिक्तेषु वर्तते । कारणान्तरादेव हि 'कुक्कुटावानय मिथुनीकरिष्यामहे' इत्यादौ विरूपैकशेषावगतिः । न चेह तथाऽस्तिकारणान्तरं, प्रत्युत भ्रातृतत्सुतसाहचर्यात् पुमांस एव गोत्रजा गम्यन्ते । किञ्च पत्नीदुहित्रादीनां शृङ्गग्राहेण दायादत्वस्मृतेरगत्या 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति श्रुतेस्तद्व्यतिरिक्ताविषयतोक्ता । तेनेह सरूपैकशेषतया स्मृतेः सत्यां संगतौ श्रुतिविरोधिनी विरूपैकशेषता दूरोत्सारिता । अत एव 'जीवन् पुत्रेभ्यो दायं विभजेत्' इत्यापस्तम्बसूत्रं व्या

चक्षाणेन तद्ग्राष्यकारेण पुत्रेभ्य एव दायं विभजेन्न स्त्री भ्यो दुहितृभ्य इत्युक्तम्। यद्यपि 'भ्रातृपुत्रौ स्वसृदुहितृ भ्याम्' इति शब्दस्मृत्या पुत्रेभ्य इत्यत्र विरूपैकशेषं कृत्वा दुहितृणामप्यनुप्रवेशः सूत्रे कर्तुं शक्यते, तथाऽपि पुमांसो दायादा न स्त्रियः 'तस्मात् स्त्रियो निरिन्द्रिया अदायादीः' इति श्रुतेरिति। एतेनैतन्निरस्तं—यत् कैश्चिदुक्तं—गोत्रजा पितामही तत्सपिण्डाः समानोदकाश्च, तत्र पितामही प्रथमं धनभाक् 'मातर्यपि च वृत्तायां पितुर्माता धनं हरेत्' इति मात्रनन्तरं पितामह्या धनग्रहणे प्राप्ते पुत्रादीनां भ्रातृसुतपर्यन्तानां बद्धक्रमत्वेन मध्येऽनुप्रवेशाभावादुत्कर्षे तत्सुतानन्तरमपि पितामही गृह्णाति अविरोधादिति। भ्रातृसुतानन्तरमपि तेषां गोत्रजानां च बद्धक्रमत्वाविशेषात् पितामह्या सहैवात्र क्रमो बाध्यत इत्यसम्बन्धसरूपैकशेषत्वेन पुंसामेव गोत्रजानां भ्रातृसुतैस्सह क्रमबन्धनात्, न चान्यगोत्रजा पितामही मृतगोत्रजाऽपीत्यलं बहुना। गोत्रजा इत्येकशेषकरणमपि पितराविवन्नचायामूलावान्तरक्रमाभावादेव याज्ञावल्क्यस्येति मन्तव्यम्। न हि भ्रातृसुताभावे पितामहसुतो धनभागित्येवमाद्यवान्तरक्रमे काश्चिन्नचायोस्ति। ननु पितामहमतिक्रम्य तत्सुतो धनभागिति केनोच्यते। भ्रातरस्तत्सुता इत्यभिधाय गोत्रजा इत्याभिदधता याज्ञवल्क्येनोच्यते। गोत्रजशब्देनैव भ्रातृतत्सुतयोर्निर्देशे लभ्यमानेऽपि पृथक्त्वयोरभिधा-

नस्य गोत्रजेषु पितामहादिषु तस्यतस्य सन्ततौ पितृसन्ततावि व द्वयोरेव पुत्रपौत्रयोर्धनभागित्वज्ञापनार्थत्वात् । मनुनाऽप्ययमेवार्थः सूच्यते—

यो यो ह्यनन्तरः पिण्डात्तस्य तस्य धनं भवेत् ।
अत ऊर्ध्वं सकुल्यास्स्युराचार्यशिष्य एव वा ॥

तदेतद्धारेश्वरो व्याचष्टे—यो योह्यनन्तरः पिण्डादित्यत्र पिण्डादिति पदं सपिण्डादित्यर्थे द्रष्टव्यम् । कः पुनरयमवाधिभूतः सपिण्डः? पिता हरेदित्यधिकृतत्वात् पितैव । ननु पितुरन्तरस्तत्पिता भवति तत्पुत्रश्च । तत्रोभयोर्विद्यमानत्वे कस्यानन्तर्यं युक्तम्? तत्पुत्राणामिति ब्रूमः । कुत एतत्? 'पिता हरेदपुत्रस्य रिक्थं भ्रातर एव वा' इत्यत्र एवकारेण पितामहे रिक्थभागित्वाभावसूचनात् । ततश्च वचनादेव तुल्येऽप्यानन्तर्ये सन्ततिद्वारमेवानन्तर्यमिष्यते । एवञ्च 'यो यो ह्यनन्तरः पिण्डात्' इत्यनेन पितृसन्ततेरभावे पितामहसंततिरभिधीयते, तस्याप्यभावे प्रपितामहसन्ततिरित्येवमाद्यात्सपिण्डादित्यनुसन्धेयम् । सपिण्डानामभावे तु सकुल्याः समानोदकाश्चात्र सकुल्यशब्देनोच्यन्ते । तेषामप्यासन्नसन्ततेरभावे पूर्ववद्विप्रकृष्टसन्ततौ रिक्थार्हेति । एवञ्च ये—भ्रातृसुतानन्तरं पितामहो धनभाक् तदभावे तत्सन्ततिः, एवं प्रपितामहादेरपीत्याहुः, ते न्यायसिद्धक्रमबाधकक्रमान्तरपरवचनसूक्ष्मार्थज्ञा न भवन्ति । अत्रायं दायप्राप्तिक्रमः—भ्रातृसुताभावे पितामः

हसुतस्य दायप्राप्तिः, तस्याभावे प्रपितामहसुतस्य, तस्याभावे वृद्धप्रापितामहसुतस्य, तस्याभावे वृद्धप्रापितामहपितृसुतस्य, तस्याभावे सपिण्डान्तिमपुरुषस्य, तस्याभावे तत्सुतस्य, तस्याभावे समानोदकाद्यपुरुषस्य, तस्याभावे तत्सुतस्य, एवमेवोपरितनषट्समानोदकसन्ततावप्यनुसन्धेयम् । तदेतत्सर्वमभिसन्धायाह बृहस्पतिः—

बहवो ज्ञातयो यत्र सकुल्या बान्धवास्तथा ।
यस्त्वासन्नतरस्तेषां सोऽनपत्यधनं हरेत् ॥

ज्ञातयः सपिण्डाः सकुल्याः समानोदकाः । बान्धवास्त्वासन्नतराः क्रमेणैव स्मृत्यन्तरे प्रदर्शिताः—

आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुस्सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥
पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुस्सुताः ।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
मातुः पितृष्वसुः पुत्राः मातुर्मातृष्वसुस्सुताः ।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥

इति । ज्ञातिसकुल्यबन्धुषु वाचनिकासन्नतराभावे यथाकथञ्चिदप्यासन्नतरा मृग्याः, 'पिण्डगोत्रऋषिसम्बन्धा रिक्थं भजेरन्' इति सामान्येन गौतमस्मरणात् । बन्धूनामभावे के धनभाज इत्यपेक्षिते याज्ञवल्क्यः—'शिष्यसब्रह्मचारिणः' इति। धनभाज इति शेषः । उपनीय वेदमध्यापितः शिष्यः, एका-

चार्यः सब्रह्मचारी। शिष्योपाध्यायसम्बन्धेन धनसम्बन्धे गुणभूतस्य शिष्यस्य कथिते प्रधानभूताचार्यस्य दण्डापूपन्यायात् बन्धुभावे प्रथमं धनसम्बन्धो ज्ञायते इति मत्वाऽऽचार्यस्यात्रानभिधानमिति मन्तव्यम्। सब्रह्मचार्यभावे के धनभागिन इत्यपेक्षिते मनुः—

सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः।
त्रैविद्याश्शुचयो दान्ताः तथा धर्मो न हीयते॥
अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः॥

इति। मनूक्तलक्षणब्राह्मणाभावे राजानं प्रत्याह नारदः—

ब्राह्मणार्थस्य तन्नाशे दायादश्चेन्न कश्चन।
ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोऽन्यथा॥

तन्नाशे अर्थस्वामिनाशे। ब्राह्मणेतरार्थस्य तन्नाशे त्वाह मनुः—

इतरेषां तु वर्णानां सर्वाभावे हरेन्नृपः।

इति। नृपो जनपदपुरपरिपालनादिकर्ता। सर्वेषामभावे राजगामि धनमिदानुवृत्तौ नारदः—

अन्यत्र ब्राह्मणात्तिंकतु राजा धर्मपरायणः।
तत्स्त्रीणां जीवनं दद्यादेष दायविधिस्स्मृतः॥

तत्स्त्रीणां ब्राह्मणेतरधनस्वामिस्त्रीणां धनभागित्वानर्हाणामित्यर्थः। सर्वेषामभावे इत्यत्र वर्णभेदनिबन्धनविशेषमाह सङ्ग्रहकारः—

पितर्यविद्यमानेऽपि धनं तत्पितृसन्ततेः।
तस्यामविद्यमानायां तत्पितामहसन्ततेः॥

असत्यामपि तस्यां तु प्रपितामहसन्ततेः ।
एवमेवोपरितनाः सापिण्डा रिक्थभागिनः ॥
तदभावे सकुल्यास्स्युराचार्यशिष्य एव वा ।
सब्रह्मचारी सद्विप्राः पूर्वाभावे परः परः ॥
शूद्रस्यैकोदराभावे राजा धनमवाप्नुयात् ।
आचार्यस्याप्यभावे तु तथा क्षत्रियवैश्ययोः ॥

इति सङ्ग्रहकारस्य धारेश्वरमतानुसारित्वात् पितर्यविद्यमानेऽपि धनं तत्पितृसन्ततेः इत्यभिधानम् । अस्मन्मते तु पितर्यविद्यमाने तु मातुर्धनं, तदभावे पितामह्याः, तदभावे धनिकपितृसन्ततेः भ्रातृतत्सुतरूपाया इत्यनुसन्धेयम् । एवमुक्तमपुत्रधनविषयं सर्वं यथायोग्यमनुपनीतोपकुर्वाणब्रह्मचारिसमावृत्तगृहस्थाश्रमान्तरबहिर्भूतस्नातकस्वामिविषयम्, नैष्ठिकवनस्थयतिस्वामिकधनविषये तु ग्राहकान्तरस्मरणात् । तथाच याज्ञवल्क्यः—

वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः ।
क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः ॥

ब्रह्मचार्यत्र यतिसाहचर्यान्नैष्ठिकोऽवगम्यते । धर्मभ्राता समानाचार्यकः । एकतीर्थः समानशास्त्रकः क्रमेण पूर्वपूर्वाभावे परः पर इत्यर्थः ॥

इति स्मृतिचन्द्रिकायां दुहित्रादिविषयाणि.

अथ संसृष्टभ्रात्रादिविषयाणि कानिचिद्वचनानि लिख्यन्ते.

अत्र बृहस्पतिः—

विभक्तो यः पुनः पित्रा भ्रात्रा वैकत्र संस्थितः ।
पितृव्येणाथवा प्रीत्या तत्संसृष्टस्स उच्यते ॥

यः पुत्रादिः पित्रादिना सह विभक्तस्सन् पुनः प्रीत्यादिनिमित्तेन विभक्तेनैव येन पित्रादिना सहवासमापन्नः स तेन संसृष्ट इत्युच्यत इत्यर्थः । इदं चात्रार्थादवगम्यते—पितृभ्रातृपितृव्यव्यतिरिक्तेन भ्रातृपितृव्यपुत्रादिना सह संसर्गो न विद्यत इति । सहवासे पुरुषाणामाहत्य संसर्गाभावात् धनद्वारेण संसर्गो वाच्य इतीदंताव्यवहारनिमित्तभूतावच्छेदकापनोदेन विभक्तानां पूर्ववदेकराशीकरणपर्यन्तस्संसर्गो न पुनः सहवासमात्रमिति मन्तव्यम् । अत एव पुनः क्रियमाणधनविभागमनूद्य तत्र प्रकारविशेषमाह मनुः—

विभक्तास्सहजीवन्तो विभजेरन् पुनर्यदि ।
समस्तत्र विभागस्स्याज्ज्यैष्ठ्यं तत्र न विद्यते ॥

सहजीवन्तः सहवासेन जीवन्तः । विभजेरन् संसृष्टधनमिति शेषः । तत्र संसृष्टधनविभागे समविभागविधानादेव सिद्धे ज्यैष्ठ्यनिमित्तकांशाग्रहणे पुनर्ज्यैष्ठ्यनिमित्तकभागवैषम्यनिषेधोऽयं स्वल्पधनसंसर्गनिमित्तकभागवैषम्यानुज्ञानार्थः । तेन संसर्गसमये यदीयं यावत्संसृष्टं तदनुसारेण संसृष्टविभागवैषम्यं कल्पनीयम् । एवंच धनस्येदंतापनोदाय संसर्गो न पुनरिय-

त्तापनोदायेति मन्तव्यम् । अन्यदपि भागवैषम्यं निमित्तान्तरकृतमाह बृहस्पतिः—

संसृष्टानां तु यः कश्चिद्विद्याशौर्यादिनाऽधिकम् ।
प्राप्नोति तस्य दातव्यो द्व्यंशश्शेषास्समांशिनः ॥

तस्मिन् प्राप्ताधिकधन इति शेषः । संसृष्टद्रव्यानुपरोधेनार्जितेऽपि विभाज्यत्वविधानार्थमेतत् । संसृष्टानां मध्ये पुनर्विभागकरणादर्वाक्प्रमीतस्य पुत्रादिसद्भावे,

प्रमीतपितृकाणां तु पितृतो भागकल्पना ।

इति विधिना विभागः कर्तव्यः, विधानान्तरास्मरणात्, पुत्राद्यभावे तु न पत्नीदुहितृन्यायः, विधानान्तरस्मरणात् । तथाच बृहस्पतिः—

विभक्ता भ्रातरो ये तु संप्रीत्यैकत्र संस्थिताः ।
पुनर्विभागकरणे तेषां ज्यैष्ठ्यं न विद्यते ॥
यदा कश्चित्प्रमीयेत प्रव्रजेद्वा कथञ्चन ।
न लुप्यते तस्य भागः सोदरस्य विधीयते ॥

इति । यथा प्रथमविभागकरणात् पूर्वं मृतस्यापुत्रस्य प्रव्रजितस्य वा भागो लुप्यते, विभागाभावेन तद्धेतुकाया इयत्ताया अभावात्, तेन सर्वं रिक्थं सहवासिन एव तत्र सर्वे गृह्णन्ति, न तथाऽत्र विभागहेतुकाया इयत्तायाः अभावः, प्रथमविभागेनैवेयत्तायाः कृतत्वात् । न च संसर्गात्सा अपैति,

तस्येदन्तामात्रापनोदकत्वात् । तेन न सर्वं रिक्थं संसृष्टिन एव सर्वे गृह्णीयुः, किंतु विभागकाले तत्तद्भागः पृथगुद्धरणीयः । स च विभक्तपतिभागविषय इत्यादौ न पत्न्याः, किंतु संसृष्टिसोदरस्य भ्रातुर्वचनेन विधीयते । सोदरस्येत्येकवचनमविवक्षितम् । अत एव नारदः—

भ्रातॄणामप्रजाः प्रेयात् कश्चिच्चेत्प्रव्रजेत वा ।
विभजेयुर्धनं तस्य शेषास्ते स्त्रीधनं विना ॥

शेषाः संसृष्टिनः सोदरभ्रातरः,

संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः ।

इति याज्ञवल्क्यस्मरणात् । संसृष्टिनो भ्रातुर्धनं संसृष्टयेव भ्राता हरेत् न पत्न्यादिः, तत्रापि सोदर एवेत्यर्थः । एवं तर्ह्यत्र मृतस्य पत्नीनामप्रत्तदुहितॄणां च का गतिरित्यपेक्षितेऽप्याह नारदः—

भरणं चास्य कुर्वीरन् स्त्रीणामा जीवितक्षयात् ।
रक्षन्ति शय्यां भर्तुश्चेदाच्छिन्द्युरितरासु तत् ॥
या तस्य दुहिता तस्याः पित्र्योंऽशो भरणे मतः ।
आ संस्काराद्धरेद्भागं परतो बिभृयात्पतिः ॥

इति । तस्य मृतस्य प्रव्रजितस्य वा या दुहिता तस्याः परिणयनं, ततःपूर्वं भरणं च शेषा एव कुर्वीरन्निति द्वितीयश्लोकस्य तात्पर्यार्थः प्रत्येतव्यः । यत्र पुनश्शेषेषु भ्रातृष्वसंसृष्टा

अपि सोदराः केचित्सन्ति तत्र ये संसृष्टास्सोदरास्त एव विभजेयुः—

संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।

इति प्रस्तुत्य भ्रातृणामप्रजा इत्युक्तम् । यत्र त्वसंसृष्टास्सर्वे सोदराः भिन्नोदरास्तु संसृष्टाः तत्र सोदरा एव असंसृष्टा अपि तस्य धनं विभजेरन् न तु भिन्नोदरास्संसृष्टाः—

असंसृष्ट्यपि चादद्यात्संसृष्टी नान्यमातृजः ।

इति याज्ञवल्क्यस्मरणात् । असंसृष्ट्यपीत्यपिशब्दात् अन्यमातृजस्य संसृष्टित्वविशिष्टस्य आदानप्रतिषेधः अवगम्यते । यदा तु शेषेषु सोदराभावः तदा भिन्नोदरास्संसृष्टा विभजेयुः ।

संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनौ ।

इति बृहस्पतिस्मरणात् । अत्र भिन्नमातृकाविति पौनरुक्त्यपरिहाराय गम्यते । यत्तु याज्ञवल्क्योक्तं—

अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् ।

इति, तत् सोदर्यसद्भावविषयमित्यविरुद्धम् । यद्यसंसृष्टानामेकोदराणामभाव एव संसृष्टभिन्नोदराणां धनग्रहणं तर्हि,

येषां ज्येष्ठः कनिष्ठो वा हीयेतांशप्रदानतः ।
म्रियेतान्यतरो वाऽपि तस्य भागो न लुप्यते ॥
सोदर्या विभजेरंस्तं समेत्य सहितास्समम् ।
भ्रातरो ये च संसृष्टा भगिन्यश्च सनाभयः ॥

इत्ति मनुवचनाविरोधस्स्यात् । चशब्दद्वयेन सर्वेषां श्लोको-

क्तानां सोदरभ्रातृभगिन्यसोदरभ्रातृणामितरेतरयुक्तानां विभागावगतेः । किंच संसृष्टा भिन्नोदरभ्रातरस्तैस्सहितास्सोदर्यास्सनाभयो भगिन्यस्समेत्य तमलुप्तभागं समं विभजेरन्निसेवान्वयान्मिळितानामेव कर्तृता सहितसर्वशब्दाभ्यां सुव्यक्तेति व्यक्तो विरोधः । केचिद्विरोधपरिहारार्थमिदं वचनमेवं व्याचक्षिरे—"तमलुप्तभागं सोदरा यदा संसृष्टिनः तदा त एव गृह्णीयुः, नासंसृष्टिनः सोदरा अपि । संसृष्टीनां सोदराणामभावे सर्वे सोदरास्समेत्य मिळितास्सहिताः समप्रधानभावेन समं अन्यूनाधिकं विभजेरन् । सोदराणामभावे भगिन्यस्सनाभयो विभजेरन् । तासामप्यभावे अन्योदर्या भ्रातरः" इति । तदेतत् अनेकाध्याहारकरणादसन्तासमञ्जसत्वाच्चोपेक्षणीयम् । अन्ये पुनर्विरोधपरिहारार्थं—

अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् ।
असंसृष्ट्यपि चादद्यात्संसृष्टो नान्यमातृजः ॥

इति याज्ञवल्क्यवचनं पठित्वा तद्वचनं यथा प्रतीयमानमानववचनसमानार्थतया व्याकुर्वते । तत्र तावत् 'अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् । असंसृष्टी' इत्येतावतो भागस्याक्षरार्थतात्पर्यार्थौ व्याख्यातौ । अन्योदर्यो यस्सापत्नो भ्राता संसृष्टिधनं हरेत् न पुनरन्योदर्यो धनं हरेत् असंसृष्टी । अनेनान्वयव्यतिरेकाभ्यामन्योदर्यस्य संसृष्टित्वं धनग्रहणे कारणमुक्तामिति । अपिचादद्यात् असं-

संसृष्टी' इत्येतावता मध्यमभागेन सह सम्बन्धमसंसृष्टीति पूर्वभागस्याभिधायाक्षरार्थसहितः तात्पर्यार्थो व्याख्यातः । असंसृष्टीत्येतदुत्तरेणापि संबध्यते । ततश्चासंसृष्ट्यपि संसृष्टिनो धनमाददीत । कोसावित्यत आह—'संसृष्टः' इति । संसृष्टः एकोदरसंसृष्टः सोदर्य इति यावत् । अनेनासंसृष्टस्यापि सोदर्यधनग्रहणे सोदरत्वं कारणमुक्तमिति । नान्यमातृज इति भागस्याप्येवकाराध्याहारं कृत्वा तेन सह सम्बन्धं संसृष्ट इति मध्यमभागान्तर्गतस्य पदस्याभिधायाक्षरार्थो व्याख्यातः । संसृष्ट इत्युत्तरेणापि सम्बध्यते । तत्र च संसृष्टः संसृष्टीत्यर्थः । नान्यमातृज इत्यत्र एवशब्दाध्याहारेण व्याख्यानं कार्यम् । संसृष्ट्यप्यन्यमातृज एव सोदरसहितः संसृष्टिनो धनं नाददीतेति कृत्स्नश्लोकस्य च तात्पर्यार्थो मानववचनसमानार्थतया दर्शितः । एवञ्च 'असंसृष्ट्यपि चादद्यात्' इत्यपिशब्दश्रवणात् 'संसृष्टो नान्यमातृजः' इत्यवधारणनिषेधादसंसृष्टसोदरस्य संसृष्टिभिन्नोदरस्य च विभज्यग्रहणं कर्तव्यमित्युक्तं भवति । द्वयोरपि धनग्रहणकारणस्यैवैकस्य सद्भावादिति । तदेतत् एवंव्याख्यातृभ्यः तेभ्य एव रोचते, न पुनः प्रतिपत्तृभ्यः, वचनतोऽत्यन्ताप्रतीयमानस्यैव स्वप्रज्ञाबलाद्वचनार्थकरणात् । तस्मादत्र मनुवचनया ज्ञवल्क्यवचनयोर्यथाप्रतीयमानार्थपरयोर्विषयव्यवस्थयैवाविरोधो वाच्यो न पुनरर्थैक्याभिधानक्लेशादिति सैवोच्यते । मनुवचनं

तावत् स्थावरतदितरधनसद्भावविषयं, प्रजापतिना तत्रैव संसृष्टासंसृष्टानां विभज्यधनग्रहणविधानात्—

अन्तर्धनं च यद्द्रव्यं संसृष्टानां च तद्भवेत् ।
भूमिं गृहं चासंसृष्टाः प्रगृह्णीयुर्यथाऽंशतः ॥

इति । संसृष्टानां भिन्नोदरभ्रातृणां यथांशतो गूढधनं जङ्गमं च द्विपदचतुष्पदादिरूपं भवेत् । असंसृष्टास्सोदरभ्रातृभगिन्यस्तु गृहक्षेत्रं यथांशतः प्रगृह्णीयुरित्यर्थः । एवंच पारिशेष्यात् केवलस्थावरसद्भावविषये केवलस्थावरेतरसद्भावविषये वा याज्ञवल्क्यवचनं द्रष्टव्यम् । यदा तु शेषभूतसंसृष्टभिन्नोदरा एव तदा पिता पितृव्यो वा यस्संसृष्टस्स एव गृह्णीयात् । 'संसृष्टिनि प्रेते संसृष्टी रिक्थभाक्' इति गौतमस्मरणात् । यदा तु पिता पितृव्यो वा संसृष्टी न विद्यते तदा त्वसंसृष्टाभिन्नोदरो भ्राता गृह्णीयात् । तदभावे त्वसंसृष्टः पिता, तदभावे माता, तदभावे पत्नी । तथाच शङ्खः—'स्वर्यातस्य ह्यपुत्रस्य भ्रातृगामि द्रव्यं तदभावे पितरौ हरेयातां ज्येष्ठा वा पत्नी' इति । स्वर्यातस्य ह्यपुत्रस्य पित्रा पितृव्येण वा संसृष्टस्य संसृष्ट्यभावे भिन्नोदरासंसर्गे भ्रातृगामि द्रव्यमित्यर्थः । तथा च नारदः—

संसृष्टानां तु यो भागस्तेषामेव स इष्यते ।
अतोऽन्यथांशतो भाजो निर्बीजेभ्वितरानियात् ॥

अतोऽन्यथा संसृष्टेषु सत्सु भिन्नोदरभ्रात्राद्यसंसृष्टिनो नांश-

भाजः। यदा तु सर्वे संसृष्टाः निर्बीजाः प्रजाराहिता भवन्ति तदा चेतरान् भिन्नोदरभ्रात्रादीनसंसृष्टान् इयात् संसृष्टानां भागं प्राप्नुयादित्यर्थः। तत्र चायं 'भ्रातृगामि द्रव्यम्' इत्यादिशङ्खवचनोक्तक्रमो द्रष्टव्यः। ज्येष्ठाग्रहणं सुसंयतत्वादिगुणवत्याः कथनार्थं, न पुनर्मध्यमादिनिवृत्त्यर्थम्। पुनरपि तद्भाव इति वक्तव्ये वाशब्दः प्रयुक्तः, फलसाम्यात्। तथाहि—वाशब्दाद्विकल्पो गम्यते। न चात्र स्वाम्यरूपे वस्तुनि तुल्यविकल्पः सम्भवति। 'न हि वस्तुनि विकल्पः' इति न्यायशास्त्रे सिद्धत्वात्। तस्मादत्र वाशब्दादभावविकल्पावगतेः फलसाम्यमस्त्येव। एवञ्चायं क्रमः—भ्रात्रभावे पिता हरेत् तदभावे माता तदभावे पत्नीति। ततश्च विभक्तविषयोक्तपत्नीदुहित्रादिक्रमविरुद्धत्वात्तदविरोधायैतत् संसृष्टांशविषयमिति कल्प्यते। विभक्तविषयोक्तनैयायिकपत्नीदुहित्रादिक्रमोऽस्मिन्विषये शङ्खोक्तवाचनिकक्रमेण बाध्यते। वाचनिक एवायं क्रमः, अस्मिन् क्रमे कस्यचिन्नचायस्याभावात्। अनेन व्युत्क्रमेण यदा पत्नीनामागतं धनं भ्रातृपुत्रादयश्च सपिण्डा विद्यन्ते तदा त्वाह नारदः—

मृते पत्यौ तु भार्यास्युरभ्रातृपितृमातृकाः।
सर्वे सपिण्डास्स्वधनं विभजेयुर्यथांशतः॥

भार्याः पत्नयः। अभ्रातृपितृमातृकाः याः पत्युर्भ्रातृपितृमातरस्तासामभावविशिष्टा इत्यर्थः। अनेन द्वन्द्वसमासे भ्रात्रपेक्षयाऽ

भ्यर्हितं पितृपदस्य पूर्वनिपातनं परित्यज्य वैपरीत्येन समासरचनां कुर्वता नारदेन संसृष्टापुत्रधनं प्रथमतो भ्रातृगामि तदभावे पितृगामि तदभावे मातृगामि तदभावे सर्ववृत्तस्थपत्न्यभिगामीति दर्शितम्। संसृष्टविषये पत्नीनां न गौणपुत्राभावे दायहरत्वं, किंतु भिन्नोदरासंसृष्टभ्रातृपितृमातृणामप्यभाव इति मन्तव्यम्। सर्वे सापिण्डा इत्यादेरयमर्थः—संसृष्टापुत्रस्य ये भ्रातृपितृमातृव्यतिरिक्तास्सापिण्डाः भ्रातृपुत्रादयस्ते स्वधनं पूर्वमपुत्रधनेन सह स्वपित्रादिसंसृष्टं तदूर्ध्वं तत्पत्नीभिस्सह यथांशतो भ्रातृपुत्राणां भ्रात्रंशो भार्याणां भर्त्रंश इत्यंशानतिक्रमेण विभजेयुरिति। पत्नीनामभावे तु संसृष्टापुत्रांशं तद्भगिनी लभते। तथाच बृहस्पतिः—

या तस्य भगिनी सा तु ततोंशाल्लब्धुमर्हति।
अनपत्यस्य धर्मोऽयमभार्यापितृकस्य च॥
सा च दत्ता त्वदत्ता वा सोदरे तु मृते सति।
तस्यांशं तु हरेत्सैव द्वयोर्य्यक्तं हि कारणम्॥

अभ्रातृमातृकस्य चेति चशब्दार्थः। भगिन्यभावे तु केवलास्सापिण्डाः संसृष्टांशं—

अनन्तरस्सापिण्डाद्यस्तस्य तस्य धनं भवेत्।

इत्युक्तक्रमेण विभजेरन्, प्रतिपदोक्तानामभावात्। तथाच स एव—

मृतोऽनपत्योऽभार्यश्चेद्भ्रातृपितृमातृकः ।
सर्वे सपिण्डास्तद्दायं विभजेरन्यथांशतः ॥

तद्दायं संसृष्टदायम् । मृतोऽनपत्यो भिन्नमातृको भ्रात्रादिप्रतिपदोक्तधनग्राहित्वरहितश्चेदिति पूर्वार्धस्य तात्पर्यार्थः । सपिण्डाभावे तु विभक्तसंस्थितद्रव्यवदेव संसृष्टस्वर्यात्तद्रव्यमपि समानोदकादिगामीत्यनुसन्धेयम् । संसृष्टद्रव्यमधिकृत्य सपिण्डेभ्यः ऊर्ध्वं विशेषास्मृतेः ॥

इति स्मृतिचन्द्रिकायां संसृष्टभ्रात्रादिविषयाणि.

अथ विभक्तजपुत्रादिविभागः.

अत्र जीवद्विभागोत्तरकालजातं पुत्रं प्रत्याह विष्णुः—'पितृविभागानन्तरोत्पन्नस्य भागं दद्युः' इति । अस्यार्थः—अविस्पष्टगर्भायां पितृभार्यायां ये पुत्राः पित्रा विभक्तास्ते स्वविभागोत्तरकालजस्य पुत्रस्य तत्संभवाज्ञानतः स्वभागप्रविष्टतद्भागमुद्धृत्य दद्युरिति । पिता तु स्वभागप्रविष्टतद्भागांशं न दद्यात्, किंतु पूर्वजैर्दत्तानंशान् गृहीत्वा विभक्तजेन सह वसेत् । तस्याप्राप्तव्यवहारस्य सहवासेन पालनीयत्वात् । अत एव 'पितृविभक्ताः भागं दद्युः' इत्युक्तं, न पुनः पिता पितृविभक्ताश्च भागं दद्युरिति । यत्तु गौतमेनोक्तं—'विभक्तजः पित्र्यमेव' इति, भागं गृह्णीयादिति शेषः । तदेतत्पितृ-

विभक्तपुत्रैर्विभक्तजस्य भागदानात् प्रागेव मृते पितरि द्रष्टव्यम् । तथाच पूर्वजैर्भागो न देयः, पित्र्यमेवेत्येवकारकरणात् । यत्तु बृहस्पतिनोक्तं—

पित्रा सह विभक्ता ये सापत्ना वा सहोदराः ।
जघन्यजास्तु ये तेषां पितृभागहरास्तु ते ॥

इति, तत्रापितृभागहरा इत्यस्य पितृभाग एव भागहरा इत्यर्थोऽवगन्तव्यः । तदेतत् विभागादूर्ध्वमेव ये गर्भस्था भूत्वा जातास्तद्विषयम् । जघन्यजानां पितृभागादेव भागहरत्वे कारणमप्याह स एव—

अनीशः पूर्वजः पित्र्ये भ्रातृभागे विभक्तजः ।

अनीशः अस्वामी । अनीशः पूर्वजः पित्र्य इत्यत्र पित्रा सह विभक्तत्वादित्यभिप्रायः प्रसेतव्यः । भ्रातृभागे विभक्तज इत्यत्र तु भ्रातृभागे विभक्तजधनसङ्क्रमणाभावादित्यभिप्रायोऽध्यवसेयः । प्रथमोक्ताभिप्रायेण विभक्ताग्रजानामनीशतां पित्र्ये प्रसाध्य तद्बलादन्यदप्याह स एव—

पुत्रैस्सह विभक्तेन पित्रा यत्स्वयमार्जितम् ।
विभक्तजस्य तत्सर्वमनीशाः पूर्वजास्स्मृताः ।

सर्वग्रहणं विभागात्पश्चादार्जिते पित्र्ये पूर्वजानां सुतानामगृहीतांशत्वेनांशोस्तीति शङ्कानिवृत्त्यर्थम् । एवंच पूर्वजास्तदितराश्चान्योन्यमसम्बन्धिजनवदस्वामिनः परस्परधने, किन्त्वीषदत्र भेदोस्तीत्याह स एव—

यथा धने तथा चर्णे दानाधानक्रयेषु च।
परस्परमनीशास्ते मुक्त्वाऽऽशौचोदकक्रियाः॥

केवलमाशौचोदकक्रियादौ परस्परमीशा न धनादाविस्यर्थः। आधानमाधिः। उक्तमृणादावनीशत्वं संसर्गाभावे सतीत्याह स एव—

संसृष्टौ यौ पुनः प्रीत्या तौ परस्परभागिनौ।

इति। यत्पुनर्मनुनोक्तं—

ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्धनम्।
संसृष्टास्तेन वा ये स्युः विभजेत स तैस्सह॥

इति, तत्र पित्र्यमेवेत्युत्तरार्धेऽपि संबध्यते। अतो न प्रागुक्तेन विरुद्धम्। तदेतद्विभक्तजेन पितुस्सहवासदशायां मृते पितरि द्रष्टव्यम्। अजीवद्विभागोत्तरकालजातं तु पुत्रं प्रत्याह याज्ञवल्क्यः—

विभक्तेषु सुतो जातस्सवर्णायां विभागभाक्।
दृश्याद्वा तद्विभागस्स्यादायव्ययविशोधितात्॥

पितुरूर्ध्वमविस्पष्टगर्भायां पितृभार्यायां भ्रातृषु परस्परं विभक्तेषु पश्चात्सुतो यो जातस्स विभागभाक्, भाग एव विभागः तं लभत इति यावत्। सर्वस्माद्विभक्ततद्धनादुद्धृत्य भागभागिति यावत्। यद्वा—दृश्यात् दृश्यमानगृहोपस्करवाह्यदोह्याभरणभृत्यादेः सकाशादेवायव्ययविशोधितात् उपचयापचयाभ्यामवधारितेयत्तादिकाद्विभक्तादुद्धृतो भागस्तस्य विभक्त-

जस्य स्यादित्यर्थः। दृश्यग्रहणं गूढद्रव्यजाताद्विभक्तादुद्धृत्यांशकल्पनानिवृत्त्यर्थम्। विभक्तजस्य सुतत्वाविशेषेऽपि विभागकाले दुर्विज्ञेयसद्भावशालित्वात्तत्र भागे ह्रासकरणं न्याय्यमिति मन्वानेन पक्षान्तरमुक्तमिति मन्तव्यम्। दुर्विज्ञेयतत्सद्भावता न तद्दोषकृतेति प्रथमपक्षोपि नात्यन्तानुचित इति मन्तव्यम्। यत्र पुनर्विभक्तागतादौ पुरुषदोषकृतो विभागात् पश्चादागमस्तत्र विभक्तागतस्य ह्रासपक्ष एव न समानभागपक्षान्तरोन्मेषः। अत एव तत्र ह्रासभागमेवाह बृहस्पतिः—

गोत्रसाधारणं त्यक्त्वा योऽन्यं देशं समाश्रितः।
अर्धतस्त्वागतस्यांशः प्रदातव्यो न संशयः॥

गोत्रसाधारणं त्यक्त्वा सर्वसहवासनिवासदेशमुत्सृज्य योऽत्यन्तदूरदेशनिवासी स्वसद्भावाज्ञानतः शेषैरेव विभज्य सर्वस्मिन् धने गृहीते पश्चादागतस्यांशोऽर्धतो विभक्तद्रव्यार्धादुद्धृत्य दातव्य इत्यर्थः। अत्रेतरेषां विभक्तागतसद्भावाज्ञानं तद्दोषनिबन्धनमिति न पक्षान्तरोन्मेषः। अत एव न संशय इत्युक्तम्। एवमतिदीर्घकालप्रोषितस्य सद्भावाज्ञानतः कृते विभागे सत्यागतस्यापीत्याह स एव—

ऋणं लेख्यं गृहं क्षेत्रं यस्य पैतामहं भवेत्।
चिरकालप्रोषितोपि भागभागागतस्तु सः॥

भागभाक् अर्धभागित्यर्थः। आगतो विभागादूर्ध्वमागतः। पौत्रादिस्तु विभक्तागतः क्रमायातद्रव्यमात्रेऽंशभागित्याह स एव—

तृतीयः पञ्चमश्चैव सप्तमो योपि वा भवेत् ।
जन्मनामपरिज्ञाने लभेतांशं क्रमागते ॥

कस्यचिद्विभक्तागतस्य क्रमागतेष्वपि भूमात्रेंऽशो देय इत्याह स एव—

यं परम्परया मौलाः समस्तास्स्वामिनं विदुः ।
तदन्वयस्यागतस्य दातव्या गोत्रजैर्महीं ॥

आगतस्य विभागादूर्ध्वमिति शेषः । विभागादूर्ध्वमागतस्य पूर्वमागतस्य वा स्वभागं ग्रहीतुं प्रवृत्तस्य दृष्टादृष्टप्रमाणेनादौ तावदात्मनः परायत्ते द्रव्ये स्वाम्यं साधयतो भागहरणेऽधिकारो भवति नान्यथेत्याह स एव—

कृतेऽकृते वा विभागे रिक्थी यत्र प्रवर्तते ।
सामान्यं चेद्भावयति तत्र भागहरस्तु सः ॥

इति स्मृतिचन्द्रिकायां विभक्तजपुत्रादिविभागः.

अथावलुप्तविभागः.

तत्र मनुः—

ऋणे धने च सर्वस्मिन् प्रविभक्ते यथाविधि ।
पश्चाद्दृश्येत यत्किञ्चित्तत्सर्वं समतां नयेत् ॥

विभागकाले यद्दृश्यते ऋणं धनं वा सर्वस्मिन् तस्मिन् यथाविधि—

पितृरिक्थहराः पुत्राः सर्व एव समांशिनः ।
विद्याकर्मयुतस्तेषामाधिक्यं लब्धुमर्हति ॥

इत्यादिविध्यनतिक्रमेण विभक्ते पश्चात् कालान्तरे यत्किञ्चिद्दृणं प्रोषितोत्तमर्णस्य यत्किञ्चिद्धनं प्रोषितनिक्षेपधारकादिसमीपस्थं तयोस्समागमादिवशाद्दृश्यते तत्सर्वं समतां नयेत्। न पुनर्विद्याकर्मयुतेऽधिकतामित्यर्थः। पश्चाद्दृष्टे ऋणे समतानियमात् पूर्वदृष्टे ऋणे धनवाद्विषमताऽस्तीति गम्यते। एवं विभागकाले यद्वस्तु येनकेनचिद्धञ्चकेन परकीयबुद्ध्युत्पादनादिना प्रच्छादितं विभागोत्तरकाले विचार्यमाणे स्वकीयमेव ज्ञातं चेत्तत्समतां नयेदित्याह कात्यायनः—

प्रच्छादितं यदि धनं पुनरासाद्य तत्समम्।
भजेरन् भ्रातृभिस्सार्धं अभावे हि पितुस्सुताः॥

पितुरभावे सर्वे सुता एव तदासादितं विभजेरन्नित्यर्थः। एवं सहवासिषु केनचित्किञ्चिद्धनमपहृतं कथञ्चिद्विभागादूर्ध्वं दृष्टं चेत् समतां नयेत्। तथाच याज्ञवल्क्यः—

अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते।
तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः॥

ते सर्वे विभक्ता इत्यर्थः। अपहृतवदुर्विभक्तमपि समतां नयेत्। तथाच कात्यायनः—

अन्योन्यापहृतं द्रव्यं दुर्विभक्तं च यद्भवेत्।
पश्चात्प्राप्तं विभज्येत समभागेन तद्भृगुः॥

दुर्विभक्तं अशास्त्रोक्तप्रकारेण विषमतया विभक्तं मिथोऽपहृतदुर्विभक्तवदन्यापहृतं नष्टलब्धं च समतां नयेत्। तथा वि-

भक्तेनार्जितं धनं त्वार्जकस्यैव भवति न दायादस्येत्याह स एव—

विभक्तेनैव यत्प्राप्तं धनं तस्यैव तद्भवेत् ।
हृतं नष्टं च यल्लब्धं प्रागुक्तं च पुनर्भजेत् ॥

प्रागुक्तं मिथोऽपहृतं दुर्विभक्तं च, दृष्टान्तार्थमत्र पुनरनयोरुपादानम् । एवञ्च प्रागुक्तवत् विभजेरन्नित्यर्थः । तेन परापहृतस्य नष्टलब्धस्य च समेव विभजनमनेनोक्तमिति मन्तव्यम् । एवं मन्वादिभिर्विभागात् पश्चाद्दृश्यमानमात्रस्यैव साधारणद्रव्यस्य विभागविधानात् पूर्वकृतविभागः सम्यक् जात इति गम्यते । तेन विभागादूर्ध्वं किञ्चित्सामान्यद्रव्यदर्शनेऽपि पुरुषाणां विभक्तत्वं पूर्वमेव संपन्नमिति मन्तव्यम् । यत्पुनर्मनुनोक्तं—

विभागे तु कृते किञ्चित् सामान्यं यत्र दृश्यते ।
नासौ विभागो विज्ञेयः कर्तव्यः पुनरेव हि ॥

इति, तत् विभक्तैर्विभक्तद्रव्येष्वायव्ययादिकरणात् प्रागेव दृष्टविषये द्रष्टव्यम् । अन्यथा पूर्वोक्तसर्ववचनविरोधापत्तेः । पुनर्विभागविधानस्य प्रयोजनं पश्चाद्दृष्टांशेऽप्युद्धारादिकरणम् ॥

इति स्मृतिचन्द्रिकायां अवलुप्तविभागः.

अथ विभक्तकृत्यम्.

तत्र नारदः—

यद्येकजाता बहवः पृथग्धर्माः पृथक्क्रियाः ।
पृथक्कर्मगुणोपेता न चेत्कार्येषु संमताः ॥

स्वभागान्यदि दद्युस्ते विक्रीणीरन्नथापि वा ।
कुर्युर्यथेष्टं तत्सर्वमीशास्ते स्वधनस्य वै ॥

अस्यार्थः—एकस्माज्जाता यदि बहवोऽनेकधा विभक्ताः तथा पृथक्पृथक् परस्परानुमतिमन्तरेण धनसाध्याग्निहोत्रादिकर्मकारिणस्स्युः, तथैव विभक्तव्ययायत्तकृष्यादिलौकिकक्रियाकारिणो भवेयुः, तथा विभिन्नभाण्डादिकर्माङ्गद्रव्योपेतास्स्युः, तथा स्वकार्येषु भ्रातरो न चेत्संमताः तदा तानना दृत्य स्वकार्यं कुर्युः । तथा ते विभक्ता यदि स्वभागान् दद्युर्विक्रीणीयुरथापि वा तत्सर्वं यथेष्टं कुर्युः यतस्ते विभक्तास्स्वतन्त्राः स्वामिन इति यावत् । यत्तु बृहस्पतिनोक्तं

विभक्ता वाऽविभक्ता वा दायादास्स्थावरे समाः ।
एको ह्यनीशस्सर्वत्र दानाधमनविक्रये ॥

इति, आधमनं आधीकरणम् । तदेतत् यत्र समतया स्थावरविभागमतिदुष्करं मत्वा तत्फलमेव फलकाले विभज्य ग्रहीष्याम इत्याभिसन्धिना तदितरधनविभागतो दायादा विभक्ता भवन्ति तद्विषयम्, तत्र स्थावरे त्वेकैकस्य स्वतन्त्रस्वामित्वाभावात् । विभक्तस्य कृत्यान्तरमप्याह स एव—

येनांशो यादृशो भुक्तः तस्य तन्न विचालयेत् ।

इति । तथा राजानं प्रत्याह—

स्वेच्छाकृतविभागो यः पुनरेव विसंवदेत् ।

स राज्ञांऽशे स्वके स्थाप्यः शासनीयोऽनुबन्धकृत् ॥

अनुबन्धो निबन्धः आग्रह इति यावत् ॥

इति स्मृतिचन्द्रिकायां विभक्तकृत्यविषयाणि..

अथ विभागतद्धर्मसद्भावनिर्णयहेतवः कथ्यन्ते.

तत्र याज्ञवल्क्यः—

विभागनिह्नवे ज्ञातिबन्धुसाक्ष्यभिलेखितैः ।

विभागभावना ज्ञेया गृहक्षेत्रैश्च यौतकैः ॥

यौतकैः पृथक्कृतैः । विभागग्रहणं तद्धर्माणामपि प्रदर्शनार्थम् । अत एव नारदः—

विभागधर्मसंदेहे दायादानां विनिर्णयः ।

ज्ञातिभिर्भागलेख्येन पृथक्कार्यप्रवर्तनात् ॥

नासीदावयोर्विभाग इति स्वरूपापलापादिना सर्वस्माद्विभाज्यान्नावयोर्विभाग इति धर्मापलापादिना विभागतद्धर्मसद्भावसंदेहे दायादानां ज्ञात्यादिसाक्षिभिर्विभागलेख्येन वा पृथक्कार्यप्रवर्तनादियुक्तिभिर्वा निर्णयो ज्ञेय इत्यर्थः । पृथक्कार्यप्रवर्तनं दायादानां पृथक्पृथग्वैश्वदेवभिक्षादानातिथिपूजनादिधर्मप्रवर्तनम् । कथं तस्य युक्तित्वमित्यपेक्षिते अनन्तरमुक्तं तेनैव—

भ्रातॄणामविभक्तानामेको धर्मः प्रवर्तते ।

विभागे सति धर्मोऽपि भवेत्तेषां पृथक्पृथक् ॥

धर्मो वैश्वदेवादिः । तथाच बृहस्पतिः—

एकपाकेन वसतां पितृदेवद्विजार्चनम् ।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे ॥

एवञ्च पृथक्पृथग्वैश्वदेवादिकार्यप्रवर्तनं अविभक्तेष्वविद्यमानं विभक्तत्वमवगमयतीति विभागसंदेहे सति निर्णायकयुक्तियोक्तिर्युक्तेत्यनवद्यम् । युक्त्यन्तराणि वक्तुं परस्परसाक्षित्वादिकं तावद्विभक्तानां विधास्यन् तत्प्रतिषेधमविभक्तेषु स एवाह—

साक्षित्वं प्रातिभाव्यं च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्युः नाविभक्ताः परस्परम् ॥

ग्रहणं प्रतिग्रहः । एवञ्च परस्परसाक्षित्वादियुक्तिभ्योपि विभागसद्भावावगतिः सिध्यत्येव । अत एवानन्तरमुक्तं तेनैव—

येषामेताः क्रिया लोके प्रवर्तन्ते स्वरिक्थिषु ।
विभक्तानवगच्छेयुः लेख्यमप्यन्तरेण तान् ॥

प्रवर्तन्ते व्यस्तास्समस्ता वेति शेषः । एवमृणग्रहणमपि रिक्थिषु प्रवर्तमानं विभक्तावगमकम् । अविभक्तेष्वप्रवर्तनात् । तथाच याज्ञवल्क्यः—

भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ।
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ॥

ततश्च ऋणदातुरपि ऋणग्रहीतुः सकाशात् विभक्तत्वं सिद्धम् । अत एव बृहस्पतिः—

पृथगायव्ययधनाः कुसीदं च परस्परम् ।
वणिक्पथं च ये कुर्युः विभक्तास्ते न संशयः ॥

कुसीदं वृद्ध्यर्थं धनप्रयोगः । वणिक्पथो वाणिज्यम् । परस्परमित्युभयत्र संबध्यते । एवं हेतुतो निर्णयः स्वतश्श्रेष्ठनिर्णायकप्रमाणाभावे कार्य इत्याह स एव—

साहसं स्थावरं स्वाम्यं प्राग्विभागश्च रिक्थिनाम् ।
अनुमानेन विज्ञेयो न स्युर्यत्र च साक्षिणः ॥

प्राग्विभागो विभागविवादात् प्राग्जातो विभागः । अनुमानं युक्तिः । साहसादिसाधकयुक्तिप्रदर्शनार्थं कांश्चित्साधकानाह स एव—

कुलानुबन्धव्याघातहोढं साहससाधकम् ।
स्वस्य भोगस्स्थावरस्य विभागस्य पृथग्धनम् ॥

कुलानुबन्धः पूर्वपुरुषवैरानुबन्धः । व्याघातः परस्परं स्पर्धा । होढं बलादपहृतलेशदर्शनम् । स्वस्य भोगः आत्मनो भोगः अत्र कात्यायनः—

वसेयुर्दश वर्षाणि पृथक्धर्माः पृथक्क्रियाः ।
भ्रातरस्तेऽपि विज्ञेयाः विभक्ताः पैतृकाद्धनात् ॥

भ्रातृशब्दोऽत्र रिक्थसम्बन्ध्युपलक्षणार्थः । पैतृकग्रहणं दायधनोपलक्षणार्थम् । परमार्थतो दायग्रहणाभावेऽपि,

पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।
परेण भुज्यमानायाः धनस्य दशवार्षिकी ॥

इति वचनानुसारेण विभक्ता एवेति विज्ञेया इत्यर्थः। दश वर्षादर्वाक् पुनः प्रागुक्तयुक्तिभिरेव निर्णयः। तासामन्यथासिद्धिसम्भावनया निर्णयाभावे तु—

युक्तिष्वप्यसमर्थासु शपथैरेव निर्णयेत्।

इति वचनाद्यद्यपि शपथः प्रापितः, तथाऽपि शपथे निर्णयो न कार्यः। यत आह याज्ञवल्क्यः—

विभागधर्मसंदेहे बन्धुसाक्ष्यभिलेखितैः।
विभागभावना कार्या न भवेद्दैविकी क्रिया॥

इति। कथं तर्हि युक्तिष्वसमर्थासु निर्णय इत्यपेक्षिते मनुः—

विभागे यत्र संदेहो दायादानां परस्परम्।
पुनर्विभागः कर्तव्यः पृथक्स्थानस्थितैरपि॥

यत्र संदेहो युक्तिभिरसमर्थाभिर्नापैतीति शेषः। यत्पुनस्तेनैवोक्तं—

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत्॥

इति, तत् युक्त्यादिभिरपगतसंदेहविभागविषयमिति सर्वमनवद्यम्॥

इति स्मृतिचन्द्रिकायां विभागतद्धर्मसद्भावनिर्णयहेतवः.
समाप्तं च दायविभागाख्यपदस्य विधिवितानम्.

अत्रेयं प्रकरणानुपूर्वी—विभागकालकर्तृप्रदर्शनं, जीवद्विभागप्रकारः, विषमविभागप्रकारः, अजीवद्विभागप्रकारविषयाणि, दायानर्हविषयाणि, विभाज्यनिरूपणं, अविभाज्यनिरूपणं, पुत्रपौत्रादिविभागकल्पनाविषयाणि, स्त्रीधनभेदाः, स्त्रीधनकृत्यं, स्त्रीद्वाराऽऽगतधनविभागः, गौणपितृद्वाराऽऽगतधनविभागः, पुत्रद्वाराऽऽगतधनविभागः, अपुत्रद्वाराऽऽगतधनविभागे पत्नीविषयाणि, दुहित्रादिविषयाणि, संसृष्टभ्रात्रादिविषयाणि, विभक्तजपुत्रादिविभागः, अवलुप्तधनविभागः, विभक्तकृत्यं, विभागतद्धर्मसद्भावनिर्णयहेतवः ॥

इति स्मृतिचन्द्रिकायां दायविभागाख्यपदस्य
प्रकरणानुपूर्वी.

इति दायभागप्रकरणं समाप्तम्.

अथ साहसाख्यपदस्य विधिरुच्यते.

तत्र बृहस्पतिः—

मनुष्यमारणं चौर्यं परदाराभिमर्शनम् ।
पारुष्यमुभयं चेति साहसं स्याच्चतुर्विधम् ॥

अत्र आद्ये द्विविधे साहसे साहासिकज्ञानार्थमाह स एव—

हतस्तु दृश्यते यत्र घातकस्तु न दृश्यते ।
पूर्ववैरानुमानेन ज्ञातव्यस्स महीभुजा ॥
विज्ञेयोऽसाधुसंसर्गाच्चिह्नात् होढेन तस्करः ।
एषोदिता घातकानां तस्कराणां च भावना ॥

चिह्नं शोणितलेपादिः । होढेन हृतहस्तस्थधनादिना । उदित-भावनासंभवे तु कात्यायनः—

विना चिह्नैस्तु यत्कार्यं साहसाख्यं प्रवर्तते ।
शपथैस्स विशोध्यस्स्यात् सर्ववादेष्वयं विधिः ॥

इति । स इति साहसकर्तृत्वेनाभियुक्तः प्रत्यवमृश्यते । तत्र बृहस्पतिः—

दिव्यैर्विशुद्धो मान्यस्स्यादशुद्धो वधमर्हति।

इति । नारदोपि—

तत्कारिणो नार्थदमैश्शास्या वध्याः प्रयत्नतः ।

इति । तत्कारिणः साहसलक्षणवधकारिणः । तेषां वधे

विशेषमाह व्यासः—

ज्ञात्वा तु घातकं सम्यगसहायं सबान्धवम् ।
हन्याच्चित्रवधोपायैरुद्वेजनकरैर्नृपः ॥
बन्दिग्राहांस्तथा वाजिकुञ्जराणां च हारिणः ।
प्रसह्य घातिनश्चैव शूलानारोपयेन्नरान् ॥

यत्तु बृहस्पतिनोक्तं—

प्रकाशवधकाराश्च तथा चोपांशुघातकाः ।
ज्ञात्वा सम्यग्धनं हृत्वा हन्तव्या विविधैर्वधैः ॥

इति, तत् ब्रह्मध्रक्षत्रियादिविषयम् । यदाह बोधायनः— 'क्षत्रियादीनां ब्राह्मणस्य वधे वधः सर्वस्वहरणं च, तेषामेव तुल्यापकृष्टवधे यथाबलमनुरूपान् दण्डान् प्रकल्पयेत्' इति । बहूनामेकघातकत्वे दोषानुरूपदण्डाभिधानार्थमाह कात्यायनः—

एकं चेद्बहवो हन्युस्संरब्धाः पुरुषं नराः ।
मर्मघाती तु यस्तेषां स घातक इति स्मृतः ॥

तन स एव वधापराधदण्डभाक् । तथाच बृहस्पतिः—

मर्मघाती तु यस्तेषां यथोक्तं दापयेद्दमम् ।

इति । तामिति शेषः । यत्तुदोर्नैस्वाभिसम्बन्धात् । मर्महन्तृव्यतिरिक्तानामपि दण्डोऽनन्तरमुक्तः—

आरम्भकृत्सहायश्च तथा मार्गानुदेशकः ।

आश्रयश्शस्त्रदाता च भक्तदाता विकर्मिणाम् ॥
युद्धोपदेशकश्चैव तद्विनाशप्रदर्शकः ।
उपेक्षी कार्ययुक्तश्च दोषवक्ताऽनुमोदकः ॥

स्मृत्यन्तरेऽपि—

अनिषेद्धा क्षमो यस्स्यात् सर्वे तत्कार्यकारिणः ।
यथाशक्त्यनुरूपं तु दण्डमेषां प्रकल्पयेत् ॥

इति । अनुरूपं दोषानुरूपम् । अत एव मर्महन्तृदोषार्धभागित्वं द्वयोर्दर्शयति मनुः—

आरम्भकृत्सहायश्च दोषभाजौ तदर्धतः ।

इति । एवं मार्गानुदेशकादेरपि दोषलाघवमूह्यम् । याज्ञवल्क्यस्तु साहसप्रयोजकत्वतारतम्यादोषमहत्त्वतारतम्यं दण्डातिरेककथनमुखेनाह—

यस्साहसं कारयति स दाप्यो द्विगुणं दमम् ।
यश्चैवमुक्त्वाऽहं दाता कारयेत्स चतुर्गुणम् ॥

यदिदं साहसं भवान् कुर्यात् तदैतावद्धनं भवते दास्यामीत्येवमुक्त्वा साहसं कारयति स चतुर्गुणं दाप्य इत्यर्थः । द्विगुणं चतुर्गुणमित्यत्र साहसकर्तुरुक्तदण्डात् द्विगुणं चतुर्गुणमित्यर्थोऽवसेयः । मनुस्तु क्रोधादितः प्रेरितानां साहसिकानामुक्तो यो दण्डस्तस्याभावं दोषाभावकथनमुखेन विधित्सुः प्रेरितानां साहसिकानां कथयति—

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ।
द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥
आत्मनश्च परित्राणे दक्षिणानां च संगरे ।
स्त्रीविप्राभ्यवपत्तौ च घ्नन् धर्मेण न दुष्यति ॥

धर्मः तटाकारामादिकः भेदनच्छेदनादिसाहसिकैः यत्र देशे काले चोपरुध्यते, तथा शूद्रेतरवर्णसंकरे परदाराक्रमणादिरूपे राजाभावकालकारिते, तथाऽऽत्मनः परतः प्राणसंशये, तथा दक्षिणानां गवां संगरे ग्रहणानिमित्तकयुद्धे, तथा स्त्रीविप्राभ्यवपत्तौ दुर्बलहिंसानिवारणे, द्विजातिभिः क्षत्रधर्माश्रयणरहितैरसमर्थैश्शस्त्रं ग्राह्यमिति संबन्धः । क्षत्रियस्य प्रजामात्ररक्षणार्थं शस्त्रग्रहणं प्राप्तमिति तद्व्यतिरिक्तविप्रवैश्यविषयं द्विजातिग्रहणम् । तथाच बोधायनः—

ब्राह्मणार्थे गवार्थे वा वर्णानां वाऽपि सङ्करे ।
गृह्णीयातां विप्रविशौ शस्त्रं धर्मव्यतिक्रमे ॥

गौतमोपि—'प्राणसंशये ब्राह्मणोपि शस्त्रमाददीत दुर्बलहिंसायां विमोचने शक्तश्चेत्' इति । ब्राह्मणग्रहणं वैश्यस्यापि प्रदर्शनार्थम् । अत एव विष्णुः—'आत्मत्राणे वर्णसंकरे वा ब्राह्मणवैश्यौ शस्त्रमाददीयाताम्' इति । यत्तु बोधायनेनोक्तं—'भयार्थमपि ब्राह्मण आयुधं नाददीत' इति, यदप्यापस्तम्बेन—'परीक्षार्थोपि ब्राह्मण आयुधं नाददीत' इति, उभयत्राप्यपिशब्देन बिभीषिकार्थं हिंसार्थं वा ब्राह्मणस्य शस्त्र-

ग्रहणं दूरोत्सारितामिति गम्यते। तेन बिभीषिकार्थं ब्राह्मणस्य शस्त्रग्रहणविधानं पूर्वोक्तं विरुध्यते; सत्यं, अत एव पूर्वोक्तधर्मोपरोधादिशस्त्रग्रहणविधिविषयादन्यत्र प्रतिषेधोऽवतिष्ठते इति व्यवस्थापनीयम्। 'घ्नन् धर्मेण न दुष्यति' इति वदता मनुना हिंसापर्यन्तोऽयं शस्त्रग्रहणोपदेशो न बिभीषिकामात्रसंजननायेति दर्शितम्। 'घ्नन् धर्मेण न दुष्यति' इत्यस्य यद्यपि क्षात्रयुद्धधर्मेण घ्नन् न दुष्यतीत्यर्थो भवति। तथाऽपि धर्मोपरोधकादिहिंसाया अवश्यकर्तव्यत्वात्तत्र क्षात्रयुद्धधर्मेण घ्नन्नित्यर्थायोगाद्धर्मेण हिंसादिविधिना प्रेरितो भूत्वा घ्नन् न दुष्यतीत्यर्थोऽवगन्तव्यः। एतदुक्तं भवति—धर्मोपरोधकादिहिंसायाश्चोदितत्वात् तत्कर्ता न दुष्यतीति। तथाच मनुवृत्तावुक्तं—'स्तेनादीनां वधः क्षात्रधर्मेणेत्ययुक्तं, तद्धननस्यावश्यकर्तव्यत्वात्। तस्माद्धर्मेण शास्ता न दुष्यतीति द्रष्टव्यम्' इति। धर्मोपरोधकादिहननचोदना स्मृत्यनुमेया न प्रत्यक्षश्रुतेरिति दर्शयितुमुपक्रमस्मृतिवाक्यमाह मनुः—

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम्।
आततायिनमायान्तं हन्यादेवाविचारयन्॥

अत्र गुर्वादिपदान्यन्यपरतया प्रयुक्तानीति दर्शयितुं तेषां तात्पर्यार्थो वृत्तिकारेण दर्शितः—गुरुं वा मान्यतमं वेत्यर्थः। बालवृद्धौ वा कृपाविषयमपीत्यर्थः। ब्राह्मणं वा बहुश्रुतं समस्तपात्रगुणयुक्तमित्यर्थः। उत्तरार्धार्थोऽपि तेनैव दर्शितः—

वधार्थमधिकारविच्छेदार्थमवश्यमेतीत्याततायिनमायान्तं प्रवृत्तं प्राणाद्यपहारे हन्यादेव, अविचारयन्नित्यत्र धारणेति नियमः पर इति। कात्यायनोपि—

विनाशहेतुमायान्तं हन्यादेवाविचारयन्।

विनाशहेतुं उदासीनं जलभेदादिविनाशहेतुं आततायिनमिति यावत्। क्वचिदपि विचारयन्निति पाठादर्शनात्। एतदुक्तं भवति—आततायिवधः सदोषो निर्दोषो वेति विचारो न कार्यः वैधत्वादिति। वासिष्ठोपि वैधत्वं दर्शयति—

आततायिनमायान्तमपि वेदान्तगं रणे।
जिघांसन्तं जिघांसीयान्न तेन भ्रूणहा भवेत्॥

इति। अत्र केचिदाहुः—आततायिवधविधिवाक्यत्रयेऽप्यायान्तमिति वचनादात्तशस्त्रो हन्तुमुन्मुखोऽभिधावन् दारादीन्वा जिहीर्षन् हन्तव्यः। कृते त्वनर्थे किमन्यत् करिष्यतीत्युपेक्ष्य एवेति। अत्र कृते त्वनर्थ इत्याद्ययुक्तमित्यपरे दूषयन्ति। कारिष्यन् कृतवांश्च द्वावपि दौष्ट्येन समौ वधार्हावेव। तस्मादायान्तमिति पदं कृत्वाऽऽगतस्याप्याततायिन उपलक्षणार्थमुक्तमिति। अन्ये पुनरेवमाहुः—वर्तमानार्थजिघांसन्तमिति विधिवाक्यस्थपदपर्यालोचनया वर्तमानविषदानादिव्यापारा एवाततायिन उच्यन्ते। तद्व्यापारनिवारणं च यत्राततायिवधमन्तरेण न संभवति तत्रैव तद्वधाभ्यनुज्ञा, सत्यां गतौ वधस्यानुचितत्वात्। तेन विषोपादानादौ व्याप्रियमाणः प्रहर-

णादिमात्रेण अनिवार्यः, न हन्तव्यः। विषदानादौ व्यापृतस्य ग्रहणादिमात्रेण निवारयितुं शक्यस्य वा वधो दोषनिमित्त मेवेति । तदपि न—न हि विषदानादिव्यापारेषु व्यापृतानां व्यापारनिवृत्तावपि पूर्वसिद्धं परशरीरादिविनाशहेतुत्वलक्षण मातताियित्वमपैति। तदुक्तं मेधातिथिना—'आततायित्वाच्चासौ हन्यते न हि कृतवतः आततायित्वमपैति' इति। तेन विष दानादौ व्यापृतोप्याततायित्वाद्धन्तव्य इति मेधातिथेरभिप्रायः। ननु च दारादिरक्षणार्थो वध इति कृते दारादिविप्लवे पश्चा द्वधो व्यर्थ इत्युपेक्ष्य एव कृतवानाततायी, न हन्तव्यः। मैवं—न दारादिरक्षणार्थो वधविधिः, किंतु दाराद्युपद्रवादिनि मित्ते वधो विधीयते। रक्षणार्थस्तु वधविधेरात्मनश्च परि त्राण इत्यादौ क्वचिदेव। तस्मात्कृतवानित्याततायी नोपेक्ष्यः। अत एव मनुः—

नाततायिवधे दोषो हन्तुर्भवति कश्चन।
प्रकाशं वाऽप्रकाशं वा मन्युस्तं मन्युमृच्छति॥

एतद्भाष्यकारो मेधातिथिर्व्याचष्टे—'न कश्चनेति नेहाधर्मो न दण्डो न प्रायश्चित्तम्। प्रकाशं आभाष्य जनसमक्षम्। अ प्रकाशं विषदानादिना येनकेनचिदुपायेन। मन्युः क्रोधाभि मानिनी देवता। स मन्युमृच्छति। नात्र हन्तृहन्तव्यभावोस्ति पुरुषयोः। आततायिक्रोधः इतरेण क्रोधेन हन्तव्य इत्यर्थ वादोऽयम्' इत्यादिग्रन्थेन। अत्राप्रकाशवधेऽपि दोषाभावं

वदन् मनुरप्युपप्लवं कृत्वा गतेऽप्याततायिनि विषदानादिना वधो न दोषायेति दर्शयति, उपप्लवकरणसमये विषदानासम्भवात्। बृहस्पतिरपि—

नाततायिवधे हन्ता किल्बिषं प्राप्नुयात्क्वचित्।
विनाशार्थिनमायान्तं घातयन्नापराध्नुयात्॥

अत्र करिष्यदाततायिविषयं उत्तरवाक्यं विनाशार्थिनमिति विशेषश्रुत्यैव प्रतिपन्नमिति पूर्ववाक्यं कृत्वागताततायिविषयमिति गम्यते। करिष्यदाततायिनोपि यथाकथञ्चित् विनाशार्थित्वापगमात् निवृत्तोद्यमाः तदा तान् घातयन् अपराध्नुयादिति दर्शयितुं 'विनाशार्थिनमायान्तम्' इत्युक्तम्। अत एवास्मिन् विषये वधस्थाने ग्रहणमाह कात्यायनः—

उद्यतानां तु पापानां हन्तुर्दोषो न विद्यते।
निवृत्तास्तु यदारम्भात् ग्रहणं न वधः स्मृतः॥

आततायित्वानिष्पत्तेरित्यभिप्रायः। आततायित्वनिष्पत्तावपि क्वचिद्विषये न वध इत्याह सुमन्तुः—'आततायिवधे न दोषोऽन्यत्र गोब्राह्मणाद्यदा हतः प्रायश्चित्तं स्यात्' इति। गौः ब्राह्मणो वा आततायी यदा हतः तदा प्रायश्चित्तं स्यादोषस्त्यादित्यर्थः। आत्मपरित्राणव्यतिरिक्तविषयमेतत्। यदाह देवलः—

आत्मत्यागः परत्यागात् पापीयान् पातकादपि।

पातके निष्कृतिः प्रोक्ता कथमात्मघ्ननिष्कृतिः ॥
आत्मानं बुद्धिसम्पन्नं योग्यं सर्वार्थसिद्धिषु ।
श्रमदुःखभये त्यक्त्वा रौरवे परिपच्यते ॥
उद्यम्य शस्त्रमायान्तं भ्रूणमप्याततायिनम् ।
निहत्य भ्रूणहा न स्यादहत्वा भ्रूणहा भवेत् ॥

इति । परवधार्हपातकादात्मत्राणानास्थानादात्मत्यागः पापी यानित्युक्तदोषमवैत्य भ्रूणमपि ब्राह्मणमपि दण्डापूपन्यायात् गामप्याततायिनमात्मपरित्राणायावश्यं हन्यादित्यर्थः । यत्तूशनसा ब्राह्मणस्य रुधिरोत्पादननिमित्तदोषमभिधायाभिहितम्—'गृहीतशस्त्रमाततायिनं हत्वा न दोषस्स्यात्' इति, तदापि पूर्वोक्तात्मपरित्राणविषये द्रष्टव्यम् । यत्तु कात्यायनेनोक्तं—

आततायिनि चोत्कृष्टे तपस्स्वाध्यायजन्मतः ।
वधस्तत्र तु नैव स्यात् पापे हीने वधो भृगुः ॥

इति । तपस्स्वाध्यायजन्मत उत्कृष्टे ब्राह्मणे न वध इत्यर्थः । यच्च बृहस्पतिनोक्तं—

आततायिनमुत्कृष्टं वृत्तस्वाध्यायसंयुतम् ।
यो न हन्याद्वधप्राप्तं सोऽश्वमेधफलं लभेत् ॥

उत्कृष्टं ब्राह्मणमित्यर्थः । वधप्राप्तं—

स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम् ।
न तेन भ्रूणहा भवति मन्युस्तं मन्युमृच्छति ॥

इत्यादिवचनापातमात्राद्वधप्राप्तमित्यर्थः । तदेतद्वचनद्वयं पूर्वोक्तात्मत्राणव्यतिरिक्तविषये ब्राह्मणातताय्यनि द्रष्टव्यम् । यत्तु बोधायनेनोक्तं—'षट्स्वप्यनभिचरन् पतति' इति, षट्सु आततायिष्वाति शेषः । के पुनस्त इत्यपेक्षिते वासिष्ठः—

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥

उदाहरणभूतानामत्यन्तप्रसिद्धानां षाड्विध्यादुभयत्र षड्ग्रहणं, न पुनः परिसङ्ख्यार्थं, विधान्तरेणाततायिनां लोके विद्यमानत्वात् । अत एव—

उद्यतासिविषाग्निश्च चापोद्यतकरस्तथा ।
आथर्वणेन हन्ता च पिशुनश्चैव राजनि ॥
भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः ।
एवमाद्यान्विजानीयात्सर्वानेवाततायिनः ॥

इति कात्यायनेनैव एवमाद्यानित्युक्तम् । एवमाद्यान् एवंप्रकारानित्यर्थः । अत एवाततायिन इत्यनुवृत्तौ तेनैवोक्तं—

यशोवृत्तहरान् पापानाहुर्धर्मार्थहारकान् ।
अनाक्षारितपूर्वो यस्त्वपराधे प्रवर्तते ॥
प्राणद्रव्यापहारे च तं विद्यादाततायिनम् ।

प्राणद्रव्यापहारेऽन्यस्मिन्नपि तत्तुल्यापराधे च यस्त्वनाक्षारितपूर्वोऽबाधितपूर्वः प्रवर्तते तं आततायिनं विद्यादित्यर्थः । अने-

नार्थादाक्षारितपूर्वो यः पूर्वोक्तविषदानाद्यपराधे प्रवर्तते नासा वाततायीत्युक्तम्। एवञ्च 'आततायी वधोद्यतः' इत्यमरसिंहकृतोऽर्थनिर्देशः क्षेत्रदारापहर्त्रादीनामर्थानां प्रदर्शनार्थमिति मन्तव्यम्। एवंच 'षट्स्वप्यनभिचरन् पतति' इत्याततायिवधमात्रमकुर्वन् पतितो भवतीत्यर्थोऽवगन्तव्यः। तदेतद्बोधायनवचनं आत्मत्यागविषये तद्व्यतिरिक्तधर्माद्युपरोधविषयेऽपि गोब्राह्मणेतरशेषाततायिविषये द्रष्टव्यम्। गवां पर्युदासवचनात्तदितरपश्वादितिर्यग्जातीनामप्याततायिनां वधो विहित इत्यवगम्यते। अत एव कात्यायनेन आततायिपश्वादिवधेऽपि दोषाभावो दर्शितः—

नखिनां शृङ्गिणां चैव दंष्ट्रिणां चाततायिनाम्।
हस्त्यश्वानां तथाऽन्येषां वधे हन्ता न दोषभाक्॥

अन्येषां चञ्चादिशालिनां पक्ष्यादीनाम्। एवञ्चाततायिनां वधे यत्र दोषाभाव उक्तः तत्र घातकानां वधनिबन्धनदण्डाभावः प्रत्येतव्यः, अस्मिन् साहसाख्यवधे दोषाभावकथनस्य दण्डाभावप्रतिपत्त्यर्थत्वात्॥

इति स्मृतिचन्द्रिकायां वधलक्षणसाहसविषयाणि
वचनानि निरूपितानि.

अथ साहसस्तेयविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र बृहस्पतिः—

साम्प्रतं साहसं स्तेयं श्रूयतां क्रोधलोभजम् ।

इति । साहसलक्षणकं स्तेयमित्यर्थः । किं तदित्यपेक्षिते याज्ञवल्क्यः—

सामान्यद्रव्यप्रसभहरणं साहसं स्मृतम् ।

इति । सामान्यद्रव्यं बहुजनैः प्रहरादिकालक्रमेण रक्ष्यमाणं द्रव्यम् । एतत् छलेन हर्तुं न शक्यते, रक्षणे प्रमादासम्भवात् । तेनास्य प्रायेण बलादपहरणम्, तदेतदाभिसन्धायोक्तं—'सामान्यद्रव्यप्रसभहरणम्' इति । साहसं स्मृतं साहसलक्षणं स्तेयमित्यर्थः । तथाच कात्यायनः—

सान्वयस्त्वपहारो यः प्रसह्य हरणं च यत् ।
साहसं च भवेदेवं स्तेयमुक्तं विनिह्नवः ॥

अन्वयो रक्षणकालक्रमप्राप्तपालकनरनैरन्तर्यम्, तस्मिन् सति योऽपहारः सः सान्वयोऽपहारः । स च प्रसह्य क्रियमाणः साहसं च स्तेयं च इत्येवं द्विरूपमापद्यते । उक्तप्रकारविपरीतोपि निह्नवो द्रव्यापहारः स्तेयरूपमेवापद्यत इति स्मृतावुक्तमित्यर्थः ।

निरन्वयं भवेत् स्तेयं कृत्वाऽपव्ययते च यत् ।

इति मनुस्मरणात् । अस्यार्थो मेधातिथिना स्पष्टीकृतः—निर-

न्वयं आरक्षकपुरुषवर्जितमवसरं अभिज्ञाय क्रियते यच्चौर्यम्, प्रसह्य कृतं निह्नुते कृतामिदं न मयेति, तदपि स्तेयमिति। एवं साहसस्तेयकेवलस्तेययोर्भेदकथनं तत्कर्तृषु दण्डभेदकथनार्थम्। तत्र तावत्साहसस्तेयकर्तृविषये दण्डानाह बृहस्पतिः—

क्षेत्रोपकरणं सेतुमूलपुष्पफलानि च।
विनाशयन् हरन् दण्ड्यश्शताद्यमनुरूपतः॥
पशुवस्त्रान्नपानानि गृहोपकरणं तथा।
हिंसयन् चोरयन् दाप्यो द्विशताद्यं दमस्तथा॥
स्त्रीपुंगोहेमरत्नानि देवविप्रधनं तथा।
कौशेयं चोत्तमं द्रव्यमेषां मूल्यसमो दमः॥
द्विगुणो वा कल्पनीयः पुरुषापेक्षया नृपैः।
हन्ता वा घातनीयस्स्यात् प्रसङ्गविनिवृत्तये॥

इति। अत्र विनाशयन् हरन् हिंसयन् चोरयन् हन्ता वेति च वदन् इदं दण्डशास्त्रं साहसस्तेयकर्तृविषयमिति दर्शयति, तस्य क्रोधलोभवत्त्वेन हननोपेतस्तेयकारित्वात्। हन्ता वा घातनीय इत्यब्राह्मणविषयम्। तथाच साहसस्तेयं प्रकृत्य यमः—

न शारीरो ब्राह्मणस्य दण्डो भवति कर्हिचित्।
गुप्ते तु बन्धने बद्ध्वा राजा भक्तं प्रदापयेत्॥
अथवाऽप्यधनं रक्षाकर्म वा कारये न्नृपः।
मासार्धमासं कुर्वीत कार्यं विज्ञाय तत्त्वतः॥
यथाऽपराधं विप्रं तु विकर्माण्यपि कारयेत्।

अवध्या ब्राह्मणा गावो लोकेऽस्मिन्वैदिकी श्रुतिः ॥

इति । रक्षाकर्म पश्वादिपालनरूपं गर्हितम् । यत्तु याज्ञवल्क्येन साहसस्तेयं प्रस्तुत्यानन्तरमुक्तं—

तन्मूल्याद्द्विगुणो दण्डो निह्नवे तु चतुर्गुणः ।

इति । तन्मूल्यात् साहसस्तेयप्राप्तवस्त्रादिमूल्यादित्यर्थः । तद्वचनं वस्त्राद्युत्तमहरणे दृष्टसाहसकृते द्रष्टव्यम्,

द्विगुणो वा कल्पनीयः पुरुषापेक्षया नृपैः ।

इति वस्त्राद्युत्तमद्रव्यहरणे बृहस्पतिनोक्तत्वात् । निह्नवे तु नमयेदमुत्तमद्रव्यप्रसभहरणं कृतमित्यपलापे तु कृते इत्यर्थः ।

इति स्मृतिचन्द्रिकायां साहसस्तेयविषयाणि.

अथ प्रसङ्गादस्मिन्नेव पदे केवलस्तेयविषयाण्यपि कानिचिद्वचनानि लिख्यन्ते, नारदीये पदोद्देशकवचने स्तेयसंग्रहयोरनुद्देशादुद्देशक्रमप्राप्तावसराभावात् । तत्र मनुः—

द्विविधांस्तस्करान् विद्यात् परद्रव्यापहारिणः ।
प्रकाशांश्चाप्रकाशांश्च चारचक्षुर्महीपतिः ॥

बृहस्पतिरपि –

प्रकाशाश्चाप्रकाशाश्च द्विविधास्तस्करास्स्मृताः ।
प्रज्ञासामर्थ्यमायाभिः प्रभिन्नास्ते सहस्रधा ॥

के पुनः प्रकाशास्तस्करा इत्यपेक्षिते स्वयमेवाह—

नैगमा वैद्यकितवा सभ्योत्कोचकवञ्चकाः ।
दैवोत्पातविदो भद्राशिल्पज्ञाः प्रतिरूपकाः ॥
अक्रियाकारिणश्चैव मध्यस्थाः कूटसाक्षिणः ।
प्रकाशास्तस्करा ह्येते तथा कुहकजीवनाः ॥

इति । प्रतिरूपकाः प्रतिरूपकराः । तथाच नारदः—

प्रकाशवञ्चकास्तत्र कूटमानतुलास्स्मृताः ।
उत्कोचकास्सोपधिकाः कितवाः पण्ययोषितः ॥
प्रतिरूपकराश्चैव मङ्गलादेशवृत्तयः ।
इत्येवमादयो ज्ञेयाः प्रकाशास्तस्करा भुवि ॥

इति । नैगमादिच्छद्मना परद्रव्यापहारिणश्चेत् प्रकाशतस्करा न स्वरूपत इत्यवगन्तव्यम् । नैगमादिव्याजेन परद्रव्यापहर्तृत्वे सिद्धे दण्डमाह व्यासः—

स्त्रीपुंसौ वञ्चयन्तीह मङ्गलादेशवृत्तयः ।
गृह्णन्ति छद्मना चार्थमनार्यास्त्वार्यलिङ्गिनः ॥
नैगमाद्या भूरिधना दण्ड्या दोषानुरूपतः ।
यथा ते नातिवर्तन्ते तिष्ठन्ति समये तथा ॥

दोषानुरूपतो दण्ड्या न पुनर्धनानुरूपत इत्यर्थः । ते च विधयो विस्तारभयान्न दर्शिताः ग्रन्थान्तरे द्रष्टव्याः । एवमप्रकाश तस्कराणां दण्डमभिधातुं तेषां स्वरूपमाह स एव—

साधनाद्यन्विता रात्रौ विचरन्त्यविभाविताः ।
अविज्ञातनिवासाश्च ज्ञेयाः प्रच्छन्नवञ्चकाः ॥

रात्राविति प्रायिकाभिप्रायेणोक्तम् । दिवाऽप्यरण्यादावविभावितानां विचरतां सम्भवात् । एतेषामवान्तरभेदमाह स एव—

उत्क्षेपकस्सन्धिभेत्ता पान्थमुट् ग्रन्थिभेदकः ।
स्त्रीपुंगोऽश्वपशुस्तेयी चोरो नवविधः स्मृतः ॥

उत्क्षेपको धनिनामनवधानमवधार्यान्तिकस्थं धनमुद्धृत्य ग्राहकः । सन्धिभेत्ता गृहाणां विच्छेदायकृतसञ्चरस्थाने पृष्ठसन्धाववस्थाय तत्रस्थभित्तिभेत्ता । पान्थमुट् उत्कटकान्तारादौ पथिकानां धनापहारकः । ग्रन्थिभेदकः परिधानादिग्रथितधनं ग्रहीतुं तद्ग्रन्थिविमोचकः । स्त्रीपुंगोऽश्वपशुस्तेयी द्वन्द्वान्तेश्रूयमाणश्शब्दः प्रत्येकमभिसम्बध्यते । अत एव नवविध इत्युक्तम् । अत्र याज्ञवल्क्यः—

ग्राहकैर्गृह्यते चोरो लोप्त्रेणाथ पदेन वा ।

इति । बृहस्पतिरपि—

संसर्गैश्चिह्नलोप्त्रैश्च विज्ञातो राजपूरुषैः ।
प्रदाप्योऽपहृतं शास्यो दमैश्शास्त्रप्रचोदितैः ॥

संसर्गैः कुत्सितसंसर्गैः । चिह्नं चौर्यसाधनसङ्ग्रहवत्त्वादिकम् । लोप्त्रं स्तेयावाप्तं धनम् । प्रदाप्यः स्वामिन इति शेषः । अत एव विष्णुः—'स्तेनास्सर्व एवापहृतं धनिकस्य दाप्याः, तत-

स्तेषामभिहितदण्डप्रयोगः' इति । कस्य स्तेनस्य कः पुनरभिहितो दण्ड इत्यपेक्षिते बृहस्पतिः—

उत्क्षेपकस्य संदंशः छेत्तव्यो राजपूरुषैः ।

इति । संदंशोत्राङ्गुल्यङ्गुष्ठात्मकः परवस्त्रादानहेतुर्विवक्षितः । मनुरपि—

सन्धिं भित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः ।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत् ॥

तानिति शेषः । तथाच व्यासः—

सन्धिं भित्त्वाऽनेकविधं धनं प्राप्नोति वै गृहात् ।
प्रदाप्य स्वामिने सर्वं तीक्ष्णशूले निवेशयेत् ॥

यः प्राप्नोति तं प्रदाप्य पश्चाच्छूले निवेशयेदित्यर्थः । अन्यस्य स्तेनस्य दण्डमाह बृहस्पतिः—

एकस्मिन् यत्र निधनं प्रापिते दुष्टचारिणि ।
बहूनां भवति क्षेमः तस्य पुण्यप्रदो वधः ॥
तथा पान्थमुषो वृक्षे गळे बध्वाऽवलम्बयेत् ।

इति । अपरस्य मनुर्दण्डमाह—

अङ्गुली ग्रन्थिभेदस्य छेदयेत्प्रथमे ग्रहे ।
द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥

अङ्गुली तर्जन्यङ्गुष्ठौ । ग्रन्थिभेदने तयोस्साधकतमत्वात् ।

प्रथमे ग्रन्थिभेदानामङ्गुल्यङ्गुष्ठयोर्वधः ।

इति बृहस्पतिस्मरणाच्च । स्त्रीपुंसस्तेनयोर्दण्डमाह व्यासः—

स्त्रीहर्ता लोहशयने दग्धव्यो वै कटाग्निना ।
नरहर्ता हस्तपादौ छित्वा स्थाप्यश्चतुष्पथे ॥

गोस्तेनस्य दण्डमाह बृहस्पतिः—

गोहर्तुर्नासिकां छित्वा बध्वाऽम्भसि निमज्जयेत् ।

अश्वपशुस्तेनयोर्दण्डमाह व्यासः—

अश्वापहरणे पादौ कटिं छित्वा प्रमाप्यते ।
पशुहर्तुस्त्वर्धपादं तीक्ष्णशस्त्रेण कर्तयेत् ॥

पशुहर्तुरर्थदण्डः पश्वनुसारेण कार्य इत्याह नारदः—

महापशून् स्तेनयतो दण्ड उत्तमसाहसम् ।
मध्यमं मध्यमपशून् पूर्वं क्षुद्रपशौ हते ॥

मध्यमं मध्यमसाहसम् । पूर्वं प्रथमसाहसम् । सुवर्णादिकं स्तेनयतो दण्डमाह मनुः—

सुवर्णरजतादीनां उत्तमानां च वाससाम् ।
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ॥
शेषेष्वेकादशगुणं मूल्यादण्डं प्रकल्पयेत् ।
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ॥
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥

इति । स्वर्णरजतादीनां तुलया मेयानां पञ्चाशत्संख्याः देश-व्यवहारानुसारेण कर्षादिना वेदितव्याः । 'तथागणिममेयानां शतादभ्यधिके वधः' इत्यत्रापि एवमेव शतसङ्ख्याऽवगन्त-

व्या। शेषशब्दो यद्यप्युक्तसङ्ख्यातिरिक्ते न्यूनाधिकसङ्ख्याके वर्तितुमर्हति, तथाऽपि लघुदण्डाभिधानान्नचूनसङ्ख्याक एव वर्तत इति मन्तव्यम्। कुम्भशब्दः खारीपर्यायः, तत्र क्वचिदेशे कुम्भशब्दप्रयोगात्। खार्याः पुनरियत्ता स्मृत्यन्तरे दर्शिता—

अङ्गुळ्यग्रत्रयग्राह्या शाणमित्यभिधीयते।
शाणं पाणितलं मुष्टिः प्रसृतिश्च तथाऽञ्जलिः॥
कुडुपश्च तथा प्रस्थः आढको द्रोण एव च।
मानी खारी च विज्ञेयास्संख्यायाश्चतुरुत्तराः॥

इति। 'दाप्यस्तस्य च तद्धनम्' इत्यनेन यद्यपि प्रकृतधान्यात्मकमेव धनं तत्स्वामिने स्तेनापहृतं दाप्य इति भाति, तथाऽपि 'स्तेनास्सर्व एवापहृतं दाप्याः' इति विष्णुस्मरणात् सर्वत्र कृते स्तेये योज्यम्। अन्यान्यपि बहूनि स्तेयविषयाणि विद्यन्ते वचनानि विस्तरभयादिह न लिखितानि मानवादौ द्रष्टव्यानि॥

इति स्मृतिचन्द्रिकायां केवलस्तेयविषयाणि.

अथ साहसस्त्रीसङ्ग्रहविषयाणि.

तत्र बृहस्पतिः—

अनिच्छन्त्या यत्क्रियते सुप्तोन्मत्तप्रमत्तया।
प्रलपन्त्या वा रहसि बलात्कारकृतं तु तत्॥

संवर्तोपि—

नेच्छन्त्या यानि चिह्नानि बलात्कारकृतानि च ।
परपुंसः प्रसङ्गेषु नारीणां तानि शृण्वतः ॥
नखदन्तक्षतक्षामा कुचग्रहणविक्षता ।
सद्यो विध्वंसिता नारी बलात्कारेण दूषिता ॥
उच्चैर्विक्रोशयन्ती च रुदन्ती लोकसन्निधौ ।
तस्य नाम्ना वदन्ती च यथाऽहं तेन दूषिता ॥
शोचेदेवंविधैर्लिङ्गैः क्षामीकृतपयोधरा ।
छिन्नालङ्कारकेशैश्च व्याकुलीकृतलोचना ॥
राज्ञा सभ्यैः सभां नीत्वा स्वयमान्विष्य तत्क्षणात् ।
यद्ब्रूयात्सहजं वाक्यं तत्कर्तव्यं प्रयत्नतः ॥
विवादे साक्षिणामत्र न कुर्वीत परिग्रहम् ।
प्रार्थनादाभिशस्तस्य न दिव्यं दातुमर्हति ॥

इति । बलात्कारेण सद्यो विध्वंसिता दूषिता नारी या नखदन्तक्षताद्यन्विता विध्वंसकस्य नाम्ना तत्कृतविध्वंसनप्रकारं वदन्ती शोचेत् तां तत्क्षणात् राजा स्वयमन्विष्य सभ्यैस्सह सभां प्राप्य का तव पीडेति पृच्छेत् । ततस्तदा तयाऽऽवेदितं तदाकर्ण्य चिह्नैरेवात्र राज्ञा निर्णेतव्यमित्यर्थः । तत्रापराधिनो दण्डमाह मनुः—

सहस्रं ब्राह्मणो दण्ड्यो विप्रां गुप्तां बलाद्व्रजन् ।

इति । गुप्तां स्वानियमेन रक्षिताम् । ब्राह्मणेतरसवर्णाविषये तु बृहस्पतिरपराधिनो दण्डमाह—

सहसा कामयेद्यस्तु धनं तस्याखिलं हरेत् ।
उत्कृत्य लिङ्गवृषणौ भ्रामयेद्गर्दभेन तु ॥

कामयेत् परस्त्रियं व्रजेदित्यर्थः । उक्तदण्डस्य विषयं विषयान्तरे दण्डान्तरं चाह स एव—

दमो नेयस्समायां तु हीनायामर्धिकस्ततः ।
पुंसः कार्योऽधिकायां तु गमने स प्रमापणम् ॥

दमः 'सहसा कामयेत्' इत्यादिवाक्योक्तो दमः । समायां जारसवर्णपरभार्याविषये नेयो जारं प्रापणीयः । जारतो हीनाविषये तूक्तदमादर्धिको दमो जारं नेयः । जारतोऽधिकाविषये तु स एवोक्तो दमः पुंसः कार्यः, प्रमापणमपि पुंसः कार्यमित्यर्थः । यत्तु कात्यायनेन प्रमापणमात्रमुक्तं—

स्त्रीषु वृत्तोपभोगस्स्यात् प्रसह्य पुरुषो यदा ।
वधे तत्र प्रवर्तेत कार्यातिक्रमणं हि तत् ॥

इति, तत् अगुणवतो जायायां द्रष्टव्यम् । अत्र मन्वादिभिः पुरुषस्यैव दण्डाभिधानं दण्डप्रापकस्त्रीगतापराधाभावादिति मन्तव्यम् । तथाऽपीतरपुरुषसंसर्गजं पापं नार्यास्समुपयुज्यते । ततश्चासंव्यवहार्यताऽत्रापि दण्ड्यायामिव समाना । सा प्रायश्चित्तेन क्वचिदपैति क्वचिन्नेत्याह बृहस्पतिः—

अनिच्छन्ती तु या भुक्ता गुप्तां तां वासयेद्गृहे ।
मलिनाङ्गीमधश्शय्यां पिण्डमात्रोपजीविनीम् ॥
कारयेन्निष्कृतिं कृच्छ्रं पराकं वा समे गताम् ।
हीनवर्णोपभुक्ता या त्याज्या वध्याऽथवा भवेत् ॥

इति । गुप्तां पुनस्सम्भोगरहिताम् । वासयेत् विशुद्धिपर्यन्तमिति शेषः । समे गतां समे वर्णे पुंसि सङ्गतामित्यर्थः । हीनवर्णोपभुक्ताविषये वचनान्तरपर्यालोचनया यद्वक्तव्यं तद्विस्तरभयादिह नोक्तम् । स्वावसरे प्रायश्चित्तकाण्डे वक्ष्यते ।

इति स्मृतिचन्द्रिकायां साहसस्त्रीसङ्ग्रहविषयाणि.

अथ प्रसङ्गादेवास्मिन् पदे केवलस्त्रीसङ्ग्रहविषयाण्यपि कानिचिद्वचनानि लिख्यन्ते ॥

तत्र बृहस्पतिः—

छद्मना कामयेद्यस्तु तस्य सर्वहरो दमः ।
अङ्कयित्वा भगाङ्केन पुरान्निर्वासयेत्ततः ॥

छद्मना कामयेत् वञ्चनया सङ्गच्छेत् । सर्वहरः सर्वस्वहरणम् । ततः भगाङ्ककरणानन्तरमित्यर्थः । सहसा कामयेदित्यादिवाक्यस्येवास्यापि—

दमो नेयस्समायां तु हीनायामर्धिकस्ततः ।
पुंसः कार्योऽधिकायां तु गमने स प्रमापणम् ॥

इति विशेषो द्रष्टव्यः। तस्यायमर्थः—समायां जारसवर्णपरभार्यागमनविषये 'छद्मना कामयेत्' इत्यादिवाक्योक्तो दमो नेयः पुमांसं जारभूतं प्रापणीयः। हीनायां जारतो हीनवर्णायां गमने ततः छद्मना गमननिमित्तकाद्दमादर्धिकोऽर्धः दमः पुंसः कार्यः। अधिकायां जारतोऽधिकवर्णायां गमने समप्रमापणमपि पुंसः कार्यम् सर्वस्वहरणं कृत्वा प्रमापयेदित्यर्थः। अत्रापि पुंस एवापराधित्वात्तस्यैव दण्डाभिधानमिति मन्तव्यम्। तेनात्रापि स्त्रिया नास्ति दण्डः, तथाऽपि परपुरुषसम्पर्कजन्मदोषसद्भावादसंव्यवहार्यताऽस्ति। ततश्चात्रापि—

अनिच्छन्तीं तु या भुक्ता गुप्तां तां वासयेत् गृहे।
मलिनाङ्गीमधश्शय्यां पिण्डमात्रोपजीविनीम् ॥
कारयेन्निष्कृतिं कृच्छ्रं पराकं वा समे गताम्।
हीनवर्णोपभुक्ता या स्याज्या वध्याऽथवा भवेत् ॥

इत्युक्तमनुसंधेयम्। स्त्रीपुंसयोः परस्परानुरागजोपगमने तु दण्डमाह याज्ञवल्क्यः—

सजातावुत्तमो दण्डः आनुलोम्ये तु मध्यमः।
प्रातिलोम्ये वधः पुंसां स्त्रीणां नासादिकर्तनम् ॥

अत्र नार्या अपि दण्डाभिधानादन्योन्यानुरागजोपभोगविषयमिदं वचनमिति गम्यते, गुरुदण्डाभिधानात् सम्बन्धिभिः प्रसह्य परिपालितचरितशालिनीविषयामिति च गम्यते। मध्य-

मो दण्डः चत्वारिंशत्सहितपञ्चशतकार्षापणात्मकः । एवञ्च पञ्चशताधिकत्वादयमपि गुरुदण्डः

ऋणं वा यदि वा दण्डः प्रायश्चित्तमथापि वा ।
यत्र पञ्चशताधि स्यात् तत्कार्यं गुरु कीर्तितम् ॥

इति स्मरणात् । तेन गुरुत्वान्मध्यमोपि पूर्वोक्तगुप्तविषय एव । कर्णादिकर्तनं तु प्रातिलोम्य एव, तदनन्तराभिधानात् वधार्धतुल्यत्वाच्च । एवञ्च स्वजातावानुलोम्ये च नार्याः पुंसोऽभिहितार्थदण्डार्धदण्डः कल्पनीय इति वधार्धतुल्यकर्णादिकर्तनाभिधानादेवाधिगन्तव्यम् । अत एव कात्यायनः—

सर्वेषु चापराधेषु पुंसो योऽर्थदमः स्मृतः ।
तदर्धं योषितो दद्युः..... ॥

इति । पुरुषवदपराधकर्त्र्य इति शेषः । यत्तु मनुना सानुरागया ब्राह्मण्या सह सङ्गतस्य मध्यमसाहसमुक्तं,

शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ।

इति, तत् अरक्षितचरितशालिनीविषयम् । यत्पुनरानुलोम्येऽप्येवमेव तेनोक्तं—

अगुप्ते वैश्यराजन्ये शूद्रां वा ब्राह्मणो व्रजेत् ।
शतानि पञ्च दण्ड्यः स्यात् सहस्रं चान्त्यजे स्मृतम् ॥

इति । अन्त्यजः प्रसिद्धश्चर्मकरादिः । अगुप्ते मानसव्यभिचारादरक्षिते गृहेऽवरुद्धे इति यावत् ।

अरक्षिता गृहे रुद्धा पुरुषैराप्तकारिभिः ।

इति तेनैवोक्तत्वात्। एवञ्च रुद्धामित्यत्र गृहे रुद्धामित्यध्याहर्तव्यम्। एवञ्चैतदाप्तकारिभिः प्रसह्य रक्षितचरितशालिनीविषयमित्यवसेयम्। यत्तु ब्राह्मणस्य शूद्रेतरानुलोम्ये तेनोक्तं—

सहस्रं ब्राह्मणो दण्डं दाप्योऽगुप्ते तु ते व्रजन्।

इति, ते क्षत्रियावैश्ये अगुप्ते मानसव्यभिचारानवकाशाय गृहव्यापारावसक्तचित्ततया सुरक्षिते विवक्षिते, न तु स्वगृहेऽवरुद्धे गुरुतरदण्डत्वात्। द्विविधगुप्ताव्यतिरिक्तविषये तु व्यास आह—

गुप्तायां संग्रहे दण्डो यथोक्तस्समुदाहृतः।
इच्छन्त्यामागतायां तु गच्छतोऽर्धदमः स्मृतः॥

गुप्तां गच्छतो यावान् दण्ड उक्तस्तादितरां गच्छतस्तदर्धो दण्डः स्मृत इत्यर्थः। एवञ्च गुप्तायास्संग्रहे यत्र वध उक्तः तत्र तदितरस्यास्सङ्ग्रहे लिङ्गच्छेदो भवति। यत्रोत्तमसाहसो दण्ड उक्तस्तत्र तदितरस्यास्सङ्ग्रहे मध्यमसाहसः। यत्र पुनः मध्यमसाहस उक्तस्तत्र प्रथमसाहस इत्यनुसन्धेयम्। प्रातिलोम्ये तु जातिविशेषतो दण्डविशेषानाह मनुः—

शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन्।
अगुप्तमङ्गसर्वस्वी गुप्तं सर्वेण हीयते॥

अस्यार्थः—शूद्रः स्वेतरवर्णजां परस्त्रियं गच्छन्महापराधी भवति। तत्र गुप्तायां सङ्ग्रहे तावदङ्गसर्वस्वी ताभ्यां हीयते, लिङ्गेन धनेन च हीयत इति यावत्। अगुप्तायां सङ्ग्रहे तु सर्वेण

लिङ्गेन शरीरेण हीयत इति। तथाच गूद्रस्येत्यनुवृत्तौ गौतमः—'आर्यस्त्र्यभिगमने लिङ्गोद्धारस्सर्वस्वहरणं च गोप्ता चेद्वधोऽधिकः' इति। आर्यस्त्र्यभिगमने त्रैवार्णिकस्त्र्यभिगमन इत्यर्थः। गुप्तं द्वैजातं वर्णमावसन्नित्यनुवृत्तौ मनुः—

वैश्यस्सर्वस्वदण्डस्त्यात्संवत्सरनिरोधितः।
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति॥

संवत्सरनिरोधितः बन्धनागार इति शेषः। मूत्रेण गर्दभस्य गोर्वेति शेषः। एतयोरेवागुप्तां ब्राह्मणीं गच्छतोः दण्डमाह स एव—

ब्राह्मणीं तु यदाऽगुप्तां गच्छेतां वैश्यपार्थिवौ।
वैश्यं पञ्चशतं कुर्यात् क्षत्रियं तु सहस्रिणम्॥

पञ्चशतं कुर्यात् पञ्चशतकार्षापणदण्डेन दण्डयेदित्यथः। एतयोरेव गुप्तायां ब्राह्मण्यां दण्डाधिक्यमाह स एव—

उभावपि तु तावेव ब्राह्मण्या गुप्तया सह।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना॥

शूद्रवद्दण्ड्यौ लिङ्गेन धनेन शरीरेण च हीनौ कार्याविसर्थः। विषयान्तरेऽप्येतयोरेव दण्डान्तरमाह स एव—

वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजन्।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः॥

'वैश्यं पञ्चशतं कुर्यात् क्षत्रियं तु सहस्रिणम्' इत्युक्तदण्डमर्हत

इत्यर्थः । प्रातिलोम्येऽप्यल्पदण्डार्हत्वायासन्तनिर्गुणपतिपत्नी-विषय एव वैश्यदण्डोऽयं द्रष्टव्यः । आनुलोम्ये तु गुरुदण्डार्हत्वायासन्तसगुणपतिपत्नीविषय एवायं क्षत्रियदण्डो द्रष्टव्यः । एवञ्च पारिशेष्यात् 'वैश्यस्सर्वस्वदण्डस्स्यात्' इत्यादिनोक्तो गुरुदण्डः स्वजातावेवासन्तसगुणपतिपत्नीविषय एवावतिष्ठत इत्यवगन्तव्यम् । स्वजातावपि क्वचिच्छारीरदण्डमपराधाधिक्यं प्रदर्शयन्नाह नारदः—

माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसाखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताऽचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्राजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामान्यतमां गत्वा गुरुतल्पग उच्यते ।
शिश्नस्य कर्तनं तत्र नान्यो दण्डो विधीयते ॥

इति । अन्योऽस्मान्न्यून इति शेषः, अधिकस्य विधानात् । तथाच याज्ञवल्क्यः—

पितुस्स्वसारं मातुश्च मातुलानीं स्नुषामपि ।
मातुस्सपत्नीं भगिनीं आचार्यतनयां तथा ॥
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ।
छित्वा लिङ्गं वधस्तस्य सकामायाः स्त्रियास्तथा ॥

इति । ब्राह्मणव्यतिरिक्तविषयमेतत्, वधस्यापि विधानात् ।

अस्मिन्नेव विषये स्त्रिया अपि वधः, 'सकामायाः स्त्रियास्तथा' इति वचनात्। अन्यत्रापि क्वचित् स्त्रिया वधमाह मनुः—

भर्तारं लङ्घयेद्या तु जातिस्त्रीगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते॥

लङ्घयेत् किमनेनात्यन्तानुरूपेण पत्येति उपपतिं समाश्रयेदित्यर्थः। यमोपि—

वृषलं सेवते या तु ब्राह्मणी मदमोहिता।
तां श्वभिः खादयेद्राजा संस्थाने वध्यघातिनाम्॥
वैश्यं वा क्षत्रियं वाऽपि ब्राह्मणी सेवते तु या।
शिरसो मुण्डनं तस्याः प्रयाणं गर्दभेन तु॥

इति। मदमोहितेति वदन्वधदण्डस्यासार्वत्रिकत्वं दर्शयति। तेन नार्याः कर्णादिकर्तनमिति प्रागुक्तो दण्डो रागादत्यन्तासक्ताविषय इति मन्तव्यम्। अत्यन्तासक्तिरहिताविषये तु न शारीरो दण्डः, संव्यवहारार्थं—

यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्।

इति प्रायश्चित्तविधानात्। एवञ्च यत्कात्यायनेनोक्तं—

नास्वतन्त्राः स्त्रियो ग्राह्याः पुमांस्तत्रापराध्यति।
प्रभुणा शासनीयास्ता राजा तु पुरुषं नयेत्॥
प्रोषितस्वामिका नारी प्रापिता यद्यपि ग्रहे।
तावत्सा बन्धने स्थाप्या यावत्प्रत्यागतः प्रभुः॥

इति, तत् व्रतचारणार्हास्वतन्त्रासु द्रष्टव्यम् । योषिदुत्थापितानुरागजसङ्ग्रहे तु बृहस्पतिराह—

गृहमागत्य या नारी प्रलोभ्य स्पर्शनादिना ।
कामयेत्तत्र सा दण्ड्या नरस्यार्धदमस्स्मृतः ॥

दण्ड्या योषितोऽभिहितदण्डेनेति शेषः । अर्धदमो योषिदर्धादर्धदमः । यत्तु यमेनोक्तं—

परदारसवर्णासु दण्ड्यास्स्युः पञ्चकृष्णलान् ।
असवर्णास्वानुलोम्ये दण्डो द्वादशको मतः ॥

इति । द्वादशकः द्वादशकार्षापण इत्यर्थः । तदेतत् बन्धकीविषयं, बन्धक्यधिकारे तेनास्य दण्डस्य विधानात् । वेश्याविषये तु व्यास आह—

परोपरुद्धागमने पञ्चाशत्पणको दमः ।
प्रसह्य वेश्यागमने दण्डो दशपणस्स्मृतः ॥ इति ॥

इति स्मृतिचन्द्रिकायां केवलस्त्रीसंग्रहविषयाणि.

अथ साहसपदान्तर्गतोभयपारुष्यविषयाणि.

तत्र नारदः—

फलमूलोदकादीनां क्षेत्रोपकरणस्य च ।
भङ्गक्षेपावमर्दाद्यैः प्रथमं साहसं स्मृतम् ॥
वासःपश्वन्नपानानां गृहोपकरणस्य च ।

एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् ॥
व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् ।
प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् ॥
तस्य दण्डः क्रियापेक्षः प्रथमस्य शतावरः ।
मध्यमस्य तु शास्त्रज्ञैः दृष्टः पञ्चशतावरः ॥
वधस्सर्वस्वहरणं पुर्या निर्वासनाङ्कने ।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसे ॥
स्यातां संव्यवहार्यौ द्वौ धृतदण्डौ तु पूर्वयोः ।
धृतदण्डोप्यसंभाष्यो ज्ञेय उत्तमसाहसे ॥

इति । एतेनैव प्रकारेणेत्यनेन भङ्गाक्षेपावमर्दाद्यः प्रकार उक्तः । भङ्गः फलादिरूपस्य । आक्षेपः आक्रोशः फलमूलादेर्वाचा न्यग्भावकरणमिति यावत् । अवमर्दः स्वरूपावशेषेण पीडनम् । आद्यशब्देनामेध्यादिना उपघातादि गृह्यते । अत्राक्षेपशब्देन वाक्पारुष्यमुक्तम् । भङ्गावमर्दाद्यैरित्यनेन दण्डपारुष्यम् । तयोः प्रथममध्यमादिसाहसभेदोक्त्या तु सहसाकृतविषयताऽपि ज्ञापिता । एवञ्च फलमूलादिषु सहसा कृतं वाक्पारुष्यं दण्डपारुष्यं वा प्रथमसाहसम् । वासःपश्वादिषु कृतं तु मध्यमसाहसम् । प्राणिषु प्राणोपरोधितया कृतं पुनरुत्तमसाहसमिति मन्तव्यम् । तस्य साहसवाक्पारुष्यस्य साहसदण्डपारुष्यस्य वाऽपराधस्य दण्डः क्रियापेक्षः अपराधक्रियापेक्षः कल्पनीय इति शेषः । तत्र प्रथमस्य दण्डश्शता-

वरः । शतकार्षापणादूनो नास्तीत्यर्थः । एवमुत्तरवाक्यस्याप्यर्थो व्याख्येयः । प्रथमसाहसदण्डस्य क्रियापेक्षया आधिक्यं मध्यमसाहसदण्डात् कल्प्यम् । वधाद्युत्तमसाहसदण्डपञ्चकेऽपि क्रियापेक्षया व्यवस्था कल्प्या, 'तस्य दण्डः क्रियापेक्षः' इत्यस्य प्रथममध्यमोत्तमसाहसाधारस्येहाभिधानात् । क्रियापेक्षः सहसाकृतः पारुष्यतारतम्यापेक्ष इत्यर्थः ॥

इति स्मृतिचन्द्रिकायां साहसपदान्तर्गतोभयपारुष्यविषयाणि.

अथ प्रसङ्गात् साहसकल्पापराधदण्डविषयाणि कानिचिद्वचनानि लिख्यन्ते.

तत्र मनुः—

कूटशासनकर्तॄंश्च प्रकृतीनां च दूषकान् ।
स्त्रीबालब्राह्मणघ्नांश्च हन्याद्विट्सेविनस्तथा ॥

द्विट्सेविनः शत्रुसेवकान् । द्वितीयपादस्तु 'स्वाम्यमात्यदुर्गकोशदण्डराष्ट्रमित्राणि प्रकृतयस्तद्दूषकांश्च हन्यात्' इति विष्णुवचनादेव व्याख्यातः । दण्डशब्दोत्र सेनामात्रमाचष्टे, 'राष्ट्रदुर्गबलानि च' इत्यमरसिंहेनाभिधानात् । मानवे ब्राह्मणग्रहणं मनुष्योपलक्षणार्थम् । अत एव राजा हन्यादित्यनुवृत्तौ विष्णुः—'स्त्रीबालपुरुषघातिनश्च' इति । अथवा ब्राह्मणघ्नग्रहणं—महापातकिनामुपलक्षणार्थम् । तथाच तत्रैवोक्तं—

ब्रह्महा च सुरापश्च तस्करो गुरुतल्पगः ।
एते सर्वे पृथग्वध्या महापातकिनो नराः ॥

यस्य प्रतिषिद्धा सुरा स इह सुरापो विवक्षितः । तस्करोप्यत्र सुवर्णस्तेयी विवक्षितः 'महापातकिनः' इत्यभिधानात् । विप्रेतरमहापातकिविषयमेतत् । विप्रविषये त्वाह बृहस्पतिः—

महापातकयुक्तोपि न विप्रो वधमर्हति ।
निर्वासनाङ्कने मौण्ड्यं तस्य कुर्यान्नराधिपः ॥

कामकृतविषयमेतत् । निर्वासनादिदण्डे कृतेऽप्यत्र दोषो नापैति, उत्तमसाहसकल्पापराधत्वात् ।

धृतदण्डोप्यसंभाष्यो ज्ञेय उत्तमसाहसे ।

इत्यस्य तत्कल्पापराधेऽप्यतिदिष्टत्वात् ॥

अत एव निर्वासितानामङ्कितानामप्यसंव्यवहार्यतां प्रपञ्चितवान् मनुः—

असंभोज्या ह्यसंयाज्याः अपाठ्याश्चाविवाहिनः ।
चरेयुः पृथिवीं सर्वां सर्वधर्मबहिष्कृताः ॥
ज्ञातिसंबन्धिभिश्चैते कर्तव्याः कृतलक्षणाः ।
निर्वाच्या निर्नमस्कारास्तन्मनोरनुशासनम् ॥

इति । सर्वधर्मबहिष्कृताः श्रौतस्मार्तकर्मपरिभ्रष्टा इत्यर्थः । कृतलक्षणाः ललाटे कृताङ्काः । ज्ञात्यादिभिः निर्वाच्याः निर्नमस्काराः कर्तव्या इत्यन्वयः । यत्तु तेनैवोक्तं—

आगस्सु ब्राह्मणस्यैव कार्यो मध्यमसाहसः ।
विवास्यो वा भवेद्राष्ट्रात् सद्रव्यस्सपरिच्छदः ॥

इति । आगस्सु महापातकेष्वित्यर्थः । तदकामकृतविषयम् । तत्रापि प्रायश्चित्तमकुर्वतो मध्यमसाहसो दण्डः कार्यः । तदप्यकुर्वतो विवास इति व्यवस्था ज्ञेया । ब्राह्मणेतरमहापातकिविषये त्वकामकृते सर्वस्वहरणं कामकृते वध इत्याह स एव—

इतरे कृतवन्तस्तु पापान्येतान्यकामतः ।
सर्वस्वहारमर्हन्ति कामतस्तु प्रमापणम् ॥
एते सर्वे पृथग्वध्या महापातकिनो नराः ॥

इत्यनेन विप्रेतरेषु निष्कारणं वधस्योक्तत्वात् ।

ब्राह्मणान् बाधमानं तु कामादवरवर्णजम् ।
हन्याच्चित्रवधोपायैरुद्वेजनकरैर्नृपः ॥

इति तेनैव ब्रह्मघ्नवधे विशेषस्मरणाच्च । अवरवर्णजं ब्राह्मणेतरवर्णजम् । सर्वस्वहारमर्हन्ति प्रायश्चित्तमकुर्वन्त इति शेषः । कुर्वन्तस्तु कमर्हन्तीत्यपेक्षिते स एवाह—

प्रायश्चित्तं तु कुर्वाणाः पूर्वे वर्णा यथोदितम् ।
नाङ्क्या राज्ञा ललाटे तु दाप्यस्तूत्तमसाहसम् ॥

नाङ्क्याः नापि सर्वस्वदण्डार्हाः किंतूत्तमसाहसं दाप्या इत्यर्थः । यत्तु बोधायनेनोक्तं—'क्षत्रियादीनां ब्राह्मणवधे वधः

सर्वस्वहरणं च' इति, तत् साहसरूपवधविषयम् । यत्त्वनन्तरमुक्तं— 'तेषामेव तुल्यापकृष्टवधे यथाबलमनुरूपं दण्डं प्रकल्पयेत्' इति, तेषां क्षत्रियादीनां तुल्यापकृष्टवधे बलानुरूपं दण्डं प्रकल्पयेदित्यर्थः। तत् कण्ठोक्तचैव स्पष्टविषयम्। दण्डप्रकल्पनप्रकारश्चानन्तरमुक्तः—'क्षत्रियवधे गोसहस्रमृषभैकाधिकं राज्ञ उत्सृजेद्वैरनिर्यातनार्थं शतं वैश्ये दश शूद्रे वृषभश्चात्राधिकः शूद्रवधेन स्त्रीवधो गोवधश्च व्याख्यातः' इति। उत्सृजेत् दद्यादित्यर्थः। वैश्यस्य वधे शतं गोशतम् । शूद्रे शूद्रवधे दश गाः तासु वृषभोऽधिकः । वैरनिर्यातनार्थं राज्ञ उत्सृजेदित्युभयत्रानुषज्यते । वैरनिर्यातनार्थमित्यनेनायं दण्डो न दोषनिर्यातनार्थमित्युक्तम् । तेनात्र धृतदण्डस्याप्यसम्भाष्यत्वादिकं नापैतीति दर्शितम् । एवञ्च जडाधिकृतक्षत्रियादिवधे कामकृते पादोनो गोसहस्रादिको दण्डः कल्पनीयः । अकामकृते त्वर्धोन इति ज्ञेयम् । प्रणाड्या कृत्वाऽकामतश्चेत् त्रिपादोनः कल्पनीयः, दोषानुसारित्वाद्दण्डस्य । दोषाभावं क्वचित् प्रणाड्या वधे त्वाह याज्ञवल्क्यः—

अमनुष्यकृतो दोषो नापैहीति प्रजल्पतः ।
काष्ठलोष्टेषुपाषाणवाहायुधकृतस्तथा ॥

अस्यार्थः—अमनुष्यैः पशुपक्ष्यादिभिः स्वत एव कृतो हिंसादिदोषः तत्स्वामिनां तेषु बलवर्धनघासादिदायित्वेऽपि न भवति। तथाऽन्यप्रेषितकाष्ठलोष्टपाषाणपृष्ठ्यानवाहादिकृतो हिंसादिदोषः

प्रेरकस्यापसरेति पुनःपुनरुच्चैरुच्चरितुः न भवतीति। ततोत्र दण्डो नास्तीत्यभिप्रायः । दण्डाभावस्यात्राभिप्रेतस्य क्वचिदपवादमाह स एव—

शक्तो ह्यमोक्षयन् स्वामी दंष्ट्रिणां शृङ्गिणां तथा ।
प्रथमं साहसं दद्याद्विक्रुष्टे द्विगुणं तथा ॥

विक्रुष्टे मोचय मोचयेति पीड्यमानेन आक्रन्दितेऽप्यमोक्षयन् प्रथमसाहसद्वयं दद्यादित्यर्थः । बृहस्पतिरपि साहसकल्पापराधे दण्डमाह—

दण्डाजिनादिना युक्तमात्मानं दर्शयन्ति ये ।
हिंसन्ति छद्मना शून्ये वध्यास्ते राजपूरुषैः ॥

याज्ञवल्क्यस्तु सम्बन्धिवधे दण्डमाह—

विषाग्निदां पतिगुरुनिजापत्यप्रमापणीम् ।
विकर्णकरनासोष्ठीं कृत्वा गोभिः प्रमापयेत् ॥

असम्बन्धिषुरुषे तु विषाग्निदानादौ साहसिकवधवत्सहायादेर्वधो न कार्यः, किंतु तस्यैव कार्य इत्याह यमः—

विषाग्निदायकाश्चोराः घातकाश्चोपघातकाः ।
स्वशरीरेण दण्ड्यास्स्युः मनुराह प्रजापतिः ॥

उपघातकाः अन्यद्वारा घातकाः । गुर्वादिघातकस्यापि स्त्रीवद्दण्डः, विशेषास्मृतेः दण्डापूपन्यायसिद्धत्वाच्च । तथाहि—यत्र स्त्रिया अपि गुरुदण्डस्तत्र सुतरां पुंस इति गम्यते ।

विविधवधो वा, स्त्रीदण्डापेक्षया पुरुषस्यान्यत्र दण्डाधिक्य-दर्शनात् । सम्बन्धिवधनिमित्तकदण्डोऽयं कामकृते द्रष्टव्यः, कामकृतमहापातकदण्डाधिक्यस्य अकामकृतविषये कल्पनायोगात् । अकामकृतसंबन्धिवधविषये तु अकामकृतमहापातक-दण्डाधिकदण्डत्वाय पुरान्निर्वासनान्तं सर्वस्वहरणं प्रायश्चित्त-मकुर्वतो दण्डः कल्पनीयः । कुर्वतस्तूत्तमसाहसद्वयमित्यूह्यम्। मनुरपि साहसकल्पापराधे दण्डमाह—

तटाकभेदकं हन्यादप्सु शुद्धवधेन वा ।
तच्चापि प्रतिसंस्कुर्याद्दद्याद्वोत्तमसाहसम् ॥

तटाकमहत्त्वाल्पत्वानुसारेणात्र दण्डविकल्पे व्यवस्था कार्या । तथा—

यस्तु पूर्वनिविष्टस्य तटाकस्योदकं हरेत् ।
आगमं वाऽप्युपारुन्ध्यात्स दाप्यः पूर्वसाहसम् ॥

आगमं उदकस्य तटाकं प्रत्यागमनम् । हरेत् स्वतटाकादि-पूरणायेति शेषः । एवमुपारुन्ध्यादियत्रापि शेषो द्रष्टव्यः । कात्यायनोपि—

हरेद्भिन्द्याद्दहेद्वाऽपि देवानां प्रतिमा यदि ।
तद्गृहं चैव यो भिन्द्यात् प्राप्नुयात्पूर्वसाहसम् ॥
प्रमाणेन तु कूटेन मुद्रया वाऽपि कूटया ।
कार्यं तु साधयेद्यो वै स दाप्यो दममुत्तमम् ॥

इति । प्रमाणं लिखितादि । बृहस्पतिरपि—

मन्त्रौषधिबलात्किञ्चित् संभ्रान्तिं दर्शयन्ति ये ।
मूलकर्म च कुर्वन्ति निर्वास्यास्ते महीभुजा ॥

मूलकर्म वाशिक्रियाविशेषो मूलाद्यौषधसाध्यः ॥

इति स्मृतिचान्द्रिकायां साहसकल्पापराधदण्डविषयाणि.
समाप्तं च साहसाख्यपदस्य प्रासङ्गिकस्य विधिवितानम् ॥

अथ वाक्पारुष्यस्य पदस्य विधिरुच्यते.

तत्र बृहस्पतिः—

समजातिगुणानां तु वाक्पारुष्ये परस्परम् ।
विनयोऽभिहितश्शास्त्रे पणा अर्धत्रयोदशाः ॥

अर्धं त्रयोदशं येषां द्वादशानां ते तथोक्ताः । केवलजाति-साम्ये तु मनुराह—

समवर्णे तु सर्वेषां द्वादशैव व्यतिक्रमे ।

इति । परस्परं वाचैवेति शेषः । वाचा व्यतिक्रमस्य पौर्वापर्यादिकृताविशेषाभावे द्वयोस्समदोषयोर्द्वादश पणा एव दण्डो भवति न पुनरन्यतरस्य न्यूनोऽधिको वेत्यर्थः । अत एव स्मृत्यन्तरं—

पारुष्यदोषानृतयोः युगपत्संप्रवृत्तयोः ।
विशेषश्चेन्न दृश्येत विनयस्स्यात् समस्तयोः ॥

विशेषदर्शने तु तदनुसारेण विषम एव दमस्स्यादित्यभिप्रायः। अत एव बृहस्पतिः—

समानयोस्समो दण्डो न्यूनस्य द्विगुणस्ततः।
उत्तमस्यार्धिकः प्रोक्तो वाक्पारुष्ये परस्परम् ॥

अयुगपत् सम्प्रवृत्तयोस्समानयोरपि विषमो दण्डः। तथाच नारदः—

पूर्वमाक्षारयेद्यस्तु नियतं स्यात्स दोषभाक्।
पश्चाद्यस्सोप्यसत्कारी पूर्वे तु विनयो गुरुः ॥

पूर्वे त्वाक्षारणे निमित्ते तन्निमित्तको विनयः पश्चादाक्षारणनिमित्तकविनयादभ्यधिको भवेदित्यर्थः। वर्णादितस्समयोर्निबन्धे तु विशेषदर्शने तन्निमित्तमपि विनयगौरवं भवतीत्याह स एव—

द्वयोरापन्नयोस्तुल्यमनुबध्नाति यः पुमान्।
तयोर्दण्डमवाप्नोति पूर्वो वा यदि वोत्तरः ॥

तुल्यमापन्नयोस्समत्वेनैव आक्षेपकरयोरिति यावत्। तयोर्दण्डमवाप्नोति तुल्यमापन्नयोर्द्वयोः। दण्डो मिळितयोर्यावान् तावन्तमाप्नोतीत्यर्थः। यः पुनरनुतापान्निबन्धं यजति तस्य दण्डह्रासकल्पनस्य प्रकारमाहोशना—

मोहात् प्रमादात् संघर्षात्प्रीत्या वोक्तं मयेति यः।
नाहमेवं पुनर्वक्ष्ये दण्डार्धं तस्य कल्पयेत् ॥

एवं जातिगुणवयोविद्याविशेषदर्शने, तथा प्रथममध्यमोत्तमभावेन त्रिधाऽभिहितवाक्पारुष्यान्तर्गतभेददर्शने, तथा निष्ठुरा-

श्लीलतीव्रत्वादिवाक्पारुष्यविशेषदर्शने, तथा श्रुताभिजनदेश कर्मशरीरपितृमातृगुर्वाद्यधिक्षेपविशेषदर्शने तत्तन्निबन्धनोच्चावच दण्डविधायिकास्स्मृतयो यद्यपि वचस्समुच्चयकारैस्समुच्चिताः। अस्माभिस्तु सम्प्रति तदर्थानुष्ठाननिष्ठप्रजाशिक्षकाभावात् वृथा ग्रन्थविस्तरापत्तिर्मा भूदिति न समुच्चिताः। क्वचिद्वाक्पारुष्य-दण्डस्यापवादमाह वचोभङ्ग्या बृहस्पतिः—

गुणहीनस्य पारुष्ये ब्राह्मणो नापराध्नुयात्।

इति। सत्सवादित्वेऽपि वाक्पारुष्यदण्डो नापैतीत्याह वचो भङ्ग्या नारदः—

पतितं पतितेत्युक्त्वा चोरं चोरेति वा पुनः।
वचनात्तुल्यदोषस्स्यान्मिथ्या द्विर्दोषतां व्रजेत्॥

वचनात् तथ्यवचनात्। तथाच स एव—

दुष्टस्यैव तु यो दोषान् कीर्तयेत्क्रोधकारणात्।
अन्यापदेशवादी च वाग्दुष्टं तं नरं विदुः॥

क्रोधकारणादिति वदन् दुष्टपरिहरणकारणाद्दोषकीर्तनं न दोषकारीति दर्शयति। दर्शितं च कात्यायनेन—

यत्र स्यात्परिहारार्थं पतितस्तेनकीर्तनम्।
वचनात्तत्र न स्यात्तु दोषो यत्र विभावयेत्॥

वचनात् पतितादिकीर्तनादित्यर्थः। यत्राभियोगादौ पातित्यादिकं साधयेत् तत्रापि वचनाद्दोषो न स्यादित्यर्थः॥

इति स्मृतिचन्द्रिकायां वाक्पारुषस्य पदस्य विधिवितानम्.

अथ दण्डपारुष्याख्यस्य पदस्य विधिरुच्यते.

तत्र मनुः—

एष दण्डविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः।
अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥

दण्डपारुष्यस्य प्रतिव्यक्ति दण्डनिर्णयं अत ऊर्ध्वं प्रवक्ष्यामीत्यर्थः । दण्डपारुष्यव्यक्तयस्तु दिङ्मात्रतः परिशिष्टकारेण प्रदर्शिताः—

दुःखं रक्तं व्रणं भङ्गं छेदनं भेदनं तथा ।
कुर्याद्यः प्राणिनां तद्धि दण्डपारुष्यमुच्यते ॥

स्थावरजङ्गमप्राणिनां प्राण्यन्तरकृतं नखादिना त्वग्भेदादिभवं दुःखं रक्तव्रणादिकं च दण्डपारुष्यमुच्यत इत्यर्थः । व्यासेनापि दिङ्मात्रेण प्रदर्शिताः—

भस्मादिना प्रक्षिपणं ताडनं च करादिना ।
आवेष्टनं चांशुकाद्यैर्दण्डपारुष्यमुच्यते ॥

इति । आदिग्रहणेनोपरि प्रक्षेपणादुःखकरं कर्दमपांसुमलादि द्रव्यं गृह्यते । करादिनेत्येनेनादिशब्देन लगुडपाषाणेष्टकायुधादि द्रव्यम्, आद्यग्रहणेन रज्जुशृङ्खलादि द्रव्यम् । प्रदर्शित व्यक्तीनां मध्ये कासुचिद्व्यक्तिषु दण्डे निर्णयमाह मनुः—

त्वग्भेदकश्शतं दण्ड्यो लोहितस्य च दर्शकः ।
मांसभेत्ता तु षण्णिष्कान् प्रवास्यस्त्वस्थिभेदकः ॥

मांसभेत्ता व्रणकर्ता। अस्थिभेदकोऽस्थिभञ्जकः। कात्यायनोपि—

कर्णोष्ठघ्राणपादाक्षिजिह्वाशिश्नकरस्य च।
छेदने चोत्तमो दण्डो भेदने मध्यमो भृगुः॥

बृहस्पतिरपि—

भस्मादिना प्रक्षिपणं ताडनं च करादिना।
प्रथमं दण्डपारुष्यं दमः कार्योऽत्र माषकः॥
इष्टकोपलकाष्ठैश्च ताडने तु द्विमाषकः।
कार्यः कृतानुरूपस्तु लग्ने घाते दमो बुधैः॥
एष दण्डस्समेषूक्तः परस्त्रीष्वधिकेषु च।
द्विगुणस्त्रिगुणो ज्ञेयः प्राधान्यापेक्षया बुधैः॥

इति। याज्ञवल्क्यस्त्वप्रदर्शितास्वपि दण्डपारुष्यव्यक्तिषु दण्डमाह—

पादकेशांशुककरोच्छुञ्छनेषु पणान्दश।
पीडाकर्षांशुकावेष्टपादाध्यासे शतं दमः॥

अत्र अंशुकावेष्टनं च अंशुकाद्यैरिति प्रदर्शितम्। शेषास्त्व प्रदर्शिता व्यक्तयः। एवमन्यास्वप्यप्रदर्शितव्यक्तिषु प्रतिव्यक्ति दण्डनिर्णयस्मृतयो यद्यपि समुच्चयकारैः समुच्चिताः। अस्माभिस्तु विस्तरभयान्न समुच्चिताः। कात्यायनस्तु वाक्पारुष्योक्त-प्रतिव्यक्तिदण्डनिर्णय इहानुक्तदण्डविषये क्वचिदनुसन्धेय इति दर्शयति—

वाक्पारुष्ये यथैवोक्ताः प्रातिलोम्यानुलोम्यतः।
तथैव दण्डपारुष्ये पञ्चाशा दण्डा यथाक्रमम्॥

एवञ्चात्र प्रतिव्यक्ति दण्डनिर्णयः प्रातिलोम्यादावपि कायायनेन स्मृत इति न क्वचिदस्मृताः दण्डाः पात्याः । नन्वेवमपि क्वचिदत्रापराधानुसारेण कल्पिता दण्डाः पात्याः, अनन्तव्यक्तिषु प्रतिव्यक्ति दण्डनिर्णयस्मरणायोगात् । सत्यं—अत एवोक्तमुशनसा—

यत्र नोक्तो दमस्सर्वैरानन्त्यात्तु महात्मभिः ।
तत्र कार्यं परिज्ञाय कर्तव्यं दण्डधारणम् ॥

आनन्त्यात् पारुष्यव्यक्तीनामिति शेषः । कार्यं प्राणिषु प्राण्यन्तरैरुत्पादितं दुःखम् । अत एव मनुः—

मनुष्याणां पशूनां च दुःखाय प्रहृते सति ।
यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा ॥

केनचित्कस्यचिद्दुःखाय प्रहृते सति स्वल्पं दुःखं महद्वा भवतु, दण्डस्तु महानेवेत्याह स एव—

येनकेनचिदङ्गेन हिंस्याच्छ्रेयांसमन्त्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥

हिंस्यात् प्रहरेत् । श्रेयांसं द्विजम् । अन्त्यजः शूद्रः । तथाच बृहस्पतिः—

येनाङ्गेन द्विजातीनां शूद्रः प्रहरते रुषा ।
छेत्तव्यं तद्भवेत्तस्य मनुना समुदाहृतम् ॥

येनकेनचिदङ्गेनेति सामान्येनोक्तिं स्वयमेव मनुर्विशेषनिष्ठां कर्तुमाह—

पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन् कोपात् पादच्छेदनमर्हति ॥
अवनिष्ठीवतो दर्पाद्द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्धयतो गुदम् ॥
केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायां च ग्रीवायां वृषणेषु च ॥

इति । पाणिं दण्डं वा उद्यम्येत्यत्र प्रहारान्नियनुषज्यते । केशेष्वेकेन हस्तेन गृह्णतोप्युभयहस्तच्छेदनाविधिः द्विवचनात् गम्यते । दाढिका पुरुषस्य प्रधानं लिङ्गमुच्यते । कोपाद्दर्पादिति च वदन् मोहभ्रमादादिना प्रहारावष्ठीवनादिकं कुर्वन्न दण्ड्य इति दर्शयति । दर्शितं च याज्ञवल्क्येन—

हीनेष्वर्धदमो मोहमदादिभिरदण्डनम् ।

इति । हीनेषु पारुष्यकृदपेक्षया जात्यादिना हीनेषु पुरुषेषु पारुष्ये कृते तत्कर्तुरर्धदमः समेषूक्तदमापेक्षया भवतीत्यर्थः । परस्परपारुष्यकारिषु दममाह बृहस्पतिः—

द्वयोः प्रहरतोर्दण्डः समयोस्तु समस्स्मृतः ।
आरम्भकोऽनुबन्धी च दाप्यस्स्यादधिकं दमम् ॥

सङ्ख्यया समभावाभावे त्वाह याज्ञवल्क्यः—

एकं घ्नतां बहूनां तु यथोक्ताद्द्विगुणो दमः ।

इति । बहूनां प्रत्येकं द्विगुणो दमो न पुनस्समुदायस्य प्रहारकस्य, प्रत्येकमेवापराधाधिक्यात् । अत एव विष्णुः—

'एकं घ्नतां बहूनां प्रत्येकस्योक्तदण्डो द्विगुणः' इति । प्रत्येकस्य प्रत्येकमित्यर्थः। व्रणादिदुःखेष्वतिदुस्सहेषु जातेष्वाह कात्यायनः—

देहेन्द्रियविनाशे तु यथा दण्डं प्रकल्पयेत् ।
तथा तुष्टिकरं देयं समुत्थानं च पण्डितैः ॥

तुष्टिकरं दुस्सहव्रणतुष्टिकरं देयं दुस्सहव्रणादिकारिणा देयम् । समुत्थानं व्ययं पण्डितैः व्रणगुरुत्वानुसारेण कल्पितमिति शेषः । समुत्थानं च आव्रणरोपणाद्देयम् ।

समुत्थानव्ययं चासौ दद्यादा व्रणरोपणात् ।

इति तेनैवोक्तत्वात् । समुत्थानव्ययं भिषग्भेषजपथ्यपानाद्यर्थं क्रियमाणं व्ययम् । बृहस्पतिरपि—

अङ्गावपीडने चैव छेदने भेदने तथा ।
समुत्थानव्ययं दाप्यः कलहापहृतं च यत् ॥

समुत्थानव्ययमङ्गादिपीडनादिदुःखोत्पादको दाप्य इत्याह याज्ञवल्क्यः—

दुःखमुत्पादयेद्यस्तु स समुत्थानजं व्ययम् ।
दाप्यः—

इति । दुःखमुत्पादयेत् मनुष्यग्राम्यपशूनामिति शेषः । तथाच विष्णुः—'सर्वे च पुरुषपीडाकरास्तदुत्थं व्ययं दाप्याः 'ग्राम्यपशुपीडाकराश्च' इति । ग्राम्यपशुपीडातिशयेन पशुमरणे त्वाह स एव—'ग्राम्यपशुघाती कार्षापणशतं दण्ड्यः पशुस्वामिनश्च तन्मूल्यं दद्यात्' इति । प्राणिघातनिबन्धो दण्डः क्वचित्क्वचित् अशक्यप्रतीकारविषये दोषाभावान्नेत्याह मनुः—

छिन्ने नस्ये युगे भग्ने तिर्यक्प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
छेदने चैव यन्त्राणां योक्त्ररश्मेस्तथैव च ।
आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत् ॥

इति । छिन्ने नस्ये बलीवर्दान्नासिकास्थरज्ज्वादौ त्रुटिते । युगे शकटादियुगकाष्ठे भग्ने । तिर्यक्प्रतिमुखागते कथञ्चित् भूवैषम्यादिना तिर्यगभिमुखं वा परावृत्ते याने । यन्त्राणि शकटादिकाष्ठानां बन्धनार्थं रज्ज्वादीनि । बलीवर्दादिनियन्तृकपाशग्रहयोर्योक्त्ररश्मिशब्दाभ्यां पृथगभिधानात् यन्त्रशब्देन न ग्रहणम् । अपैहीत्याक्रन्दे अपैहीत्युच्चैरुच्चारिते । अपैहीतिशब्दोऽपसरेत्यादितत्समानर्थाखिलशब्दानां प्रदर्शनार्थम् । तेनापभ्रंशभाषयाऽप्याक्रन्दे कृते न दण्डः । शक्यप्रतीकारेऽत्रोपेक्षकस्य दण्डमाह स एव—

यत्रापवर्तते युग्यं वैगुण्यात्प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥

प्राजकस्य नोदकस्य, शकटादिनेतुरिति यावत् । द्विशतग्रहणं तत्तत्प्राणिहिंसायां विशेषविहितदण्डोपलक्षणार्थम् । प्राजकस्य वैगुण्यात् एकहस्तत्वादिकात् स्वामिना वेतनलाघवार्थमनुमतात् । प्रगुणप्राजकप्रमादादिना प्रवृत्ते युग्ये न स्वामी दण्ड्यः, किंतु प्राजक इत्याह स एव—

प्राजकश्चेद्भवेदार्तः प्राजको दण्डमर्हति ।

इति । आप्तः प्रगुण इत्यर्थः । नारदोपि क्वचिद्दण्ड्यः प्रभुरित्याह—

पुत्रापराधे न पिता न स्वामी शुनि दण्डभाक् ।
न मर्कटे च तत्स्वामी तैरेव प्रहितो न चेत् ॥

स्थावरप्राणिपीडाकराणां तु दण्डमाह मनुः—

वनस्पतीनां सर्वेषामुपभोगो यथा यथा ।
तथा तथा दमः कार्यो हिंसायामिति धारणा ॥

स्थावरप्राणिजातोपलक्षणार्थं वनस्पतिग्रहणम् । फलभोगार्थेषु पनसादिमहाभोगकारणेषु उत्तमसाहसदण्डः, पुष्पभोगार्थेषु चम्पकादिषु पक्वापक्वफलभोगापेक्षयाऽल्पभोगकारणेषु मध्यमसाहसदण्डः, पत्रभोगार्थेषु पुष्पभोगापेक्षया स्वल्पभोगकारणेषु वल्लीगुल्मलतादिस्थावरप्राणिषु कार्षापणशतं, अत्यल्पभोगार्थेषु तृणेष्वेकः कार्षापणं इत्युपभोगानुसारेण दमोऽवगन्तव्यः । तथाच दण्ड इत्यनुवृत्तौ विष्णुः—'फलोपभोगद्रुमच्छेदी तूत्तमसाहसं, पुष्पोपभोगच्छेदी मध्यमसाहसं, वल्लीगुल्मलताच्छेदी कार्षापणशतं, तृणच्छेद्येकं, सर्वे च तत्स्वामिनां तदुत्पत्तिं' इति । सर्वे फलोपभोगद्रुमच्छेदकादयः तत्स्वामिनां छिन्नद्रुमादिस्वामिनां तदुत्पत्तिं फलोपभोगद्रुमाद्युत्पत्तिं पुनः प्ररोपितद्रुमादिभोगकालपर्यन्तं दाप्या इति शेषः ॥

इति स्मृतिचन्द्रिकायां दण्डपारुष्याख्यस्य
पदस्य विधिवितानम्.

अथ द्यूतसमाह्वयाख्यस्य पदस्य विधिरुच्यते.

तत्र नृपतिं प्रत्याह मनुः—

प्रकाशमेतत्तास्कर्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् ॥

तास्कर्यं तस्करत्वम् । यत्नवान् भवेत् यत्नवान् भूत्वा तौ निवारयेत् । तथाचाह स एव—

द्यूतं समाह्वयं चैव राजा राष्ट्रे निवारयेत् ।

इति । द्यूतसमाह्वययोः को भेद इत्यपेक्षिते स एवाह—

अप्राणिभिर्यत्क्रियते तल्लोके द्यूतमुच्यते ।
प्राणिभिः क्रियते यस्तु स विज्ञेयः समाह्वयः ॥

अप्राणिभिः अक्षादिभिः । प्राणिभिः मेषादिभिः । निवारणमत्र निर्वासनादिदण्डेन, दण्डस्यैव नीचनिवारणत्वात् । अत एव निवारणाय निर्वासनमाह स एव—

कुशीलवांश्च कितवान् पाषण्डस्थांश्च मानवान् ।
विकर्मस्थान् शौण्डिकांश्च क्षिप्रं निर्वासयेत्पुरात् ॥

कितवानां नीचकारित्वप्रख्यापनायात्र कुशीलवाद्यनेकनीचसाहचर्यकरणमिति मन्तव्यम् । दुस्सङ्गेन कुमार्गित्वं अविलम्बेन प्रजानामापद्यत इति क्षिप्रग्रहणं कृतम् । क्षिप्रग्रहणस्यैतदेव प्रयोजनमुक्तं तेनैव—

एते राष्ट्रे वर्तमानाः राज्ञः प्रच्छन्नतस्कराः ।
विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥

एते कुशीलवादयः। बृहस्पतिस्तु मनोर्मतमन्येषां मतं चाह—

द्यूतं निषिद्धं मनुना सत्यशौचधनापहम्।
अभ्यनुज्ञातमन्यैस्तु राजभागसमन्वितम्॥
सभिकाधिष्ठितं कार्यं तस्करज्ञानहेतुना।

इति। सभां कृत्वा द्यूतकारकस्सभिकः। कथं पुनस्सभिकस्य द्यूतकारकत्वमित्यपेक्षिते स एवाह—

सभिको ग्राहको द्रव्यं दद्याज्जेत्रे नृपाय च।

इति। द्यूतपराजितकितवानां तु बन्धनादिना पणग्राहको भवेत्। पणग्रहणात् प्रागेव स्वद्रव्यं जेत्रे नृपाय च यथाभागं दद्यात् सभिक इत्यर्थः। तथाच कात्यायनः—

जेतुर्दद्यात्स्वकं द्रव्यं जिताद्ग्राह्यं त्रिपक्षकम्।
सद्यो वा सभिकेनैव कितवात्तु न संशयः॥

त्रिपक्षकमित्यनेन यथासामर्थ्यमा त्रिपक्षात् पणदानकालो देय इति दर्शितम्। जेत्रे राज्ञे च दत्तस्य स्वद्रव्यस्य पणप्रतिनिधेः वृद्धिः पणग्रहणकाले पणेन सह सभिकेन ग्राह्या।

दशकं तु शते वृद्धिं गृह्णीयात्तु पराजयात्।

इति तेनैवोक्तत्वात्। पराजयात् पराजितादित्यर्थः। सभिकाधिष्ठितमित्यस्यानित्यत्वमाह स एव—

अथवा कितवो राज्ञे दत्वा भागं यथोदितम्।
प्रकाशं देवनं कुर्यादेवं दोषो न विद्यते॥

दोषो राजवच्चनलक्षणो द्यूतकारित्वलक्षणो वा। समाह्वयं प्रस्तुत्याह बृहस्पतिः—

द्वंद्वयुद्धेन यः कश्चिदवसादमवाप्नुयात् ।
तत्स्वामिना पणो देयो यस्तत्र परिकल्पितः ॥

क्वचित्पणपरिकल्पनं कृताकृतमित्याह नारदः—

परिहासकृतं यच्च यच्चाप्यविदितं भवेत् ।
तत्रापि नाप्नुयात्काममथवाऽनुमतं तयोः ॥

काम्यत इति कामः पणः, नाप्नुयात् द्यूतस्य तत्रालस्यापनोदनार्थत्वादित्यभिप्रायः । तयोर्जेतृजितयोर्दैवनात् प्रागनुमतं कामं परिहासकृतादावपि जेता प्राप्नुयादिति शेषः। तत्र प्राप्तपणापादितभक्ष्यादिभक्षणादावावृत्तिप्रतिषेधार्थमाह स एव—

भक्ष्यभोज्यान्नपानानि स्वल्पान्यन्यानि कानिचित् ।
प्रीत्या तु सकृदाजीवेत् प्रसङ्गं तु विवर्जयेत् ॥

विवादनिर्णयस्तत्र सभिकादिसमयानुसारेण प्रसिद्ध इति तद्विषयाणि वचनान्यनास्थया नास्माभिः समुच्चितानि ॥

इति स्मृतिचन्द्रिकायां द्यूतसमाह्वयाख्यस्य
पदस्य विधिवितानम्.

अथ प्रकीर्णकाख्यस्य पदस्य विधिरुच्यते.

तत्र बृहस्पतिः—

एष वादिकृतः प्रोक्तो व्यवहारस्समासतः ।
नृपाश्रयं प्रवक्ष्यामि व्यवहारं प्रकीर्णकम् ॥

वादिकृतः अर्थिप्रत्यर्थिभ्यां राजानि मिथो विसंवादमावेद्य कृतः। स च ऋणादानादिद्यूतान्तविषयो न द्यूतमात्रविषय इति। एषशब्दोऽत्र प्रागुक्तसप्तदशपदान्तर्गताशेषगणे वर्तते, न पुनरनन्तरोक्तद्यूतसमाह्वयान्तर्गतविशेषेष्वेवावतिष्ठते। समासत इत्युभयत्र सम्बध्यते। नृपाश्रयं दुष्टचेष्टोपेताश्रयान्तरसापेक्षनृपाश्रयम्। एकाश्रयव्यवहाराभावात् प्रकीर्णकं प्रकीर्णकव्यपदेशयोगिनं, तद्योगश्च विप्रकीर्णानां नृपाश्रयाणामेकत्र संनिवेशात्। तथाच नारदः—

राज्ञामाज्ञाप्रतीघातः तत्कर्मकरणं तथा ।
पुरप्रमाणं सम्भेदः प्रकृतीनां तथैव च ॥
पाषण्डनैगमश्रेणिगणधर्मविपर्ययः ।
पितापुत्रविवादश्च प्रायश्चित्तव्यतिक्रमः ॥
प्रतिग्रहविलोपश्च कोप आश्रमिणामपि ।
वर्णसङ्करदोषश्च तद्वृत्तिनियमस्तथा ॥
न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात् प्रकीर्णकम् ।

इति। प्रतीघातो भङ्गः। तत्कर्म सिंहासनारोहणादिराजकर्म।

पुरप्रमाणं पौरचरितलेख्यप्रमाणम् । सम्भेदः प्रकृतीनां राज्याङ्गानां मर्मोच्छेदो दूषणैः प्रसिद्धैः । पाषण्डादयः प्रागनेकधा व्याख्याताः । परधर्माणां करणं धर्मविपर्ययः । पितापुत्रविवादोत्र ऋणादानाद्यनन्तर्भूतोऽभिहितः । न दृष्टं यच्च पूर्वेष्विति प्रागुक्तसर्वशेषतयाऽभिधानात् । राजाज्ञाप्रतीघातविशेषे केनचित्कृते राज्ञा स्वयमन्विष्य भाविते दण्डमाह याज्ञवल्क्यः—

ऊनं वाऽभ्यधिकं वाऽपि लिखेद्यो राजशासनम् ।
पारदारिकचोरौ वा मुञ्चतो दण्ड उत्तमः ॥

अन्यूनानतिरेकेण लेखनस्यादुष्टलक्षणस्य च राज्ञाऽऽदिष्टस्यातिक्रमे तदाज्ञाप्रतिघातकत्वेनातिदौष्ट्यादुत्तमसाहसदण्डोऽत्र ग्राह्य इत्यर्थः । आज्ञाकारिणां सत्कारमन्यथाकारिणामत्यन्तापकारमाचरेदित्याह स एव—

ये राष्ट्रेऽधिकृतास्तेषां चारैर्ज्ञात्वा विचेष्टितम् ।
साधून् संमानयेद्राजा विपरीतांश्च घातयेत् ॥

अधिकृतस्थानानुसारेण वर्तमानास्साधवः । राष्ट्र इत्युपलक्षणम् । अत एव व्यासः—

न्यायस्थाने येऽधिकृता गृहीत्वाऽर्थं विनिर्णयम् ।
कुर्वन्त्युत्कोचकास्ते तु राजद्रव्यविनाशकाः ॥
उत्कोचजीविनो द्रव्यहीनान् कृत्वा विवासयेत् ।

इति । तत्कर्मकरणे च दण्डमाह याज्ञवल्क्यः—

राजयानासनारोहे दण्डो मध्यमसाहसः ।

इति । कात्यायनोपि—

राजक्रीडासु ये सक्ताः राजवृत्त्युपजीविनः ।
अप्रियस्य च यो वक्ता वधं तेषां प्रवर्तयेत् ॥

पुरप्रमाणप्रकृतिसंभेदादौ राज्ञा यत्कर्तव्यं तदस्माभिः प्रागेव प्रसङ्गादस्मिन् काण्डे सदाचारकाण्डे चाभिहितमित्युपरम्यते। तेन प्रकीर्णकाख्यपदप्रतिपाद्यं किञ्चिदेवेह प्रतिपादितम्। अवशिष्टमिह तत्र तत्र प्रसङ्गादुक्तमनुसन्धेयम् ॥

इति सकल विद्याविशारद श्रीकेशवादित्य भट्टोपाध्याय-
सूनु याज्ञिक देवण भट्टोपाध्याय सोमयाजि विर-
चितायां स्मृतिचन्द्रिकायां व्यवहारकाण्डे
द्वितीयपरिच्छेदः काण्डश्च
समाप्तः.